# BIBLIOTHECA INDICA,

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, Nos. 420, 424, 428, 434, 437 AND 445.

Puranas. Vayupurana

# The Vâyu Purâna:

A SYSTEM OF HINDU MYTHOLOGY AND TRADITION.

EDITED BY

RÁJENDRALÁLA MITRA, LL. D., C. I. E.

VOLUME I.

---

**CALCUTTA.**

PRINTED BY T. C, BISWAS, AT THE KÁLIKÁ PRESS.

1880,

PK 3621
V 39
1880

109612

# वायुपुराणम् ।

——:o:——

महर्षिवेदव्यासप्रणीतम् ।

——:o:——

श्रीलश्री—

वङ्गदेशीयासियातिक्-सोसाइट्याख्यसमाजानुज्ञया

श्रीराजेन्द्रलालमित्रेण

परिशोधितम् ।

प्रथमखण्डः ।

कलिकातानगर्यां

कालिकायन्त्रे मुद्रितञ्च ।

संवत् १९३७ ।

# अथ वायुपुराण-प्रथमखण्डानुक्रमणिका।


| अध्याये | विषयः | पृष्ठे |
|---|---|---|
| १ | अनुक्रमनिका ... | १ |
| २ | द्वादशवार्षिकसत्रनिरूपणं | २० |
| ३-४-५-६ | सृष्टिप्रकरणं ... | २८ |
| ७ | प्रतिसन्धिकीर्त्तनं ... | ५२ |
| ८ | चतुराश्रमविभागः ... | ६० |
| ९ | देवादिसृष्टिवर्णनं ... | ७९ |
| १० | मन्वन्तरादिवर्णनं ... | ९१ |
| ११ | पाशुपतयोगः ... | १०० |
| १२ | योगोपसर्गाः ... | १०६ |
| १३ | योगैश्वर्य्याणि ... | १११ |
| १४-१५ | पाशुपतयोगः ... | ११४ |
| १६ | शौचाचारलक्षणं ... | ११९ |
| १७ | परमाश्रमप्राप्तिकथनं ... | १२४ |
| १८ | यतिप्रायश्चित्तविधिः ... | १२५ |
| १९ | अरिष्टानि ... ... | १२८ |
| २० | ॐकारप्राप्तिलक्षणं ... | १३२ |
| २१ | कल्पनिरूपणं ... | १३७ |
| २२ | कल्पसंख्यानिरूपणं ... | १४५ |
| २३ | माहेश्वरावतारयोगः ... | १४९ |
| २४ | शार्व्वत्वं ... ... | १७१ |
| २५ | मधुकैटभोत्पत्तिविनाशवर्णनं | १८८ |
| २६ | स्वरोत्पत्तिः ... ... | १९८ |

| अध्याये | विषयः | पृष्ठे |
|---|---|---|
| २७ | महादेवतनुवर्णनं ... | २०१ |
| २८ | ऋषिवंशानुकीर्त्तनं ... | २०९ |
| २९ | अग्निवंशवर्णनं ... | २२४ |
| ३० | दक्षशापवर्णनं ... | २२० |
| ३१ | देववंशवर्णनं ... ... | २५३ |
| ३२ | युगधर्म्माः ... .. | २६० |
| ३३ | स्वायम्भुववंशवर्णनं ... | २६७ |
| ३४-३५ | जम्बूद्वीपवर्णनं ... | २७४ |
| ३६-३७-३८ | पूर्व्वादिचतुर्दिग्विभागस्थ-सरःशैलादिकीर्त्तनं | २९३ |
| ३९ | शैलस्थितविविधदेवालय-कीर्त्तनं ... ... | ३० |
| ४० | देवकूटपर्व्वतमर्य्यादा कीर्त्तनं ... ... | ३१२ |
| ४१ | कैलासवर्णनं ... | ३१५ |
| ४२ | देवनदीवर्णनं ... | ३२४ |
| ४३-४४ | केतुमालवर्णनं ... | ३३३ |
| ४५ | भारतवर्षवर्णनं ... | ३४० |
| ४६ | किंपुरुषादिवर्षवर्णनं | ३५४ |
| ४७ | गङ्गावतारवर्णनं ... | ३५८ |
| ४८ | जम्बुद्वीपान्तर्वर्त्तिद्वीप-वर्णनं ... ... | ३६ |

अथ वायुपुराण-प्रथमखण्डानुक्रमणिका ।


| अध्याये | विषयः | पृष्ठे |
|---|---|---|
| ४९ | प्लक्षद्वीपादिवर्णनं | ... ३७१ |
| ५०-५१ | ज्योतिःप्रचारः | ... ३९० |
| ५२ | ध्रुवचर्य्या | ... ४१० |
| ५३ | ज्योतिःसन्निवेशः | ... ४११ |
| ५४ | नीलकण्ठस्तवः | ... ४४४ |
| ५५ | लिङ्गोद्भवस्तवः | .. ४५७ |
| ५६ | पिप्पलवर्णनं ... | ... ४६५ |
| ५७ | यज्ञप्रवर्त्तनं | ... ४७२ |
| ५८ | चतुर्युगाख्यानं | ... ४८९ |
| ५९ | ऋषिलक्षणं | ... ५०१ |
| ६० | महास्थानतीर्थवर्णनं | ... ५१२ |
| ६१ | प्रजापतिवंशानुकीर्त्तनं | ५२१ |


श्रीश्रीगणेशाय नमः ॥

# वायुपुराणम् ।

## अथ पूर्व्वभागे

### प्रथमोऽध्यायः ।

### अनुक्रमणिका ।

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥
जयति पराशरसूनुः सत्यवतीहृदयनन्दनो व्यासः ।
यस्यास्यकमलगलितं वाङ्मयममृतं जगत् पिबति(१) ॥
प्रपद्ये देवमीशानं शाश्वतं ध्रुवमव्ययम्(२) ।
महादेवं महात्मानं सर्व्वस्य जगतः पतिं ॥ १ ॥
ब्रह्माणं लोककर्त्तारं सर्व्वज्ञमपराजितम् ।
प्रभुं भूतभविष्यस्य साम्प्रतस्य च सत्पतिं ॥ २ ॥
ज्ञानमप्रतिमं यस्य वैराग्यञ्च जगत्पतेः ।
ऐश्वर्य्यञ्चैव धर्म्मस्य सहसिद्धिचतुष्टयम् ॥ ३ ॥
य इमान्पश्यते भावान्नित्यं सदसदात्मकान् ।
आविशन्ति पुनस्तं वै क्रियाभावार्थमीश्वरम् ॥ ४ ॥

१ एतन्मङ्गलाचरणश्लोकद्वयं ख०, ग०, घ, ङ पुस्तकेषु नास्ति ।
२ पदमव्ययमिति ख० ।

लोकक्षयोक्तत्त्वज्ञो योगमास्थाय तत्त्ववित्।
असृजत् सर्व्वभूतानि स्थावराणि चराणि च ॥ ५ ॥
तमजं विश्वकर्म्माणं चित्पतिं लोकसाक्षिणं।
पुराणाख्यानजिज्ञासुर्व्रजामि शरणं प्रभुं ॥ ६ ॥
ब्रह्मवायुमहेन्द्रेभ्यो नमस्कृत्य समाहितः।
ऋषीणाञ्च वरिष्ठाय वसिष्ठाय महात्मने ॥ ७ ॥
तत्रभ्रे चातियशसे जातूकर्ण्याय चर्षये।
वसिष्ठाय च शुचये कृष्णद्वैपायनाय च ॥ ८ ॥
पुराणं सम्प्रवक्ष्यामि ब्रह्मोक्तं वेदसम्मितम्।
धर्म्मार्थन्यायसंयुक्तैरागमैः सुविभूषितम् ॥ ९ ॥
असोमकृष्णे विक्रान्ते राजन्येऽनुपमत्विषि।
प्रशासतीमां धर्म्मेण भूमिं भूमिपसत्तमे ॥ १० ॥
ऋषयः संयितात्मानः सत्यव्रतपरायणाः।
ऋजवो नष्टरजसः शान्ता दान्ता जितेन्द्रियाः ॥ ११ ॥
धर्म्मक्षेत्रे कुरुक्षेत्रे दीर्घसत्रन्तु ईजिरे।
नद्यास्तीरे दृषद्वत्याः पुण्यायाः शुचिरोधसः।
दीक्षितास्ते यथाशास्त्रं नैमिषारण्यगोचराः ॥ १२ ॥
द्रष्टुकामान् स महाबुद्धिः सूतः पौराणिकोत्तमः।
लोमानि हर्षयाञ्चक्रे श्रोतृणां यत् सुभाषितैः।
कर्म्मणा प्रथितस्तेन लोकेऽस्मिन्लोमहर्षणः ॥ १३ ॥
तपःश्रुताचारनिधेर्व्वेदव्यासस्य धीमतः।
शिष्यो बभूव मेधावी त्रिषु लोकेषु विश्रुतः ॥ १४ ॥
पुराणवेदो ह्यखिलस्तस्मिन् सम्यक् प्रतिष्ठितः।



भारती चैव विपुला महाभारतवर्द्धिनी ॥ १५ ॥
धर्म्मार्थकाममोक्षार्थाः कथा यस्मिन् प्रतिष्ठिताः।
सूक्ताः सुपरिभाषाश्च भूमावोषधयो यथा ॥ १६ ॥
स तान्प्रायेण सुधियो न्यायविन्मुनिपुङ्गवान्।
अभिगम्योपसंस्तुत्य नमस्कृत्य कृताञ्जलिः।
तोषयामास मेधावी प्रणिपातेन तानृषीन् ॥ १७ ॥
ते चापि सत्रिणः प्रीताः ससदस्या महौजसः।
तस्मै साम च पूजाञ्च यथावत् प्रतिपेदिरे ॥ १८ ॥
अथ तेषां पुराणस्य शुश्रूषा समपद्यत।
दृष्ट्वा तमतिविश्रब्धं विद्वांसं लोमहर्षणम् ॥ १९ ॥
तस्मिन् सत्रे गृहपतिः सर्व्वशास्त्रविशारदः।
इङ्गितैर्भावमालक्ष्य तेषां सूतमनोदयत्(१) ॥ २० ॥
त्वया सूत महाबुद्धिर्भगवान् ब्रह्मवित्तमः।
इतिहासपुराणार्थं व्यासः सम्यगुपासितः।
दुदोह वै मतिं तस्य त्वं पुराणाश्रयां कथां ॥ २१ ॥
एषाञ्च ऋषिमुख्यानां पुराणं प्रति धीमतां।
शुश्रूषास्ति महाबुद्धे तच्छ्रावयितुमर्हसि ॥ २२ ॥
सर्व्वे ह्यमी महात्मानो नानागोत्राः समागताः।
स्वान् स्वान् वंशान् पुराणैस्तु शृणुयुर्ब्रह्मवादिनः ॥ २३ ॥
सपुत्रान् दीर्घसत्रेऽस्मिन् श्रावयेथा मुनीनथ(२)।
दीक्षितोऽमीभिरस्माभिस्तेन प्रागसि संस्मृतः ॥ २४ ॥

---

१ सूतमचोदयदिति ख०।
२ सर्व्वान् श्रावय भो मुनीनिति ख०, घ० च।

इतिसन्नोदितः(१) सूतस्तैरेव मुनिभिः पुरा ।
पुराणार्थं पुराणज्ञैः सत्यव्रतपरायणैः ॥ २५ ॥
स्वधर्म्म एष सूतस्य सद्भिर्दृष्टः पुरातनैः ।
देवतानामृषीणाञ्च राज्ञाञ्चामिततेजसां ॥ २६ ॥
वंशानां धारणं कार्य्यं श्रुतानाञ्च महात्मनां ।
इतिहासपुराणेषु दिष्टा ये ब्रह्मवादिभिः ॥ २७ ॥
न हि वेदेष्वधीकारः कश्चित् सूतस्य दृश्यते ।
वैण्यस्य हि पृथोर्य्यज्ञे वर्त्तमाने महात्मनः ।
सुत्यायामभवत् सूतः प्रथमं वर्णवैकृतः ॥ २८ ॥
ऐन्द्रेण हविषा तत्र हविः पृक्तं बृहस्पतेः ।
जुह्वायेन्द्राय देवाय ततः सूतो व्यजायत ।
प्रमादात्तत्र सञ्जज्ञे प्रायश्चित्तञ्च कर्म्मसु ॥ २९ ॥
ग्निष्टहव्येन यत् पृक्तमभिभूतं गुरोर्हविः ।
अधरोत्तरचारेण जज्ञे तद्वर्णवैकृतः ॥ ३० ॥
यच्च क्षत्रात् समभवद्ब्राह्मणाऽवरयोनितः ।
ततः पूर्व्वेण साधर्म्म्यात्तुल्यधर्म्मा प्रकीर्त्तितः ॥ ३१ ॥
मध्यमो ह्येष सूतस्य धर्म्मः क्षत्रोपजीवनं ।
रथनागाश्वचरितं जघन्यञ्च चिकित्सितं ॥ ३२ ॥
तत् स्वधर्म्ममहं पृष्टो भवद्भिर्ब्रह्मवादिभिः ।
कस्मात् सम्यङ्न विब्रूयां पुराणमृषिपूजितम् ॥ ३३ ॥
पितॄणां मानसी कन्या वासवी समपद्यत ।
अपध्याता च पितृभिर्म्मर्त्त्ययोनौ बभूव सा ॥ ३४ ॥

१ सन्नोदित इति ख० ।



अरणीव हुताशस्य निमित्तं यस्य जन्मनः ।
तस्यां जातो महायोगी व्यासो वेदविदां वरः ॥ ३५ ॥
तस्मै भगवते कृत्वा नमो व्यासाय वेधसे ।
पुरुषाय पुराणाय भृगुवाक्यप्रवर्त्तिने(१) ।
मानुषच्छन्नरूपाय विष्णवे प्रभविष्णवे ॥ ३६ ॥
जातमात्रञ्च यं वेद उपतस्थे ससङ्ग्रहः ।
धर्म्ममेव पुरस्कृत्य जातूकर्णादवाप तं ॥ ३७ ॥
मतिं मन्थानमाविध्य(२) येनासौ श्रुतिसागरात् ।
प्रकाशं जनितो लोके महाभारतचन्द्रमाः ॥ ३८ ॥
वेदद्रुमञ्च यं प्राप्य सशाखः समपद्यत ।
भूमिकालगुणान् प्राप्य बहुशाखो यथा द्रुमः ॥ ३९ ॥
तस्मादहमुपश्रुत्य पुराणं ब्रह्मवादिनः ।
सर्व्वज्ञात्सर्व्ववेदेषु पूजिताद्दीप्ततेजसः ॥ ४० ॥
पुराणं सम्प्रवक्ष्यामि यदुक्तं मातरिश्वना ।
पृष्टेन मुनिभिः पूर्व्वं नैमिषीयैर्महात्मभिः ॥ ४१ ॥
महेश्वरः परोऽव्यक्तश्चतुर्व्याहश्चतुर्मुखः ।
अचिन्त्यश्चाप्रमेयश्च स्वयम्भूर्हेतुरीश्वरः ॥ ४२ ॥
अव्यक्तं कारणं यच्चनित्यं सदसदात्मकम् ।
महदादिविशेषान्तं सृजतीति विनिश्चयः ॥ ४३ ॥
अण्डं हिरण्मयञ्चैव बभूवाप्रतिमन्ततः ।
अण्डस्यावरणञ्चाद्भिरपामपि च तेजसा ॥ ४४ ॥

१ भृगुवाक्यार्थवर्त्तिन इति ख० ।
२ मन्थानमाविश्येति ख० ।

वायुना तस्य नभसा नभो भूतादिना हृतं ।
भूतादिर्महता चैव अव्यक्तेनाहृतो महान् ॥ ४५ ॥
अतोऽत्र विश्वदेवानामृषीणाञ्चोपवर्णितम् ।
नदीनां पर्व्वतानाञ्च प्रादुर्भावोऽत्र गद्यते ॥ ४६ ॥
मन्वन्तराणां सर्व्वेषां कल्पानाञ्चोपवर्णनम् ।
कीर्त्तनं ब्रह्मचक्रस्य ब्रह्मजन्म च कीर्त्यते ॥ ४७ ॥
अतो ब्रह्मणि स्रष्टृत्वं प्रजासर्गोपवर्णनम् ।
अवस्थाश्चात्र कीर्त्यन्ते ब्रह्मणोऽव्यक्तजन्मनः ॥ ४८ ॥
कल्पानां वत्सरश्चैव जगतः स्थापनन्तथा ।
शयनञ्च हरेरत्र पृथिव्युद्धरणन्तथा ॥ ४९ ॥
सन्निवेशः पुरादीनां वर्णाश्रमविभागशः ।
वृक्षाणां गृहसंस्थानां सिद्धानाञ्च(१) विनाशनं ॥ ५० ॥
योजनानां पथाश्चैव सञ्चरं बहुविस्तरं ।
स्वर्गे स्थानविभागञ्च मर्त्यानां भुविचारिणां ॥ ५१ ॥
वृक्षाणामोषधीनाञ्च वीरुधाञ्च प्रकीर्त्तनं ।
वृक्षनारकिकीटत्वं मर्त्यानां परिकीर्त्तनम् ॥ ५२ ॥
देवतानामृषीणाञ्च हे स्तुती परिकीर्त्तिते ।
अन्नादीनां तनूनाञ्च सृजनन्त्यजनन्तथा ॥ ५३ ॥
प्रथमं सर्व्वशास्त्राणां पुराणं ब्रह्मणा स्मृतम् ।
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः ॥ ५४ ॥
अङ्गानि धर्म्मशास्त्रञ्च व्रतानि नियमास्तथा ।
पशूनां पुरुषाणाञ्च सम्भवः परिकीर्त्तितः ॥ ५५ ॥

१ सिद्धीनाञ्चेति क०।



तथा निर्व्वचनं प्रोक्तं कल्पस्य च परिग्रहः ।
नव सर्गाः पुनः प्रोक्ता ब्रह्मणो बुद्धिपूर्व्वकाः ॥ ५६ ॥
त्रयोऽन्ये बुद्धिपूर्व्वास्तु ततो लोकानकल्पयत् ।
ब्रह्मणोऽवयवेभ्यश्च धर्म्मादीनां समुद्भवः ॥ ५७ ॥
ये द्वादश प्रसूयन्ते प्रजाः कल्पे पुनः पुनः ।
कल्पयोरन्तरं प्रोक्तं प्रतिसन्धिश्च यस्तयोः ॥ ५८ ॥
तमोमात्राधृतत्वाच्च ब्रह्मणोऽधर्म्मसम्भवः ।
तथैव शतरूपायाः सम्भवश्च ततः परम् ॥ ५९ ॥
प्रियव्रतोत्तानपादौ प्रसूत्याकूतयश्च ताः ।
कीर्त्यन्ते धृतपाप्मानो येषु लोकाः प्रतिष्ठिताः ॥ ६० ॥
रुचेः प्रजापतेश्चैव आकूत्यां मिथुनोद्भवः ।
प्रसूत्यामपि दक्षस्य कन्यानां प्रभवस्ततः ॥ ६१ ॥
दाक्षायणीषु चाप्यूर्द्धं श्रद्धाद्यासु महात्मनाम् ।
धर्म्मस्य कीर्त्यते सर्गः सात्विकस्य सुखोदयः ॥ ६२ ॥
तथाऽधर्म्मस्य हिंसायां तामसोऽशुभलक्षणः ।
महेश्वरस्य सत्वाच्च प्रजासर्गः प्रकीर्त्तितः ॥ ६३ ॥
निरामयञ्च ब्रह्माणं तादृग्यं कीर्त्तितं मुनेः ।
योगं योगनिधिः प्राह द्विजानां मुक्तिकाङ्क्षिणां ॥ ६४ ॥
अवतारश्च रुद्रस्य महाभाग्यं तथैव च ।
त्रैवेदिकां कथाञ्चापि संवादः परमो महान् ॥ ६५ ॥
ब्रह्मनारायणाभ्याञ्च यच्च स्तोत्रं प्रकीर्त्तितम् ।
स्तुतस्ताभ्यां स देवेशस्तुतोष भगवान् शिवः ॥ ६६ ॥
प्रादुर्भावोऽथ रुद्रस्य ब्रह्मणोऽङ्गे महात्मनः ।

कीर्त्यते नाम हेतुश्च यथाऽरीदीन्महामनाः ॥ ६७ ॥
रुद्रादीनि यथा चैषां नामान्याप्नोत् स्वयम्भुवः ।
यथा च तैर्व्याप्तमिदं त्रैलोक्यं सचराचरम् ॥ ६८ ॥
भृग्वादीनामृषीणाञ्च प्रजासर्गोपवर्णनम् ।
वशिष्ठस्य च ब्रह्मर्षेर्यत्र गोत्रानुकीर्त्तनम् ॥ ६९ ॥
अग्नेः प्रजायाः सम्भूतिः स्वाहायां यच्च कीर्त्तिता ।
पितॄणां हि:प्रकाराणां स्वधायास्तदनन्तरं ॥ ७० ॥
पितृवंशप्रसङ्गेन कीर्त्यते च महेश्वरात् ।
दक्षस्य शापः सत्यर्थं भृग्वादीनाञ्च धीमतां ॥ ७१ ॥
प्रतिशापश्च रुद्रस्य दक्षादद्भुतकर्म्मणः ।
प्रतिषेधश्च वैरस्य कीर्त्यते यत्र विस्तरः ॥ ७२ ॥
तेषां नियोगी द्वीपेषु देशेषु च पृथक् पृथक् ॥ ७३ ॥
स्वायम्भुवस्य सर्गस्य ततश्चाप्यनुकीर्त्तनम् ।
उक्तो नाभेर्निसर्गश्च रजसश्च महात्मनः ॥ ७४ ॥
द्वीपानां ससमुद्राणां पर्व्वतानाञ्च कीर्त्तनम् ।
वर्षाणाञ्च नदीनाञ्च तद्भेदानाञ्च सर्व्वशः ॥ ७५ ॥
द्वीपभेदसहस्राणामन्तर्भेदश्च ससप्त ।
विस्तरान् मण्डलाच्चैव जम्बुद्वीपसमुद्रयोः ।
प्रमाणं योजनाग्रेण कीर्त्यते पर्व्वतैः सह ॥ ७६ ॥
हिमवान् हेमकूटस्तु निषधो मेरुरेव च(१) ।
नीलः श्वेतः शृङ्गवांश्च कीर्त्यन्ते वर्षपर्वताः ॥ ७७ ॥
तेषामन्तरविष्कम्भा उच्छ्रायायामविस्तराः ।

१ मेरुपर्व्वत इति क० ।



कीर्त्यन्ते योजनाग्रेण ये च तत्र निवासिनः ॥ ७८ ॥
भारतादीनि वर्षाणि नदीभिः पर्वतैस्तथा ।
भूतैश्चोपनिविष्टानि गतिमद्भिर्ध्रुवैस्तथा ॥ ७९ ॥
जम्बुद्वीपादयो द्वीपाः समुद्रैः सप्तभिर्वृताः ।
ततश्चाप्यमयी भूमिर्लोकालोकश्च कीर्त्यते ॥ ८० ॥
अण्डस्यान्तस्थिते लोकाः सप्तद्वीपा च मेदिनी ।
भूरादयश्च कीर्त्यन्ते वरणैः प्राकृतैः सह ॥ ८१ ॥
सर्वञ्च तत्प्रधानस्य परिमाणैकदेशिकं ।
सन्न्यासपरिमाणञ्च सङ्क्षेपेणैव कीर्त्यते ॥ ८२ ॥
सूर्य्याचन्द्रमसोश्चैव पृथिव्याश्चाप्यशेषतः ।
प्रमाणं योजनाग्रेण साम्प्रतैरभिमानिभिः ।
महेन्द्राद्याः सभाः पुण्या मानसोत्तरमूर्द्धनि ॥ ८३ ॥
अत ऊर्द्धं गतिश्चोक्ता स्वर्गस्यालातचक्रवत् ।
नागवीथ्यजवीथ्योश्च लक्षणं परिकीर्त्यते ॥ ८४ ॥
काष्ठयोर्लेखयोश्चैव मण्डलानाञ्च योजनैः ।
लोकालोकस्य सन्ध्याया अङ्गो विष्कम्भतस्तथा ॥ ८५ ॥
लोकपालाः स्थिताश्चोर्द्धं कीर्त्यन्ते ये चतुर्दिशं ।
पितॄणां देवतानाञ्च पन्थानौ दक्षिणोत्तरौ ॥ ८६ ॥
गृहिणां न्यासिनाञ्चोक्तौ रजःसत्त्वसमाश्रयात् ।
कीर्त्यते च पदं विष्णोर्धर्म्माद्या यत्र धिष्ठिताः ॥ ८७ ॥
सूर्य्याचन्द्रमसोश्चारो ग्रहाणां ज्योतिषान्तथा ।
कीर्त्यते ध्रुवसामर्थ्यात् प्रजानाञ्च शुभाशुभं ॥ ८८ ॥
ब्रह्मणा निर्म्मितः सौरः स्यन्दनोऽर्थवशात् स्वयं ।

कीर्त्यते भगवान् येन प्रसर्पति दिवि स्वयं ॥ ८८ ॥
स रथोऽधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा ।
गन्धर्वैरप्सरोभिश्च ग्रामणीसर्परात्तसैः ॥ ८० ॥
अपां सारमयश्चेन्दोः कीर्त्यते च रथस्तथा ।
हृद्विचयौ च सोमस्य कीर्त्येते सूर्य्यकारितौ ॥ ८१ ॥
सूर्य्यादीनां स्यन्दनानां ध्रुवादेव प्रकीर्त्तनं ।
कीर्त्यते शिशुमारश्च यस्य पुच्छे ध्रुवः स्थितः ॥ ८२ ॥
तारारूपाणि सर्व्वाणि नक्षत्राणि ग्रहैः सह ।
निवासा यत्र कीर्त्यन्ते देवानां पुण्यकारिणां ॥ ८३ ॥
सूर्य्यरश्मिसहस्रे च वर्षशीतोष्णनिःस्रवः ।
प्रविभागश्च रश्मीनां नामतः कर्म्मतोऽर्थतः ॥ ८४ ॥
परिमाणगती चोक्ते ग्रहाणां सूर्य्यसंश्रयात् ।
यथा चाशु विषात् प्राप्ता शम्भोः कण्ठस्य नीलता ॥ ८५ ॥
ब्रह्मप्रसादितस्याशु विषादः शूलपाणिनः ।
स्तूयमानः सुरैर्विष्णुः स्तौति देवं महेश्वरं ॥ ८६ ॥
लिङ्गोद्भवकथा पुण्या सर्व्वपापप्रणाशिनी ।
विश्वरूपात् प्रधानस्य परिणामोऽयमद्भुतः ॥ ८७ ॥
पुरूरवस ऐलस्य माहात्म्यानुप्रकीर्त्तनं ।
पितॄणां द्विप्रकाराणां तर्पणञ्चामृतस्य वै ॥ ८८ ॥
ततः पर्व्वाणि कीर्त्यन्ते पर्व्वणाञ्चैव सञ्चयः ।
स्वर्गलोकगतानाञ्च प्राप्तानाञ्चाप्यधोगतिं ।
पितॄणां द्विप्रकाराणां श्राद्धेनानुग्रहो महान् ॥ ८९ ॥
युगसंख्या प्रमाणञ्च कीर्त्यते च कृते युगे ।



त्रेतायुगे चापकर्षादार्त्तायाः संप्रवर्त्तनं ॥ ९० ॥
वर्णानामाश्रमाणाञ्च संख्यानाञ्च प्रवर्त्तनं ।
वर्णानामाश्रमाणाञ्च संस्थितिर्धर्म्मतस्तथा ॥ ९१ ॥
यज्ञप्रवर्त्तनञ्चैव संवादो यत्र कीर्त्यते ।
ऋषीणां वसुना सार्द्धं वसोश्चाधःपुनर्गतिः ॥ ९२ ॥
प्रश्नानां दुर्व्वचत्वञ्च स्वायम्भुवमृते मनुं ।
प्रशंसा तपसश्चोक्ता युगावस्थाश्च कृत्स्नशः ।
द्वापरस्य कलेश्चाथ सङ्क्षेपेण प्रकीर्त्तनं ॥ ९३ ॥
देवतिर्य्यङ्मनुष्याणां प्रमाणानि युगे युगे ।
कीर्त्यन्ते युगसामर्थ्यात् परिणाहोच्छ्रयायुषः ॥ ९४ ॥
शिष्टादीनाञ्च निर्देशः प्रादुर्भावश्च कीर्त्यते ।
वेदस्य तद्विजातानां मन्त्राणाञ्च प्रकीर्त्तनं ॥ ९५ ॥
शाखानां परिमाणञ्च वेदव्यासादिशब्दनं ।
मन्वन्तराणां संहारः संहारान्ते च सम्भवः ॥ ९६ ॥
देवतानामृषीणाञ्च मनोः पितृगणस्य च ।
न शक्यं विस्तराद्वक्तुमित्युक्तञ्च समासतः ॥ ९७ ॥
मन्वन्तरस्य संख्या च मानुषेण प्रकीर्त्तिता ।
मन्वन्तराणां सर्व्वेषामेतदेव च लक्षणम् ॥ ९८ ॥
अतीतानागतानाञ्च वर्त्तमानेन कीर्त्यते ।
तथा मन्वन्तराणाञ्च प्रतिसन्धानलक्षणम् ॥ ९९ ॥
अतीतानागतानाञ्च प्रोक्तं स्वायम्भुवेऽन्तरे ।
मन्वन्तरत्वयञ्चैव कालज्ञानञ्च कीर्त्यते ॥ ११० ॥
मन्वन्तरेषु देवानां प्रजेशानाञ्च कीर्त्तनं ।

दक्षस्य चापि दौहित्रा: प्रियाया दुहितु: सुता: ।
ब्रह्मादिभिस्ते जनिता दक्षेणैव च धीमता ॥ १११ ॥
सावर्ण्याद्याश्च कीर्त्यन्ते मनवो मेरुमाश्रिता: ।
ध्रुवस्योत्तानपादस्य प्रजासर्गोपवर्णनम् ॥ ११२ ॥
पृथुनापि च वैन्येन भूमेर्दोहप्रवर्त्तनम् ।
पात्राणां पयसाश्चैव वत्सानाञ्च विशेषणम् ।
ब्रह्मादिभि: पूर्वमेव दुग्धा चेयं वसुन्धरा ॥ ११३ ॥
दशभ्यस्तु प्रचेतोभ्यो मारिषायां(१) प्रजापते: ।
दक्षस्य कीर्त्यते जन्म सोमस्योग्रेण धीमत: ॥ ११४ ॥
भूतभव्यभवैश्वर्यं महेन्द्राणाञ्च कीर्त्यते ।
मन्वादिका भविष्यन्ति आख्यानैर्बहुभिर्हि ता: ॥ ११५ ॥
वैवस्वतस्य च मनो: कीर्त्यते सर्गविस्तर: ।
देवस्य महतो यत्ने वाराहीं विभ्रतस्तनुम् ।
ब्रह्मशुक्रात् समुत्पत्तिर्भृग्वादीनाञ्च कीर्त्यते ॥ ११६ ॥
विनिवृत्ते प्रजासर्गे चाक्षुषस्य मनो: शुभे ।
दक्षस्य कीर्त्यते सर्गो ध्यानाद्दैवस्तदन्तरे ॥ ११७ ॥
नारद: प्रियसंवादी दक्षपुत्रान्महाबलान् ।
नाशयामास शापाय आत्मनो ब्रह्मण: सुत: ॥ ११८ ॥
ततो दक्षोऽसृजत् कन्या वीरिण्यामेव विश्रुता: ।
कीर्त्यते धर्मसर्गश्च कश्यपस्य च धीमत: ॥ ११९ ॥
अत ऊर्द्धं ब्रह्मणश्च विष्णोश्चैव भवस्य च ।
एकत्वञ्च पृथक्त्वञ्च विशेषत्वञ्च कीर्त्यते ॥ १२० ॥

१ मार्षायाञ्चेति ख०, ग०, घ० च ।



ईशत्वाच्च यथा यज्ञे जाता देवा: स्वयम्भुवा ।
मरुत्प्रसादो मरुतां दित्या देवांशसम्भवा: ॥ १२१ ॥
कीर्त्यन्ते मरुताञ्चाथ गणास्ते सप्तसप्तका: ।
देवत्वं पिप्पलाख्येन वायुस्कन्धेन चाश्रय: ॥ १२२ ॥
दैत्यानां दानवानाञ्च गन्धर्व्वोरगरक्षसाम् ।
सर्व्वभूतपिशाचानां पशूनां पक्षिवीरुधाम् ।
उत्पत्तयश्चाप्सरसां कीर्त्यन्ते बहुविस्तरात् ॥ १२३ ॥
समुद्रसंयोगकृतं जन्मैरावतहस्तिन: ।
वैनतेयसमुत्पत्तिस्तथा चास्याभिषेचनम् ॥ १२४ ॥
भृगूणां विस्तरश्चोक्तस्तथाचाङ्गिरसामपि ।
कश्यपस्य पुलस्त्यस्य तथैवात्रेर्महात्मन: ॥ १२५ ॥
पराशरस्य च मुने: प्रजानां यत्र विस्तर: ।
देवतानामृषीणाञ्च प्रजोत्पत्तिस्तत: परं ॥ १२६ ॥
तिस्र: कन्या: प्रकीर्त्यन्ते यासु लोका: प्रतिष्ठिता: ।
पिप्पलौहित्यनिर्द्देशो देवानां जन्म चोच्यते ॥ १२७ ॥
विस्तरस्ते भगवत: पद्मानां सुमहात्मनां ।
इलाया विस्तरश्चोक्त आदित्यस्य तत: परं ॥ १२८ ॥
विकुक्षिचरितञ्चोक्तं धुन्धोश्चैव निबर्हणम् ।
बृहद्बलान्तसंक्षेपादिक्ष्वाकाद्या: प्रकीर्त्तिता: ॥ १२९ ॥
जह्न्वादीनां क्षितीशानां यावज्जह्नुगणादिति ।
कीर्त्यते विस्तरो यश्च ययातेरपि भूपते: ॥ १३० ॥
यदुवंशसमुद्देशो हैहयस्य च विस्तर: ।
क्रोष्टोरनन्तरं चोक्तस्तथा वंशस्य विस्तर: ॥ १३१ ॥

ज्यामघस्य च(१) माहात्म्यं प्रजासर्गश्च कीर्त्यते ।
देवाद्रधस्य त्वर्कस्य दृष्टेश्चैव महात्मनः ॥ १३२ ॥
अत्रिमिश्चान्वयश्चैव विष्णोर्हिंस्याभिशंसनं ।
विवस्वतोऽथ संप्राप्तिर्मणिरत्नस्य धीमतः ॥ १३३ ॥
युधाजितः प्रजासर्गः कीर्त्यते च महात्मनः ।
कीर्त्यते चान्वयः श्रीमान् राजर्षेर्ऋक्षयोधिषः(२) ॥१३४॥
पुनश्च जन्म चाप्युक्तं चरितञ्च महात्मनः ।
कंसस्य चापि दौरात्म्यं एकात्मेन समुद्भवः ॥ १३५ ॥
वासुदेवस्य देवक्यां विष्णोर्जन्म प्रजापतेः ।
विष्णोरनन्तरञ्चापि प्रजासर्गोपवर्णनम् ॥ १३६ ॥
देवासुरे समुत्पन्ने विष्णुना स्त्रीवधे कृते ।
संरब्धता शुक्रवधं शापः प्राप्तः पुरा भृगोः ।
भृगुश्चोत्थापयामास दिव्यां शुक्रस्य मातरं ॥ १३७ ॥
देवानामसुराणाञ्च संग्रामा द्वादशायुताः ।
नारसिंहप्रभृतयः कीर्त्यन्ते प्राणनाशनाः ॥ १३८ ॥
शुक्रेणाराधनं स्थाणोर्घोरेण तपसा कृतं ।
वरदानप्रलुब्धेन यत्र गर्वस्तवः कृतः ।
अनन्तरं विनिर्दिष्टं देवासुरविचेष्टितं ॥ १३९ ॥
जयन्त्या सह संवादे(३) तु यत्र शुक्रे महात्मनि ।
असुरान्मोहयामास शुक्ररूपेण बुद्धिमान् ।

१ यामघस्य चेति ख० ।
२ देवभीढुष इति क० ।
३ शुक्रे इति ग० ।



बृहस्पतिस्तु तान् शुक्रः शशाप सुमहाद्युतिः ॥ १४० ॥
उक्तञ्च विष्णुमाहात्म्यं विष्णोर्जन्मादिशब्दनं ।
तुर्वसुः शुक्रदौहित्रो देवयान्या यदोरभूत् ।
अनुर्द्रुह्यस्तथा पूरुर्ययातितनया नृपाः ॥ १४१ ॥
अत्र वंश्या महात्मानस्तेषां पार्थिवसत्तमाः ।
कीर्त्यन्ते दीर्घयशसो भूरिद्रविणतेजसः ॥ १४२ ॥
कुशिकस्य च विप्रर्षेः सम्यग्यो धर्मसंश्रयः ।
वार्हस्त्यन्तु सुरभिर्यत्र शापमिहानुदत् ॥ १४३ ॥
कीर्त्तनं जह्नुवंशस्य शान्तनोर्वीर्यशब्दनं ।
भविष्यतां तथा राज्ञामुपसंहारशब्दनं ॥ १४४ ॥
अनागतानां सप्तानां मनूनाञ्चोपवर्णनं ।
भौमस्यान्ते कलियुगे चौणे संहारवर्णनं ॥ १४५ ॥
परार्द्धपरयोश्चैव लक्षणं परिकीर्त्यते ।
ब्राह्मेणो योजनाग्रेण परिमाणविनिर्णयः ॥ १४६ ॥
नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिकः स्मृतः ।
त्रिविधः सर्वभूतानां कीर्त्यन्ते प्रतिसञ्चरः ॥ १४७ ॥
अनावृष्टिर्भास्कराच्च घोरः संवर्त्तकोऽनलः ।
मेघो ह्येकार्णवं वायुस्तथा रात्रिर्महात्मनः ॥ १४८ ॥
संख्यालक्षणमुद्दिष्टं ततो ब्राह्मं विशेषतः ।
भूरादीनाञ्च लोकानां सप्तानामुपवर्णनं ।
कीर्त्यन्ते चात्र निरयाः पापानां रौरवादयः ॥ १४९ ॥
ब्रह्मलोकोपरिष्टात्तु शिवस्य स्थानमुत्तमं ।
यत्र संहारमायान्ति सर्वभूतानि सङ्क्षये ॥ १५० ॥

सर्वेषामेव सत्वानां परिणामविनिर्णयः ।
ब्रह्मणः प्रतिसंसर्गे सर्वसंहारवर्णनं ॥ १५१ ॥
अष्टरूप्यमतः प्रोक्तं प्राणस्याष्टकमेव च ।
गतिश्चोर्द्धमधश्चोक्ता धर्माधर्मसमाश्रयात् ॥ १५२ ॥
कल्पे कल्पे च भूतानां महतामपि सङ्क्षयः ।
प्रसङ्गाय च दुःखानि ब्रह्मणश्चाप्यनित्यता ॥ १५३ ॥
दौरात्म्यञ्चैव भोगानां परिणामविनिर्णयः ।
दुर्लभत्वञ्च मोक्षस्य वैराग्याद्दोषदर्शनं ॥ १५४ ॥
व्यक्ताव्यक्तं परित्यज्य सत्त्वं ब्रह्मणि संस्थितं ।
नानालक्षणसंयुक्तं ततस्तदभिवर्त्तते(१) ॥ १५५ ॥
ततस्तापत्रयातीतो नीरूपाख्यो निरञ्जनः ।
आनन्दो ब्रह्मणः प्रोक्तो न विभेति कुतश्चन ॥ १५६ ॥
कीर्त्यते च पुनः सर्गो ब्रह्मणोऽन्यस्य पूर्ववत् ।
कीर्त्यते ऋषिवंशश्च सर्वपापप्रणाशनः ॥ १५७ ॥
इतिकृत्यसमुद्देशः पुराणस्योपवर्णितः ।
कीर्त्यन्ते जगतोऽत्रैव सर्वप्रलयविक्रियाः ।
प्रवृत्तयश्च भूतानां निवृत्तीनां फलानि च ॥ १५८ ॥
प्रादुर्भावो वसिष्ठस्य शक्तेर्जन्म तथैव च ।
सौदासाग्निग्रहस्तस्य विश्वामित्रकृतेन च ॥ १५९ ॥
पराशरस्य चोत्पत्तिरदृश्यत्वं यथा विभोः ।
जन्म पित्रृणां कन्यायां व्यासस्यापि यथा मुनेः ॥ १६० ॥
शुकस्य च तथा जन्म सह पुत्रस्य धीमतः ।

१ ततस्तदिह वर्त्तत इति ख० ।



पराशरस्य प्रद्वेषो विश्वामित्रकृतो यथा ॥ १६१ ॥
वसिष्ठसम्भृतस्याग्निर्विश्वामित्रजिघांसया ।
सन्तानहेतोर्विभुना चौर्ण्यः स्कन्देन धीमता ।
दैवेन विधिना विप्र विश्वामित्रहितैषिणा ॥ १६२ ॥
एकं वेदञ्चतुर्थादञ्चतुर्धा पुनरीश्वरः ।
यथा विभेद भगवान् व्यासः सर्वान् स्वबुद्धितः(१) ।
तस्य शिष्यैः प्रशिष्यैश्च शाखाभेदाः पुनः कृताः ॥ १६३ ॥
प्रयोगैः षड्गुणीयैश्च यथा पृष्टः स्वयम्भुवा ।
पृष्टेन चानुपृष्टास्ते मुनयो धर्मकाङ्क्षिणः ।
देशं पुण्यमभीप्सन्तो विभुना तद्धितैषिणा ॥ १६४ ॥
सुनाभं दिव्यरूपाख्यं सत्याङ्गं शुभविक्रमं ।
अनौपम्यमिदञ्चक्रं वर्त्तमानमतन्द्रिताः ।
पृष्ठतो यात नियतास्ततः प्राप्स्यथ यद्धितम् ॥ १६५ ॥
गच्छतो धर्मचक्रस्य यत्र नेमिर्विशीर्य्यते ।
पुण्यः स देशो मन्तव्य इत्युवाच तदा प्रभुः ।
उक्त्वा चैवमृषीन् ब्रह्मा ह्यदृश्यत्वमगात्पुनः ॥ १६६ ॥
गङ्गागर्भसमाहारं नैमिषेयत्वमेव च ।
ईजिरे चैव सत्रेण मुनयो नैमिषे तदा ।
मृते शरद्वति तथा तस्य चोत्थापनं कृतं ॥ १६७ ॥
ऋषयो नैमिषेयास्तु श्रद्धया परया पुनः ।
निःसीमां गामिमां कृत्स्नां कृत्वा राजानमाहरन् ।
यथाविधि यथाशास्त्रं तमातिथ्यैरपूजयन् ॥ १६८ ॥

१ सर्वादृक्प्रभृतीति क०, ग०, घ० च ।

प्रीतं तथाकृतातिथ्यं राजानं विधिवत्तदा ।
अन्तर्द्धानगतः क्रूरः स्वर्भानुरसुरोऽहरत् ॥ १६९ ॥
अनुसस्मृतं चापि नृपमैडं यथा पुरा ।
गन्धर्व्वसहितं दृष्ट्वा कलापग्रामवासिनं ॥ १७० ॥
सन्निपातः पुनस्तस्य यथा यज्ञे महर्षिभिः ।
दृष्ट्वा हिरण्मयं सर्व्वं यज्ञे वस्तु महात्मनां ॥ १७१ ॥
तदा वै नैमिषेयाणां सत्रे द्वादशवार्षिके ।
यथा विवदमानस्तु ऐडः संस्थापितस्तु तैः ॥ १७२ ॥
जनयित्वा त्वरण्यान्ते ऐडपुत्रं यथायुषं ।
समापयित्वा तत्सत्रमायुषं पर्य्युपासते ॥ १७३ ॥
एतत्सर्व्वं यथादृत्तं व्याख्यातं द्विजसत्तमाः ।
ऋषीणां परमं चात्र लोकतत्त्वमनुत्तमम् ॥ १७४ ॥
ब्रह्मणा यत्पुरा प्रोक्तं पुराणं ज्ञानमुत्तमं ।
अवतारस्य रुद्रस्य द्विजानुग्रहकारणात् ॥ १७५ ॥
तथा पाशुपता योगा स्थानानाञ्चैव कीर्त्तनं ।
लिङ्गोद्भवस्य देवस्य नीलकण्ठत्वमेव च ॥ १७६ ॥
कथ्यते यत्र विप्राणां वायुना ब्रह्मवादिना ।
धन्यं यशस्यमायुष्यं पुण्यं पापप्रणाशनं ।
कीर्त्तनं श्रवणं चास्य धारणञ्च विशेषतः ॥ १७७ ॥
अनेन हि क्रमेणेदं पुराणं संप्रचक्ष्यते ।
सुखमर्थः समासेन महानप्युपलभ्यते ।
तस्मात् किञ्चित्समुद्दिश्य पश्चाद्वक्ष्यामि विस्तरम् ॥ १७८ ॥
पाद्मादिमिदं सम्यक् योऽधीयीत जितेन्द्रियः ।



तेनाधीतं पुराणं तत् सर्व्वं नास्त्यत्र संशयः ॥ १७९ ॥
यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः ।
न चेत्पुराणं संविद्यान्नैव स स्याद्विचक्षणः ॥ १८० ॥
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ॥ १८१ ॥
अध्यर्द्धमिदमध्यायं साक्षात् प्रोक्तं स्वयम्भुवा ।
आपदं प्राप्य मुच्येत यथेष्टां प्राप्नुयाद्गतिं ॥ १८२ ॥
यस्मात्पुरा ह्यनतीदं पुराणं तेन तत् स्मृतं ।
निरुक्तमस्य यो वेद सर्व्वपापैः प्रमुच्यते ॥ १८३ ॥
नारायणः सर्व्वमिदं विश्वं व्याप्य प्रवर्त्तते ।
तस्यापि जगतः स्रष्टुः स्रष्टा देवो महेश्वरः ॥ १८४ ॥

अतश्च संक्षेपमिमं शृणुध्वं
महेश्वरः सर्व्वमिदं पुराणं ।
स सर्गकाले च करोति सर्गान्
संहारकाले पुनरादद्दीत ॥ १८५ ॥

इति श्रीमहापुराणे वायुप्रोक्ते अनुक्रमणिका नाम प्रथमोऽध्यायः ॥ १ ॥

---

# अथ द्वितीयोऽध्यायः।

द्वादशवार्षिकसत्रनिरूपणं।

शुक उवाच।

प्रत्यब्रुवन् पुनः सूतमृषयस्ते तपोधनाः।
कुत्र सत्रं समभवत् तेषामद्भुतकर्म्मणाम् ॥ १ ॥
कियन्तश्चैव तत्कालं कथञ्च समवर्त्तत।
आचचक्ष पुराणञ्च कथं तेभ्यः प्रभञ्जनः ॥ २ ॥
आचक्ष्व विस्तरेणेदम्मरं कौतूहलं हि नः।
इति सन्नोदितः सूतः प्रत्युवाच शुभं वचः ॥ ३ ॥
शृणुध्वं यत्र ते धीरा ईजिरे सत्रमुत्तमं।
यावन्तश्चाभवत् कालं यथा च समवर्त्तत ॥ ४ ॥
सिसृक्षमाणा विश्वं हि यत्र विश्वसृजः पुरा।
सत्रं हि ईजिरे पुण्यं सहस्रं परिवत्सरान् ॥ ५ ॥
तपोगृहपतिर्य्यत्र ब्रह्मा ब्रह्माऽभवत्स्वयं।
इलाया यत्र पत्नीत्वं शमित्रं यत्र बुद्धिमान्।
मृत्युश्चक्रे महातेजास्तस्मिन् सत्रे महात्मनां ॥ ६ ॥
विबुधा ईजिरे तत्र सहस्रं प्रतिवत्सरान्
भ्रमतो धर्म्मचक्रस्य यत्र नेमिरशीर्य्यत।
कर्म्मणा तेन विख्यातं नैमिषं मुनिपूजितं ॥ ७ ॥
यत्र सा गोमती पुण्या सिद्धचारणसेविता।
रोहिणी सुषुवे तत्र ततः सौम्योऽभवत् सुतः ॥ ८ ॥
अक्षिर्ज्येष्ठः समभवत् वशिष्ठस्य महात्मनः।



अरुन्धत्याः सुता यत्र शतमुत्तमतेजसः ॥ ९ ॥
कल्माषपादो नृपतिर्यत्र शक्तिना।
यत्र वैरं समभवद्विश्वामित्रवशिष्ठयोः ॥ १० ॥
अदृश्यन्त्यां समभवन्मुनिर्य्यत्र पराशरः।
पराभवो वशिष्ठस्य यस्मिन् जातेप्यवर्त्तत ॥ ११ ॥
तत्र ते ईजिरे सत्रं नैमिषे ब्रह्मवादिनः।
नैमिषे ईजिरे यत्र नैमिषेयास्ततः स्मृताः ॥ १२ ॥
तत्सत्रमभवत्तेषां समाः द्वादश धीमतां।
पुरूरवसि विक्रान्ते प्रशासति वसुन्धरां ॥ १३ ॥
अष्टादश समुद्रस्य द्वीपानश्नन्पुरूरवाः।
तुतोष नैव रत्नानां लोभादिति हि नः श्रुतं ॥ १४ ॥
उर्व्वशी चकमे यञ्च देवकृतिप्रणोदिता।
आजहार च तत्सत्रं स्वर्वेश्यासहसङ्गतः ॥ १५ ॥
तस्मिन्नरपतौ सत्रं नैमिषेयाः प्रचक्रिरे।
यं गर्भं सुषुवे गङ्गा पावकाद्दीप्ततेजसं।
तदुल्वं पर्व्वतेन्यस्तं हिरण्यं प्रत्यपद्यत ॥ १६ ॥
हिरण्मयन्ततश्चक्रे यज्ञवाटं महात्मनां।
विश्वकर्म्मा स्वयं देवो भावयन् लोकभावनं ॥ १७ ॥
बृहस्पतिस्ततस्तत्र तेषाममिततेजसां।
ऐडः पुरूरवा भेजे तं देशं मृगयां चरन् ॥ १८ ॥
तं दृष्ट्वा महदाश्चर्य्यं यज्ञवाटं हिरण्मयं।
लोभेन हतविज्ञानस्तदादातुं प्रचक्रमे ॥ १९ ॥
नैमिषेयास्ततस्तस्य चुक्रुधुर्नृपतेर्भृशं।

निजघ्नुश्चापि संक्रुद्धाः कुशवज्रैर्मनीषिणः ।
ततो निशान्ते राजानं मुनयो दैवनोदिताः ॥ २० ॥
कुशवज्रैर्विनिष्पिष्टः स राजा व्यजहात्तनुं ।
और्व्वश्रेयं ततस्तस्य पुत्रश्चक्रुर्नृपं भुवि ॥ २१ ॥
नहुषस्य महात्मानं पितरं यं प्रचक्षते ।
स तेषु वर्त्तते सम्यक् धर्म्मशीलो महीपतिः ।
आयुरारोग्यमत्युग्रं तस्मिन् स नरसत्तमः ॥ २२ ॥
सान्त्वयित्वा च राजानं ततो ब्रह्मविदांवराः ।
सत्रमारेभिरे कर्त्तुं यथावन्नर्म्मभूतये ॥ २३ ॥
बभूव सत्रं तत्तेषां ब्रह्मासद्यं महात्मनां ।
विश्वं सिसृक्षमाणानां पुरा विश्वसृजामिव ॥ २४ ॥
वैखानसैः प्रियसखैर्बालखिल्यैर्मरीचिकैः ।
अन्यैश्च मुनिभिर्जुष्टं सूर्य्यवैश्वानरप्रभैः ॥ २५ ॥
पितृदेवासुरःसिद्धैर्गन्धर्व्वोरगचारणैः ।
सभारैस्तु शुभैर्जुष्टन्तैरेवेन्द्रसदो यथा ॥ २६ ॥
स्तोत्रसत्रग्रहैर्हवान् पितॄन् पित्र्यैश्च कर्म्मभिः ।
आनर्चुश्च यथाजाति गन्धर्व्वादीन् यथाविधि ॥ २७ ॥
आराधयितुमिच्छन्तस्ततः कर्म्मान्तरेष्वथ ।
जगुः सामानि गन्धर्व्वा ननृतुश्चाप्सरोगणाः ॥ २८ ॥
व्याजह्रुर्मुनयो वाचं चित्राक्षरपदां शुभां ।
मन्त्रादितत्त्वविद्वांसो जगदुश्च परस्परं ॥ २९ ॥
वितण्डावचनाश्चैके निजघ्नुः प्रतिवादिनः ।
ऋषयस्तत्र विद्वांसः साङ्ख्यार्थन्यायकोविदाः ॥ ३० ॥



न तत्र दुरितं किञ्चिद्दिदधुर्ब्रह्मराक्षसाः ।
न च यज्ञहनो दैत्या न च यज्ञमुषोऽसुराः ॥ ३१ ॥
प्रायश्चित्तं दुरिष्टं वा न तत्र समजायत ।
शक्तिप्रज्ञाक्रियायोगैर्विधिरासीत् स्वनुष्ठितः ॥ ३२ ॥
एवं वितेनिरे(१) सत्रं द्वादशाब्दं मनीषिणः ।
भृग्वाद्या ऋषयो धीरा ज्योतिष्टोमान् पृथक् पृथक् ।
चक्रिरे पृष्ठगमनान् सर्व्वानयुतदक्षिणान् ॥ ३३ ॥
समाप्तयज्ञास्ते सर्वे वायुमेव महाधिपं ।
पप्रच्छुरमितात्मानं भवद्भिर्य्यदृष्टं द्विजाः ।
प्रनोदितश्च वंशार्थं स च तानब्रवीत्प्रभुः ॥ ३४ ॥
शिष्यः स्वयम्भुवो देवः सर्व्वप्रत्यक्षदृग्वशी ।
अणिमादिभिरष्टाभिरैश्वर्य्यैर्यः समन्वितः ॥ ३५ ॥
तिर्य्यग्योन्यादिभिर्हैमैः सर्वलोकान्बिभर्त्ति यः ।
सप्तस्कन्धादिकं शश्वत् प्लवते योजनाहरः ॥ ३६ ॥
विषये नियता यस्य संस्थिताः सप्तका गणाः ।
व्यूहांस्त्रयाणां भूतानां कुर्व्वन् यश्च महाबलः ।
तेजसश्चाप्युपध्मानन्दधातीमं शरीरिणं ॥ ३७ ॥
प्राणाद्याहृत्तयः पञ्च करणानाञ्च वृत्तिभिः ।
प्रेर्य्यमाणाः शरीराणां कुर्व्वतेयास्तु धारणं ॥ ३८ ॥
आकाशयोनिर्हिगुणः शब्दस्पर्शसमन्वितः ।
तैजसप्रकृतिश्चोक्तोऽप्ययं भावो मनीषिभिः ॥ ३९ ॥
तत्राभिमानी भगवान् वायुश्चातिक्रियात्मकः ।

१ विदधिरे इति च० ।

वातारणिः समाख्यातः शब्दशास्त्रविशारदः ॥ ४० ॥
भारत्या श्लक्ष्णया सर्व्वान् मुनीन् प्रह्लादयन्निव।
पुराणज्ञः सुमनसः पुराणार्थयुतया ॥ ४१ ॥

इति श्रीमहापुराणे वायुप्रोक्ते द्वादशवार्षिकसत्रनिरूपणं नाम द्वितीयोऽध्यायः।

---

## अथ तृतीयोऽध्यायः।

---

### प्रजापतिसृष्टिकथनं।

सूत उवाच। महेश्वरायोत्तमवीर्य्यकर्म्मणे
सुरर्षभायामितबुद्धितेजसे।
सहस्रसूर्य्यानलवर्च्चसे नम-
स्त्रिलोकसंहेरविसृष्टये नमः ॥ १ ॥
प्रजापतीन् लोकनमस्कृतांस्तथा
स्वयम्भुरुद्रप्रभृतीन् महेश्वरान्।
भृगुं मरीचिं परमेष्ठिनं मनुं
रजस्तमोधर्म्ममथापि कश्यपं ॥ २ ॥
वशिष्ठदक्षात्रिपुलस्त्यकर्दमान्
रुचिं विवस्वन्तमथापि च क्रतुं।
मुनिन्तथैवाङ्गिरसं प्रजापतिं
प्रणम्य मूर्द्ध्ना पुलहञ्च भावतः ॥ ३ ॥
तथैव चुक्रोधनमेविंकम्पितं



प्रजाविहङ्गार्पितकार्य्यशासनं।
पुरातनानप्यपरांश्च शाश्वतां-
स्तथैव चान्यान् सगणानवस्थितान् ॥ ४ ॥
तथैव चान्यानपि धर्य्यशोभिनः
मुनीन् सहस्रत्युशनःपुरोगमान्।
तपःशुभाचारऋषीन् दयान्वितान्
प्रणम्य वक्ष्ये कलिपापनाशिनीं ॥ ५ ॥
प्रजापतेः सृष्टिमिमामनुत्तमां
सुरेशदेवर्षिगणैरलङ्कृतां
शुभामतुल्यामममहात्मभिप्रियां।
प्रजापतीनामपि चोत्थनार्च्चिषां
विशुद्धवाग्बुद्धिशरीरतेजसां ॥ ६ ॥
तपोभृतां ब्रह्मदिनादिकालिकीं
प्रभूतमाविष्कृतपौरुषश्रियं।
श्रुतौ स्मृतौ च प्रसृतामुदाहृतां
परां पराणामनिलप्रकीर्त्तितां ॥ ७ ॥
समासबन्धैर्नियतैर्यथातथं
विशब्दनेनापि मनःप्रहर्षिणीं।
यस्याश्च वक्ता प्रथमा प्रवृत्तिः
प्राधानिकी चेश्वरकारिता च ॥ ८ ॥
यत्तत्स्मृतं कारणमप्रमेयं
ब्रह्म प्रधानं प्रकृतिप्रसूति।
पात्मा गुहा योनिरथापि चक्षुः

चैत्रं तथैवामृतमच्चरच्च ॥ ९ ॥
शुक्रं तपः सत्वमतिप्रकाशं
तद्दृष्टि नित्यं पुरुषं द्वितीयं ।
तमप्रमेयं पुरुषेण युक्तं
स्वयम्भुवा लोकपितामहेन ॥ १० ॥
उत्पादकत्वाद्रजसोतिरेकात्
कालस्य योगान्नियमावधेश्च ।
चेतन्नयुक्तान् नियतान्विकारान्
लोकस्य सन्तानविवृद्धिहेतून् ।
प्रकल्पयत्यसौ सुषुवे तथाष्टौ
सङ्कल्पमात्रेण महेश्वरस्य ॥ ११ ॥
देवासुराद्रिद्रुमसागराणां
मनुप्रजेशर्षिपितृद्विजानां ।
पिशाचयक्षोरगराक्षसानां
ताराग्रहार्क्षचनिशाचराणां ॥ १२ ॥
मासर्तुसंवत्सररात्र्यहानां
दिक्कालयोगादियुगायनानां ।
वनौषधीनामपि वीरुधाञ्च
जलौकसामप्यरसां पशूनां ॥ १३ ॥
विद्युत्सरिन्मेघविहङ्गमानां ।
यत्सूक्ष्मगं यद्भुवि यद्दियत्स्थं
यत्स्थावरं यच्च यदस्ति किञ्चित् ।
सर्व्वस्य तस्यास्ति गतिर्विभक्ति-



रात्रह्मणो यावदियं प्रसूतिः ॥ १४ ॥
छन्दांसि वेदाः सऋचो यजूंषि
सामानि सोमश्च तथैव यज्ञः ।
आजोव्यमेषां यदभीप्सितञ्च
देवस्य तस्यैव च वै प्रजापतेः ॥ १५ ॥
वैवस्वतस्यास्य मनोः पुरस्तात्
सम्भूतिरुक्ता प्रसवश्च तेषां ।
येषामिदं पुण्यकृतां प्रसूत्या
लोकत्रयं लोकनमस्कृतानां ।
सुरेशदेवर्षिमनुप्रधीना-
मापूरितञ्चोपरिभूषितञ्च ॥ १६ ॥
रुद्रस्य शापात् पुनरुद्भवश्च
दक्षस्य चाप्यत्र मनुष्यलोके ।
वासः क्षितौ वा नियमाद्भवस्य
दक्षस्य चात्र प्रतिशापलाभः ॥ १७ ॥
मन्वन्तराणां परिवर्त्तनानि
युगेषु सम्भूतिविकल्पनञ्च ।
ऋषित्वमार्षस्य च संप्रवृद्धि-
र्व्यथायुगादिष्वपि चेत्तदत्र ॥ १८ ॥
ये द्वापरेषु प्रथयन्ति वेदान्
व्यासाश्च तेऽत्र क्रमशो निबद्धाः ।
कल्पस्य संख्या भुवनस्य संख्या
ब्राह्मस्य चाप्यत्र दिनस्य संख्या ॥ १९ ॥

अण्डोद्भिज(१) स्वेदजरायुजानां
धर्मात्मनां स्वर्गनिवासिनां वा।
ये यातनास्थानगताश्च जीवा-
स्तर्केण तेषामपि च प्रमाणं ॥ २० ॥
आत्यन्तिकः प्राकृतिकश्च योऽयं
नैमित्तिकश्च प्रतिसर्गहेतुः।
बन्धश्च मोक्षश्च विधिश्च तत्र
प्रोक्ता च संसारगतिः परा च ॥ २१ ॥
प्रकृत्यवस्थेषु च कारणेषु
या च स्थितिर्या च पुनः प्रवृत्तिः।
तच्छास्त्रयुक्त्या स्वमतिप्रयत्नात्
समस्तमाविष्कृतधीधृतिभ्यः।
विप्रा ऋषिभ्यः समुदाहृतं यत्
यथातथन्तच्छृणुतोच्यमानं ॥ २२ ॥

इति श्रीमहापुराणे वायुप्रोक्ते सृष्टिप्रकरणं नाम तृतीयोऽध्यायः।

---

१ अण्डोद्भिज इति आर्षप्रयोगः।

# अथ चतुर्थोऽध्यायः।

## सृष्टिप्रकरणं।

ऋषयस्तु ततः श्रुत्वा नैमिषारण्यवासिनः।
प्रत्यूचुस्ते ततः सर्वे सूतं पर्य्याकुलेक्षणाः ॥ १ ॥
भवान् वै वंशकुशलो व्यासात् प्रत्यक्षदर्शवान्।
तस्मात्त्वं भवनं कृत्स्नं लोकस्यामुष्य वर्णय ॥ २ ॥
यस्य यस्यान्वया ये ये तांस्तानिच्छाम वेदितुं।
तेषां पूर्व्वर्षिसृष्टिञ्च विचित्रान्तां प्रजापतेः ॥ ३ ॥
असकृत्परिपृष्टस्तैर्म्महात्मा लोमहर्षणः।
विस्तरेणानुपूर्व्व्या च कथयामास सत्तमः ॥ ४ ॥

लोमहर्षण उवाच ॥

पृष्टाश्चैतां कथां दिव्यां श्रुत्वां पापप्रणाशिनीं।
कथ्यमानां मया चित्रां बह्वर्थां श्रुतिसम्मतां ॥ ५ ॥
यश्चेमान्धारयेन्नित्यं शृणुयाद्वाप्यभीक्ष्णशः।
श्रावयेच्चापि विप्रेभ्यो यतिभ्यश्च विशेषतः ॥ ६ ॥
शुचिः पर्व्वसु युक्तात्मा तीर्थेष्वायतनेषु च।
दीर्घमायुरवाप्नोति स पुराणानुकीर्त्तनात्।
स्ववंशधारनं कृत्वा स्वर्गलोके महीयते ॥ ७ ॥
विस्तारावयवं तेषां यथाशब्दं यथाश्रुतं।
कीर्त्त्यमानं निबोधध्वं सर्व्वेषां कीर्त्तिवर्द्धनं ॥ ८ ॥
धन्यं यशस्यं शत्रुघ्नं स्वर्ग्यमायुर्विवर्धनं।

कीर्त्तनं स्थिरकीर्त्तीनां सर्व्वेषां पुण्यकारिणां ॥ ९ ॥
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितञ्चेति पुराणं पञ्चलक्षणं ॥ १० ॥
कल्पेभ्योऽपि हि यः कल्पः शुचिभ्यो नियतः शुचिः ।
पुराणं सम्प्रवक्ष्यामि मारुतं वेदसम्मितं ॥ ११ ॥
प्रबोधः प्रलयश्चैव स्थितिरुत्पत्तिरेव च ।
प्रक्रिया प्रथमः पादः कथ्यवस्तुपरिग्रहः ॥ १२ ॥
उपोद्घातोऽनुषङ्गश्च उपसंहार एव च ।
धर्म्यं यशस्यमायुष्यं सर्व्वपापप्रणाशनं ॥ १३ ॥
एवं हि पादाश्चत्वारः समासात् कीर्त्तिता मया ।
वक्ष्याम्येतान्पुनस्तांस्तु विस्तरेण यथाक्रमं ॥ १४ ॥
तस्मै हिरण्यगर्भाय पुरुषायेश्वराय च ।
अन्ताय प्रथमायैव विशिष्टाय प्रजात्मने ।
ब्रह्मणे लोकतन्त्राय नमस्कृत्वा स्वयम्भुवे ॥ १५ ॥
महदाद्यं विशेषान्तं सर्वरूप्यं सलक्षणं ।
पञ्चप्रमाणं षट्श्येतं पुरुषाधिष्ठितं स्मृतं ।
असंशयात् प्रवक्ष्यामि भूतसर्गमनुत्तमं ॥ १६ ॥
अव्यक्तं कारणं यत्तु नित्यं सदसदात्मकं ।
प्रधानं प्रकृतिश्चैव यमाहुस्तत्त्वचिन्तकाः ॥ १७ ॥
गन्धवर्णरसैर्हीनं शब्दस्पर्शविवर्जितं ।
अजातं ध्रुवमक्षय्यं नित्यं स्वात्मन्यवस्थितं ॥ १८ ॥
जगद्योनिं महद्भूतं परं ब्रह्म सनातनं ।
विग्रहं सर्व्वभूतानामव्यक्तमभवत्किल ॥ १९ ॥



अनाद्यन्तमजं सूक्ष्मन्निर्गुणं प्रभवाव्ययं ।
अप्राप्यतमविज्ञेयं ब्रह्माद्ये समवर्त्तत ॥ २० ॥
तस्यात्मना सर्व्वमिदं व्याप्तमासीत्तमोमयं ।
गुणसाम्ये तदा तस्मिन् गुणभावे तमोमये ॥ २१ ॥
सर्गकाले प्रधानस्य क्षेत्रज्ञाधिष्ठितस्य वै ।
गुणभावाद्व्यमानो महान् प्रादुर्बभूव ह ॥ २२ ॥
सूक्ष्मेण महता सोऽथ अव्यक्तेन समावृतः ।
सत्वोद्रिक्तो महानग्रे सत्वमात्रप्रकाशकम् ।
मनो महांश्च विज्ञेयो मनस्तत्कारणं स्मृतं ॥ २३ ॥
लिङ्गमात्रसमुत्पन्नः क्षेत्रज्ञाधिष्ठितस्तु सः ।
धर्म्मादीनान्तु रूपाणि लोकतत्त्वार्थहेतवः ।
महांस्तु सृष्टिं कुरुते नोद्यमानः सिसृक्षया ॥ २४ ॥
मनो महान्मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः ।
प्रज्ञा चितिः स्मृतिः संवित् विपुरं चोच्यते बुधैः ॥ २५ ॥
मनुते सर्व्वभूतानां यस्माच्चेष्टाफलं विभुः ।
सौक्ष्म्यत्वेन विद्वद्भानां तेन तन्मन उच्यते ॥ २६ ॥
तत्त्वानामग्रजो यस्मान्महांश्च परिमाणतः ।
शेषेभ्योऽपि गुणेभ्योऽसौ(१) महानिति ततः स्मृतः ॥ २७ ॥
विभर्त्ति मानं मनुते विभागं मन्यतेऽपि च ।
पुरुषो भोगसम्बन्धात् तेन चासौ मतिः स्मृतः ॥ २८ ॥
बृहत्त्वाद्बृंहणत्वाच्च भावावां सलिलाश्रयात् ।
यस्माद्बृंहयते भावान् ब्रह्मा तेन निरुच्यते ॥ २९ ॥

(१) शेषेभ्यो गुणतत्त्वेभ्य इति ख०, घ०, ङ० च ।

आपूरयित्वा यस्माच्च कृत्स्नान्देहाननुग्रहैः ।
तत्त्वभावांश्च नियतान् तेन पूरिति चोच्यते ॥ ३० ॥
बुध्यते पुरुषश्चाच सर्व्वभावान् हिताहितान् ।
यस्मादबोधयते चैव तेन बुद्धिर्निरुच्यते ॥ ३१ ॥
ख्यातिः प्रसुप्तभोगश्च यस्मात् संवर्त्तते ततः ।
भोगस्य ज्ञाननिष्ठत्वात्तेन ख्यातिरिति स्मृतः ॥ ३२ ॥
ख्यायते तद्गुणैर्वापि नामादिभिरनेकशः ।
तस्माच्च महतः संज्ञा ख्यातिरित्यभिधीयते ॥ ३३ ॥
साचात् सर्व्वं विजानाति महात्मा तेन चेश्वरः ।
तस्माज्ज्ञाता ग्रहाश्चैव प्रज्ञा तेन स उच्यते ॥ ३४ ॥
ज्ञानादीनि च रूपाणि क्रतुकर्म्मफलानि च ।
चिनोति यस्माद्भोगार्थंस्तेनासौ चितिरुच्यते ॥ ३५ ॥
वर्त्तमानान्यतीतानि तथा चानागतान्यपि ।
स्मरते सर्व्वकार्य्याणि तेनासौ स्मृतिरुच्यते ॥ ३६ ॥
कृत्स्नञ्च विन्दते ज्ञानं तस्मान्महात्मामुच्यते ।
तस्माद्विदेर्व्विदेश्चैव संविदित्यभिधीयते ॥ ३७ ॥
विद्यते स च सर्व्वस्मिन् सर्व्वन्तस्मिंश्च विद्यते ।
तस्मात्संविदिति प्रोक्तो महान्वै बुद्धिमत्तरैः ॥ ३८ ॥
ज्ञानात्तु ज्ञानमित्याहुर्भगवान् ज्ञानसन्निधिः ।
हन्नानां विपुरीभावाद्विपुरं प्रोच्यते बुधैः ॥ ३९ ॥
सर्व्वगत्वाच्च लोकानामवश्यत्वाच्च तथेश्वरः ।
बृहत्वाच्च स्मृतो ब्रह्मा भूतत्वाद्भव उच्यते ॥ ४० ॥
चत्वारश्चेतनाविज्ञानादेकत्वाच्च स कः स्मृतः ।



यस्मात्पुर्य्यनुशेते च तस्मात् पुरुष उच्यते ।
नोत्पादितत्वात् पूर्व्वत्वात् स्वयम्भूरिति चोच्यते ॥ ४१ ॥
पर्य्यायवाचकैः शब्दैस्तत्त्वमाद्यमनुत्तमम् ।
व्याख्यातं तत्त्वभावज्ञैरेवं सद्भावचिन्तकैः ॥ ४२ ॥
महान् सृष्टिं विकुरुते चोद्यमानः सिसृक्षया ।
सङ्कल्पोऽध्यवसायश्च तस्य वृत्तिद्वयं स्मृतम् ॥ ४३ ॥
धर्म्मादीनि च रूपाणि लोकतत्त्वार्थहेतवः ।
त्रिगुणस्तु स विज्ञेयः सत्वराजसतामसः ॥ ४४ ॥
त्रिगुणाद्रजसोद्रिक्तादहङ्कारस्ततोऽभवत् ।
महताचावृतः सर्गो भूतादिर्विकृतस्तु सः ॥ ४५ ॥
तस्माच्च तमसोद्रिक्तादहङ्कारादजायत ।
भूततन्मात्रसर्गस्तु भूतादिस्तामसस्तु सः ॥ ४६ ॥
आकाशं शुषिरं तस्मादुद्रिक्तं शब्दलक्षणं ।
आकाशं शब्दमात्रन्तु भूतादिरावृणोत् पुनः ॥ ४७ ॥
शब्दमात्रन्तदाकाशं स्पर्शमात्रं ससर्ज ह ।
भूतादिस्तु विकुर्व्वाणः शब्दमात्रं ससर्ज्ज ह ॥ ४८ ॥
बलवान् जायते वायुः स वै स्पर्शगुणो मतः ।
आकाशं शब्दमात्रन्तु स्पर्शमात्रं समावृणोत् ॥ ४९ ॥
रसमात्रास्तु ता ह्यापो रूपमात्राभिरावृणोत् ।
आपो रसान् विकुर्व्वन्त्यो गन्धमात्रं ससर्ज्जिरे ॥ ५० ॥
सङ्घातो जायते तस्मात्तस्य गन्धो गुणः स्मृतः ।
रसमात्रन्तु तत्तोयं गन्धमात्रं समावृणोत् ॥ ५१ ॥
तस्मिंस्तस्मिंस्तु तन्मात्रा तेन तन्मात्रता स्मृता ।

शब्दविशेषवाचकत्वाद्विशेषास्ततः स्मृताः ।
अशान्तघोरमूढत्वाद्विशेषास्ततः पुनः ॥ ५२ ॥
भूततन्मात्रसर्गोऽयं विज्ञेयस्तु परस्परात् ।
वैकारिकादहङ्कारात्सत्वोद्रिक्तात्तु सात्विकात् ।
वैकारिकः स सर्गस्तु युगपत्सम्प्रवर्त्तते ॥ ५३ ॥
बुद्धीन्द्रियाणि श्रवणं पञ्च कर्मेन्द्रियाण्यपि ।
साधकानीन्द्रियाणि स्युर्देवा वैकारिका दश ।
एकादशं मनस्तत्र देवा वैकारिकाः स्मृताः ॥ ५४ ॥
श्रोत्रत्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
शब्दादीनामवाप्त्यर्थं बुद्धियुक्तानि वक्ष्यते ॥ ५५ ॥
पादौ पायुरुपस्थश्च हस्तौ वाग्दशमी भवेत् ।
गतिविसर्गौ ह्यानन्दः शिल्पं वाक्यश्च कर्म च ॥ ५६ ॥
आकाशं शब्दमात्रञ्च स्पर्शमात्रं समाविशेत् ।
द्विगुणस्तु ततो वायुः शब्दस्पर्शात्मकोऽभवत् ॥ ५७ ॥
रूपन्तथैव विज्ञेयः शब्दस्पर्शगुणावुभौ ।
त्रिगुणस्तु ततश्चाग्निः स शब्दस्पर्शरूपवान् ॥ ५८ ॥
सशब्दस्पर्शरूपञ्च रसमाचं समाविशत् ।
तस्माच्चतुर्गुणा ह्यापो विज्ञेयास्तु रसात्मिकाः ॥ ५९ ॥
सशब्दस्पर्शरूपेषु गन्धस्तेषु समाविशत् ।
संयुता गन्धमात्रेण आचिन्वन्ति महीमिमां ।
तस्मात्पञ्चगुणा भूमिः स्थूलभूतेषु दृश्यते ॥ ६० ॥
शान्ता घोराश्च मूढाश्च विशेषास्तेन ते स्मृताः ।
परस्परानुप्रवेशात्प्रवारयन्ति परस्परम् ॥ ६१ ॥



भूमेरन्तस्त्विदं सर्वं लोकालोकघनावृतम् ।
विशेषा इन्द्रियग्राह्या नियतत्वाच्च ते स्मृताः ॥ ६२ ॥
गुणं पूर्वस्य पूर्वस्य प्राप्नुवन्त्युत्तरोत्तरम् ।
तेषां यावच्च यच्च तत्तत्तावद्गुणं स्मृतम् ॥ ६३ ॥
उपलभ्य शुचेर्गन्धं क्वचिद्वायोरनैपुणात् ।
पृथिव्यामेव तद्विद्यादेषां वायोश्च संश्रयात् ॥ ६४ ॥
एते सप्त महावीर्या नानाभूताः पृथक् पृथक् ।
नाशक्नुवन् प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ।
ते समेत्य महात्मानो ह्यन्योन्यस्यैव संश्रयात् ॥ ६५ ॥
पुरुषाधिष्ठितत्वाच्च अव्यक्तानुग्रहेण च ।
महदादयो विशेषान्ता अण्डमुत्पादयन्ति ते ॥ ६६ ॥
एककालं समुत्पन्नं जलबुद्बुदवच्च तत् ।
विशेषेभ्योऽण्डमभवत् दृढत्वदुदकञ्च यत् ।
तत्तस्मिन् कार्य्यकरणं संसिद्धं ब्रह्मणस्तदा ॥ ६७ ॥
प्राकृतेऽण्डे विबुद्धे सन् क्षेत्रज्ञो ब्रह्मसंज्ञितः ।
स वै शरीरी प्रथमः स वै पुरुष उच्यते ॥ ६८ ॥
आदिकर्त्ता च भूतानां ब्रह्माऽग्रे समवर्त्तत ।
हिरण्यगर्भः सोऽग्रेऽस्मिन् प्रादुर्भूतश्चतुर्मुखः ।
सर्गे च प्रतिसर्गे च क्षेत्रज्ञो ब्रह्मसंज्ञितः ॥ ६९ ॥
करणैः सह सृज्यन्ते प्रत्याहारे त्यजन्ति च ।
भजन्ते च पुनर्देहानसमाहारसन्धिषु(१) ॥ ७० ॥

१ पुनर्देहान् समानुसमसन्धिषु इति क० ।

हिरण्मयस्तु यो मेरुस्तस्योल्बं तन्महात्मनः ।
गर्भोदकं समुद्राश्च जरायवस्थीनि पर्व्वताः ॥ ७१ ॥
तस्मिन्नण्डे त्विमे लोका अन्तर्भूतास्तु सप्त वै ।
सप्तद्वीपा च पृथ्वीयं समुद्रैः सह सप्तभिः ॥ ७२ ॥
पर्व्वतैः समहद्भिश्च नदीभिश्च सहस्रशः ।
अन्तस्तस्मिंस्त्विमे लोका अन्तर्विश्वमिदञ्जगत् ॥ ७३ ॥
चन्द्रादित्यौ सनक्षत्रौ सग्रहौ सह वायुना ।
लोकालोकश्च यत्किञ्चिच्चाण्डे तस्मिन् समर्पितम् ॥७४ ॥
अग्निर्दशगुणाभिस्तु वाह्यतोऽण्डं समावृतम् ।
आपो दशगुणा ह्येवन्तेजसा वाह्यतो वृताः(१) ॥ ७५ ॥
तेजोदशगुणेनैव वाह्यतो वायुना वृतम् ।
वायोर्दशगुणेनैव वाह्यतो नभसा वृतं ॥ ७६ ॥
आकाशेन वृतो वायुः खञ्च भूतादिना वृतम् ।
भूतादिर्म्महता चापि अव्यक्तेन वृतो महान्
एतैरावरणैरण्डं सप्तभिः प्राकृतैर्वृतम् ॥ ७७ ॥
एताश्चावृत्य चान्योन्यमष्टौ प्रकृतयः स्थिताः ।
प्रसर्गकाले स्थित्वा च ग्रसन्त्येता परस्परम् ॥ ७८ ॥
एवं परस्परोत्पन्ना धारयन्ति परस्परम् ।
आधाराधेयभावेन विकारस्य विकारिषु ॥ ७९ ॥
अव्यक्तं क्षेत्रमुद्दिष्टं ब्रह्मा क्षेत्रज्ञ उच्यते ।
इत्येष प्राकृतः सर्गः क्षेत्रज्ञाधिष्ठितस्तु सः ।

१, अपां दशगुणेनैव तेजसा वाह्यतो वृतमित्यर्धं पाठो भवितुमर्हति ।



अबुद्बिपूर्व्वं प्रागासीत् प्रादुर्भूता तड़िद्यथा ॥ ८० ॥
एतद्धिरण्यगर्भस्य जन्म यो वेद तत्त्वतः ।
आयुष्मान् कीर्त्तिमान् धन्यः प्रजावांश्च भवत्युत ॥ ८१ ॥
निवृत्तिकामोऽपि नरः शुद्धात्मा लभते गतिम् ।
पुराणश्रवणान्नित्यं सुखञ्च क्षेममाप्नुयात् ॥ ८२ ॥

इति श्रीमहापुराणे वायुप्रोक्ते सृष्टिप्रकरणं
नाम चतुर्थोऽध्यायः ।

# अथ पञ्चमोऽध्यायः।

## सृष्टिप्रकरणं।

———000———

लोमहर्षण उवाच। यद्विसृष्टेस्तु संख्यातं मया कालान्तरद्विजाः।
एतत् कालान्तरं ज्ञेयमहर्वै पारमेश्वरम्॥ १॥
रात्रिस्तावती ज्ञेया परमेशस्य सत्तमाः।
अहस्तस्य तु या सृष्टिः प्रलयो रात्रिरुच्यते॥ २॥
अहश्च विद्यते तस्य न रात्रिरिति धारणा।
उपचारः प्रक्रियते लोकानां हितकाम्यया॥ ३॥
प्रजाः प्रजानाम्पतय ऋषयो मुनिभिः सह।
ऋषीन् सनत्कुमाराख्यान् ब्रह्मसायुज्यगैः सह॥ ४॥
इन्द्रियाणीन्द्रियार्थाश्च महाभूतानि पञ्च च।
तन्मात्रा इन्द्रियगणो बुद्धिश्च मनसा सह॥ ५॥
अहस्तिष्ठन्ति ते सर्वे परमेशस्य धीमतः।
अहरन्ते प्रलीयन्ते रात्र्यन्ते विश्वसम्भवः॥ ६॥
स्वात्मन्यवस्थिते सत्वे विकारे प्रतिसंहृते।
साधर्म्येणावतिष्ठेते प्रधानपुरुषावुभौ॥ ७॥
तमःसत्वगुणावेतौ समत्वेन व्यवस्थितौ।
अन्योद्रिक्तौ प्रसूतौ च तौ तथा च परस्परम्।
गुणसाम्ये लयौ ज्ञेयौ वैषम्ये सृष्टिरुच्यते॥ ८॥



तिलेषु वा यथा तैलं घृतं पयसि वा स्थितम्।
तथा तमसि सत्वे च रजोऽव्यक्ताश्रितं स्थितम्॥ ९॥
उपास्य रजनीं कृत्स्नां परां माहेश्वरीं तदा।
अहर्मुखे प्रवृत्ते च पुरः प्रकृतिसम्भवः॥ १०॥
क्षोभयामास योगेन परेण परमेश्वरः।
प्रधानं पुरुषञ्चैव प्रविश्याण्डं महेश्वरः॥ ११॥
प्रधानात् क्षोभ्यमाणात्तु रजो वै समवर्त्तत।
रजः प्रवर्त्तकं तत्र बीजेष्वपि यथा जलम्॥ १२॥
गुणवैषम्यमासाद्य प्रसूयन्ते ह्यधिष्ठिताः।
गुणेभ्यः क्षोभ्यमाणेभ्यस्त्रयो देवा विजज्ञिरे।
आश्रिताः परमा गुह्याः सर्व्वात्मानः शरीरिणः॥ १३॥
रजो ब्रह्मा तमो ह्यग्निः सत्वं विष्णुरजायत।
रजःप्रकाशको ब्रह्मा स्रष्टृत्वेन व्यवस्थितः॥ १४॥
तमःप्रकाशकोऽग्निस्तु कालत्वेन व्यवस्थितः।
सत्वप्रकाशको विष्णुरौदासीन्ये व्यवस्थितः॥ १५॥
एत एव त्रयो वेदा एत एव त्रयोऽग्नयः।
परस्पराश्रिता ह्येते परस्परमनुव्रताः॥ १६॥
परस्परेण वर्त्तन्ते धारयन्ति परस्परम्।
अन्योन्यमिथुना ह्येते ह्यन्योन्यमुपजीविनः।
क्षणं वियोगो न ह्येषाञ्च त्यजन्ति परस्परम्॥ १७॥
ईश्वरो हि परो देवो विष्णुस्तु महतः परः।
ब्रह्मा तु रजसोद्रिक्तः सर्गायेह प्रवर्त्तते।
परश्च पुरुषो ज्ञेयः प्रकृतिश्च परा स्मृता॥ १८॥

अधिष्ठितोऽसौ हि महेश्वरेण
प्रवर्त्तते चोद्यमानः समन्तात्।
अनुप्रवर्त्तन्ति महान्त एव
चिरस्थिताः स्वे विषये प्रियत्वात् ॥ १९ ॥
प्रधानं गुणवैषम्यात्सर्गकाले प्रवर्त्तते।
ईश्वराधिष्ठितात् पूर्व्वन्तस्मात्सदसदात्मकात्।
ब्रह्मा बुद्धिश्च मिथुनं युगपत्सम्बभूवतुः ॥ २० ॥
तस्मात्तमोऽव्यक्तमयः क्षेत्रज्ञो ब्रह्मसंज्ञितः।
संसिद्धः कार्य्यकरणैर्ब्रह्माऽग्रे समवर्त्तत ॥ २१ ॥
तेजसा प्रथमो धीमानव्यक्तः संप्रकाशते।
स वै शरीरी प्रथमः कारणत्वे व्यवस्थितः ॥ २२ ॥
अप्रतीघेन ज्ञानेन ऐश्वर्य्येण च सोऽन्वितः।
धर्म्मेण चाप्रतीघेन वैराग्येण समन्वितः ॥ २३ ॥
तस्येश्वरस्याप्रतिघं ज्ञानं वैराग्यलक्षणम्।
धर्म्मैश्वर्य्यकृता बुद्धिर्ब्राह्मी जज्ञेऽभिमानिनः ॥ २४ ॥
अव्यक्ताज्जायते चास्य मनसा च यदिच्छति।
वशीकृतत्वाद्वैगुण्यात् सुरेशत्वात्स्वभावतः ॥ २५ ॥
चतुर्मुखस्तु ब्रह्मत्वे कालत्वे चान्तकोऽभवत्।
सहस्रमूर्द्धा पुरुषस्तिस्रोऽवस्थाः स्वयम्भुवः ॥ २६ ॥
सत्त्वं रजश्च ब्रह्मत्वे कालत्वे च रजस्तमः।
सात्त्विकं पुरुषत्वे च गुणवृत्तिः स्वयम्भुवः ॥ २७ ॥
लोकान् सृजति ब्रह्मत्वे कालत्वे संक्षिपत्यपि।
पुरुषत्वे ह्युदासीनस्तिस्रोऽवस्थाः प्रजापतेः ॥ २८ ॥



ब्रह्मा कमलगर्भाभः कालो जात्यञ्जनप्रभः।
पुरुषः पुण्डरीकाक्षो रूपं तत्परमात्मनः ॥ २९ ॥
योगेश्वरः शरीराणि करोति विकरोति च।
नानाकृतिक्रियारूपनामवृत्तिः स्वलीलया ॥ ३० ॥
त्रिधा यद्वर्त्तते लोके तस्मात्त्रिगुण उच्यते।
चतुर्द्धा प्रविभक्तत्वाच्चतुर्व्यूहः प्रकीर्त्तितः ॥ ३१ ॥
यदाप्नोति यदादत्ते यच्चास्ति विषयं प्रति।
तच्चास्य सततं भावस्तस्मादात्मा निरुच्यते ॥ ३२ ॥
ऋषिः सर्व्वगतत्वाच्च शरीरादात्स्वयं प्रभुः।
स्वामित्वमस्य तत्सर्व्वं विष्णुः सर्व्वप्रवेशनात् ॥ ३३ ॥
भगवान् भगसद्भावाद्भागो रागस्य शासनात्।
परश्च तु प्रकृतत्वादवनाद्वेति स्मृतः ॥ ३४ ॥
सर्व्वज्ञः सर्व्वविज्ञानात् सर्व्वः सर्व्वं यतस्ततः।
नराणामयनं यस्मात्तेन नारायणः स्मृतः ॥ ३५ ॥
त्रिधा विभज्य स्वात्मानं त्रैलोक्यं सम्प्रवर्त्तते।
सृजते ग्रसते चैव वीक्षते च त्रिभिस्तु यत्।
अग्रे हिरण्यगर्भः स प्रादुर्भूतश्चतुर्मुखः ॥ ३६ ॥
आदित्वाच्चादिदेवोऽसावजातत्वादजः स्मृतः।
पाति यस्मात्प्रजाः सर्व्वाः प्रजापतिरतः स्मृतः ॥ ३७ ॥
देवेषु च महान् देवो महादेवस्ततः स्मृतः।
सर्व्वेशत्वाच्च लोकानामवशत्वात्तथेश्वरः ॥ ३८ ॥
बृहत्त्वाच्च स्मृतो ब्रह्मा भूतत्वाद्भूत उच्यते।
क्षेत्रज्ञः क्षेत्रविज्ञानाद्विभुः सर्व्वगतो यतः ॥ ३९ ॥

यस्मात् पुर्य्यनुशेते च तस्मात् पुरुष उच्यते ।
नीत्यादित्वात् पूर्व्वत्वात् स्वयम्भूरिति सः स्मृतः ॥ ४० ॥
दूज्यत्वादुच्यते यज्ञः कविर्विक्रान्तदर्शनात्(१) ।
क्रमणः क्रमणीयत्वाद्दर्णकस्याभिपालनात् ॥ ४१ ॥
आदित्यसंज्ञः कपिलस्त्वमजोग्निरिति स्मृतः ।
हिरण्यमस्य गर्भोऽभूद्धिरण्यस्यापि गर्भजः ।
तस्माद्धिरण्यगर्भः स पुराणेऽस्मिन्निरुच्यते ॥ ४२ ॥
स्वयम्भूवो निवृत्तस्य कालो वर्षायुतस्तु यः ।
न शक्यः परिसंख्यातुमपि वर्षशतैरपि ॥ ४३ ॥
कल्पसंख्यानिवृत्तेस्तु पराख्यो ब्रह्मणः स्मृतः ।
तावच्छेषोऽस्य कालोऽन्यस्तस्यान्ते प्रतिरुच्यते ॥ ४४ ॥
कोटिकोटिसहस्राणि अन्तर्भूतानि यानि वै ।
समतीतानि कल्पानान्तावच्छेषाः परास्तु ये ॥ ४५ ॥
यस्त्वऽयं वर्त्तते कल्पो वाराहन्तं निबोधत ।
प्रथमः साम्प्रतस्तेषां कल्पोऽयं वर्त्तते द्विजाः ॥ ४६ ॥
तस्मिन् स्वायम्भुवाद्यास्तु मनवः सुरसत्तमैश ।
अतीता वर्त्तमानाश्च भविष्या ये च वै पुनः ॥ ४७ ॥
तैरियं पृथिवी सर्व्वा सप्तद्वीपा समन्ततः ।
पूर्णं युगसहस्रं वै परिपाल्या नरेश्वरैः ।
प्रजाभिस्तपसा चैव तेषां शृणुत विस्तरं ॥ ४८ ॥

१ क्वचिद्विक्रान्तदर्शनादिति ब०, ग०, ङ० च ।



मन्वन्तरेण चैकेन सर्व्वाण्येवान्तराणि वै ।
भविष्याणि भविष्यैश्च कल्पः कल्पेन चैव ह ॥ ४९ ॥
अतीतानि च कल्पानि सोदकानि सहान्वयैः ।
अनागतेषु तद्वच्च तर्कः कार्य्यो विजानता ॥ ५० ॥

इति श्रीमहापुराणे वायुप्रोक्ते सृष्टिप्रकरणं नाम पञ्चमोऽध्यायः ।

# अथ षष्ठोऽध्यायः ।

## सृष्टिप्रकरणं ।

———ooo———

सूत उवाच । आपो ह्यग्नेः समभवन्नष्टेऽग्नौ पृथिवीतले ।
सान्तरालैकलीनेऽस्मान्नष्टे स्थावरजङ्गमे ॥ १ ॥
एकार्णवे तदा तस्मिन् न प्राज्ञायत किञ्चन ।
तदा स भगवान् ब्रह्मा सहस्राक्षः सहस्रपात् ॥ २ ॥
सहस्रशीर्षा पुरुषो रुक्मवर्णोऽच्छतेन्द्रियः ।
ब्रह्मा नारायणाख्यः स सुष्वाप सलिले तदा ॥ ३ ॥
सत्त्वोद्रेकात् प्रबुद्धस्तु शून्यं लोकमुदीक्ष्य सः ।
इमञ्चोदाहरन्त्यत्र श्लोकं नारायणं प्रति ॥ ४ ॥
आपो नारा वै तनव इत्यपां नाम शुश्रुमः ।
अप्सु शेते च यत्तस्मात्तेन नारायणः स्मृतः ॥ ५ ॥
तुल्यं युगसहस्रस्य नैशङ्कालमुपास्य सः ।
शर्व्वर्य्यन्ते प्रकुरुते ब्रह्मत्वं सर्गकारणात् ॥ ६ ॥
ब्रह्मा तु सलिले तस्मिन् वायुर्भूत्वा तदाचरत् ।
निशायामिव खद्योतः प्रावृट्काले ततस्ततः ॥ ७ ॥
ततस्तु सलिले तस्मिन् विज्ञायान्तर्गतां महीं ।
अनुमानादसंमूढो भूमेरुद्धरणं प्रति ॥ ८ ॥
अकरोत् स तनुन्वन्यां कल्पादिषु यथा पुरा ।



ततो महात्मा मनसा दिव्यं रूपमचिन्तयत् ॥ ९ ॥
सलिलेनाप्लुतां भूमिन्दृष्ट्वा स तु समन्ततः ।
किन्नु रूपं महत् कृत्वा उद्धरेयमहं महीं ॥ १० ॥
जलक्रीड़ासु रुचिरं वाराहं रूपमस्मरत् ।
अदृश्यं सर्व्वभूतानां वाङ्मयं धर्म्मसंज्ञितं ॥ ११ ॥
दशयोजनविस्तीर्णं शतयोजनमुच्छ्रितं ।
नीलमेघप्रतीकाशं मेघस्तनितनिस्वनं ॥ १२ ॥
महापर्व्वतवर्ष्माणं श्वेतन्तीक्ष्णोग्रदंष्ट्रिणं ।
विद्युदग्निप्रकाशाच्चमादित्यसमतेजसं ॥ १३ ॥
पीनवृत्तायतस्कन्धं सिंहविक्रान्तगामिनं ।
पीनोन्नतकटीदेशं सुश्लक्ष्णं शुभलक्षणं ॥ १४ ॥
रूपमास्थाय विपुलं वाराहममितं हरिः ।
पृथिव्युद्धरणार्थाय प्रविवेश रसातलं ॥ १५ ॥
स वेदवाद्युपदंष्ट्रः क्रतुदक्षाश्वितीमुखः ।
अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः ॥ १६ ॥
अहोरात्रेक्षणधरो वेदाङ्गश्रुतिभूषणः ।
आज्यनासः स्रुवतुण्डः सामघोषस्वनो महान् ॥ १७ ॥
सत्यधर्म्ममयः श्रीमान् धर्म्मविक्रमसंस्थितः ।
प्रायश्चित्तरतो घोरः पशुजानुर्महाकृतिः ॥ १८ ॥
ऊर्द्धगात्रो होमलिङ्गः स्थानबीजो महौषधिः ।
वेद्यान्तरात्मा मन्त्रस्फिगाज्यस्रुक् सोमशोणितः ॥ १९ ॥
वेदस्कन्धो हविर्गन्धो हव्यकव्यातिवेगवान् ।
प्राग्वंशकायो द्युतिमान्नानादीक्षाभिरन्वितः ॥ २० ॥

दक्षिणाद्दृदयो योगी महासत्त्वमयो विभुः।
उपाकर्मेष्टिरुचिरः प्रवर्ग्यवित्तभूषणः॥ २१॥
नानाच्छन्दोगतिपथो गुह्योपनिषदासनः।
छायापत्नीसहायो वै मणिशृङ्ग इवोच्छ्रितः।
भूत्वा यज्ञवराहो वै अपः स प्राविशत् प्रभुः॥ २२॥
अद्भिः संछादितामुर्वीं स तामग्न्न् प्रजापतिः।
उपगम्योज्जहाराथ अपस्थाय स विन्यसत्(१)॥ २३॥
सामुद्रौर्व्वै समुद्रेषु नादेयीश्च नदीष्वथ।
रसातलतले मग्नां रसातलतले गतां।
प्रभुर्लोकहितार्थाय दंष्ट्रयाभ्युज्जहार गां॥ २४॥
ततः स्वस्थानमानीय पृथिवीं पृथिवीकरः।
मुमोच पूर्व्वं मनसा धारयित्वा धराधरः॥ २५॥
तस्योपरि जलौघस्य महती नौरिव स्थितः।
चरितत्वाच्च देवस्य न मही याति विप्लवम्॥ २६॥
ततोऽकृत्य क्षितिन्देवो जगतः स्थापनेच्छया।
पृथिव्याः प्रविभागाय मनश्चक्रेऽम्बुजेक्षणः।
पृथिवीन्तु समीकृत्य पृथिव्यां सोऽचिनोद्गिरीन्॥ २७॥
प्राक्सर्व्वं दह्यमानास्तु तदा सम्वर्त्तकाग्निना।
तेनाग्निना विशीर्णास्ते पर्व्वता भुवि सर्व्वशः॥ २८॥
प्रैत्यादेकार्णवे तस्मिन्वायुनापस्तु संहताः।
निषिक्ता यत्र यत्रासंस्तत्र तत्राचलोऽभवत्॥ २९॥
स्वचाचलत्वादचलाः पर्व्वभिः पर्व्वताः स्मृताः।

(१) पाठोऽयं न समीचीनो बोधितुमर्हति।



गिरयोऽन्तर्निगीर्णत्वाच्चयनाच्च गिलीचयाः॥ ३०॥
ततस्तेषु विशीर्णेषु लोकोदधिगिरिष्वथ।
विश्वकर्म्मा विभजते कल्पादिषु पुनः पुनः॥ ३१॥
ससमुद्रामिमां पृथ्वीं सद्वीपां सपर्व्वतां।
भूराद्यांश्चतुरो लोकान् पुनः सोऽथ प्रकल्पयत्।
लोकान् प्रकल्पयित्वा च प्रजासर्गं ससर्ज्ज ह॥ ३२॥
ब्रह्मा स्वयम्भूर्भगवान् सिसृक्षुर्विविधाः प्रजाः।
ससर्ज्ज सृष्टिन्तद्रूपां कल्पादिषु यथा पुरा॥ ३३॥
तस्याभिध्यायतः सर्गं तदा वै बुद्धिपूर्व्वकं।
प्रधानसमकालं वै प्रादुर्भूतस्तमोमयः॥ ३४॥
तमो मोहो महामोहस्तामिस्रो अन्धसंज्ञितः।
अविद्या पञ्चपर्व्वैषा प्रादुर्भूता महात्मनः॥ ३५॥
पञ्चधा चाश्रितः सर्गो ध्यायतः सोऽभिमानिनः।
सर्व्वतस्तमसा चैव दीपः कुम्भवदावृतः।
बहिरन्तःप्रकाशश्च शुद्धो निःसंग एव च॥ ३६॥
यस्मात्तैः संवृता बुद्धिर्मुख्यानि करणानि च।
तस्मात्ते संवृतात्मानो नगा मुख्याः प्रकीर्त्तिताः॥ ३७॥
मुख्यसर्गं तथा भूतं ब्रह्मा दृष्ट्वा ह्यसाधकं।
अप्रसन्नमनाः सोऽथ ततो न्यासोऽभ्यमन्यत॥ ३८॥
तस्याभिध्यायतस्तत्र तिर्य्यक् स्रोतोऽभ्यवर्त्तत।
यस्मात्तिर्य्यग्व्यवर्त्तेत तिर्य्यक्स्रोतस्ततः स्मृतं। ३९॥
तमोबहुत्वात्ते सर्व्वे ह्यज्ञानबहुलाः स्मृताः।
उत्पथग्राहिणश्चापि ते ध्यानाद्यानमानिनः॥ ४०॥

तिर्य्यक्स्रोतस्तु दृष्ट्वा वै द्वितीयं विश्वमीश्वरः।
अहंकृता अहंमना अष्टाविंशद्विधात्मकाः॥ ४१॥
एकादशेन्द्रियविधा नवधा चोदयस्तथा।
अष्टौ च तारकाद्याश्च तेषां शक्तिविधाः स्मृताः॥ ४२॥
अतः प्रकाशास्ते सर्व्वे आवृताश्च बहिः पुनः।
यस्मात्तिर्य्यक् प्रवर्त्तंत तिर्य्यक्स्रोताः स उच्यते॥ ४३॥
तिर्य्यक् स्रोताश्च दृष्ट्वा वै द्वितीयं विश्वमीश्वरः।
अभिप्रायमथोद्भूतं दृष्ट्वा सर्व्वन्तथाभिधं।
तस्याभिध्यायतो नित्यं सात्त्विकः समवर्त्तत॥ ४४॥
ऊर्द्धस्रोतास्तृतीयस्तु स चैवोर्द्धव्यवस्थितः।
यस्माद्यावर्त्ततोर्द्धन्तु ऊर्द्धस्रोतास्ततः स्मृतः॥ ४५॥
ते सुखप्रीतिबहुला बहिरन्तश्च संवृताः।
प्रकाशा बहिरन्तश्च ऊर्द्धस्रोतोद्भवाः स्मृताः॥ ४६॥
तेन वातादयो ज्ञेयाः सृष्टात्मानो व्यवस्थिताः।
ऊर्द्धस्रोतास्तृतीयो वै तेन सर्गस्तु स स्मृतः॥ ४७॥
ऊर्द्धस्रोतःसु सृष्टेषु देवेषु स तदा प्रभुः।
प्रीतिमानऽभवद्ब्रह्मा ततोऽन्यं सोऽभ्यमन्यत।
ससर्ज्ज सर्गमन्यं स साधकं प्रभुरीश्वरः॥ ४८॥
अथाभिध्यायतस्तस्य सत्याभिध्यायिनस्तदा।
प्रादुर्ब्बभूव चाव्यक्तादर्व्वाक्स्रोतः सुसाधकं।
यस्मादर्व्वाक् व्यवर्त्तंत ततोऽर्व्वाकस्रोत उच्यते॥ ४९॥
ते च प्रकाशबहुलास्तमःसत्त्वरजोधिकाः।
तस्मात्ते दुःखबहुला भूयो भूयश्च कारिणः॥ ५०॥



प्रकाशा बहिरन्तश्च मनुष्याः साधकाश्च ते।
लक्षणैस्तारकाद्यैस्ते अष्टधा च व्यवस्थिताः॥ ५१॥
सिद्धात्मानो मनुष्यास्ते गन्धर्वसहधर्म्मिणः।
इत्येष तेजसः सर्गो ह्यर्व्वाक्स्रोताः प्रकीर्त्तितः॥ ५२॥
पञ्चमोऽनुग्रहः सर्गश्चतुर्था स व्यवस्थितः।
विपर्य्ययेण शक्त्या च तुष्ट्या सिद्ध्या तथैव च।
विवृत्तं वर्त्तमानञ्च तेऽर्थं जानन्ति तत्त्वतः॥ ५३॥
भूतादिकानां सत्त्वानां षष्ठः सर्गः स उच्यते।
विपर्य्ययेण भूतादिरशक्त्या च व्यवस्थितः॥ ५४॥
प्रथमो महतः सर्गो विज्ञेयोमहतस्तु सः।
तन्मात्राणां द्वितीयस्तु भूतसर्गः स उच्यते॥ ५५॥
वैकारिकस्तृतीयस्तु सर्ग ऐन्द्रियकः स्मृतः।
इत्येष प्राकृतः सर्गः सम्भूतो बुद्धिपूर्व्वकः॥ ५६॥
मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः।
तिर्य्यक् स्रोताश्च यः सर्गस्तिर्य्यग्योनः स पञ्चमः॥ ५७॥
तथोर्द्धस्रोतसां षष्ठो देवसर्गस्तु सः स्मृतः।
तथार्व्वाक्स्रोतसां सर्गः सप्तमः स तु मानुषः॥ ५८॥
अष्टमोऽनुग्रहः सर्गः सात्त्विकस्तामसस्तु सः।
पञ्चैते वैकृताः सर्गाः प्राकृतास्तु त्रयः स्मृताः॥ ५९॥
प्राकृतो वैकृतश्चैव कौमारो नवमः स्मृतः।
प्राकृतास्तु त्रयः सर्गाः कृतास्ते बुद्धिपूर्व्वकाः॥ ६०॥
बुद्धिपूर्व्वं प्रवर्त्तन्ते षट्सर्गा ब्रह्मणस्तु ते।
विस्तरानुग्रहं सर्गं कीर्त्यमानं निबोधत॥ ६१॥

चतुर्द्वावस्थितः सोऽथ सर्वभूतेषु तत्त्वगः ।
विपर्य्ययेण शक्त्या च तुष्ट्या सिद्धया तथैव च ॥ ६२ ॥
स्थावरेषु विपर्य्यासस्तिर्य्यग्योनिषु शक्तिता ।
सिद्धात्मानो मनुष्यास्तु तुष्टिर्देवेषु कृत्स्नगः ॥ ६३ ॥
इत्येते प्राकृताश्चैव वैकृताश्च नव स्मृताः ।
सर्गाः परस्परस्याथ प्रकारा बहवः स्मृताः ॥ ६४ ॥
अग्रे ससर्ज्ज वै ब्रह्मा मानसानात्मनः समान् ।
सनन्दनञ्च सनकं विद्वांसञ्च सनातनं ॥ ६५ ॥
विज्ञानेन निबद्धास्ते वैवर्त्तेन महौजसः ।
संबुद्धाश्चैव नानात्वादपविद्धास्त्रयोऽपि ते ।
असक्तश्चैव प्रजासर्गं प्रतिसर्गङ्गताः पुनः ॥ ६६ ॥
तदा तेषु व्यतीतेषु तदान्यान् साधकांश्च तान् ।
मानसानसृजद्ब्रह्मा पुनः स्थानाभिमानिनः ।
आभूतसंप्लवावस्थानामतस्तान्निबोधत ॥ ६७ ॥
आपोऽग्निः पृथिवी वायुरन्तरिक्षं दिशस्तथा ।
स्वर्गं दिवः समुद्रांश्च नदान् शैलान् वनस्पतीन् ॥ ६८ ॥
ओषधीनां तथात्मानो ह्यात्मानो वृक्षवीरुधां ।
लवाः काष्ठाः कलाश्चैव मुहूर्त्ताः सन्धिरात्रयः ॥ ६९ ॥
अर्द्धमासाश्च मासाश्च अयनाब्दयुगानि च ।
स्थानाभिमानिनः सर्व्वे स्थानाख्याश्चैव ते स्मृताः ॥ ७० ॥

वक्त्राद्यस्य ब्राह्मणा संप्रसूताः
तदुत्तस्थः क्षत्रिया पूर्व्वभागे ।
वैश्यास्तोर्वोर्यस्य पद्भ्यां च शूद्राः



सर्व्वे वर्णा गात्रतः संप्रसूताः ॥ ७१ ॥
नारायणः परोऽव्यक्तादण्डमव्यक्तसंभवं ।
अण्डाब्जञ्च पुनर्ब्रह्मा लोकास्तेन कृताः स्वयं ॥ ७२ ॥
एष वः कथितः पादः समासान्न तु विस्तरात् ।
अनेनाद्येन पादेन पुराणं संप्रकीर्त्तितं ॥ ७३ ॥

इति श्रीमहापुराणे वायुप्रोक्ते सृष्टिप्रकरणं नाम षष्ठोऽध्यायः ।

समाप्तः प्रक्रियापादः ।

# अथ सप्तमोऽध्यायः।

—080—

## प्रतिसन्धिकीर्त्तनं।

इत्येष प्रथमः पादः प्रक्रियार्थः प्रकीर्त्तितः।
श्रुत्वा तु संहृष्टमनाः काश्यपेयः सनातनः॥ १॥
सम्बोध्य सूतं वचसा पप्रच्छाथोत्तरां कथां।
अतःप्रभृति कल्पस्य प्रतिसन्धिं प्रचक्ष्व नः॥ २॥
समतीतस्य कल्पस्य वर्त्तमानस्य चोभयोः।
कल्पयोरन्तरं यच्च प्रतिसन्धिर्य्य तस्तयोः।
एतद्वेदितुमिच्छामः अत्यन्तकुशलोऽद्यसि॥ ३॥
लोमहर्षण उवाच। अतऽवोऽहं प्रवक्ष्यामि प्रतिसन्धिञ्च यस्तयोः।
समतीतस्य कल्पस्य वर्त्तमानस्य चोभयोः॥ ४॥
मन्वन्तराणि कल्पेषु येषु यानि च सुव्रताः।
यश्चायं वर्त्तते कल्पो वाराहः साम्प्रतः शुभः॥ ५॥
अस्मात् कल्पाच्च यः कल्पः पूर्व्वोऽतीतः सनातनः।
तस्य चास्य च कल्पस्य मध्यावस्थान्निबोधत॥ ६॥
प्रत्याहृते पूर्व्वकल्पे प्रतिसन्धिश्च तत्र वै।
अन्यः प्रवर्त्तते कल्पो जनाल्लोकात् पुनः पुनः॥ ७॥
व्युच्छिन्नात् प्रतिसन्धेस्तु कल्पात् कल्पः परस्परं।
व्युच्छिद्यन्ते क्रियाः सर्व्वाः कल्पान्ते सर्व्वशस्तदा।
तस्मात् कल्पात्तु कल्पस्य प्रतिसन्धिर्निगद्यते॥ ८॥



मन्वन्तरयुगाख्यानामप्युच्छिन्नाश्च सन्धयः।
परस्पराः प्रवर्त्तन्ते मन्वन्तरयुगैः सह॥ ९॥
उक्ता ये प्रक्रियार्थेन पूर्व्वकल्पाः समासतः।
तेषां परार्द्धकल्पानां पूर्व्वो ह्यस्मात्तु यः परः।
आसीत् कल्पो व्यतीतो वै परार्द्धेन परस्तु सः॥ १०॥
अन्ये भविष्या ये कल्पा अपरार्द्धानुणीकृताः।
प्रथमः साम्प्रतस्तेषां कल्पोऽयं वर्त्तते द्विजाः॥ ११॥
यस्मिन् पूर्व्वः परार्द्धे तु द्वितीये पर उच्यते।
एतावान् स्थितिकालश्च प्रत्याहारस्तुतः स्मृतः॥ १२॥
अस्मात् कल्पात्तु यः पूर्व्वं कल्पोऽतीतः सनातनः।
चतुर्य्युगसहस्रान्ते अहोमन्वन्तरैः पुरा॥ १३॥
क्षीणे कल्पे तदा तस्मिन् दाहकाले ह्युपस्थिते।
तस्मिन् कल्पे तदा देवा आसन्वैमानिकास्तु ये॥ १४॥
नक्षत्रग्रहतारास्तु चन्द्रसूर्य्यग्रहाश्च ये।
अष्टाविंशतिरेवैताः कोट्यस्तु सुकृतात्मनां॥ १५॥
मन्वन्तरे तथैकस्मिन् चतुर्दशसु वै तथा।
त्रीणि कोटिशतान्यासन् कोट्या द्विनवतिस्तथा।
अष्टाधिकाः सप्तशताः सहस्राणां स्मृताः पुरा॥ १६॥
वैमानिकानां देवानां कल्पेऽतीते तु येऽभवन्।
एकैकस्मिंस्तु कल्पे वै देवा वैमानिकाः स्मृताः॥ १७॥
अथ मन्वन्तरेष्वासंश्चतुर्दशसु वै दिवि।
देवाश्च पितरश्चैव मुनयो मनवस्तथा॥ १८॥
तेषामनुचरा ये च मनुपुत्रास्तथैव च।

वर्णाश्रमिभिरीड्याश्च तस्मिन् काले तु ये सुराः ।
मन्वन्तरेषु ये ह्यासन् देवलोके दिवौकसः ॥ १९ ॥
ते तैः संयोजकैः सार्द्धं प्राप्ते सङ्कलने तथा ।
तुल्यनिष्ठास्तु ते सर्व्वे प्राप्ते ह्याभूतसंप्लवे ॥ २० ।
ततस्ते वश्यभावित्वाद्बुद्ध्वा पर्य्यायमात्मनः ।
त्रैलोक्यवासिनो देवास्तस्मिन् प्राप्ते ह्युपप्लवे ॥ २१ ॥
तेनोत्सुक्यविषादेन त्यक्त्वा स्थानानि भावतः ।
महर्लोकाय संविग्नास्ततस्ते दधिरे मतिं ॥ २२ ॥
ते युक्ता उपपद्यन्ते महसि स्वैः शरीरकैः ।
विशुद्धिबहुलाः सर्व्वे मानसीं सिद्धिमास्थिताः ॥ २३ ॥
तैः कल्पवासिभिः सार्द्धं महानासादितस्तु यैः ।
ब्राह्मणैः क्षत्रियैर्वैश्यैस्तत्तैषापरैर्जनैः ॥ २४ ॥
मत्वा तु ते महर्लोकं देवसङ्घाश्चतुर्म्मुखं ।
ततस्ते जनलोकाय सोद्वेगा दधिरे मतिं ॥ २५ ॥
विशुद्धिबहुलाः सर्व्वे मानसीं सिद्धिमास्थिताः ।
तैः कल्पवासिभिः सार्द्धं महानासादितस्तु यैः ॥ २६ ॥
दग्धकल्पं ह्युवाचाथ तस्माद्गच्छन्ति स्वस्तपः ।
तत्र कल्पान् दश स्थित्वा सत्यं गच्छन्ति वै पुनः ।
एतेन क्रमयोगेन यान्ति कल्पनिवासिनः ॥ २७ ॥
एवं देवयुगानान्तु सहस्राणि परस्परात् ।
गतानि ब्रह्मलोकं वै अपरावर्त्तिनीं गतिं ॥ २८ ॥
आधिपत्यं विना ते वै ऐश्वर्य्येण तु तत्समाः ।
भवन्ति ब्रह्मणस्तुल्या रूपेण विषयेण च ॥ २९ ॥



तत्र ते ह्यवतिष्ठन्ति प्रीतियुक्ताः प्रसङ्गमात् ।
आनन्दं ब्रह्मणः प्राप्य मुच्यन्ते ब्रह्मणा सह ॥ ३० ॥
अवश्यम्भाविनाऽर्थेन प्राकृतेनैव ते स्वयं ।
नानात्वेनाभिसम्बद्धास्तदा तत्कालभाविनः ॥ ३१ ॥
स्वरूपतो बुद्धिपूर्व्वं यथा भवति जाग्रतः ।
तत्कालभावि तेषान्तु तथा ज्ञानं प्रवर्त्तते ॥ ३२ ॥
प्रत्याहारे तु भेदानां येषां भिन्नाभिसृच्छ्रणां ।
तैः सार्द्धं प्रतिसृज्यन्ते कार्य्याणि करणानि च ॥ ३३ ॥
नानात्वदर्शनात्तेषां ब्रह्मलोकनिवासिनां ।
विनष्टस्वाधिकाराणां स्वेन धर्म्मेण तिष्ठतां ॥ ३४ ॥
ते तुल्यलक्षणाः सिद्धाः शुद्धात्मानो निरञ्जनाः ।
प्रकृतीः कारणातीताः स्वात्मन्येव व्यवस्थिताः ॥ ३५ ॥
प्रख्यापयित्वा (१) ह्यात्मानं प्रकृतिस्तेषु सर्व्वशः ।
पुरुषाव्यक्तरूपत्वेन प्रतीता न प्रवर्त्तते ॥ ३६ ॥
प्रवर्त्तिते पुनः सर्गे तेषां वा कारणं पुनः ।
संयोगे प्राकृते तेषां युक्तानां तत्त्वदर्शिनां ॥ ३७ ॥
अत्रापवर्गिणां तेषामपुनर्म्मार्गगामिनां ।
अभावः पुनरुत्पत्तौ शान्तानामर्च्चिषामिव ॥ ३८ ॥
ततस्तेषु गतेषूर्द्धं त्रैलोक्यात्सुमहात्मसु ।
तैः सार्द्धं ये महर्लोकात्तदा नासादिता जनाः ।
तच्छिष्टास्तेह तिष्ठन्ति कल्पाहेहमुपासते ॥ ३९ ॥
गन्धर्व्वाद्याः पिशाचान्ता मानुषा ब्राह्मणादयः ।

१ व्याख्यापयित्वेति ङ० ।

पशवः पक्षिणश्चैव स्थावराः ससरीसृपाः ॥ ४० ॥
तिष्ठत्सु तेषु तत्कालं पृथिवीतलवासिषु ।
सहस्रं यत्तु रश्मीनां सूर्य्यस्येह विभासते ।
ते सप्तरश्मयो भूत्वा ह्येकैको जायते रविः ॥ ४१ ॥
क्रमेणोत्तिष्ठमानास्ते त्रीन् लोकान् प्रदहन्त्युत ।
जङ्गमं स्थावरञ्चैव नदीः सर्व्वांश्च पर्व्वतान् ।
पूर्व्वं शुष्का ह्यनाद्रष्या सूर्य्यैस्तैश्च प्रधूपिताः ॥ ४२ ॥
तदा ते विविशुः सर्व्वे निर्दग्धाः सूर्य्यरश्मिभिः ।
जङ्गमाः स्थावराः सर्व्वे धर्म्माधर्म्मात्मकास्तु वै ॥ ४३ ॥
दग्धदेहास्ततस्ते वै गताः पापयुगात्यये ।
योन्या तया ह्यनिर्मुक्ताः शुभपापानुबन्धया ॥ ४४ ॥
ततस्ते ह्युपपद्यन्ते तुल्यरूपा जने जनाः ।
विशुद्धिवदुलाः सर्व्वे मानसीं सिद्धिमास्थिताः ॥ ४५ ॥
उषित्वा रजनीं तत्र ब्रह्मणोऽव्यक्तजन्मनः ।
पुनः सर्गे भवन्तीह ब्रह्मणो मानसीप्रजाः ॥ ४६ ॥
ततस्तेषु प्रवृत्तेषु जने त्रैलोक्यवासिषु ।
निर्दग्धेषु च लोकेषु तेषु सूर्य्यैस्तु सप्तभिः ।
दृष्ट्वा क्षितौ प्लाविताया विशीर्णेष्वालयेषु च ॥ ४७ ॥
समुद्राश्चैव मेघाश्च आपः सर्व्वाश्च पार्थिवाः ।
व्रजन्त्येकार्णवत्वं हि सलिलाख्यास्तदाश्रिताः ॥ ४८ ॥
आगतागतिकं तद्वै यदा तु सलिलं बहु ।
संज्ञाप्येमां स्थितां भूमिमर्णवाख्या तदा च सा ॥ ४९ ॥
आभाति यस्मान्नाभान्ति भासन्तो व्याप्तिदीप्तिषु ।



सर्व्वतः समनुप्राप्य तासाच्चाप्सु विभाव्यते ॥ ५० ॥
तदभ्यस्तनुते यस्मात् सर्व्वां पृथ्वीं समन्ततः ।
धातूंस्तनोति विस्तारे तेनाभ्यस्तनवः स्मृताः ॥ ५१ ॥
अरमित्येष शीघ्रन्तु निपातः कविभिः स्मृतः ।
एकार्णवे भवन्त्यापो न शीघ्रास्तेन ते नराः ॥ ५२ ॥
तस्मिन् युगसहस्रान्ते संस्थिते ब्रह्मणोऽहनि ।
रजन्यां वर्त्तमानायान्तावत्तत्सलिलात्मना ॥ ५३ ॥
ततस्तु सलिले तस्मिन्नष्टेऽग्नौ पृथिवीतले ।
प्रशान्तवातेऽन्धकारे निरालोके समन्ततः ॥ ५४ ॥
येनैवाधिष्ठितं ह्येदं ब्रह्मा स पुरुषः प्रभुः ।
विभागमस्य लोकस्य पुनर्व्वै कर्त्तुमिच्छति ॥ ५५ ॥
एकार्णवे तदा तस्मिन्नष्टे स्थावरजङ्गमे ।
तदा स भवति ब्रह्मा सहस्राक्षः सहस्रपात् ॥ ५६ ॥
सहस्रशीर्षा पुरुषो रुक्मवर्णो ह्यतीन्द्रियः ।
ब्रह्मा नारायणाख्यस्तु सुष्वाप सलिले तदा ॥ ५७ ॥
सत्त्वोद्रेकात् प्रबुद्धस्तु शून्यं लोकमवेक्ष्य च ।
इमञ्चोदाहरन्त्यत्र श्लोकं नारायणं प्रति ॥ ५८ ॥
आपो नाराख्यास्तनव इत्यपां नाम शुश्रुमः ।
आपूर्य्य नाभिं तत्रास्ते तेन नारायणः स्मृतः ॥ ५९ ॥
सहस्रशीर्षाः सुमनाः सहस्रपात्
सहस्रचक्षुर्व्वदनः सहस्रभुक् ।
सहस्रबाहुः प्रथमः प्रजापति-
स्त्रयीपथे यः पुरुषो निरुच्यते ॥ ६० ॥

आदित्यवर्णो भुवनस्य गोप्ता-
एको ह्यपूर्व्वः प्रथमन्तुराषाट्।
हिरण्यगर्भः पुरुषो महात्मा
स पठ्यते वै तमसः परस्तात्॥ ६१॥
कल्पादौ रजसोद्रिक्तो ब्रह्मा भूत्वाऽसृजत् प्रजाः।
कल्पान्ते तमसोद्रिक्तो कालो भूत्वाऽग्रसत् पुनः॥ ६२॥
स वै नारायणाख्यस्तु सत्त्वोद्रिक्तोऽर्णवे स्वपन्।
त्रिधा विभज्य चात्मानं त्रैलोक्ये समवर्त्तत॥ ६३॥
सृजते ग्रसते चैव वीक्षते च त्रिभिस्तु तान्।
एकार्णवे तदा लोके नष्टे स्थावरजङ्गमे॥ ६४॥
चतुर्युगसहस्रान्ते सर्व्वतः सलिलाप्लुते।
ब्रह्मा नारायणाख्यस्तु अप्रकाशार्णवे स्वपन्॥ ६५॥
चतुर्विधाः प्रजा ग्रस्त्वा ब्राह्म्यां रात्र्यां महार्णवे।
पश्यन्ति तं महर्लोकात् सुप्तं कालं महर्षयः॥ ६६॥
भृग्वाद्यो यथा सप्त कल्पे ह्यस्मिन् महर्षयः।
ततो विवर्त्तमानैस्तैर्महान् परिगतः परः॥ ६७॥
गत्यर्थात् ऋषयो धातोर्व्वामनिर्व्वृत्तिरादितः।
तस्मादृषिपरत्वेन महांस्तस्मान्महर्षयः॥ ६८॥
महर्लोकस्थितैर्दृष्टः कालः सुप्तस्तदा च तैः।
सत्याद्या सप्त ये ह्यासन् कल्पेऽतीते महर्षयः॥ ६९॥
एवं ब्राह्मीषु रात्रीषु ह्यतीतासु सहस्रशः।
दृष्टवन्तस्तथा ह्यन्ये सुप्तं कालं महर्षयः॥ ७०॥
कल्पस्यादौ तु वृद्धयो यस्मात् संस्थाश्चतुर्विध।



कल्पयामास वै ब्रह्मा तस्मात्कालो निरुच्यते॥ ७१॥
स स्रष्टा सर्व्वभूतानां कल्पादिषु पुनः पुनः।
व्यक्ताऽव्यक्तो महादेवस्तस्य सर्व्वमिदं जगत्॥ ७२॥
इत्येष प्रतिसन्धिर्व्वः कीर्त्तितः कल्पयोर्द्वयोः।
साम्प्रतातीतयोर्म्मध्ये प्रागवस्था बभूव या॥ ७३॥
कीर्त्तिता तु समासेन कल्पे कल्पे यथा तथा।
साम्प्रतन्तु प्रवक्ष्यामि कल्पमेतं निबोधत॥ ७४॥

इति श्रीमहापुराणे वायुप्रोक्ते प्रतिसन्धिकीर्त्तनं
नाम सप्तमोऽध्यायः।

# अथाष्टमोऽध्यायः।

## चतुराश्रमविभागः।

———ooo———

सूत उवाच। तुल्यं युगसहस्रस्य नैशङ्कालमुपास्य सः।
शर्व्वर्य्यन्ते प्रकुरुते ब्रह्मत्वं सर्गकारणात् ॥ १ ॥
ब्रह्मा तु सलिले तस्मिन् वायुर्भूत्वा तदाचरत्।
अन्धकारे तदा तस्मिन् नष्टे स्थावरजङ्गमे ॥ २ ॥
जलेन समनुव्याप्ते सर्व्वतः पृथिवीतले।
अविभागेन भूतेषु समन्तात्सुस्थितेषु च ॥ ३ ॥
निशायामिव खद्योतः प्रावृट्काले ततस्ततः।
तदाकाशे चरन् सोऽथ वीच्यमाणः स्वयम्भुवः ॥ ४ ॥
प्रतिष्ठाया ह्यपायन्तु मार्गमाणस्तदा प्रभुः।
ततस्तु सलिले तस्मिन् ज्ञात्वा ह्यन्तर्गतां महीं ॥ ५ ॥
अनुमानात्तु सम्बुद्धो भूमेरुद्धरणं प्रति।
चकारान्यान्तनुश्चैव पूर्व्वकल्पादिषु स्मृतां ॥ ६ ॥
स तु रूपं वराहस्य कृत्वापः प्राविशत् प्रभुः।
अद्भिः सञ्छादितामुर्व्वीं समीक्ष्याथ प्रजापतिः ॥ ७ ॥
उद्धृत्योर्व्वीमथाङ्गास्तु, अपस्तास्तु, स विन्यसत्।
सामुद्रीस्तु, समुद्रेषु नादेयीर्न्निम्नगास्वपि।
पार्थिवीस्तु, स विन्यस्य पृथिव्यां सोऽचिनोद्गिरीन् ॥ ८ ॥
प्राक्सर्गे दह्यमाने तु तदा संवर्त्तकाग्निना।
तेनाग्निना प्रलीनास्ते पर्व्वता भुवि सर्व्वशः ॥ ९ ॥



शैत्यादेकार्णवे तस्मिन् वायुनापस्तु संहताः।
निषन्ना यत्र यत्रासंस्तत्र तत्राऽचलोऽभवत् ॥ १० ॥
स्कन्नाचलत्वादचलाः पर्व्वभिः पर्व्वताः स्मृताः।
गिरयोऽद्रिर्निगीर्णत्वाच्चयनाच्च शिलोच्चयाः ॥ ११ ॥
ततस्तु तां समुद्धृत्य क्षितिमन्तर्ज्जलात् प्रभुः।
स्वस्थाने स्थापयित्वा च विभागमकरोत् पुनः ॥ १२ ॥
सप्त सप्त तु वर्षाणि तस्या द्वीपेषु सप्तसु।
विषमानि समीक्ष्यथ शिलाभिरचिनोद्गिरीन् ॥ १३ ॥
द्वीपेषु तेषु वर्षाणि चत्वारिंशत्तथैव च।
तावन्तः पर्व्वताश्चैव वर्षान्ते समवस्थिताः।
सर्गादौ सन्निविष्टास्ते स्वभावेनैव नान्यथा ॥ १४ ॥
सप्तद्वीपाः समुद्राश्च अन्योन्यस्य तु मण्डलं।
सन्निकृष्टाः स्वभावेन समावृत्य परस्परं ॥ १५ ॥
भूराख्यांश्चतुरो लोकांश्चन्द्रादित्यौ ग्रहैः सह।
पूर्व्वन्तु निर्म्ममे ब्रह्मा स्थानानीमानि सर्व्वशः ॥ १६ ॥
कल्पस्य चास्य ब्रह्मा वै ह्यसृजत् स्थानिनः पुरा।
आपोऽग्निः पृथिवी वायुरन्तरिक्षन्दिवन्तथा ॥ १७ ॥
स्वर्गन्दिशः समुद्रांश्च नदीः सर्व्वांश्च पर्व्वतान्।
ओषधीनां तथात्मानमात्मानं वृक्षवीरुधां ॥ १८ ॥
लवाः काष्ठाः कलाश्चैव मुहूर्त्तं सन्धिरात्रहं।
अर्द्धमासांश्च मासांश्च अयनाब्दयुगानि च ॥ १९ ॥
स्थानाभिमानिनश्चैव स्थानानि च पृथक् पृथक्।
स्थानात्मनः स सृष्ट्वा वै युगावस्थां विनिर्म्ममे ॥ २० ॥

कृतन्तेताद्वापरञ्च कलिश्चैव तथा युगं ।
कल्पस्यादौ कृतयुगे प्रथमे सोऽसृजत् प्रजाः ॥ २१ ॥
प्रागुक्ता या मया तुभ्यं पूर्व्वकालं प्रजास्तु ताः ।
तस्मिन् संवर्त्तमाने तु कल्पे दग्धास्तदाऽग्निना ॥ २२ ॥
अप्राप्ता यास्तपोलोकं जनलोकं समाश्रिताः ।
प्रवर्त्तन्ति पुनः सर्गे बीजार्थन्ता भवन्ति हि ॥ २३ ॥
बीजार्थेन स्थितास्तत्र पुनः सर्गस्य कारणात् ।
ततस्ताः सृज्यमानास्तु सन्तानार्थं भवन्ति हि ॥ २४ ॥
धर्म्मार्थकाममोक्षाणामिह ताः साधकाः स्मृताः ।
देवाश्च पितरश्चैव ऋषयो मनवस्तथा ॥ २५ ॥
ततस्ते तपसा युक्ता स्थानान्यापूरयन्ति हि ।
ब्रह्मणो मानसास्ते वै सिद्धात्मानो भवन्ति हि ॥ २६ ॥
ये सर्गादिषयुक्तेन कर्म्मणा ते दिवङ्गताः ।
आवर्त्तमाना इह ते सम्भवन्ति युगे युगे ॥ २७ ॥
स्वकर्म्मफलशेषेण ख्याताश्चैव तथाऽत्मिकाः ।
भवन्ति जनाल्लोकात् कर्म्मसंसयबन्धनात् ॥ २८ ॥
आशयः कारणं तत्र बोद्धव्यं कर्म्मणान्तु सः ।
तैः कर्म्मभिस्तु जायन्ते जनाल्लोकाः शुभाशुभैः ॥ २९ ॥
गृह्णन्ति ते शरीराणि नानारूपाणि योनिषु ।
देवाद्यस्थावरान्ते च उत्पद्यन्ते परस्परं ॥ ३० ॥
तेषां ये यानि कर्म्माणि प्राक् सृष्टेः प्रतिपेदिरे ।
तान्येते प्रतिपद्यन्ते सृज्यमानाः पुनः पुनः ॥ ३१ ॥
हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्मे ऋतानृते ।



तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते ॥ ३२ ॥
कल्पेष्वासन् व्यतीतेषु रूपनामानि यानि च ।
तान्येवानागते काले प्रायशः प्रतिपेदिरे ॥ ३३ ॥
तस्मात्तु नामरूपाणि तान्येव प्रतिपेदिरे ।
पुनः पुनस्ते कल्पेषु जायन्ते नामरूपतः ॥ ३४ ॥
ततः सर्गे ह्यवष्टब्धे सिसृक्षोर्ब्रह्मणस्तु वै ।
प्रजास्ता ध्यायतस्तस्य सत्याभिध्यायिनस्तदा ॥ ३५ ॥
मिथुनानां सहस्रन्तु सोऽसृजद्वै मुखात्तदा ।
जनास्ते ह्युपपद्यन्ते सत्त्वोद्रिक्ताः सुचेतसः ॥ ३६ ॥
सहस्रमन्यद्दक्षस्तो मिथुनानां ससर्ज्ज ह ।
ते सर्व्वे रजसोद्रिक्ता शुश्रिणश्चाप्यशुश्रिणः ॥ ३७ ॥
सृष्ट्वा सहस्रमन्यत्तु इन्द्रानामूरुतः पुनः ।
रजस्तमोभ्यामुद्रिक्ता ईहाशीलास्तु ते स्मृताः ॥ ३८ ॥
पद्भ्यां सहस्रमन्यत्तु मिथुनानां ससर्ज्ज ह ।
उद्रिक्तास्तमसा सर्व्वे निःस्त्रीका ह्यल्पतेजसः ॥ ३९ ॥
ततो वै हर्षमानास्ते इन्द्रोत्पन्नास्तु प्राणिनः ।
अन्योन्या ह्यृच्छयाविष्टा मैथुनायोपचक्रमुः ॥ ४० ॥
ततः प्रभृतिकल्पेऽस्मिन् मिथुनोत्पत्तिरुच्यते ।
मासे मासे[1]र्त्तवं यत्तदाऽऽसीद्धि योषितां ॥ ४१ ॥
तस्मात्तदा न सुषुवुः सेवितैरपि मैथुनैः ।
आयुषोऽन्ते प्रसूयन्ते मिथुनान्येव ते सकृत् ॥ ४२ ॥
कुटकाः कुविकाश्चैव(१) उत्पद्यन्ते सुमूर्षिताः ।

१ कुटकान् कुन्दकांश्चैव इति क०।

ततः प्रभृतिकल्पेऽस्मिन् मिथुनानां हि सम्भवः ॥ ४३ ॥
ध्याते तु मनसा तासां प्रजानां जायते सकृत् ।
शब्दादिविषयः शुद्धः प्रत्येकं पञ्चलक्षणः ॥ ४४ ॥
इत्येवं मनसा पूर्व्वं प्राक्सृष्टिर्य्यां प्रजापतेः ।
तस्यान्ववाये सम्भूता यैरिदं पूरितं जगत् ॥ ४५ ॥
सरित्सरःसमुद्रांश्च सेवन्ते पर्व्वतानपि ।
तदा नात्यम्बुशीतोष्णा युगे तस्मिन् चरन्ति वै ॥ ४६ ॥
पृथ्वीरसोद्भवं नाम आहारं ह्याहरन्ति वै ।
ताः प्रजाः कामचारिण्यो मानसीं सिद्धिमास्थिताः ॥४७॥
धर्माधर्मौ न तास्वास्तां निर्विशेषाः प्रजास्तु ताः ।
तुल्यमायुः सुखं रूपं तासां तस्मिन् कृते युगे ॥ ४८ ॥
धर्माधर्मौ न तास्वास्तां कल्पादौ तु कृते युगे ।
स्वेन स्वेनाधिकारेण जज्ञिरे ते कृते युगे ॥ ४९ ॥
चत्वारि तु सहस्राणि वर्षाणां दिव्यसंख्यया ।
आद्यङ्कृतयुगं प्राहुः सन्ध्यानान्तु चतुःशतं ॥ ५० ॥
ततः सहस्रगस्तासु प्रजासु प्रथितास्वपि ।
न तासामतिघातोऽस्ति न द्वन्द्वानपि च क्रमः ॥ ५१ ॥
पर्व्वतोदधिसेविन्यो ह्यनिकेताश्रयास्तु ताः ।
विशोकाः सत्त्वबहुलाः एकान्तसुखितप्रजाः ॥ ५२ ॥
ता वै निकामचारिण्यो नित्यं मुदितमानसाः ।
पशवः पक्षिणश्चैव न तदामन् सरीसृपाः ॥ ५३ ॥
नोद्विज्या नारकाश्चैव ते ह्यधर्म्मप्रसूतयः ।
न मूलफलपुष्पञ्च नार्त्तवं ऋतवो न च ॥ ५४ ॥
सर्व्वकामसुखः कालो नात्यर्थं ह्युष्णशीतता ।



मनोभिलषिताः कामास्तासां सर्व्वत्र सर्व्वदा ॥ ५५ ॥
उत्तिष्ठन्ति पृथिव्यां वै ताभिर्ध्याता रसोत्थिताः ।
बलवर्णकरी तासां सिद्धिः सा रोगनाशिनी ॥ ५६ ॥
असंस्कार्य्यैः शरीरैश्च प्रजास्ताः स्थिरयौवनाः ।
तासां विशुद्धात् सङ्कल्पाज्जायन्ते मिथुनाः प्रजाः ॥ ५७ ॥
समं जन्म च रूपञ्च म्रियन्ते चैव ताः समं ।
तदा सत्यमलोभश्च क्षमा तुष्टिः सुखन्दमः ॥ ५८ ॥
निर्विशेषाः कृताः सर्व्वा रूपायुःशीलचेष्टितैः ।
अबुद्धिपूर्व्वकं वृत्तं प्रजानां जायते स्वयं ॥ ५९ ॥
अप्रवृत्तिः कृतयुगे कर्म्मणोः शुभपापयोः ।
वर्णाश्रमव्यवस्थाश्च न तदासन्न सङ्करः ॥ ६० ॥
अनिच्छाद्वेषयुक्तास्ते वर्त्तयन्ति परस्परं ।
तुल्यरूपायुषः सर्व्वा अधमोत्तमवर्ज्जिताः ॥ ६१ ॥
सुखप्राया ह्यशोकाश्च उत्पद्यन्ते कृते युगे ।
नित्यप्रहृष्टमनसो महासत्वा महाबलाः ॥ ६२ ॥
लाभालाभौ न तास्वास्तां मित्रामित्रे प्रियाप्रिये ।
मनसा विषयस्तासान्निरीहाणां प्रवर्त्तते ।
न लिप्यन्ति हि ताऽन्योन्यञ्चानुगच्छन्ति चैव हि ॥ ६३ ॥
ध्यानं परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
प्रवृत्तं द्वापरे यज्ञं दानं कलियुगे वरं ॥ ६४ ॥
सत्त्वं कृतं रजस्त्रेता द्वापरन्तु रजस्तमौ ।
कलौ तमस्तु विज्ञेयं युगवृत्तवशेन तु ॥ ६५ ॥
कालः कृते युगे ह्येष तस्य संख्यान्निबोधत ।

चत्वारि तु सहस्राणि वर्षाणामृतं कृतं युगम् ॥ ६६ ॥
सन्ध्यांशो तस्य दिव्यानि शतान्यष्टौ च संख्यया ।
तदा तासां बभूवायुश्च क्लेशविप्रक्षयः ॥ ६७ ॥
ततः कृतयुगे तस्मिन् सन्ध्यांशे हि गते तु वै ।
पादावशिष्टो भवति युगधर्मास्तु सर्वशः ॥ ६८ ॥
सन्ध्यायामप्यतीतायामन्तकाले युगस्य तु ।
पादतश्चावतिष्ठेत्तु सन्ध्याधर्मो युगस्य तु ।
एवं कृते तु निःशेषे सिद्धिस्त्वन्तर्दधे तदा ॥ ६९ ॥
तस्याश्च सिद्धौ भ्रष्टायां मानस्यामभवत्ततः ।
सिद्धिरन्या युगे तस्मिंस्त्रेतायामन्तरे कृता ॥ ७० ॥
सर्गादौ या मयाष्टौ तु मानस्यो वै प्रकीर्तिताः ।
अष्टौ ताः क्रमयोगेन सिद्धयो यान्ति संचयं ॥ ७१ ॥
कल्पादौ मानसी ह्येषा सिद्धिर्भवति सा कृते ।
मन्वन्तरेषु सर्वेषु चतुर्युगविभागशः ।
वर्णाश्रमाचारकृतः कर्मसिद्धोद्भवः स्मृतः ॥ ७२ ॥
सन्ध्याकृतस्य प्रादेन सन्ध्यापादेन चांशतः ।
कृतसन्ध्यांशका ह्येते चींस्त्रीन् पादान् परस्परान् ।
हसन्ति युगधर्मैस्ते तपःश्रुतबलायुषैः ॥ ७३ ॥
ततः कृतांशे क्षीणे तु बभूव तदनन्तरं ।
त्रेतायां युगमन्यत्तु कृतांशमृषिसत्तमाः ॥ ७४ ॥
तस्मिन् क्षीणे कृतांशे तु तच्छिष्टासु प्रजास्विह ।
कल्पादौ संप्रवृत्तायास्त्रेतायाः प्रमुखे तदा ॥ ७५ ॥
प्रणश्यति तदा सिद्धिः कालयोगेन नान्यथा ।



तस्यां सिद्धौ प्रनष्टायामन्या सिद्धिरवर्त्तत ॥ ७६ ॥
अपां सोम्ये प्रतिगते तदा मेघात्मना तु तौ ।
मेघेभ्यस्तनयित्नुभ्यः प्रवृत्तं वृष्टिसर्जनं ॥ ७७ ॥
सप्तरात्रं तया वृष्ट्या संयुक्ते पृथिवीतले ।
प्रादुरासंस्तदा तासां वृक्षास्तु गृहसंस्थिताः ॥ ७८ ॥
सर्वप्रत्युपभोगस्तु तासान्तेभ्यः प्रजायते ।
वर्त्तयन्ति हि तेभ्यस्ताः त्रेतायुगमुखे प्रजाः ॥ ७९ ॥
ततः कालेन महता तासामेव विपर्ययात् ।
रागलोभात्मको भावस्तदा ह्याकस्मिकोऽभवत् ॥ ८० ॥
यत्तद्भवति नारीणां जीवितान्ते तदार्त्तवं ।
तदा तद्वै न भवति पुनर्युगबलेन तु ॥ ८१ ॥
तासां पुनः प्रवृत्तन्तु मासे मासे तदार्त्तवं ।
ततस्तेनैव योगेन वर्त्तंतां मिथुने तदा ॥ ८२ ॥
तासान्तत् कालभावित्वान्मासि मास्युपगच्छतां ।
अकाले ह्यार्त्तवोत्पत्तिर्गर्भोत्पत्तिरजायत ॥ ८३ ॥
विपर्ययेण तासान्तु तेन कालेन भाविना ।
प्रणश्यन्ति ततः सर्वे वृक्षास्ते गृहसंस्थिताः ॥ ८४ ॥
ततस्तेषु प्रनष्टेषु विभ्रान्ता व्याकुलेन्द्रियाः ।
अभिध्यायन्ति तां सिद्धिं सत्त्वाभिध्यायिनस्तदा ॥ ८५ ॥
प्रादुर्बभूवुस्तासाच्च वृक्षास्ते गृहसंस्थिताः ।
वस्त्राणि च प्रसूयन्ते फलान्याभरणानि च ॥ ८६ ॥
तेष्वेव जायते तासां गन्धवर्णरसान्वितं ।
अमाद्यिकं महावीर्यं पुटके पुटके मधु ॥ ८७ ॥

तेन ता वर्तयन्तिस्म सुखे चेतायुगस्य च ।
हृष्टतुष्टास्तया सिद्धा प्रजा वै विगतज्वराः ॥ ८८ ॥
पुनः कालान्तरेणैव पुनर्लीभाद्वतास्तु ताः ।
वृक्षांस्तान् पर्य्यगृह्णन्त मधु वामाक्षिकं बलात् ॥ ८९ ॥
तासान्तेनापचारेण पुनर्लोकक्षतेन वै ।
प्रनष्टा मधुना सार्द्धं कल्पवृक्षाः क्वचित् क्वचित् ॥ ९० ॥
तस्यामेवाल्पशिष्टायां संध्याकालवशात्तदा ।
प्रावर्त्तन्त तदा तासां द्वन्द्वान्यभ्युत्थितानि तु ॥ ९१ ॥
शीतवातातपैस्तीव्रैस्ततस्ता दुःखिता भृशं ।
द्वन्द्वैस्ताः पीड्यमानास्तु चक्रुरावरणानि च ॥ ९२ ॥
कृत्वा द्वन्द्वप्रतीकारं निकेतानि हि भेजिरे ।
पूर्व्वं निकामचारास्ते अनिकेताश्रया भृशं ॥ ९३ ॥
यथायोग्यं यथाप्रीति निकेतेष्ववसन् पुनः ।
मरुधन्वसु निम्नेषु पर्व्वतेषु नदीषु च ।
संश्रयन्ति च दुर्गाणि धन्वानं शाश्वतोदकं ॥ ९४ ॥
यथायोगं यथाकामं समेषु विषमेषु च ।
आरब्धास्ते निकेता वै कर्त्तुं शीतोष्णवारणं ॥ ९५ ॥
ततः संस्थापयामास खेटानि च पुराणि च ।
ग्रामांश्चैव यथाभागं तथैवान्तःपुराणि च ॥ ९६ ॥
तासामायामविष्कम्भान् सन्निवेशान्तराणि च ।
चक्रुस्तदा यथाप्रज्ञं प्रदेशैः संमितस्तु तैः ॥ ९७ ॥
अङ्गुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते ।
तालः स्मृतो मध्यमया गोकर्णशाप्यनामया ॥ ९८ ॥



कनिष्ठया वितस्तिस्तु द्वादशाङ्गुल उच्यते ।
रत्निरङ्गुलपर्व्वाणि संख्यया त्वेकविंशतिः ॥ ९९ ॥
चतुर्विंशतिभिश्चैव हस्तः स्यादङ्गुलानि तु ।
किष्कुः स्मृतो द्विरत्निस्तु द्विचत्वारिंशदङ्गुलं ॥ १०० ॥
चतुर्हस्तं धनुर्दण्डो नालिकायुगमेव च ।
धनुःसहस्रे द्वे तत्र गव्यूतिस्त्वेर्विभाव्यते ॥ १०१ ॥
अष्टौ धनुःसहस्राणि योजनन्तैर्निरुच्यते ।
एतेन योजनेनैव सन्निवेशस्ततः कृतः ॥ १०२ ॥
चतुर्णामेव दुर्गाणां स्वसमुत्थानि वीणि तु ।
चतुर्थं कृत्रिमं दुर्गं तस्य वक्ष्याम्यहं विधिं ॥ १०३ ॥
सौधोच्चयप्रप्राकारं सर्व्वतश्चातकाहृतं ।
तदेकं स्वस्तिकद्वारं कुमारीपुरमेव च ॥ १०४ ॥
स्रोतसीसह तद्वारं निखातं पुनरेव च ।
हस्ताष्टौ च दश श्रेष्ठा नवाष्टौ वाऽपरे मताः ॥ १०५ ॥
खेटानां नगराणाञ्च ग्रामाणाञ्चैव सर्व्वशः ।
त्रिविधानाञ्च दुर्गाणां पर्व्वतोदकबन्धनं ॥ १०६ ॥
त्रिविधाणाञ्च दुर्गाणां विष्कम्भायाममेव च ।
योजनानाञ्च विष्कम्भमष्टभागार्द्धमायतं ॥ १०७ ॥
परमार्द्धार्द्धमायामं प्रागुदग्प्रवरं पुरं ।
छिन्नकर्णं विकर्णन्तु व्यञ्जनं क्षत्रसंस्थितं ॥ १०८ ॥
वृत्तं हीनञ्च दीर्घञ्च नगरं न प्रशस्यते ।
चतुरस्रार्ज्जवन्दिक्स्थं प्रशस्तं वै पुरं परं ॥ १०९ ॥
चतुर्विंशतिरादन्तु हस्तानष्टशतं परं ।

अत्र मध्यं प्रशंसन्ति क्लेशोत्कृष्टविवर्जितं ॥ ११० ॥
अथ किष्कुशतान्यष्टौ प्राहुर्मुख्यनिवेशनं ।
नगरादर्धविष्कम्भं खेटं ग्रामं ततो बहिः(१) ॥ १११ ॥
नगराद्योजनं खेटं खेटाद्ग्रामोऽर्द्धयोजनं ।
द्विक्रोशं परमा सीमा क्षेत्रसीमा चतुर्द्धनुः ॥ ११२ ॥
विंशद्धनूंषि विस्तीर्णो दिशां मार्गस्तु तैः कृतः ।
विंशद्धनुर्ग्राममार्गः सीमामार्गौ दशैव तु ॥ ११३ ॥
धनूंषि दश विस्तीर्णः श्रीमान् राजपथः स्मृतः ।
तूवाजिरथनागानामसम्बाधः सुसञ्चरः ॥ ११४ ॥
धनूंषि चैव चत्वारि शाखारथ्यास्तु तैः कृताः ।
गृहरथ्योपरथ्याश्च द्विकाश्चाप्युपरथ्यकाः ॥ ११५ ॥
घण्टापथश्चतुष्पादक्षिपदश्च गृहान्तरं ।
वृत्तिमार्गास्त्वर्द्धपदं प्राग्वंशः पदिकः स्मृतः ॥ ११६ ॥
अवस्करं(२) परीवाहं पदमात्रं समन्ततः ।
कृतेषु तेषु स्थानेषु पुनश्चक्रुर्गृहाणि वै ॥ ११७ ॥
यथा ते पूर्व्वमासन्वै वृक्षास्तु गृहसंस्थिताः ।
तथा कर्त्तुं समारब्धाश्चिन्तयित्वा पुनः पुनः ॥ ११८ ॥
वृक्षाश्चैव गताः शाखा न तास्वैव परागताः ।
अत ऊर्द्धं गताश्चान्या एवं तिर्य्यग्गताः पुरा ॥ ११९ ॥
बुद्ध्वाऽन्विष्यस्तथा न्यायो वृक्षशाखा यथा गताः ।
तथा कृतास्तु तैः शाखास्तस्माच्छालास्तु ताः स्मृताः ॥ १२० ॥

१ ततोर्द्धत इति ब०, ब०, ङ० च ।
२ अवस्करे इति क० ।



एवं प्रसिद्धाः शाखाभ्यः शालाश्चैव गृहाणि च ।
तस्माच्छाला वै स्मृताः शालाः शालात्वञ्चैव तासु तत् ॥ १२१ ॥
प्रसीदति मनस्तासु मनः प्रसादयन्ति ताः ।
तस्माद्गृहाणि शालाश्च प्रासादाश्चैव संज्ञिताः ॥ १२२ ॥
ज्ञात्वा वृक्षोपघातांस्तान् वार्त्तोपायमचिन्तयन् ।
नष्टेषु मधुना सार्द्धं कल्पवृक्षेषु वै तदा ।
विषादव्याकुलास्ता वै प्रजास्तृष्णाक्षुधार्दिताः ॥ १२३ ॥
ततः प्रादुर्बभौ तासां सिद्धिस्त्रेतायुगे पुनः ।
वार्त्तार्थसाधिकाप्यन्या वृत्तिस्तासां हि कामतः ॥ १२४ ॥
तासां वृष्ट्युदकानीह यानि निम्नैर्गतानि तु ।
दृष्ट्वा तदभवत्स्रोतः खातानि निम्नगाः स्मृताः ॥ १२५ ॥
एवं नद्यः प्रवृत्तास्तु द्वितीये वृष्टिसर्ज्जने ।
ये परस्तादपां श्लोका आपन्नाः पृथिवीतले ॥ १२६ ॥
अपाञ्चाभेद्य संयोगादोषध्यस्तासु चाभवन् ।
पुष्पमूलफलिन्यस्तु ओषध्यस्ताः प्रजज्ञिरे ॥ १२७ ॥
अकृष्टपच्याश्चानूप्या ग्राम्याऽरण्याश्चतुर्दश ।
ऋतुपुष्पफलाश्चैव वृक्षा गुल्माश्च जज्ञिरे ॥ १२८ ॥
प्रादुर्भावश्च त्रेतायां वार्त्तायामौषधस्य तु ।
तेनौषधेन वर्त्तन्ते प्रजास्त्रेतायुगे तदा ॥ १२९ ॥
ततः पुनरभूत्तासां रागो लोभश्च सर्व्वशः ।
अवश्यम्भाविनार्थेन त्रेतायुगवशेन तु ॥ १३० ॥
ततस्ताः पर्य्यगृह्णन्त नदीश्चैवाणि पर्व्वतान् ।
वृक्षान् गुल्मौषधीश्चैव प्रसह्यन्तु यथाबलं ॥ १३१ ॥

सिद्धात्मानस्तु ये पूर्वं व्याख्याताः प्राक्तने मया।
ब्रह्मणा मानवास्ते वै उत्पन्ना योजनादिह ॥ १३२ ॥
शान्ताश्च शुश्रिणश्चैव कर्म्मिणो दुःखिनस्तदा।
ततः प्रवर्त्तमानास्ते त्रेतायां जज्ञिरे पुनः ॥ १३३ ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा द्रोहिजनास्तथा।
भाविताः पूर्व्वजातीषु कर्म्मभिश्चाशुभाशुभैः ॥ १३४ ॥
दृतस्तेभ्यो बला ये तु सत्यशीला ह्यहिंसकाः।
वीतलोभा जितात्मानो निवसन्तिस्म तेषु वै ॥ १३५ ॥
प्रतिगृह्णन्ति कुर्व्वन्ति तेभ्यश्चान्येऽल्पतेजसः।
एवं विप्रतिपन्नेषु प्रपन्नेषु परस्परं ॥ १३६ ॥
तेन दोषेण तेषान्ता ओषध्यो मिषतां तदा।
प्रनष्टा क्रियमाणा वै मुष्टिभ्यां सिक्तता यथा ॥ १३७ ॥
अग्रसङ्ख्यैर्गवलाद्ग्राम्यारण्याश्चतुर्दश।
फलं गृह्णन्ति पुष्पैश्च पुष्पं पत्रैश्च याः पुनः ॥ १३८ ॥
ततस्तासु प्रनष्टासु विभ्रान्तास्ताः प्रजास्तदा।
स्वयम्भुवं प्रभुञ्जग्मुः क्षुधाविष्टाः प्रजापतिं ॥ १३९ ॥
दृत्यर्थमभिलिप्सन्त आदौ त्रेतायुगस्य तु।
ब्रह्मा स्वयम्भूर्भगवान् ज्ञात्वा तासां मनोषितं ॥ १४० ॥
युक्तं प्रत्यक्षदृष्टेन दर्शनेन विचार्य्य च।
प्रस्ताः पृथिव्या ओषध्यो ज्ञात्वा प्रत्यदुहत्पुनः ॥ १४१ ॥
कृत्वा वत्सं सुमेरुन्तु दुदोह पृथिवीमिमां।
दुग्धेयं गौस्तदा तेन बीजानि पृथिवीतले ॥ १४२ ॥
जज्ञिरे तानि बीजानि ग्राम्यारण्यास्तु ताः पुनः।



ओषध्यः फलपाकान्ताः समसप्तदशास्तु ताः ॥ १४३ ॥
व्रीहयश्च यवाश्चैव गोधूमा अणवस्तिलाः।
प्रियङ्गवो ह्युदाराश्च कारूषाश्च सवीनकाः ॥ १४४ ॥
माषा मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः।
आढ़क्यश्चणकाश्चैव समसप्तदशाः स्मृताः ॥ १४५ ॥
इत्येता ओषधीनान्तु ग्राम्याणां जातयः स्मृताः।
ओषध्यो यज्ञियाश्चैव ग्राम्यारण्याश्चतुर्दश ॥ १४६ ॥
व्रीहयः सयवा माषा गोधूमा अणवस्तिलाः।
प्रियङ्गुसप्तमा ह्येते अष्टमी तु कुलत्थिका ॥ १४७ ॥
श्यामाकास्त्वथ नीवारा जर्त्तिलाः सगवेधुकाः।
कुरुविन्दा वेणुयवास्तथा मर्कटकाश्च ये ॥ १४८ ॥
ग्राम्यारण्याः स्मृता ह्येता ओषध्यस्तु चतुर्दश।
उत्पन्नाः प्रथमा ह्येता आदौ त्रेतायुगस्य तु ॥ १४९ ॥
अफालकृष्टा ओषध्यो ग्राम्यारण्यास्तु सर्व्वगः।
वृक्षा गुल्मलता वल्ली वीरुधस्तृणजातयः ॥ १५० ॥
मूलैः फलैश्च रोहिण्यो गृह्णन् पुष्पैश्च जायते(१)।
प्रथ्वी दुग्धा तु बीजानि यानि पूर्व्वं स्वयम्भुवा ॥ १५१ ॥
ऋतुपुष्पफलास्ता वै ओषध्यो जज्ञिरे त्विह।
यदा प्रस्रष्टा ओषध्यो न प्ररोहन्ति ताः पुनः ॥ १५२ ॥
ततः स तासां दृत्यर्थं वार्त्तोपायञ्चकार ह।
ब्रह्मा स्वयम्भूर्भगवान् दृष्ट्वा सिद्धिन्तु कर्म्मजां ॥ १५३ ॥

१ या; फलमिति ङ०।

ततः प्रभृत्यथौषध्यः कृष्टपच्यास्तु जज्ञिरे।
संसिद्धायान्तु वार्त्तायान्ततस्तासां स्वयम्भुवः।
मर्य्यादाः स्थापयामास यथारब्धाः परस्परं ॥ १५४ ॥
ये वै परिगृहीतारस्तासामासन्विधात्मकाः।
इतरेषां कृतत्राणाः स्थापयामास क्षत्रियान् ॥ १५५ ॥
उपतिष्ठन्ति ये तान्वै यावन्तो निर्भयास्तथा।
सत्यं ब्रह्म यथा भूतं ब्रुवन्तो ब्राह्मणाश्च ते ॥ १५६ ॥
ये चान्ये प्यबलास्तेषां वैश्यसंकर्म्मसंस्थिताः।
कौनाशानाशयन्ति स्म पृथिव्यां प्रागतन्द्रिताः।
वैश्यानेव तु तानाहुः कौनाशान् वृत्तिसाधकान् ॥ १५७॥
शोचन्तश्च द्रवन्तश्च परिचर्य्यासु ये रताः।
निस्तेजसोऽल्पवीर्य्याश्च शूद्रास्तानब्रवीत्तु सः ॥ १५८ ॥
तेषां कर्म्माणि धर्म्मांश्च ब्रह्मा तु व्यदधात् प्रभुः।
सं स्थितौ प्राकृतायान्तु चातुर्व्वर्ण्यस्य सर्व्वशः ॥ १५९ ॥
पुनः प्रजास्तु ता मोहात् तान् धर्म्मान्तानपालयन्।
वर्णधर्मैरजीवन्त्यो(१) व्यरुध्यन्त परस्परं ॥ १६० ॥
ब्रह्मा तमर्थं बुद्ध्वा तु यथातथ्येन वै प्रभुः।
क्षत्रियाणां बलं दण्डं युद्धमाजीवमादिशत् ॥ १६१ ॥
याजनाध्यापनञ्चैव तृतीयञ्च प्रतिग्रहं।
ब्राह्मणानां विभुस्तेषां कर्म्माण्येतान्यथादिशत् ॥ १६२ ॥
पाशुपाल्यं वाणिज्यञ्च कृषिञ्चैव विशान्दधौ।

१ वर्णधर्मं च जीवन्त्य इति च०।



शिल्पाजीवं श्रुतिञ्चैव शूद्राणां व्यदधात् प्रभुः ॥ १६३ ॥
सामान्यानि तु कर्म्माणि ब्रह्मक्षत्रविशां पुनः।
यजनाध्ययनं दानं समान्यानि तु तेषु च ॥ १६४ ॥
कर्म्माजीवन्ततो दत्त्वा तेभ्यश्चैव परस्परं।
लोकान्तरेषु स्थानानि तेषां सिद्धाऽददत् प्रभुः ॥ १६५ ॥
प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावतां।
स्थानमैन्द्रं क्षत्रियाणां संग्रामेष्वपलायिनां ॥ १६६ ॥
वैश्यानां मारुतं स्थानं स्वधर्म्मेणोपजीविनां।
गान्धर्व्वं शूद्रजातीनां प्रतिचारेण तिष्ठतां ॥ १६७ ॥
स्थानान्येतानि वर्णानां व्यत्याचारवतां स्वयं।
ततः स्थितेषु वर्णेषु स्थापयामास चाश्रमान् ॥ १६८ ॥
गृहस्थो ब्रह्मचारित्वं वानप्रस्थं सभिक्षुकं।
आश्रमांश्चतुरो ह्येतान् पूर्व्वमाख्यापयत् प्रभुः ॥ १६९ ॥
वर्णकर्म्माणि ये केचित्तेषामिह न कुर्व्वते।
कुतः कर्म्माच्चितिं प्राहुराश्रमस्थानवासिनः ॥ १७० ॥
ब्रह्मा तान् स्थापयामास आश्रमान्नामनामतः।
निर्देशार्थं ततस्तेषां ब्रह्मा धर्म्मान् प्रभाषत।
प्रस्थानानि च तेषां वै यमांश्च नियमांश्च ह ॥ १७१ ॥
चातुर्व्वर्ण्यात्मकः पूर्व्वं गृहस्थश्चाश्रमः स्मृतः।
त्रयाणामाश्रमाणाञ्च प्रतिष्ठायोनिरेव च।
यथाक्रमं प्रवक्ष्यामि यमैश्च नियमैश्च ते ॥ १७२ ॥
दाराऽग्नयोऽथातिथेयदृज्याश्राद्धक्रियाः प्रजाः।
इत्येष वै गृहस्थस्य समासाद्धर्म्मसंग्रहः ॥ १७३ ॥

दण्डी च मेखली चैव ह्यधःशायी तथा जटी ।
गुरुशुश्रूषणञ्चैव विद्यादे ब्रह्मचारिणः ॥ १७४ ॥
चीरपत्राजिनानि स्युर्द्वान्यमूलफलौषधं ।
उभे सन्ध्येऽवगाहस्य होमश्चारण्यवासिनां ॥ १७५ ॥
आसन्नमुसले भैक्षमस्तेयं शौचमेव च ।
अप्रमादोऽव्यवायश्च दया भूतेषु च क्षमा ॥ १७६ ॥
अक्रोधो गुरुशुश्रूषा सत्यञ्च दशमं स्मृतं ।
दशलक्षणिको ह्येष धर्म्मः प्रोक्तः स्वयम्भुवा ॥ १७७ ॥
भिक्षोर्व्रतानि पञ्चाऽन्न पञ्चैवोपव्रतानि च ।
आचारशुद्धिर्नियमः शौचञ्च प्रतिकर्म्म च ।
सम्यग्दर्शनमित्येवं पञ्चैवोपव्रतान्यपि ॥ १७८ ॥

ध्यानं समाधिर्मनसेन्द्रियाणां
ससागरैर्भैक्ष्यमथोपगम्य ।
मौनं पवित्रोपचितैर्विमुक्तिः
परिव्रजो धर्म्ममिमं वदन्ति ॥ १७९ ॥

सर्व्वे ते श्रेयसे प्रोक्ता आश्रमा ब्रह्मणा स्वयं ।
सत्यार्ज्जवन्तपः क्षान्तिः योगेज्या दमपूर्व्विका ॥ १८० ॥
वेदाः साङ्गाश्च यज्ञाश्च व्रतानि नियमाश्च ये ।
न सिद्धयन्ति प्रदुष्टस्य भावदोष उपागते ॥ १८१ ॥
बहिः कर्म्माणि सर्व्वाणि प्रसिद्धयन्ति कदा च न ।
अन्तर्भावप्रदुष्टस्य कुर्व्वतोऽपि पराक्रमान् ॥ १८२ ॥
सर्व्वस्वमपि यो दद्यात् कलुषेणान्तरात्मना ।
न तेन धर्म्मभाक्स्याद्भाव एवात्र कारणं ॥ १८३ ॥



एवं देवाः सपितर ऋषयो मनवस्तथा ।
तेषां स्थानमसुष्मिंस्तु संस्थितानां प्रचक्ष्यते ॥ १८४ ॥
अष्टाऽशीतिसहस्राणि ऋषीणामूर्द्ध्वरेतसां ।
स्मृतन्तु तेषां तत्स्थानं तदेव गुरुवासिनां ॥ १८५ ॥
समर्षीणान्तु यत्स्थानं स्मृतन्तद्वै दिवौकसां ।
प्राजापत्यं गृहस्थानां न्यासिनां ब्रह्मणः क्षयः ।
योगिनामस्तं स्थानं नानाधीनां न विद्यते ॥ १८६ ॥
स्थानान्याश्रमिणां तानि ये स्वधर्म्मे व्यवस्थिताः ।
चत्वार एते पन्थानो देवयाना विनिर्म्मिताः ॥ १८७ ॥
ब्रह्मणा लोकतन्त्रेण आद्ये मन्वन्तरे भुवि ।
पन्थानो देवयानाय तेषां द्वारं रविः स्मृतः ॥ १८८ ॥
तथैव पितृयानानां चन्द्रमा द्वारमुच्यते ॥
एवं वर्णाश्रमाणां वै प्रविभागे कृते तदा ।
यदास्य न व्यवर्त्तन्त प्रजा वर्णाश्रमात्मिकाः ॥ १८९ ॥
ततोऽन्या मानसीः सोऽथ चेतामध्येऽसृजत् प्रजाः ।
आत्मनः स्वशरीराच्च तुल्याश्चैवात्मना तु वै ॥ १९० ॥
तस्मिन्नेतायुगे त्वाद्ये मध्यं प्राप्ते क्रमेण तु ।
ततोऽन्या मानसीस्तत्र प्रजाः स्रष्टुं प्रचक्रमे ॥ १९१ ॥
ततः सत्त्वरजोद्रिक्ताः प्रजाः सोऽथासृजत्प्रभुः ।
धर्म्मार्थकाममोक्षाणां वार्त्तायाश्चैव साधिकाः ॥ १९२ ॥
देवाश्च पितरश्चैव ऋषयो मनवस्तथा ।
युगानुरूपा धर्म्मेण यैरिमा विचिताः प्रजाः ॥ १९३ ॥
उपस्थिते तदा तस्मिन् प्रजाधर्मे स्वयम्भुवः ।

अभिदध्यौ प्रजाः सर्व्वाः नानारूपास्तु मानसीः॥ १९४॥
पूर्व्वोक्ता या मया तुभ्यञ्जनलोकं समाश्रिताः।
कल्पेऽतीते तु ते ह्यासन् देवाद्यास्तु प्रजा इह॥ १९५॥
ध्यायतस्तस्य ताः सर्व्वाः सम्भूत्यर्थमुपस्थिताः।
मन्वन्तरक्रमेणेह कनिष्ठे प्रथमे मताः॥ १९६॥
ख्यात्यानुबन्धैस्तैस्तैस्तु सर्व्वार्थैरिह भाविताः।
कुशलाकुशलप्रायैः कर्म्मभिस्तैः सदा प्रजाः।
तत्कर्म्मफलशेषेण उपष्टब्धाः प्रजज्ञिरे॥ १९७॥
देवासुरपितृत्वैश्च पशुपक्षिसरीसृपैः।
वृक्षनारकिकीटत्वैस्तैस्तैर्भावैरुपस्थिताः।
आधीनार्थं प्रजानाञ्च आत्मनो वै विनिर्म्ममे॥ १९८॥

इति श्रीमहापुराणे वायुप्रोक्ते चतुराश्रविभागो नामाष्टमोऽध्यायः।

---

# अथ नवमोऽध्यायः।

## देवादिसृष्टिवर्णनं।

---

सूत उवाच। ततोऽभिध्यायतस्तस्य जज्ञिरे मानसीप्रजाः।
तच्छरीरसमुत्पन्नैः कार्य्यैस्तैः कारणैः सह।
क्षेत्रज्ञाः समवर्त्तन्त गात्रेभ्यस्तस्य धीमतः॥ १॥
ततो देवासुरपितॄन् मानवञ्च चतुष्टयं।
सिसृक्षुरभ्यांस्येतांश्च स्वात्मना समयूयुजत्॥ २॥
युक्तात्मनस्ततस्तस्य ततो मात्रा स्वयम्भुवः।
तमभिध्यायतः सर्गं प्रयत्नोऽभूत् प्रजापतेः॥ ३॥
ततोऽस्य जघनात् पूर्व्वमसुरा जज्ञिरे सुताः।
असुः प्राणः स्मृतो विप्रास्तज्जन्मानस्ततोऽसुराः॥ ४॥
यया सृष्टाः सुरास्त्वा तां तनुं सं व्यपोहत।
सापविद्धातनुस्तेन सद्योरात्रिरजायत॥ ५॥
सा तमोबहुला यस्मात्ततो रात्रिस्त्रियामिका।
आहतास्तमसा रात्रौ प्रजास्तस्मात् स्वयम्भुवः॥ ६॥
दृष्ट्वा सुरांस्तु(१) देवेशस्तनुमन्यामपद्यत।
अव्यक्तां सत्त्वबहुलां ततस्तां सोऽभ्ययूयुजत्।

---

१ देवांश्च इति ख०।

ततस्त्वां युञ्जतस्तस्य प्रियमासीत् प्रभोः किल ॥ ७ ॥
ततो मुखे समुत्पन्ना दीव्यतस्तस्य देवताः।
यतोऽस्य दीव्यतो जातास्तेन देवाः प्रकीर्त्तिताः ॥ ८ ॥
धातुर्द्दिवीति यः प्रोक्तः क्रीड़ायां स विभाव्यते।
तस्यान्तन्वान्तु दिव्यायां जज्ञिरे तेन देवताः ॥ ९ ॥
देवान् सृष्ट्वाथ देवेशस्तनुमन्यामपद्यत।
सत्त्वमाचार्त्तिकां देवस्ततोऽन्यां सोऽभ्यपद्यत ॥ १० ॥
पितृवन्मन्यमानस्तान् पुत्रान् प्राध्यायत प्रभुः।
पितरो ह्युपपन्नाभ्यां(१) रात्राङ्गोरन्तरासृजत्।
तस्मात्ते पितरो देवाः पुत्रत्वन्तेन तेषु तत्॥ ११ ॥
यया सृष्टास्तु पितरस्तान्तनुं स व्यपोहत।
सापविद्धा तनुस्तेन सद्यः सन्ध्या प्रजायत ॥ १२ ॥
तस्मादहस्तु देवानां रात्रिर्य्या सासुरी स्मृता।
तयोर्मध्ये तु वै पैत्री या तनुः सा गरीयसी ॥ १३ ॥
तस्माद्देवासुराः सर्व्वे ऋषयो मनवस्तथा।
ते युक्तास्तामुपासन्ते ब्रह्मणो मध्यमान्तनुं ॥ १४ ॥
ततोऽन्यां स पुनर्ब्रह्मा तनुं वै प्रत्यपद्यत।
रजोमाचार्त्तिकायान्तु मनसा सोऽसृजत् प्रभुः ॥ १५ ॥
रजःप्रायात् ततः सोऽथ मानसानसृजत् सुतान्।
मनसस्तु ततस्तस्य मानसा जज्ञिरे प्रजाः ॥ १६ ॥
दृष्ट्वा पुनः प्रजास्वापि स्वान्तनुन्तामपोहत।

१ पाठोऽयं न समीचीनः।



सापविद्धा तनुस्तेन ज्योत्स्ना सद्यस्त्वजायत ॥ १७ ॥
तस्माद्वयन्ति संहृष्टा ज्योत्स्नाया उद्भवे प्रजाः।
इत्येतास्तनवस्तेन व्यपविद्धा महात्मना ॥ १८ ॥
सद्योरात्राहनी चैव सन्ध्या ज्योत्स्ना च जज्ञिरे।
ज्योत्स्ना सन्ध्या तथाहश्च सत्त्वमाचात्मकं स्वयं।
तमोमाचात्मिका रात्रिः सा वै तस्मात् त्रियामिका ॥ १९ ॥
तस्माद्देवा दिव्यतस्त्वा हृष्टाः सृष्टा मुखात्तु वै।
यस्मात्तेषां दिवा जन्म बलिनस्तेन ते दिवा ॥ २० ॥
तन्वा यदसुरान् रात्रौ जघनादसृजत् प्रभुः।
प्राणेभ्यो रात्रिजन्मानो ह्यसह्या निशि तेन ते ॥ २१ ॥
एतान्येव भविष्याणां देवानामसुरैः सह।
पितॄणां मानवानाञ्च अतीतानागतेषु वै।
मन्वन्तरेषु सर्व्वेषाम् निमित्तानि भवन्ति हि ॥ २२ ॥
ज्योत्स्ना रात्राहनी सन्ध्या चत्वार्य्याभासितानि वै।
भान्ति यस्मात्ततो भासि भाशब्दोऽयं मनीषिभिः।
व्याप्तिदीप्तां निगदितः पुनश्चाह प्रजापतिः ॥ २३ ॥
सोभ्यांस्येतानि दृष्ट्वा तु देवदानवमानवान्।
पितॄंश्च वासृजत्सोऽन्यानात्मनो विबुधान् पुनः ॥ २४ ॥
तामुत्सृज्य तनुं क्षत्तस्तन्ततोऽन्यामसृजत् प्रभुः।
मूर्त्तिं रजस्तमःप्रायां पुनरेवाभ्य यूयुजत् ॥ २५ ॥
अन्धकारे क्षुधाविष्टः ततोऽन्यां सृजते पुनः।
तेन सृष्टाः क्षुधात्मानस्ते भांस्यादातुमुद्यताः ॥ २६ ॥
अभांस्येतानि रक्षाम उक्तवन्तश्च तेषु च।

राक्षसास्ते स्मृता लोके क्रोधात्मानो निशाचराः ॥ २७ ॥
येऽब्रुवन् क्षिणमोऽश्नांसि तेषां सृष्टाः परस्परं ।
तेन ते कर्म्मणा यक्षा गुह्यकाः क्रूरकर्म्मिणः ॥ २८ ॥
रक्षणे पालने चापि धातुरेष विभाव्यते ।
य एष क्षितिधातुर्वै क्षयणे सन्निरुच्यते ॥ २९ ॥
तान्दृष्ट्वा ह्यप्रियेणास्य केशाः शीर्य्यन्त धीमतः ।
शीतोष्णाशोक्षिता ह्यूर्ध्वन्तदारोहन्त तं प्रभुं ॥ ३० ॥
क्षीना मच्छिरसो व्याला यस्माच्चैवापसर्पिताः ।
व्यालात्मानः स्मृता व्यालात् क्षीनत्वादहयः स्मृताः ॥ ३१ ॥
पन्नत्वात्पन्नगाश्चैव सर्पाश्चैवापसर्पिणः ।
तेषां पृथिव्यां निलया सूर्य्याचन्द्रमसोरधः ॥ ३२ ॥
तस्य क्रोधोद्भवो योऽसावग्निगर्भसुदारुणः ।
स तु सर्पसहोत्पन्नानाविवेश विषात्मिकान् ॥ ३३ ॥
सर्प्यान् सृष्ट्वा ततः क्रोधात् क्रोधात्मानो विनिर्म्ममे ।
वर्णेन कपिशेनोग्रास्ते भूताः पिशिताशनाः ॥ ३४ ॥
भूतत्वात्ते स्मृताः भूताः पिशाचाः पिशितात्मनात् ।
वयतो गास्ततस्तस्य गन्धर्व्वा जज्ञिरे तदा ॥ ३५ ॥
ध्यायतीत्येष धातुर्वै यात्रार्थे परिपठ्यते ।
पिबतो जज्ञिरे मास्तु गन्धर्व्वास्ते न ते स्मृताः ॥ ३६ ॥
अष्टास्वेतासु सृष्टासु देवयोनिषु स प्रभुः ।
ततः स्वच्छन्दतोऽन्यानि वयांसि वयसोऽसृजत् ॥ ३७ ॥
छादयन्तस्तानि छदांसि वयसोपि वयांस्यति ।
शून्यान्दृष्ट्वा तु देवो वै सृजत्पक्षिगणानपि ॥ ३८ ॥



मुखतोऽजान् ससर्ज्जाथ वक्षसश्च वयोऽसृजत् ।
गार्श्वैवाथोदराद् ब्रह्मा पार्श्वाभ्याश्च विनिर्म्ममे ॥ ३९ ॥
पन्नगाश्चाश्वान् समातङ्गान्गरभान् गवयान् मृगान् ।
उष्ट्रानश्वतरांश्चैव ताश्वान्याश्चैव जातयः ॥ ४० ॥
ओषध्यः फलमूलानि रोमतस्तस्य जज्ञिरे ।
एवं पश्वोषधीः सृष्ट्वा न्ययुञ्जत्प्रोऽध्वरे प्रभुः ॥ ४१ ॥
तस्मादादौ तु कल्पस्य त्रेतायुगमुखे तदा ।
गौरजः पुरुषो मेषो ह्यश्वोऽश्वतरगर्दभौ ।
एतान् ग्राम्यान्पशूनाहुरारण्यांश्च निबोधत ॥ ४२ ॥
श्वापदा द्विखुरो हस्ती वानरः पक्षिपञ्चमाः ।
उन्दकाः पशवः सृष्टाः सप्तमास्तु सरीसृपाः ॥ ४३ ॥
गायत्रं वरणञ्चैव त्रिष्टुत्सौम्यं रथन्तरं ।
अग्निष्टोमञ्च यज्ञानां निर्म्ममे प्रथमान्मुखात् ॥ ४४ ॥
छन्दांसि चैष्टुभञ्चैव स्तोमं पञ्चदशन्तथा ।
बृहत्सामममथोक्थञ्च दक्षिणात्सोऽसृजन्मुखात् ॥ ४५ ॥
सामानि जगतीच्छन्दस्तोमं पञ्चदशन्तथा ।
वैरूपमतिरात्रञ्च पश्चिमादसृजन्मुखात् ॥ ४६ ॥
एकविंशमथर्वाणमाप्तोर्य्यामाणमेव च ।
अनुष्टुभं सवैराजमुत्तरादसृजन्मुखात् ॥ ४७ ॥
विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च ।
वयांसि च ससर्ज्जादौ कल्पस्य भगवान् प्रभुः ॥ ४८ ॥
उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे ।
ब्रह्मणस्तु प्रजासर्गं सृजतो हि प्रजापतेः ॥ ४९ ॥

सृष्ट्वा चतुष्टयं पूर्व्वं देवासुरपितॄन् प्रजाः ।
ततः सृजति भूतानि स्थावराणि चराणि च ॥ ५० ॥
यक्षान् पिशाचान् गन्धर्व्वान् तथैवाप्सरसाङ्गणान् ।
नरकिन्नरराक्षांसि वयःपशुमृगोरगान् ॥ ५१ ॥
अव्ययञ्च व्ययञ्चैव यदिदं स्थाणुजङ्गमं ।
तेषां ये यानि कर्म्माणि प्राक्सृष्ट्यां प्रतिपेदिरे ।
तान्येव प्रतिपद्यन्ते सृज्यमानाः पुनः पुनः ॥ ५२ ॥
हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्मानृतानृते ।
तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते ॥ ५३ ॥
महाभूतेषु नानात्वमिन्द्रियार्थेषु मूर्त्तिषु ।
विनियोगञ्च भूतानां धातैव व्यदधात् स्वयं ॥ ५४ ॥
केचित् पुरुषकारन्तु प्राहुः कर्म्म च मानवाः ।
दैवमित्यपरे विप्राः स्वभावं दैवचिन्तकाः ॥ ५५ ॥
पौरुषं कर्म्म दैवञ्च फलवृत्तिस्वभावतः ।
न चैकं न पृथग्भावमधिकं न तयोर्विदुः ।
एतदेवञ्च नैकञ्च न चोभे न च वाप्युभे ॥ ५६ ॥
कर्म्मस्थान् विषयान्ब्रूयुः सत्त्वस्थाः समदर्शिनः ।
नामरूपञ्च भूतानां कृतानाञ्च प्रपञ्चनं ।
वेदशब्देभ्य एवादौ निर्म्ममे स महेश्वरः ॥ ५७ ॥
ऋषीणां नामधेयानि याश्च देवेषु दृष्टयः ।
शर्व्वर्य्यन्ते प्रसूतानां तान्येवास्य दधाति सः ॥ ५८ ॥
यथर्त्तावृतुलिङ्गानि नानारूपाणि पर्य्यये ।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥ ५९ ॥



एवम्विधासु सृष्टासु ब्रह्मणाऽव्यक्तजन्मना ।
शर्व्वर्य्यन्ते प्रदृश्यन्ते सिद्धिमास्थित्य मानसीं ॥ ६० ॥
एवम्भूतानि सृष्टानि चराणि स्थावराणि च ।
यदास्य ताः प्रजाः सृष्टाः न व्यवर्धन्त धीमतः ॥ ६१ ॥
अथान्यान्मानसान्पुत्रान् सदृशानात्मनोऽसृजत् ।
भृगुं पुलस्त्यं पुलहं क्रतुमाङ्गिरसन्तथा ॥ ६२ ॥
मरीचिं दक्षमत्रिञ्च वसिष्ठञ्चैव मानसं ।
नव ब्रह्माण इत्येते पुराणे निश्चयङ्गताः ।
तेषां ब्रह्मात्मकानां वै सर्व्वेषां ब्रह्मवादिनां ॥ ६३ ॥
ततोऽसृजत्पुनर्ब्रह्मा रुद्रं रोषात्मसम्भवं ।
सङ्कल्पञ्चैव धर्म्मञ्च पूर्व्वेषामपि पूर्व्वजः ॥ ६४ ॥
अग्रे ससर्ज्ज वै ब्रह्मा मानसानात्मनः समान् ।
सनन्दनं ससनकं विद्वांसञ्च सनातनं ॥ ६५ ॥
सनत्कुमारञ्च विभुं सनकञ्च सनन्दनं ।
न ते लोकेषु सर्ज्जन्ते निरपेक्षाः सनातनाः ॥ ६६ ॥
सर्व्वे ते ह्यागतज्ञाना वीतरागा विमत्सरा ।
तेष्वेवं निरपेक्षेषु लोकवृत्तानुकारणात्(१) ॥ ६७ ॥
हिरण्यगर्भो भगवान् परमेष्ठी ह्यचिन्तयत् ।
तस्य रोषात्समुत्पन्नः पुरुषोऽर्कसमद्युतिः ।
अर्द्धनारीनरवपुः तेजसा ज्वलनोपमः ॥ ६८ ॥
सर्व्वन्तेजोमयञ्जातमादित्यसमतेजसं ।

१ लोकवृत्तार्थकारणादिति ख० ।

विभजात्मानमित्युक्ता तत्रैवान्तरधीयत ॥ ६९ ॥
एवमुक्ता द्विधाभूतः पृथक् स्त्री पुरुषः पृथक्।
स चैकादशधा जज्ञे अर्द्धमात्मानमीश्वरः ॥ ७० ॥
तेनोक्तास्ते महात्मानः सर्व्व एव महात्मना।
जगतो बहुलीभावमधिकृत्य हितैषिणः ॥ ७१ ॥
लोकवृत्तान्तहेतोर्हि प्रयतध्वमतन्द्रिताः।
विश्वं विश्वस्य लोकस्य स्थापनाय हिताय च ॥ ७२ ॥
एवमुक्तास्तु रुरुदुर्दुद्रुवुश्च समन्ततः।
रोदनाद्रावणाच्चैव रुद्रा नाम्नेतिविश्रुताः ॥ ७३ ॥
यैर्हि व्याप्तमिदं सर्व्वं त्रैलोक्यं सचराचरं।
तेषामनुचरा लोके सर्व्वलोकपरायणाः(१) ॥ ७४ ॥
नैकनागायुतबला विक्रान्ताश्च गणेश्वराः।
तत्र या सा महाभागा शङ्करस्यार्द्धकायिनी ॥ ७५ ॥
प्रागुक्ता तु मया तुभ्यं स्त्री स्वयम्भोर्मुखोद्गता।
कायार्द्धं दक्षिणन्तस्याः शुक्लं वामन्तथाऽसितं ॥ ७६ ॥
आत्मानं विभजस्वेति सोक्ता देवी स्वयम्भुवा।
सा तु प्रोक्ता द्विधाभूता शुक्ला कृष्णा च वै द्विजाः।
तस्या नामानि वक्ष्यामि शृणुध्वं सुसमाहिताः ॥ ७७ ॥
स्वाहा स्वधा महाविद्या मेधा लक्ष्मीः सरस्वती।
अर्पणा चैकपर्णा च तथा स्यादेव पाटला ॥ ७८ ॥
उमा हैमवती षष्ठी कल्याणी चैव नामतः।
ख्यातिः प्रज्ञा महाभागा लोके गौरीतिविश्रुता ॥ ७९ ॥

१ वरा गणा इति घ०, ङ०, च।



विश्वरूपमथार्य्यायाः पृथग्देहविभावनात्।
शृणु संक्षेपतस्तस्या यथावदनुपूर्व्वशः ॥ ८० ॥
प्रकृतिर्निर्ऋता रौद्री दुर्गा भद्रा प्रमाथिनी।
कालरात्रिर्म्महामाया रेवती भूतनायिका ॥ ८१ ॥
द्वापरान्तविकारेषु देव्या नामानि मे शृणु।
गौतमी कौशिकी आर्य्या चण्डी कात्यायनी सती ॥ ८२ ॥
कुमारी यादवी देवी वरदा कृष्णपिङ्गला (१)।
बर्हिर्ध्वजा(२) शूलधरा परमब्रह्मचारिणी ॥ ८३ ॥
माहेन्द्री चेन्द्रभगिनी हृषकन्यैकवाससी।
अपराजिता बहुभुजा प्रगल्भा सिंहवाहिनी ॥ ८४ ॥
एकानसा दैत्यहनी माया महिषमर्द्दिनी।
अमोघा विन्ध्यनिलया विक्रान्ता गणनायिका ॥ ८५ ॥
देवीनामविकाराणि इत्येतानि यथाक्रमं।
भद्रकाल्यास्तवोक्तानि देव्या नामानि तत्त्वतः ॥ ८६ ॥
ये पठन्ति नरास्तेषां विद्यते न पराभवः।
अरण्ये प्रान्तरे वापि पुरे वापि गृहेपि वा ॥ ८७ ॥
रक्षामेतां प्रयुञ्जीत जले वापि स्थलेपि वा।
व्याघ्रकुम्भीरचौरेभ्यो भूतस्थाने विशेषतः।
आधिष्वपि च सर्व्वासु देव्या नामानि कीर्त्तयेत् ॥ ८८ ॥
अर्भकग्रहभूतैश्च पूतनामाष्टभिः सदा।
अभ्यर्दितानां बालानां रक्षामेतां प्रयोजयेत् ॥ ८९ ॥

१ कृत्तपिङ्गला इति।
२ बर्हिर्ध्वजेति ख०।

महादेवी कुले द्वे तु प्रज्ञा श्रीश्च प्रकीर्त्तिते ।
आभ्यां देवीसहस्राणि यैर्व्याप्तमखिलं जगत् ॥ ९० ॥
साऽसृजद्व्यवसायन्तु धर्म्मं भूतसुखावहं ।
सङ्कल्पश्चैव कल्पादौ जज्ञिरेऽव्यक्तयोनितः ॥ ९१ ॥
मानसश्च रुचिर्नाम विज्ञेयो ब्रह्मणः सुतः ।
प्राणात् स्वादसृजद्दक्षश्चक्षुर्भ्यां च मरीचिकं ॥ ९२ ॥
भृगुस्तु हृदयाज्जज्ञे ऋषिः सलिलजन्मनः ।
शिरसोऽङ्गिरसश्चैव श्रोत्रादत्रिस्तथैव च ॥ ९३ ॥
पुलस्त्यश्च तथोदानाद्व्यानाच्च पुलहं पुनः ।
समानजं वशिष्ठन्तु अपानान्निर्ममे क्रतुं ॥ ९४ ॥
अभिमानात्मकं भद्रं निर्ममे नीललोहितं ।
इत्येते ब्रह्मणः पुत्राः प्राणजा द्वादश स्मृताः ॥ ९५ ॥
इत्येते मानसाः पुत्रा विज्ञेया ब्रह्मणः सुताः ।
भृग्वादयस्तु ये सृष्टा न चैते ब्रह्मवादिनः ॥ ९६ ॥
गृहमेधिनः पुराणास्ते धर्म्मस्तै प्राक्प्रवर्त्तितः ।
द्वादशैते प्रवर्त्तन्ते सह रुद्रेण वै प्रजाः ॥ ९७ ॥
ऋभुः सनत्कुमारस्तु द्वावेतावूर्द्धरेतसौ ।
पूर्व्वोत्पन्नौ पुरा तेभ्यः सर्व्वेषामपि पूर्व्वजौ ॥ ९८ ॥
व्यतीते प्रथमे कल्पे पुराणे लोकसाधकौ ।
वैराजे तावुभौ लोके तेजः संक्षिप्य चास्थितौ ॥ ९९ ॥
तावुभौ योगधर्म्माणावारोप्यात्मानमात्मनि ।
प्रजाधर्म्मञ्च कामञ्च वर्त्तयेतां महौजसा ॥ १०० ॥
यथोत्पन्नस्तथैवैष कुमार इति चोच्यते ।



तस्मात्सनत्कुमारोयमिति नामास्य कीर्त्तितं ॥ १०१ ॥
तेषां द्वादश ते वंशा दिव्या देवगुणान्विताः ।
क्रियावन्तः प्रजावन्तो महर्षिभिरलङ्कृताः ॥ १०२ ॥
इत्येष करणोद्भूतो लोकान् स्रष्टुं स्वयम्भुवः ।
महदादिविशेषान्तो विकारः प्रकृतेः स्वयं ॥ १०३ ॥
चन्द्रसूर्य्यप्रभालोको ग्रहनक्षत्रमण्डितः ।
नदीभिश्च समुद्रैश्च पर्व्वतैश्च समावृतः ॥ १०४ ॥
पुरैश्च विविधाकारैः शैलैर्ज्जनपदैस्तथा ।
तस्मिन् ब्रह्मवनेऽव्यक्ते ब्रह्मा चरति शर्व्वरीं ॥ १०५ ॥
अव्यक्तबीजप्रभवस्तस्यैवानुग्रहोत्थितः ।
बुद्धिस्कन्धमयश्चैव इन्द्रियाङ्कुरकोटरः ॥ १०६ ॥
महाभूतप्रशाखश्च विशेषैः पत्रवांस्तथा ।
धर्म्माधर्म्मसुपुष्पस्तु सुखदुःखफलोदयः ॥ १०७ ॥
आजीवः सर्व्वभूतानामयं वृक्षः सनातनः ।
एतद् ब्रह्मबलञ्चैव ब्रह्मवृक्षस्य तस्य ह ॥ १०८ ॥
अव्यक्तं कारणं यत्तन्नित्यं सदसदात्मकं ।
इत्येषोऽनुग्रहः सर्गो ब्रह्मणः प्राकृतस्तु यः ॥ १०९ ॥
मुख्यादयस्तु षट्सर्गा वैकृता बुद्धिपूर्व्वकाः ।
वैकाले समवर्त्तन्त ब्रह्मणस्तेऽभिमानिनः ॥ ११० ॥
सर्गाः परस्परस्याथ कारणन्ते बुधैः स्मृताः ।
द्विजौ सुपर्णौ सयुजौ सखायौ पटविद्रुमौ ॥ १११ ॥
एकस्तु यो द्रुमं वेत्ति नान्यः सर्व्वात्मनस्ततः ।
द्यौर्मूर्द्धानं यस्य विप्रास्तुवन्ति

खन्नाभिं वै चन्द्रसूर्यौ च नेत्रे।
हिंग्रः श्रोत्रे चरणौ चास्य भूमिः
सोऽचिन्त्यात्मा सर्व्वभूतप्रसूतिः॥ ११२॥
वक्त्रादस्य ब्राह्मणाः संप्रसूताः
यद्दक्षस्तः क्षत्रियाः पूर्व्वभागे।
वैश्यास्योरोर्थस्य पद्भ्यां च शूद्राः
सर्व्ववर्णा गात्रतः संप्रसूताः॥ ११३॥
महेश्वरः परोऽव्यक्तादण्डमव्यक्तसंभवं।
अण्डाज्जज्ञे पुनर्ब्रह्मा येन लोकाः कृतास्त्विमे॥ ११४॥

इति श्रीमहापुराणे वायुप्रोक्ते देवादिसृष्टिवर्णनं
नाम नवमोऽध्यायः।

---

# अथ दशमोऽध्यायः।

---

## मन्वन्तरवर्णनं।

सूत उवाच। एवं भूतेषु लोकेषु ब्रह्मणा लोककर्त्तृणा।
यदा ता न प्रवर्त्तन्ते प्रजाः केनापि हेतुना॥ १॥
तमोमात्रावृतो ब्रह्मा तदाप्रभृति दुःखितः।
ततः स विदधे बुद्धिमर्थनिश्चयगामिनीं॥ २॥
अथात्मनि समस्तात्तमोमात्रां नियामिकां।
राजसत्वं पराजित्य वर्त्तमानं स धर्म्मतः।
तप्यते तेन दुःखेन शोकक्लिष्टे जगत्पतिः॥ ३॥
तमश्च व्यनुदत्तस्माद्रजस्तमसमावृणोत्॥ ४॥
तत्तमः प्रतिनुत्तं वै मिथुनं स व्यजायत।
अधर्म्माचरणाज्जज्ञे हिंसा शोकादजायत॥ ५॥
ततस्तस्मिन् समुद्भूते मिथुने चरणात्मनि।
ततश्च भगवानासीत् प्रीतश्चैवमभिस्मियत्॥ ६॥
स्वां तनुं स ततो ब्रह्मा तामपोहद्भास्वरां।
द्विधाकरोत्स तं देहमर्द्धेन पुरुषोऽभवत्॥ ७॥
अर्द्धेन नारी सा तस्य शतरूपा व्यजायत।
प्राकृतां भूतधात्रीं तां कामान्वै सृष्टवान् विभुः॥ ८॥

सा दिवं पृथिवीञ्चैव महिम्ना व्याप्य धिष्ठिता ।
ब्रह्मणः सा तनुः पूर्व्वादिमा ह्युत्थ तिष्ठति ॥ ९ ॥
या त्वर्द्धात् सृजते नारी शतरूपा व्यजायत ।
सा देवी नियुतन्तप्त्वा तपः परमदुश्चरं ॥ १० ॥
भर्त्तारन्दीप्तयशसं पुरुषं प्रत्यपद्यत ।
स वै स्वायम्भुवः पूर्व्वं पुरुषो मनुरुच्यते ॥ ११ ॥
तस्यैकसप्ततियुगं मन्वन्तरमिहोच्यते ।
लब्ध्वा तु पुरुषः पत्नीं शतरूपामयोनिजां ॥ १२ ॥
तया स रमते सार्द्धं तस्मात्सा रतिरुच्यते ।
प्रथमः संप्रयोगः स कल्पादौ समवर्त्तत ॥ १३ ॥
विराजमसृजत् ब्रह्मा सोऽभवत् पुरुषो विराट् ।
सम्मान्मानसरूपात्तु वैराजस्तु मनुः स्मृतः ॥ १४ ॥
स वैराजः प्रजासर्गः स सर्गे पुरुषो मनुः ।
वैराजात्पुरुषाद्वीराच्छतरूपा व्यजायत ॥ १५ ॥
प्रियव्रतोत्तानपादौ पुत्रौ पुत्रवतां वरौ ।
कन्ये द्वे च महाभागे याभ्यां जाताः प्रजास्त्विमाः ॥ १६ ॥
देवी नाम्ना तथाकूतिः प्रसूतिश्चैव ते शुभे ।
स्वायम्भुवः प्रसूतिन्तु दक्षाय व्यसृजत् प्रभुः ॥ १७ ॥
प्राणो दक्षस्तु विज्ञेयः सङ्कल्पो मनुरुच्यते ।
रुचेः प्रजापतेश्चैव आकूतिं प्रत्यपादयत् ॥ १८ ॥
आकूत्यां मिथुनं जज्ञे मानसस्य रुचेः शुभं ।
यज्ञश्च दक्षिणा चैव यमकौ सम्बभूवतुः ॥ १९ ॥
यज्ञस्य दक्षिणायाञ्च पुत्रा द्वादश जज्ञिरे ।



यामा इति समाख्याता देवाः स्वायम्भुवेऽन्तरे ॥ २० ॥
यमस्य पुत्रा यज्ञस्य तस्माद्यामास्तु ते स्मृताः ।
अजिताश्चैव शुक्राश्च गणौ द्वौ ब्रह्मणः स्मृतौ ॥ २१ ॥
यामाः पूर्व्वं परिक्रान्ताः यतः संज्ञा दिवौकसः ।
स्वायम्भुवसुतायान्तु प्रसूत्यां लोकमातरः ॥ २२ ॥
तस्यां कन्याश्चतुर्विंशद्दक्षस्त्वजनयत् प्रभुः ।
सर्व्वास्ताश्च महाभागाः सर्व्वाः कमललोचनाः ॥ २३ ॥
योगपत्न्यश्च ताः सर्व्वाः सर्व्वास्ता योगमातरः ।
श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा ।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिःकीर्त्तिस्त्रयोदशी ॥ २४ ॥
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः ।
द्वाराख्येतानि चैवास्य विहितानि स्वयम्भुवा ॥ २५ ॥
ताभ्यः शिष्टा यवीयस्य एकादश सुलोचनाः ।
ख्यातिः सत्यथ संभूतिः स्मृतिः प्रीतिःक्षमा तथा ॥ २६ ॥
सन्नतिश्चानसूया च ऊर्ज्जा स्वाहा स्वधा तथा ।
तास्ततः प्रत्यपद्यन्त पुनरन्ये महर्षयः ॥ २७ ॥
रुद्रो भृगुर्मरीचिश्च अङ्गिराः पुलहः क्रतुः ।
पुलस्त्योऽत्रिर्वशिष्ठश्च पितरोऽग्निस्तथैव च ॥ २८ ॥
सतीं भवाय प्रायच्छत् ख्यातिञ्च भृगवे तथा ।
मरीचये च सम्भूतिं स्मृतिमङ्गिरसे ददौ ॥ २९ ॥
प्रीतिञ्चैव पुलस्त्याय क्षमां वै पुलहाय च ।
क्रतवे सन्नतिं नाम अनसूयान्तथाऽत्रये ॥ ३० ॥
ऊर्ज्जां ददौ वशिष्ठाय स्वाहां वै ह्यग्नये ददौ ।

स्वधाश्चैव पितृभ्यस्तु तास्वपत्यानि वक्ष्यते ॥ २१ ॥
एते सर्व्वे महाभागाः प्रजाः स्वानुष्ठिताः स्थिताः।
मन्वन्तरेषु सर्व्वेषु यावदाकल्पसंप्लवं ॥ २२ ॥
अद्धा कामं विजज्ञे वै दर्पो लक्ष्मीसुतः स्मृतः।
धृत्यास्तु नियमः पुत्रस्तुष्याः सन्तोष उच्यते ॥ २३ ॥
पुष्ट्या लाभः सुतश्चापि मेधापुत्रः श्रुतस्तथा।
क्रियायास्तु नयः प्रोक्तो दण्डः समय एव च ॥ २४ ॥
बुद्देर्बोधसुतश्चापि अप्रमादश्च तावुभौ।
लज्जाया विनयः पुत्रो व्यवसायो वपुःसुतः (१) ॥ २५ ॥
क्षेमः शान्तिसुतश्चापि सुखं सिद्धेर्व्यजायत।
यशः कीर्त्तेः सुतश्चापि इत्येते धर्म्मसूनवः ॥ २६ ॥
कामस्य हर्षः पुत्रो वै देव्या रत्या व्यजायत।
इत्येष वै सुखोदर्कः सर्गो धर्म्मस्य कीर्त्तितः ॥ २७ ॥
जज्ञे हिंसा त्वधर्म्माद्वै निर्ऋतिस्त्वनृतावुभौ।
निर्ऋत्यानृतयोर्जज्ञे भयं नरक एव च ॥ २८ ॥
माया च वेदना चापि मिथुनद्वयमेतयोः।
भयाज्जज्ञेऽथ सा माया मृत्युं भूतापहारिणं ॥ २९ ॥
वेदनायास्ततश्चापि दुःखं जज्ञेऽथ रौरवात्।
मृत्योर्व्याधिज्वराः शोकाः क्रोधोऽसूया च जज्ञिरे।
दुःखान्तराः स्मृता ह्येते सर्व्वे चाधर्म्मलक्षणाः ॥ ४० ॥
तेषां भार्य्याऽस्ति पुत्रो वा सर्व्वे निधनाः स्मृताः।

(१) वपोः सुत इति घ०, ङ० च।



इत्येषतामसः सर्गो जज्ञे धर्म्मनियामकः ॥ ४१ ॥
प्रजाः सृजेति व्यादिष्टो ब्रह्मणा नीललोहितः।
सोऽभिध्याय सतीं भार्य्यामिमामे ह्यात्मसम्भवां ॥ ४२ ॥
नाधिकान्न च हीनांस्तान्नावसानान्नतः समान्।
सहस्रं हि सहस्राणामसृजत् क्षमिवाससा।
तुल्याश्चैवात्मनः सर्व्वे रूपतेजोबलश्रुतैः ॥ ४३ ॥
पिङ्गलान् सन्निषङ्गांश्च सकपर्दान् विलोहितान्।
विवासान् हरिकेशांश्च दृष्टिघ्नांश्च कपालिनः ॥ ४४ ॥
बहुरूपान् विरूपांश्च विश्वरूपांश्च रूपिणः।
रथिनो वर्म्मिणश्चैव धन्विनश्च वरूथिनः ॥ ४५ ॥
सहस्रगतबाहूंश्च दिव्यान् भौमान्तरिक्षगान्।
स्थूलशीर्षानष्टदंष्ट्रानुद्विजिह्वान् स्त्रिलोचनान् ॥ ४६ ॥
अन्नादान् पिशितादांश्च आज्यपान् सोमपांस्तथा।
मेदपांश्चातिकायांश्च गिरिकण्ठोग्रमन्यवः ॥ ४७ ॥
सोपासङ्गतलत्रांश्च धन्विनो ह्युपवर्म्मिणः।
आसीनान् धावतश्चैव जृम्भिनश्चैव धिष्ठितान् ॥ ४८ ॥
अध्यापिनोऽथ जपतो युञ्जतोऽध्यायतस्तथा।
ज्वलतो वर्षतश्चैव द्योतमानान् प्रधूपितान् ॥ ४९ ॥
बुद्धान् बुद्धतमांश्चैव ब्रह्मिष्ठान् शुभदर्शनान्।
नीलग्रीवान् सहस्राक्षान् सर्व्वांश्चाथ क्षपाचरान् ॥ ५० ॥
अदृश्यान् सर्वभूतानां महायोगान् महौजसः।
रुदतो द्रवतश्चैव एवं युक्तान् सहस्रशः।
अपातयामानसृजत् रुद्ररूपान् सुरोत्तमान् ॥ ५१ ॥

ब्रह्मा दृष्ट्वा ब्रवीदेतान्मास्राक्षीरीदृशीः प्रजाः ।
स्रष्टव्या नात्मनस्तुल्याः प्रजा नैवाधिकास्त्वया ।
अन्याः सृज त्वं भद्रन्ते स्थितोऽहन्त्वं सृज प्रजाः ॥ ५२ ॥
एते ये वै मया सृष्टा विरूपा नीललोहिताः ।
सहस्राणां सहस्रन्तु आत्मनोपमनिस्विताः ॥ ५३ ॥
एते देवा भविष्यन्ति रुद्रा नाम महाबलाः ।
पृथिव्यामन्तरिक्षे च रुद्रनाम्ना प्रतिश्रुताः ॥ ५४ ॥
शतरुद्रसमाम्नाता भविष्यन्तीह यज्ञियाः ।
यज्ञभाजो भविष्यन्ति सर्व्वे देवयुगैः सह ॥ ५५ ॥
सन्वन्तरेषु ये देवा भविष्यन्तीह च्छन्दजाः ।
तैः सार्द्धमोज्यमानास्ते स्थास्यन्तीह युगच्चयात् ॥ ५६ ॥
एवमुक्तस्तदा ब्रह्मा महादेवेन धीमता ।
प्रत्युवाच तदा भीमं हृष्यमाणः प्रजापतिः ॥ ५७ ॥
एवं भवतु भद्रन्ते यथा ते व्याहृतं प्रभो ।
ब्रह्मणा सननुज्ञाते सदा सर्व्वमभूत्किल ॥ ५८ ॥
ततःप्रभृति देवेशो न प्रासूयत वै प्रजाः ।
ऊर्द्धरेताः स्थितः स्थाणुर्य्यावदाभूतसंप्लवं ।
यस्माच्चोक्तं स्थितोऽस्मीति ततः स्थाणुरिति स्मृतः ॥ ५९ ॥
ज्ञानं वैराग्यमैश्वर्य्यं तपः सत्यं क्षमा धृतिः ।
स्रष्टृत्वमात्मसम्बोधस्त्वधिष्ठातृत्वमेव च ।
अथ यानि दशैतानि नित्यन्तिष्ठन्ति शङ्करे ॥ ६० ॥
सर्व्वान् देवान् ऋषींश्चैव ममेतानसुरैः सह ।
अत्येति तेजसा देवो महादेवस्ततः स्मृतः ॥ ६१ ॥



अत्येति दैवानैश्वर्य्याद्बलेन च महासुरान् ।
ज्ञानेन च मुनीन् सर्व्वान् योगाङ्भूतानि सर्व्वशः ॥ ६२ ॥
ऋषय ऊचुः । योगं तपश्च सत्यञ्च धर्मञ्चापि महामुने ।
माहेश्वरस्य ज्ञानस्य साधनञ्च प्रचक्ष्व नः ॥ ६३ ॥
येन येन च धर्मेण गतिं प्राप्नुवन्ति वै द्विजाः ।
तत् सर्व्वं श्रोतुमिच्छामि योगं माहेश्वरं प्रभो ॥ ६४ ॥
वायुरुवाच । पञ्च धर्म्माः पुराणे तु रुद्रेण समुदाहृताः ।
माहेश्वर्य्यं यथा प्रोक्तं रुद्रैरक्लिष्टकर्म्मभिः ॥ ६५ ॥
आदित्यैर्व्वसुभिः साध्यैरश्विभ्याञ्चैव सर्व्वशः ।
मरुद्भिर्भृगुभिश्चैव ये चान्ये विबुधालयाः ॥ ६६ ॥
यमशुक्रपुरोगैश्च पितृकालान्तकैस्तथा ।
एतैश्चान्यैश्च बहुभिस्ते धर्म्माः पर्य्युपासिताः ॥ ६७ ॥
ते वै प्रक्षीणकर्म्माणः शारदाम्बरनिर्म्मलाः ।
उपासते मुनिगणाः सन्न्यायात्मानमात्मनि ॥ ६८ ॥
गुरुप्रियहिते युक्ता गुरूणां वै प्रियेप्सवः ।
विमुच्य मानुषं जन्म विहरन्ति च देववत् ॥ ६९ ॥
महेश्वरेण ये प्रोक्ताः पञ्च धर्म्माः सनातनाः ।
तान् सर्व्वान् क्रमयोगेन उच्यमानान्निबोधत ॥ ७० ॥
प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा ।
स्मरणञ्चैव योगेऽस्मिन् पञ्च धर्म्माः प्रकीर्त्तिताः ॥ ७१ ॥
तेषां क्रमविशेषेण लक्षणं कारणं तथा ।
प्रवक्ष्यामि तथा तत्त्वं यथा रुद्रेण भाषितं ॥ ७२ ॥

JAN 15 1933



अत्येति देवानैश्वर्य्यादुबलेन च महासुरान् ।
ज्ञानेन च मुनीन् सर्व्वान् योगाद्भूतानि सर्व्वशः ॥ ६२ ॥
ऋषय ऊचुः । योगं तपश्च सत्यञ्च धर्मञ्चापि महामुने ।
माहेश्वरस्य ज्ञानस्य साधनञ्च प्रचक्ष्व नः ॥ ६३ ॥
येन येन च धर्मेण गतिं प्राप्नुवन्ति वै द्विजाः ।
तत् सर्व्वं श्रोतुमिच्छामि योगं माहेश्वरं प्रभो ॥ ६४ ।
वायुरुवाच । पञ्च धर्म्माः पुराणे तु रुद्रेण समुदाहृताः ।
माहेश्वर्य्यं यथा प्रोक्तं रुद्रैरक्लिष्टकर्म्मभिः ॥ ६५ ॥
आदित्यैर्व्वसुभिः साध्यैरश्विभ्याञ्चैव सर्व्वशः ।
मरुद्भिर्भृगुभिश्चैव ये चान्ये विबुधालयाः ॥ ६६ ॥
यमशुक्रपुरोगैश्च पितृकालान्तकैस्तथा ।
एतैश्चान्यैश्च बहुभिस्ते धर्म्माः पर्य्युपासिताः ॥ ६७ ॥
ते वै प्रक्षीणकर्म्माणः शारदाम्बरनिर्म्मलाः ।
उपासते मुनिगणाः सन्न्यायात्मानमात्मनि ॥ ६८ ॥
गुरुप्रियहिते युक्ता गुरूणां वै प्रियेष्वराः ।
विमुच्य मानुषं जन्म विहरन्ति च देववत् ॥ ६९ ॥
महेश्वरेण ये प्रोक्ताः पञ्च धर्म्माः सनातनाः ।
तान् सर्व्वान् क्रमयोगेन उच्यमानान्निबोधत ॥ ७० ॥
प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा ।
स्मरणञ्चैव योगेऽस्मिन् पञ्च धर्म्माः प्रकीर्त्तिताः ॥ ७१ ॥
तेषां क्रमविशेषेण लक्षणं कारणं तथा ।
प्रवक्ष्यामि तथा तत्त्वं यथा रुद्रेण भाषितं ॥ ७२ ॥



730 B582 V.85:1:2-6
1/4bd
85:1:2-6
(730 B582)
LIBRARY UNIVERSITY OF ILLINOIS

प्राणायामगतिश्चापि प्राणस्यायाम उच्यते।
स चापि त्रिविधः प्रोक्तो मन्दो मध्योत्तमस्तथा ॥ ७३ ॥
प्राणानाञ्च निरोधस्तु स प्राणायामसंज्ञितः।
प्राणायामप्रमाणन्तु मात्रा वै द्वादश स्मृताः ॥ ७४ ॥
मन्दो द्वादशमात्रास्तु उद्घातो द्वादश स्मृताः।
मध्यमश्च द्विरुद्घातश्चतुर्विंशतिमात्रिकः ॥ ७५ ॥
उत्तमस्तत्त्रिरुद्घातो मात्राः षट्त्रिंशदुच्यते।
स्वेदकम्पविषादानां जननो ह्युत्तमः स्मृतः ॥ ७६ ॥
इत्येतत् त्रिविधं प्रोक्तं प्राणायामस्य लक्षणं।
प्रमाणञ्च समासेन लक्षणञ्च निबोधत ॥ ७७ ॥
सिंहो वा कुञ्जरो वापि तथाऽन्यो वा मृगो वने।
गृहीतः सेव्यमानस्तु मृदुः समुपजायते ॥ ७८ ॥
तथा प्राणो दुराधर्षः सर्व्वेषामकृतात्मनां।
योगतः सेव्यमानस्तु स एवाभ्यासतो व्रजेत् ॥ ७९ ॥
स चैव हि यथा सिंहः कुञ्जरो वापि दुर्ब्बलः।
कालान्तरवशाद्योगाद्गम्यते परिमर्द्दनात् ॥ ८० ॥
परिधाय मनो मन्दं वश्यत्वं चाधिगच्छति।
परिधाय मनोदेवं तथा जीवति मारुतः ॥ ८१ ॥
वश्यत्वं हि यथा वायुर्गच्छते योगमास्थितः।
तदा स्वच्छन्दतः प्राणं नयते यत्र चेच्छति ॥ ८२ ॥
यथा सिंहो गजो वापि वश्यत्वादवतिष्ठते।
अभयाय मनुष्याणां मृगेभ्यः संप्रवर्त्तते ॥ ८३ ॥
यथा परिचितश्चायं वायुर्वै विश्वतो मुखः।



परिध्यायमानः संरुद्धः शरीरे किल्बिषन्दहेत् ॥ ८४ ॥
प्राणायामेन युक्तस्य विप्रस्य नियतात्मनः।
सर्व्वे दोषाः प्रणश्यन्ति सत्त्वस्थश्चैव जायते ॥ ८५ ॥
तपांसि यानि तप्यन्ते व्रतानि नियमाश्च ये।
सर्व्वयज्ञफलञ्चैव प्राणायामश्च तत्समः ॥ ८६ ॥
अब्बिन्दुं यः कुशाग्रेण मासि मासि समश्नुते।
संवत्सरशतं साग्रं प्राणायामश्च तत्समं ॥ ८७ ॥
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषं।
प्रत्याहारेण विषयान् ध्यानेनानीश्वरान् गुणान् ॥ ८८ ॥
तस्माद्युक्तः सदा योगी प्राणायामपरो भवेत्।
सर्व्वपापविशुद्धात्मा परं ब्रह्माधिगच्छति ॥ ८९ ॥

इति श्रीमहापुराणे वायुप्रोक्ते मन्वन्तरादिवर्णनं
नाम दशमोऽध्यायः।

---

# अथैकादशोऽध्यायः ।

## पाशुपतयोगः ।

वायुरुवाच । एकं महान्तं दिवसमहोरात्रमथापि वा ।
अर्द्धमासं तथा मासमयनाब्दयुगानि च ॥ १ ॥
महायुगसहस्राणि ऋषयस्तपसि स्थिताः ।
उपासते महात्मानः प्राणं दिव्येन चक्षुषा ॥ २ ॥
अत ऊर्द्धं प्रवक्ष्यामि प्राणायामप्रयोजनं ।
फलञ्चैव विशेषेण यथाह भगवान् प्रभुः ॥ ३ ॥
प्रयोजनानि चत्वारि प्राणायमस्य विद्धि वै ।
शान्तिः प्रशान्तिर्दीप्तिश्च प्रसादश्च चतुष्टयं ॥ ४ ॥
घोराकारग्निवानान्तु कर्म्मणां फलसम्भवं ।
स्वयङ्कृतानि कालेन इहामुत्र च देहिनां ॥ ५ ॥
पित्तमात्तप्रदुष्टानां ज्ञातिसम्बन्धिसङ्करैः ।
क्षपणं हि कषायाणां पापानां शान्तिरुच्यते ॥ ६ ॥
लोभमानात्मकानां हि पापानामपि संयमः ।
इहामुत्र हितार्थाय प्रशान्तिस्तप उच्यते ॥ ७ ॥
सूर्य्येन्दुग्रहतारागां तुल्यस्तु विषयो भवेत् ।
ऋषीणाञ्च प्रसिद्धानां ज्ञानविज्ञानसम्पदां ॥ ८ ॥
अतीतानागतानाञ्च दर्शनं साम्प्रतस्य च ।
बुद्धस्य समतां यान्ति दीप्तिः स्यात्तप उच्यते ॥ ९ ॥
इन्द्रियाणीन्द्रियार्थांश्च मनः पञ्च च मारुतान् ।



प्रसादयति येनासौ प्रसाद इति संज्ञितः ॥ १० ॥
इत्येष धर्म्मः प्रथमः प्राणायामश्चतुर्व्विधः ।
सन्निकृष्टफलो ज्ञेयः सद्यः काल प्रसादजः ॥ ११ ॥
अत ऊर्द्धं प्रवक्ष्यामि प्राणायामस्य लक्षणं ।
आसनञ्च यथा तत्त्वं युजतो योगमेव च ॥ १२ ॥
ॐ कारं प्रथमं कृत्वा चन्द्रसूर्य्यौ नमस्य च ।
आसनं स्वस्तिकं कृत्वा पद्ममर्द्धासनन्तथा ॥ १३ ॥
समजानुरेकजानुरुत्तानः सुस्थितोऽपि च ।
समो दृढ़ासनो भूत्वा संहृत्य चरणावुभौ ॥ १४ ॥
संवृतास्योऽवनद्धाच्च उरो विष्टभ्य चाग्रतः ।
पार्ष्णिभ्यां वृषणे च्छाद्य तथा प्रजननं यतः ॥ १५ ॥
किञ्चिदुन्नामितशिराः शिरोग्रीवां तथैव च ।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ १६ ॥
तमः प्रच्छाद्य रजसा रजः सत्त्वेन च्छादयेत् ।
ततः सत्त्वस्थितो भूत्वा योगं युञ्जन् समाहितः ॥ १७ ॥
इन्द्रियाणीन्द्रियार्थांश्च मनः पञ्च स मारुतान् ।
निगृह्य समवायेन प्रत्याहारमुपक्रमेत् ॥ १८ ॥
यस्तु प्रत्याहरेत् कामान् कूर्म्मोऽङ्गानीव सर्व्वतः ।
तथात्मरतिरेकस्थः पश्यत्यात्मानमात्मनि ॥ १९ ॥
पूरयित्वा शरीरन्तु स वाह्याभ्यन्तरं शुचिः ।
आकण्ठनाभियोगेन प्रत्याहारमुपक्रमेत् ॥ २० ॥
कलामात्रस्तु विज्ञेयो निमेषोन्मेष एव च ।
तथा द्वादशमात्रस्तु प्राणायामो विधीयते ॥ २१ ॥

धारणाद्दादशायामो योगो वै धारणाद्वयं।
तथा वै योगयुक्तश्च ऐश्वर्य्यं प्रतिपद्यते।
वीक्षते परमात्मानं दीप्यमानं स्वतेजसा॥ २२॥
प्राणायामेन युक्तस्य विप्रस्य नियतात्मनः।
सर्व्वे दोषाः प्रणश्यन्ति सत्त्वस्थश्चैव जायते॥ २३॥
एवं वै नियताहारः प्राणायामपरायणः।
जित्वा जित्वा सदा भूमिमारोहेत्तु सदा मुनिः॥ २४॥
अजिता हि महाभूमिर्दोषानुत्पादयेद् बहून्।
विवर्द्धयति सम्मोहं न रोहेदजितां ततः॥ २५॥
नालेन तु यथा तोयं यन्त्रेणैव बलान्वितः।
आपिबेत(१) प्रयत्नेन तथा वायुञ्जितश्रमः॥ २६॥
नाभ्याञ्च हृदये चैव कण्ठे उरसि चानने।
नासाग्रे तु तथा नेत्रे भ्रुवोर्म्मध्येऽथ मूर्द्धनि॥ २७॥
किञ्चिदूर्द्धं परस्मिंश्च धारणा परमा स्मृता।
प्राणापानसमारोधात् प्राणायामः स कथ्यते॥ २८॥
मनसो धारणा चैव धारणेति प्रकीर्त्तिता।
निवृत्तिर्विषयाणान्तु प्रत्याहारस्तु संज्ञितः॥ २९॥
सर्व्वेषां समवाये तु सिद्धिः स्याद् योगलक्षणा।
तयोत्पन्नस्य योगस्य ध्यानं वै सिद्धिलक्षणं।
ध्यानयुक्तः सदा पश्येदात्मानं सूर्य्यचन्द्रवत्॥ ३०॥
सत्त्वस्यानुपपत्तौ तु दर्शनन्तु न विद्यते।
अदेशकालयोगस्य दर्शनन्तु न विद्यते॥ ३१॥

१ ऋपः पिबेदिति ख०।



अग्न्यभ्यासे वने वापि शुष्कपर्णचये तथा।
जन्तुव्याप्ते श्मशाने वा जीर्णगोष्ठे चतुष्पथे॥ ३२॥
सशब्दे सभये वापि चैत्यवल्मीकसञ्चये।
उदपाने तथा नद्यान्न बाधातः कदाचन॥ ३३॥
क्षुधाविष्टास्तथाऽप्रीता न च व्याकुलचेतसः।
युञ्जीत परमं ध्यानं योगी ध्यानपरः सदा॥ ३४॥
एतान् दोषान् विनिश्चित्य प्रमादाद्यो युनक्ति वै।
तस्य दोषाः प्रकुप्यन्ति शरीरे विघ्नकारकाः॥ ३५॥
जड़त्वं बधिरत्वञ्च मूकत्वञ्चाधिगच्छति।
अन्धत्वं स्मृतिलोपश्च जरा रोगस्तथैव च॥ ३६॥
तस्य दोषाः प्रकुप्यन्ति अज्ञानाद्यो युनक्ति वै।
तस्माज् ज्ञानेन शुद्धेन योगी युञ्जेत्समाहितः॥ ३७॥
अप्रमत्तः सदा चैव न दोषान् प्राप्नुयात् क्वचित्।
तेषां चिकित्सां वक्ष्यामि दोषाणाञ्च यथाक्रमं।
यथा गच्छन्ति ते दोषाः प्राणायामसमुत्थिताः॥ ३८॥
स्निग्धां यवागूमत्युष्णां भुक्त्वा तत्रावधारयेत्।
एतेन क्रमयोगेन वातगुल्मं प्रशाम्यति॥ ४९॥
गुदावर्त्तप्रतीकारमिदं कुर्य्याच्चिकित्सितं।
भुक्त्वा दधि यवागूर्वा वायुरूर्द्धं ततो व्रजेत्॥ ४०॥
वायुग्रन्थिं ततो भित्त्वा वायुदेशे प्रयोजयेत्।
तथापि न विशेषः स्याद्धारणां मूर्द्ध्नि धारयेत्॥ ४१॥
युञ्जानस्य तनुत्यस्य सत्त्वस्थस्यैव देहिनः।
गुदावर्त्तप्रतीघाते एतत् कुर्य्याच्चिकित्सितं॥ ४२॥

सर्व्वगात्रप्रकम्पेन समारब्धस्य योगिनः।
इमां चिकित्सां कुर्व्वीत तया सम्पद्यते सुखी ॥ ४३ ॥
मनसा यद्धृतं किञ्चिद्दिष्टभीक्षत्य धारयेत्।
उरोद्घाते उरःस्थानं कण्ठदेशे च धारयेत् ॥ ४४ ॥
त्वचोऽवघाते तां वाचि वाधिर्ये श्रोत्रयोस्तथा।
जिह्वास्थाने तृषार्त्तस्तु अग्रे स्नेहांश्च तन्तुभिः।
फलं वै चिन्तयेद्योगी ततः सम्पद्यते सुखी ॥ ४५ ॥
क्षये कुष्ठे सकीलासे धारयेत्सर्व्वसात्विकीं।
यस्मिन् यस्मिन् रजो देशे तस्मिन् युक्तो विनिर्द्दिशेत् ॥ ४६ ॥
योगोत्पन्नस्य विप्रस्य इदं कुर्य्याच्चिकित्सितं।
वंशकीलेन मूर्द्धानं धारयानस्य ताड़येत्।
मूर्द्धिकीलं प्रतिष्ठाप्य काष्ठकाष्ठेन ताड़येत् ॥ ४७ ॥
भयभीतस्य सा संज्ञा ततः प्रत्यागमिष्यति।
अथ वा लुप्तसंज्ञस्य हस्ताभ्यां तत्र धारयेत् ॥ ४८ ॥
प्रतिलभ्य ततः संज्ञां धारणां मूर्द्धि धारयेत्।
स्निग्धमल्पञ्च भुञ्जीत ततः सम्पद्यते सुखी ॥ ४९ ॥
अमानुषेण सत्त्वेन यदा बुध्यति योगवित्।
दिवञ्च पृथिवीञ्चैव वायुमग्निञ्च धारयेत् ॥ ५० ॥
प्राणायामेन तत्सर्व्वं दह्यमानं वशीभवेत्।
अथापि प्रविशेद्देहं ततस्तं प्रतिषेधयेत् ॥ ५१ ॥
ततः संस्तभ्य योगेन धारयानस्य मूर्द्धनि।
प्राणायामाग्निना दग्धं तत्सर्व्वं विलयं व्रजेत् ॥ ५२ ॥
कृष्णसर्पापराधन्तु धारयेद्धृदयोदरे।



महो जनस्तपः सत्यं हृदि कृत्वा तु धारयेत् ॥ ५३ ॥
विषस्य तु फलं पीत्वा विशल्यां धारयेत्ततः।
सर्व्वतः सनगां पृथ्वीं कृत्वा मनसि धारयेत् ॥ ५४ ॥
हृदि कृत्वा समुद्रांश्च तथा सर्व्वाश्च देवताः।
सहस्रेण घटानाञ्च युक्तः स्नायीत योगवित् ॥ ५५ ॥
उदके कण्ठमात्रे तु धारणां मूर्द्धि धारयेत्।
प्रतिस्रोतोविषाविष्टो धारयेत् सर्व्वगात्रिकीं ॥ ५६ ॥
शीर्णैर्ऽकपत्रपुटकैः पिबेद्दुग्धौकनृत्तिकां।
चिकित्सितविधिर्ह्येष विश्रुतो योगनिर्म्मितः ॥ ५७ ॥
व्याख्यातस्तु समासेन योगदृष्टेन हेतुना।
ब्रुवतो लक्षणं विद्धि विप्रस्य कथयेत् क्वचित् ॥ ५८ ॥
अथापि कथयेन्मोहात्तद्विज्ञानं प्रलीयते।
तस्मात् प्रवृत्तिर्य्योगस्य न वक्तव्या कथञ्चन ॥ ५९ ॥

सत्त्वं तथारोग्यमलोलुपत्वं
वर्णप्रभा सुस्वरसौम्यता च।
गन्धः शुभो मूत्रपुरीषमल्पं
योगप्रवृत्तिः प्रथमा शरीरे ॥ ६० ॥

आत्मानं पृथिवीञ्चैव ज्वलन्तीं यदि पश्यति।
कृत्वान्यं विशते चैव विद्यात् सिद्धिमुपस्थितां ॥ ६१ ॥

इति श्रीमहापुराणे वायुप्रोक्ते पाशुपतयोगो
नामैकादशोऽध्यायः।

---

# अथ द्वादशोऽध्यायः।

—oo—

## योगोपसर्गाः।

सूत उवाच। अत ऊर्द्धं प्रवक्ष्यामि उपसर्गा यथा तथा।
प्रादुर्भवन्ति ये दोषा दृष्टतत्त्वस्य देहिनः॥ १॥
मानुष्यान् विविधान् कामान् कामयेत ऋतुं स्त्रियः।
विद्यादानफलञ्चैव उपसृष्टस्तु योगवित्॥ २॥
अग्निहोत्रं हविर्य्यज्ञमेतत्प्रायतनन्तथा।
मायाकर्म्म धनं स्वर्गमुपसृष्टस्तु काङ्क्षति॥ ३॥
एष कर्म्मसु युक्तस्तु सोऽविद्यावशमागतः।
उपसृष्टन्तु जानीयात् बुद्धा चैव विसर्ज्जयेत्।
नित्यं ब्रह्मपरो युक्त उपसर्गात् प्रमुच्यते॥ ४॥
जितप्रत्युपसर्गस्य जितश्वासस्य देहिनः।
उपसर्गाः प्रवर्त्तन्ते सात्त्विकाराजसतामसाः॥ ५॥
प्रतिभाश्रवणे चैव देवानाञ्चैव दर्शनं।
भ्रमावर्त्तश्च इत्येते सिद्धिलक्षणसंज्ञिताः॥ ६॥
विद्याकाव्यं तथा गिल्पं सर्व्ववाचाहृतानि तु।
विद्यार्थाश्चोपतिष्ठन्ति प्रभावस्यैव लक्षणं॥ ७॥
शृणोति शब्दान् श्रोतव्यान् योजनानां शतादपि।
सर्व्वज्ञश्च विधिज्ञश्च योगी चोन्मत्तवद्भवेत्॥ ८॥
यक्षराक्षसगन्धर्व्वान् वीक्षत दिव्यमानुषान्।
वेत्ति तांश्च महायोगी उपसर्गस्य लक्षणं॥ ९॥



देवदानवगन्धर्व्वान् ऋषींश्चापि तथा पितॄन्।
प्रेक्षते सर्व्वतश्चैव उन्मत्तन्तं विनिर्द्दिशेत्॥ १०॥
भ्रमेण भ्राम्यते योगी चोद्यमानोऽन्तरात्मना।
भ्रमेण भ्रान्तबुद्धेस्तु ज्ञानं सर्व्वं प्रणश्यति॥ ११॥
वार्त्ता नाशयते चित्तं चोद्यमानोऽन्तरात्मना।
वर्त्तनाक्रान्तबुद्धेस्तु सर्व्वज्ञानं प्रणश्यति॥ १२॥
प्रावृत्य मनसा शुक्लं पटं वा कम्बलं तथा।
ततस्तु परमं ब्रह्म क्षिप्रमेवानुचिन्तयेत्॥ १३॥
तस्माच्चैवात्मनो दोषांस्तूपसर्गानुपस्थितान्।
परित्यजेत मेधावी यदीच्छेत् सिद्धिमात्मनः॥ १४॥
ऋषयो देवगन्धर्व्वा यक्षोरगमहासुराः।
उपसर्गेषु संयुक्ता आवर्त्तन्ते पुनः पुनः॥ १५॥
तस्माद्युक्तः सदा योगी लघ्वाहारो जितेन्द्रियः।
तथा सुप्तः सुसूक्ष्मेषु धारणां मूर्द्धि धारयेत्॥ १६॥
ततस्तु योगयुक्तस्य जितनिद्रस्य योगिनः।
उपसर्गाः पुनश्चान्ये जायन्ते प्राणसंज्ञकाः॥ १७॥
पृथिवीं धारयेत्तत्त्वं ततश्चापो ह्यनन्तरं।
ततोऽग्निश्चैव सर्व्वेषामाकाशं मन एव च॥ १८॥
ततः परां पुनर्बुद्धिं धारयेद्यत्नतो यती।
सिद्धीनाञ्चैव लिङ्गानि दृष्ट्वा दृष्ट्वा परित्यजेत्॥ १९॥
पृथ्वीं धारयमाणस्य मही सूक्ष्मा प्रवर्त्तते।
अपोधारयमानस्य आपः सूक्ष्मा भवन्ति हि!
सीता रसाः प्रवर्त्तन्ते सूक्ष्मा ह्यमृतसन्निभाः॥ २०॥

तेजोधारयमानस्य तेजः सूक्ष्मं प्रवर्त्तते ।
आत्मानं मन्यते तेजस्त्वाद्भावमनुपश्यति ॥ २१ ॥
आत्मानं मन्यते वायुं वायुवन्मण्डलं प्रभो ।
आकाशं धारयमानस्य व्योम सूक्ष्मं प्रवर्त्तते ॥ २२ ॥
पश्यते मण्डलं सूक्ष्मं घोषश्चास्य प्रवर्त्तते ।
आत्मानं मन्यते नित्यं वायुः सूक्ष्मः प्रवर्त्तते ॥ २३ ॥
तथा मनोधारयतो मनः सूक्ष्मं प्रवर्त्तते ।
मनसा सर्व्वभूतानां मनस्तु विद्यते हि सः ।
बुद्ध्या बुद्धिं यदा युञ्जेत् तदा विज्ञाय बुध्यते ॥ २४ ॥
एतानि सप्त सूक्ष्माणि विदित्वा यस्तु योगवित् ।
परित्यजति मेधावी स बुद्ध्या परमं व्रजेत् ॥ २५ ॥
यस्मिन् यस्मिंश्च संयुक्तो भूत ऐश्वर्य्यलक्षणे ।
तत्रैव सङ्गं भजते तेनैव प्रविनश्यति ॥ २६ ॥
तस्मादविदित्वा सूक्ष्माणि संसक्तानि परस्परं ।
परित्यजति यो बुद्ध्या स परं प्राप्नुयाद्विजः ॥ २७ ॥
दृश्यन्ते हि महात्मान ऋषयो दिव्यचक्षुषः ।
संसक्ताः सूक्ष्मभावेषु ते दोषास्तेषु संज्ञिताः ॥ २८ ॥
तस्मान्न निश्चयः कार्य्यः सूक्ष्मेष्विह कदाचन ।
ऐश्वर्य्याज्जायते रागो विरागं ब्रह्म चोच्यते ॥ २९ ॥
विदित्वा सप्त सूक्ष्माणि षड़ङ्गञ्च महेश्वरं ।
प्रधानं विनियोगज्ञः परं ब्रह्माधिगच्छति ॥ ३० ॥

सर्व्वज्ञता तृप्तिरनादिबोधः
स्वतन्त्रता नित्यमलुप्तशक्तिः ।



अनन्तशक्तिश्च विभोर्विधिज्ञाः
षड़ाहुरङ्गानि महेश्वरस्य ॥ ३१ ॥
नित्यं ब्रह्मधनो युक्तः(१) उपसर्गैः प्रमुच्यते ।
जितश्वासोपसर्गस्य जितरागस्य योगिनः ।
एका बहिः शरीरेऽस्मिन् धारणा सर्व्वकामिकी ॥ ३२ ॥
विशेद्यदा द्विजो युक्तो यत्र यत्रार्प्पयेन्मनः ।
भूतान्याविशते वापि त्रैलोक्यञ्चापि कम्पयेत् ॥ ३३ ॥
एतया प्रविशेद्देहं हित्वा देहं पुनस्त्विह ।
मनोद्वारं हि योगानामादित्यञ्च विनिर्द्दिशेत् ॥ ३४ ॥
आदानादिक्रियाणान्तु आदित्य इति चोच्यते ।
एतेन विधिना योगी विरक्तः सूक्ष्मवर्ज्जितः ।
प्रकृतिं समतिक्रम्य रुद्रलोके महीयते ॥ ३५ ॥
ऐश्वर्य्यगुणसम्प्राप्तं ब्रह्मभूतन्तु तं प्रभुं ।
देवस्थानेषु सर्व्वेषु सर्व्वतस्तु निवर्त्तते ॥ ३६ ॥
पैशाचेन पिशाचांश्च राक्षसेन च राक्षसान् ।
गान्धर्व्वेण च गन्धर्व्वान् कौबेरेण कुबेरजान् ॥ ३७ ॥
इन्द्रमैन्द्रेण स्थानेन सौम्यं सौम्येन चैव हि ।
प्रजापतिं तथा चैव प्राजापत्येन साधयेत् ॥ ३८ ॥

---

१ ब्रह्मधनो युक्त इति च०।

ब्राह्मं ब्राह्मेन चाप्येवमुपामन्त्रयते प्रभुं ।
तत्र सक्तस्तु उन्मत्तस्तस्मात्सर्व्वं प्रवर्त्तते ॥ ३९ ॥
नित्यं ब्रह्मपरीयुक्तः स्थानान्येतानि वै त्यजेत् ।
असज्यमानः स्थानेषु द्विजः सर्वगतो भवेत् ॥ ४० ॥

इति श्रीमहापुराणे वायुप्रोक्ते योगोपसर्गनिरूपणं
नाम द्वादशोऽध्यायः ।

---

# अथ त्रयोदशोऽध्यायः ।

———ooo(ॐ)ooo———

## योगैश्वर्य्याणि ।

वायुरुवाच । अत ऊर्द्धं प्रवक्ष्यामि ऐश्वर्य्यगुणविस्तरं ।
येन योगविशेषेण सर्व्वलोकानतिक्रमेत् ॥ १ ॥
तच्चाष्टगुणमैश्वर्य्यं योगिनां समुदाहृतं ।
तत्सर्व्वं क्रमयोगेन उच्यमानं निबोधत ॥ २ ॥
अणिमा लघिमा चैव महिमा प्राप्तिरेव च ।
प्राकाम्यञ्चैव सर्व्वत्र ईशित्वञ्चैव सर्व्वतः ॥ ३ ॥
वशित्वमथ सर्व्वञ्च यत्र कामावसायिता ।
तच्चापि विविधं ज्ञेयमैश्वर्य्यं सर्व्वकामिकं ॥ ४ ॥
सावद्यं निरवद्यञ्च सूक्ष्मञ्चैव प्रवर्त्तते ।
सावद्यं नाम तत्तत्त्वं पञ्चभूतात्मकं स्मृतं ॥ ५ ॥
निरवद्यं तथा नाम पञ्चभूतात्मकं स्मृतं ।
इन्द्रियाणि मनश्चैव अहङ्कारश्च वै स्मृतं ॥ ६ ॥
तत्र सूक्ष्मप्रवृत्तन्तु पञ्चभूतात्मकं पुनः ।
इन्द्रियाणि मनश्चैव बुद्ध्यहङ्कारसंज्ञितं ॥ ७ ॥
तथा सर्व्वमयञ्चैव आत्मस्था ख्यातिरेव च ।
संयोग एवं त्रिविधः सूक्ष्मेष्वेव प्रवर्त्तते ॥ ८ ॥
पुनरष्टगुणस्यापि तेष्वेवाथ प्रवर्त्तते ।
तस्य रूपं प्रवक्ष्यामि यथाह भगवान् प्रभुः ॥ ९ ॥

त्रैलोक्ये सर्व्वभूतेषु जीवस्थानियतः स्मृतः ।
अणिमा च यथाव्यक्तं सर्व्वं तत्र प्रतिष्ठितं ॥ १० ॥
त्रैलोक्ये सर्व्वभूतानां दुःष्प्राप्यं समुदाहृतं ।
तच्चापि भवति प्राप्यं प्रथमं योगिनां बलात् ॥ ११ ॥
लम्बनं प्लवनं योगे रूपमस्य सदा भवेत् ।
शीघ्रगं सर्व्वभूतेषु द्वितीयं तत्पदं स्मृतं ॥ १२ ॥
त्रैलोक्ये सर्व्वभूतानां प्राप्तिः प्राकाम्यमेव च ।
महिमा चापि यो यस्मिंस्तृतीयो योग उच्यते ॥ १३ ॥
त्रैलोक्ये सर्व्वभूतेषु त्रैलोक्यमगमं स्मृतं ।
प्रकामान् विषयान् भुङ्क्ते न च प्रतिहतः क्वचित् ।
त्रैलोक्ये सर्व्वभूतानां सुखदुःखं प्रवर्त्तते ॥ १४ ॥
ईशो भवति सर्व्वत्र प्रविभागेन योगवित् ।
वश्यानि चैव भूतानि त्रैलोक्ये सचराचरे ।
भवन्ति सर्व्वकार्य्येषु इच्छतो न भवन्ति च ॥ १५ ॥
यत्र कामावसायित्वं त्रैलोक्ये सचराचरे ।
इच्छया चेन्द्रियाणि स्युर्भवन्ति न भवन्ति च ॥ १६ ॥
शब्दः स्पर्शो रसो गन्धो रूपञ्चैव मनस्तथा ।
प्रवर्त्तेऽस्य चेच्छातो न भवन्ति तथेच्छया ॥ १७ ॥
न जायते न म्रियते भिद्यते न च छिद्यते ।
न दह्यते न मुह्यते क्षीयते न च लिप्यते ॥ १८ ॥
न क्षीयते न क्षरति न खिद्यति कदाचन ।
क्रियते चैव सर्व्वत्र तथा विक्रियते न च ॥ १९ ॥
अगन्धरसरूपस्तु स्पर्शशब्दविवर्ज्जितः ।



अवर्णो ह्यवरश्चैव तथा वर्णस्य कर्हिचित् ॥ २० ॥
भुङ्क्तेऽथ विषयांश्चैव विषयैर्न्न च युज्यते ।
ज्ञात्वा तु परमं सूक्ष्मं सूक्ष्मत्वाच्चापवर्गकः ॥ २१ ॥
व्यापकत्वपवर्गाच्च व्यापित्वात् पुरुषः स्मृतः ।
पुरुषः सूक्ष्मभावात्तु ऐश्वर्य्ये परतः स्थितः ॥ २२ ॥
गुणान्तरन्तु ऐश्वर्य्ये सर्व्वतः सूक्ष्म उच्यते ।
ऐश्वर्य्यमप्रतिघाति प्राप्य योगमनुत्तमं ।
अपवर्गं ततो गच्छेत् सुसूक्ष्मं परमं पदं ॥ २३ ॥

इति श्रीमहापुराणे वायुप्रोक्ते योगैश्वर्य्याणि
नाम त्रयोदशोऽध्यायः ।

# अथ चतुर्दशोऽध्यायः।

## पाशुपतयोगः।

वायुरुवाच। न चैवमागतो ज्ञानाद्रागात् कर्म्म समाचरेत्।
राजसन्तामसं वापि भुक्त्वा तत्रैव युज्यते ॥ १ ॥
तथा सुकृतकर्म्मा तु फलं स्वर्गे समश्नुते।
तस्मात् स्थानात् पुनर्भ्रष्टो मानुष्यमनुपद्यते ॥ २ ॥
तस्माद् ब्रह्म परं सूक्ष्मं ब्रह्म शाश्वतमुच्यते।
ब्रह्म एव हि सेवेत ब्रह्मैव परमं सुखं ॥ ३ ॥
परिश्रमस्तु यज्ञानां महतार्थेन वर्त्तते।
भूयो मृत्युवशं याति तस्मान् मोक्षः परं सुखं ॥ ४ ॥
अथ वै ध्यानसंयुक्तो ब्रह्मयज्ञपरायणः।
न स शक्यो व्यापितुं शक्यो मन्वन्तरशतैरपि ॥ ५ ॥
दृष्ट्वा तु पुरुषं दिव्यं विश्वाख्यं विश्वरूपिणं।
विश्वपादशिरोग्रीवं विश्वेशं विश्वभावनं।
विश्वगन्धं विश्वमाल्यं विश्वाम्बरधरं प्रभुं ॥ ६ ॥
गोभिर्महो संयतते पतत्रिणं
महात्मानं परममतिं वरेण्यं।
कविं पुराणमनुशासितारं
सूक्ष्माच्च सूक्ष्मं महतो महान्तं।



योगेन पश्यन्ति न चक्षुषा तं
निरिन्द्रियं पुरुषं रुक्मवर्णं ॥ ७ ॥
अलिङ्गिनं पुरुषं रुक्मवर्णं
सलिङ्गिनं निर्गुणं चेतनञ्च।
नित्यं सदा सर्व्वगतन्तु शौचं
पश्यन्ति युक्त्या ह्यचलं प्रकाशं ॥ ८ ॥
तन्नावितस्तेजसा दीप्यमानः
अपाणिपादोदरपार्श्वजिह्वः।
अतीन्द्रियोऽप्यपि सुसूक्ष्म एकः
पश्यत्यचक्षुः स शृणोत्यकर्णः ॥ ९ ॥
नास्याख्यबुद्धं न च बुद्धिरस्ति
स वेद सर्व्वं न च वेदवेद्यः।
तमाहुरग्र्यं पुरुषं महान्तं
सचेतनं सर्व्वगतं सुसूक्ष्मं ॥ १० ॥
तमाहुर्मुनयः सर्व्वे लोके प्रसवधर्म्मिणीं।
प्रकृतिं सर्व्वभूतानां युक्ताः पश्यन्ति चेतसा ॥ ११ ॥
सर्व्वतः पाणिपादान्तं सर्व्वतोऽक्षिशिरोमुखं।
सर्व्वतः श्रुतिमाल्लोके सर्व्वमावृत्य तिष्ठति ॥ १२ ॥
युक्ता योगेन चेशानं सर्व्वतश्च सनातनं।
पुरुषं सर्व्वभूतानां तस्माज्ज्ञाता न मुह्यते ॥ १३ ॥
भूतात्मानं महात्मानं परमात्मानमव्ययं।
सर्व्वात्मानं परं ब्रह्म तद्वै ध्यात्वा न मुह्यति ॥ १४ ॥
पवनो हि यथा ग्राह्यो विचरन् सर्व्वमूर्त्तिषु।

पुरि शेते तथाभ्रे च तस्मात् पुरुष उच्यते ।
अथ चेल्लुप्तधर्म्मात्तु स विशेषैश्च कर्म्मभिः ॥ १५ ॥
ततस्तु ब्रह्म योन्यां वै शुक्रशोणितसंयुतं ।
स्त्रीपुमांसप्रयोगेण जायते हि पुनः पुनः ॥ १६ ॥
ततस्तु गर्भकाले तु कलनं नाम जायते ।
कालेन कलनञ्चापि बुद्बुदश्च प्रजायते ॥ १७ ॥
मृत्पिण्डस्तु यथा चक्रे चक्रवत्तेन पीड़ितः ।
हस्ताभ्यां क्रियमाणस्तु विश्वत्वमुपगच्छति ॥ १८ ॥
एवमात्माक्षिसंयुक्तो वायुना समुदीरितः ।
जायते मानुषस्तत्र यथा रूपं तथा मनः ॥ १९ ॥
वायुः सम्भवते तेषां वातात् सञ्जायते जलं ।
जलात्सम्भवति प्राणः प्राणाच्छुक्रं विवर्द्धते ॥ २० ॥
रक्तभागास्त्वयस्त्विंशच्छुक्रभागाश्चतुर्दश ।
भागतोऽर्द्धपलङ्कृत्वा ततो गर्भं निषेवते ॥ २१ ॥
ततस्तु गर्भसंयुक्तः पञ्चभिर्वायुभिर्वृतः ।
पितुः शरीरात् प्रत्यङ्गरूपमस्योपजायते ॥ २२ ॥
ततोऽस्य मातुराहारात् पीतलोढ़प्रवेशितं ।
नाभिः स्रोतःप्रवेशेन प्राणाधारो हि देहिनां ॥ २३ ॥
नवमासान् परिक्लिष्टः संवेष्टितशिरोधरः ।
वेष्टितः सर्व्वगात्रैश्च अपर्य्यायक्रमागतः ।
नवमासोषितश्चैव योनिच्छिद्रादवाङ्मुखः ॥ २४ ॥
ततस्तु कर्म्मभिः पापैर्निरयं प्रतिपद्यते ।
असिपत्रवनञ्चैव शाल्मलीच्छेदभेदयोः ॥ २५ ॥



तत्र निर्भर्त्सनञ्चैव तथा शोणितभोजनं ।
एतास्तु यातना घोराः कुम्भीपाकसुदुःसहाः ॥ २६ ॥
यथा ह्यापस्तु विच्छिन्नाः स्वरूपमुपयान्ति वै ।
तस्माच्छिन्नाश्च भिन्नाश्च यातनास्थानमागताः ॥ २७ ॥
एवं जीवस्तु तैः पापैस्तप्यमानः स्वयं कृतैः ।
प्राप्नुयात् कर्म्मभिर्दुःखं शेषं वा यदि चेतरं ॥ २८ ॥
एकेनैव तु गन्तव्यं सर्व्वमृत्युनिवेशनं ।
एकेनैव च भोक्तव्यं तस्मात् सुकृतमाचरेत् ॥ २९ ॥
न ह्येनं प्रस्थितं कश्चिन्नच्छन्तमनुगच्छति ।
यदनेन कृतं कर्म्म तदेनमनुगच्छति ॥ ३० ॥
ते नित्यं यमविषये विभिन्नदेहाः
क्रोशन्तः सततमनिष्टसंप्रयोगैः ।
शुष्यन्ते परिगतवेदनाशरीराः
वह्नीभिः सुमहदधर्म्मयातनाभिः ॥ ३१ ॥
कर्म्मणा मनसा वाचा यदभीष्टं निषेव्यते ।
तत्प्रसह्य हरेत् पापं तस्मात् सुकृतमाचरेत् ॥ ३२ ॥
यादृग् जातानि पापानि पूर्व्वं कर्म्माणि देहिनः ।
संसारन्तामसं तादृक् षड्विधं प्रतिपद्यते ॥ ३३ ॥
मानुष्यमशुभावञ्च पशुभावान्मृगो भवेत् ।
मृगत्वात् पक्षिभावन्तु तस्माच्चैव सरीसृपः ॥ ३४ ॥
सरीसृपत्वान्नच्छन्ति स्थावरत्वन्न संशयः ।
स्थावरत्वं पुनः प्राप्तो यावदुन्मिषते नरः ।
कुलालचक्रवद्भ्रान्तस्तत्रैव परिकीर्त्तितः ॥ ३५ ॥

इत्येवं हि मनुष्यादिः संसारे स्थावरान्तके ।
विज्ञेयस्तामसो नाम तत्रैव परिवर्त्तते ॥ २६ ॥
सात्विकश्चापि संसारो ब्रह्मादिः परिकीर्त्तितः ।
पिशाचान्तः स विज्ञेयः स्वर्गस्थानेषु देहिनां ॥ २७ ॥
ब्राह्मे तु केवलं सत्त्वं स्थावरे केवलं तमः ।
चतुर्दशानां स्थानानां मध्ये विष्टम्भकं रजः ।
मर्म्मसु क्षिप्यमानेषु वेदनार्त्तस्य देहिनः ॥ २८ ॥
ततस्तु परमं ब्रह्म कथं विप्रः स्मरिष्यति ।
संस्कारात् पूर्व्वधर्म्मस्य भावनायां प्रनोदितः ।
मानुष्यं भजते नित्यं तस्मान्नित्यं समाद्धेत् ॥ २९ ॥

इति श्रीमहापुराणे वायुप्रोक्ते पाशुपतयोगो
नाम चतुर्दशोऽध्यायः ।

---

# अथ पञ्चदशोऽध्यायः ।

———ooo@ooo———

## पाशुपतयोगः ।

वायुरुवाच । चतुर्दशविधं ह्येतत् बुद्ध्वा संसारमण्डलं ।
तथा समारभेत् कर्म्म संसारभयपीड़ितः ॥ १ ॥
ततः स्मरति संसारञ्चक्रेण परिवर्त्तितः ।
तस्मात्तु सततं युक्तो ध्यानतत्परयुञ्जकः ।
तथा समारभेद्योगं यथात्मानं स पश्यति ॥ २ ॥
एष आद्यः परं ज्योतिरेष सेतुरनुत्तमः ।
विद्वद्भो ह्येष भूतानां न सम्भेदश्च शाश्वतः ॥ ३ ॥
तदेनं सेतुमात्मानं अग्निं वै विश्वतोमुखं ।
हृदिस्थं सर्व्वभूतानामुपासीत विधानवित् ॥ ४ ॥
हुत्वाष्टावाहुतीः सम्यक् शुचिस्तद्गतमानसः ।
वैश्वानरं हृदिस्थन्तु यथावदनुपूर्व्वशः ।
अपः पूर्व्वं सकृत् प्राश्य तूष्णीं भूत्वा उपासते ॥ ५ ॥
प्राणायेति ततस्तस्य प्रथमा ह्याहुतिः स्मृता ।
अपानाय द्वितीया तु समानायेति चापरा ॥ ६ ॥
उदानाय चतुर्थीति व्यानायेति च पञ्चमी ।
स्वाहाकारैः परं हुत्वा शेषं भुञ्जीत कामतः ।
अपः पुनः सकृत् प्राश्य त्रिराचम्य हृदयं स्पृशेत् ॥ ७ ॥

ओंप्राणानां ग्रन्थिरस्यात्मा रुद्रो ह्यात्मा विशान्तकः।
स रुद्रो ह्यात्मनः प्राणा एवमाप्याययेत् स्वयं ॥ ८ ॥
त्वं देवानामपि ज्येष्ठ उग्रस्त्वच्चतुरो हृषा।
मृत्युघ्नोऽसि त्वमस्माभ्यं भद्रमेतद्धुतं हविः ॥ ९ ॥
एवं हृदयमालभ्य पादाङ्गुष्ठे तु दक्षिणे।
विन्यास्य दक्षिणं पाणिं नाभिं वै पाणिना स्पृशेत्।
ततः पुनरुपस्पृश्य चात्मानमभिसंस्पृशेत् ॥ १० ॥
अक्षिणी नासिका श्रोत्रे हृदयं शिर एव च।
द्वावात्मानावुभावेतौ प्राणापानावुदाहृतौ ॥ ११ ॥
तयोः प्राणोऽन्तरात्मास्य बाह्योऽपानोऽत उच्यते।
अन्नं प्राणस्तथापानं मृत्युर्जीवितमेव च ॥ १२ ॥
अन्नं ब्रह्म च विज्ञेयं प्रजानां प्रसवस्तथा।
अन्नाद्भूतानि जायन्ते स्थितिरन्नेन चेष्यते।
वर्द्धन्ते तेन भूतानि तस्मादन्नन्तदुच्यते ॥ १३ ॥
तदेवाग्नौ हुतं ह्यन्नं भुञ्जते देवदानवाः।
गन्धर्व्वयक्षरक्षांसि पिशाचाश्चान्नमेव हि ॥ १४ ॥

इति श्रीमहापुराणे वायुप्रोक्ते पाशुपतयोगो
नाम पञ्चदशोऽध्यायः।

---

# अथ षोड़शोऽध्यायः।

---

## शौचाचारलक्षणं।

वायुरुवाच। अत ऊर्द्धं प्रवक्ष्यामि शौचाचारस्य लक्षणं।
यदनुष्ठाय शुद्धात्मा प्रेत्य स्वर्गं हि चाप्नुयात् ॥ १ ॥
उदकार्थी तु शौचानां मुनीनामुत्तमं पदं।
यस्तु तेष्वप्रमत्तः स्यात्स मुनिर्नावसीदति ॥ २ ॥
मानावमानौ द्वावेतौ तावेवाहुर्विषामृते।
अवमानं विषन्तत्र मानस्त्वमृतमुच्यते ॥ ३ ॥
यस्तु तेष्वप्रमत्तः स्यात्स मुनिर्नावसीदति।
गुरोः प्रियहिते युक्तः स तु संवत्सरं वसेत् ॥ ४ ॥
नियमेष्वप्रमत्तस्तु यमेषु च सदा भवेत्।
प्राप्यानुज्ञान्ततश्चैव ज्ञानागमनमुत्तमं।
अविरोधेन धर्म्मस्य विचरेत् पृथिवीमिमां ॥ ५ ॥
चक्षुःपूतं व्रजेन्मार्गं वस्त्रपूतं जलं पिबेत्।
सत्यपूतां वदेद्वाणीमिति धर्म्मानुशासनं ॥ ६ ॥
आतिथ्यं आद्ययज्ञेषु न गच्छेद्योगवित् क्वचित्।
एवं ह्यहिंसको योगी भवेदिति विचारणा ॥ ७ ॥
वह्नौ विधूमे व्यङ्गारे सर्व्वस्मिन् भुक्तवज्जने।
विचरेन्मतिमान् योगी न तु तेष्वेव नित्यशः ॥ ८ ॥
यथैवमवमन्यन्ते यथा परिभवन्ति च।

युक्तस्तथाचरेद्भैक्षं सतां धर्म्ममदूषयन् ॥ ९ ॥
भैक्ष्यं चरेद् गृहस्थेषु यथाचारगृहेषु च ।
श्रेष्ठा तु परमा चेयं वृत्तिरस्योपदिश्यते ॥ १० ॥
अत ऊर्द्धं गृहस्थेषु शालीनेषु चरेद्द्विजः ।
श्रद्धानेषु दान्तेषु श्रोत्रियेषु महात्मसु ॥ ११ ॥
अत ऊर्द्धं पुनश्चापि अदुष्टपतितेषु च ।
भैक्षचर्य्या विवर्णेषु जघन्या वृत्तिरुच्यते ॥ १२ ॥
भैक्षं यवागूं तक्रं वा पयो यावकमेव च ।
फलमूलं विपक्वं वा पिण्याकं शक्तितोपि वा ॥ १३ ॥
इत्येते वै मया प्रोक्ता योगिनां सिद्धिवर्द्धनाः ।
आहारास्तेषु सिद्धेषु श्रेष्ठं भैक्षमिति स्मृतं ॥ १४ ॥
अश्विन्दुं यः कुशाग्रेण मासे मासे समश्नुते ।
न्यायतो यस्तु भिक्षेत स पूर्व्वोक्ताद्विशिष्यते ॥ १५ ॥
योगिनाञ्चैव सर्व्वेषां श्रेष्ठञ्चान्द्रायणं स्मृतं ।
एकं द्वे त्रीणि चत्वारि शक्तितो वा समाचरेत् ॥ १६ ॥
अस्तेयं ब्रह्मचर्य्यञ्च अलोभस्त्याग एव च ।
व्रतानि चैव भिक्षूणामहिंसा परमार्थिता ॥ १७ ॥
अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवं ।
नित्यं स्वाध्याय इत्येते नियमाः परिकीर्त्तिताः ॥ १८ ॥
बीजयोनिर्गुणवपुर्बद्धः कर्म्मभिरेव च ।
यथा द्विप इवारण्ये मनुष्याणां विधीयते ॥ १९ ॥
प्राप्यते वाचिरादेवाङ्कुशेनेव निवारितः ।
एवं ज्ञानेन शुद्धेन दग्धबीजो ह्यकल्मषः ॥ २० ॥



विमुक्तबन्धः शान्तोऽसौ मुक्त इत्यभिधीयते ।
वेदैस्तुल्याः सर्व्वयज्ञक्रियास्तु
यज्ञे जप्यं ज्ञानिनामाहुरग्र्यं ।
ज्ञानाद्ध्यानं सङ्गरागव्यपेतं
तस्मिन् प्राप्ते शाश्वतस्योपलब्धिः ॥ २१ ॥
दमः शमः सत्यमकल्मषत्वं
मौनञ्च भूतेष्वखिलेष्वथार्ज्जवं ।
अतीन्द्रियज्ञानमिदं तथार्ज्जवं(१)
प्राहुस्तथा ज्ञानविशुद्धसत्त्वाः ॥ २२ ॥
समाहितो ब्रह्मपरोऽप्रमादी
शुचिस्तथैवात्मरतिर्जितेन्द्रियः ।
समाप्नुयुर्योगमिमं महाधियो-
महर्षयश्चैवमनिन्दितामलाः ॥ ॥ २३ ॥

इति श्रीमहापुराणे वायुप्रोक्ते शौचाचारलक्षणं नाम षोड़शोऽध्यायः ।

---

१ ऋषेः सतन्त्रेच्छलादादर्शदोषाद्वा पुनरुक्तोऽयं पाठः ।

## अथ सप्तदशोऽध्यायः।

———ooo@ooo———

परमाश्रमप्राप्तिकथनं।

वायुरुवाच। आश्रमत्रयमुत्सृज्य प्राप्तस्तु परमाश्रमं।
अतः संवत्सरस्यान्ते प्राप्य ज्ञानमनुत्तमं ॥ १ ॥
अनुज्ञाप्य गुरुञ्चैव विचरेत् पृथिवीमिमां।
सारभूतमुपासीत ज्ञानं यज्ज्ञेयसाधकं ॥ २ ॥
इदं ज्ञानमिदं ज्ञेयमिति यस्तुषितश्चरेत्।
अपि कल्पसहस्रायुर्ज्ञेयमवाप्नुयात् ॥ ३ ॥
त्यक्तसङ्गो जितक्रोधो लघ्वाहारो जितेन्द्रियः।
पिधाय बुद्ध्या द्वाराणि ध्याने ह्येवं मनो दधेत् ॥ ४ ॥
शून्येष्वेवावकाशेषु गुहासु च वने तथा।
नदीनां पुलिने चैव नित्यं युक्तः सदा भवेत् ॥ ५ ॥
वाग्दण्डः कर्म्मदण्डश्च मनोदण्डश्च ते त्रयः।
यस्यैते नियता दण्डाः स त्रिदण्डी व्यवस्थितः ॥ ६ ॥
अवस्थितो ध्यानरतिर्जितेन्द्रियः
शुभाशुभे हित्य च कर्म्मणी उभे।
इदं शरीरं प्रविमुच्य शास्वतो
न जायते म्रियते वा कदाचित् ॥ ७ ॥

इति श्रीमहापुराणे वायुप्रोक्ते परमाश्रमप्राप्तिकथनं
नाम सप्तदशोऽध्यायः।

## अथाष्टादशोऽध्यायः।

———ooo———

यतिप्रायश्चित्तविधिः।

वायुरुवाच। अत ऊर्द्धं प्रवक्ष्यामि यतीनामिह निश्चयं।
प्रायश्चित्तानि तत्त्वेन यान्यकामकृतानि तु।
अथ कामकृतेप्याहुः सूक्ष्मधर्म्मविदो जनाः ॥ १ ॥
पापञ्च त्रिविधं प्रोक्तं वाङ्मनःकायसम्भवं।
सततं हि दिवा रात्रौ येनेदं बध्यते जगत् ॥ २ ॥
न कर्म्माणि न चाप्येष तिष्ठतीति परा श्रुतिः।
क्षणमेव प्रयोज्यन्तु आयुषस्तु विधारणात् ॥ ३ ॥
भवेद्वीरोऽप्रमत्तस्तु योगो हि परमं बलं।
न हि योगात्परं किञ्चिन्नराणामिह दृश्यते।
तस्माद्योगं प्रशंसन्ति धर्म्मयुक्ता मनीषिणः ॥ ४ ॥
अविद्यां विद्यया तीर्त्वा प्राप्यैश्वर्य्यमनुत्तमं।
दृष्ट्वा परापरं धीराः परं गच्छन्ति तत्पदं ॥ ५ ॥
व्रतानि यानि भिक्षूणां तथैवोपव्रतानि च।
एकैकापक्रमे तेषां प्रायश्चित्तं विधीयते ॥ ६ ॥
उपेत्य तु स्त्रियं कामात् प्रायश्चित्तं विनिर्दिशेत्।
प्राणायामसमायुक्तं कुर्य्यात्सान्तपनं तथा ॥ ७ ॥
ततश्चरति निर्देशं कृच्छ्रस्यान्ते समाहितः।
पुनराश्रममागम्य चरेद्भिक्षुरतन्द्रितः।
न मर्म्मयुक्तं वचनं हिनस्तीति मनीषिणः ॥ ८ ॥

तथापि च न कर्त्तव्यः प्रसङ्गो ह्येष दारुणः।
अहोरात्राधिकः कश्चिन्नास्त्यधर्म्म इति श्रुतिः॥ ९॥
हिंसा ह्येषा परा सृष्टा दैवतैर्मुनिभिस्तथा।
यदेतद्रविणं नाम प्राणा ह्येते बहिश्चराः।
स तस्य हरति प्राणान् यो यस्य हरते धनं॥ १०॥
एवं कृत्वा स दुष्टात्मा भिन्नवृत्तो व्रतात्च्युतः।
भूयो निर्व्वेदमापन्नश्चरेच्चान्द्रायणं व्रतं॥ ११॥
विधिना शास्त्रदृष्टेन संवत्सरमिति श्रुतिः।
ततः संवत्सरस्यान्ते भूयः प्रक्षीणकल्मषः।
भूयो निर्व्वेदमापन्नश्चरेद्विच्चुरतन्द्रितः॥ १२॥
अहिंसा सर्व्वभूतानां कर्म्मणा मनसा गिरा।
अकामादपि हिंसेत यदि भिक्षुः पशून् मृगान्।
कृच्छ्रातिकृच्छ्रं कुर्व्वीत चान्द्रायणमथापि वा॥ १३॥
स्कन्देदिन्द्रियदौर्ब्बल्यात् स्त्रियं दृष्ट्वा यतिर्यदि।
तेन धारयितव्या वै प्राणायामास्तु षोड़श॥ १४॥
दिवा स्कन्नस्य विप्रस्य प्रायश्चित्तं विधीयते।
चिरात्रमुपवासश्च प्राणायामशतं तथा॥ १५॥
रात्रौ स्कन्नः शुचिः स्नातो द्वादशैव तु धारणाः।
प्राणायामेन शुद्धात्मा विरजा जायते द्विजः॥ १६॥
एकान्नं मधु मांसं वा ह्यामश्राद्धं तथैव च।
अभोज्यानि यतीनाञ्च प्रत्यक्षलवणानि च॥ १७॥
एकैकातिक्रमे तेषां प्रायश्चित्तं विधीयते।
प्राजापत्येन कृच्छ्रेण ततः पापात् प्रमुच्यते॥ १८॥



व्यतिक्रमाच्च ये केचिद्वाङ्मनःकायसम्भवं।
सद्भिः सह विनिश्चित्य यद्भूयुस्तत्समाचरेत्॥ १९॥
विशुद्धबुद्धिः समलोष्टकाञ्चनः
समस्तभूतेषु चरन् समाहितः।
स्थानं ध्रुवं शाश्वतमव्ययं सतां
परं स गत्वा न पुनर्हि जायते॥ २०॥

इति श्रीमहापुराणे वायुप्रोक्ते यतिप्रायश्चित्तविधिर्नामाष्टादशोऽध्यायः।

---

# अथोनविंशोऽध्यायः ।

———ooo———

## अरिष्टानि ।

धायुरुवाच । अत ऊर्द्धं प्रवक्ष्यामि अरिष्टानि निबोधत ।
येन ज्ञानविशेषेण मृत्युं पश्यति चात्मनः ॥ १ ॥
अरुन्धतीं ध्रुवञ्चैव सोमच्छायां महापथं ।
यो न पश्येत्स नो जीवेन्नरः संवत्सरात्परं ॥ २ ॥
अरश्मिवन्तमादित्यं रश्मिवन्तञ्च पावकं ।
यः पश्येन्न च जीवेत मासादेकादशात्परं ॥ ३ ॥
वमेन्मूत्रं करीषं वा सुवर्णं रजनं तथा ।
प्रत्यक्षमथ वा स्वप्ने दशमासान् स जीवति ॥ ४ ॥
अग्रतः पृष्ठतो वापि खण्डं यस्य पदभवेत् ।
पांशुले कर्दमे वापि सप्तमासान् स जीवति ॥ ५ ॥
काकः कपोतो गृध्रो वा निलीयेद्यस्य मूर्द्धनि ।
क्रव्यादो वा खगः कश्चित् षण्मासान्नातिवर्त्तते ॥ ६ ॥
बध्येद्दायसपङ्क्तीभिः पांशुवर्षेण वा पुनः ।
छायां वा विकृतां पश्येच्चतुः पञ्च स जीवति ॥ ७ ॥
अनभ्रे विद्युतं पश्येद् दक्षिणां दिशमाश्रितां ।
उदकेन्द्रधनुर्वापि त्रयो ह्येवा स जीवति ॥ ८ ॥
अप्सु वा यदि वादर्शे आत्मानं यो न पश्यति ।
अशिरस्कन्तथात्मानं मासाद्दूर्द्धं न जीवति ॥ ९ ॥



श्वगन्धि भवेद्गात्रं वशागन्धि ह्यथापि वा ।
मृत्युर्ह्युपस्थितस्तस्य अर्द्धमासं स जीवति ॥ १० ॥
सन्धिभ्रो मारुतो यस्य मर्म्मस्थानानि कृन्तति ।
अङ्गिः स्पृष्टो न हृष्येच्च तस्य मृत्युरुपस्थितः ॥ ११ ॥
ऋक्षवानरयुक्तेन रथेनाशान्तु दक्षिणां ।
गायन्नथ व्रजेत् स्वप्ने विद्वान् मृत्युरुपस्थितः ॥ १२ ॥
कृष्णाम्बरधरा श्यामा गायन्ती वाथ चाङ्गना ।
यन्नयेद्दक्षिणामाशां स्वप्ने सोपि न जीवति ॥ १३ ॥
छिद्रं वासस्य कृष्णञ्च स्वप्ने यो विक्षयान्नरः ।
भग्नं वा श्रवणं दृष्ट्वा विद्यान्मृत्युरुपस्थितः ॥ १४ ॥
आमस्तकतलाद्यस्तु निमज्जेत्पङ्कसागरे ।
दृष्ट्वा तु तादृशं स्वप्नं सद्य एव न जीवति ॥ १५ ॥
भस्माङ्गारांश्च केशांश्च नदीं शुष्कां भुजङ्गमान् ।
पश्येद्यो दशरात्रन्तु न स जीवेत तादृशः ॥ १६ ॥
कृष्णैश्च विकटैश्चैव पुरुषैरुद्यतायुधैः ।
पाषाणैस्ताड्यते स्वप्ने यः सद्यो न स जीवति ॥ १७ ॥
सूर्य्योदये प्रत्यूषसि प्रत्यक्षं यस्य वै शिवा ।
क्रोशन्ती सन्मुखाभ्येति स गतायुर्भवेन्नरः ॥ १८ ॥
यस्य वै स्नातमात्रस्य हृदयं पीड्यते भृशं ।
जायते दन्तहर्षश्च तं गतायुषमादिशेत् ॥ १९ ॥
भूयो भूयः स्रवेद्यस्तु रात्रौ वा यदि वा दिवा ।
दीपगन्धञ्च नो वेत्ति विद्यान्मृत्युमुपस्थितं ॥ २० ॥
रात्रौ चेन्द्रायुधं पश्येद् दिवा नक्षत्रमण्डलं ।

परनेत्रेषु चात्मानं न पश्येन्न स जीवति ॥ २१ ॥
नेत्रमेकं अवेद्यस्य कर्णौ स्थानाच्च भ्रस्यतः ।
नासा च वक्रा भवति स ज्ञेयो गतजीवितः ॥ २२ ॥
यस्य कृष्णा खरा जिह्वा पङ्कभासच्च वै मुखं ।
गण्डे चिपिटके रक्ते तस्य मृत्युरुपस्थितः ॥ २३ ॥
मुक्तकेशो हसंश्चैव गायन् नृत्यंश्च यो नरः ।
याम्याशाभिमुखो गच्छेत्तदन्तं तस्य जीवितं ॥ २४ ॥
यस्य स्वेदसमुद्भूताः श्वेतसर्षपसन्निभाः ।
स्वेदा भवन्ति ह्यसकृत्तस्य मृत्युरुपस्थितः ॥ २५ ॥
उष्ट्रा वा रासभा वापि युक्ताः स्वप्ने रथेऽशुभाः ।
यस्य सोपि न जीवेत दक्षिणाभिमुखो गतः ॥ २६ ॥
इ चात्र परमेऽरिष्टे एतद्रूपं परं भवेत् ।
घोषं न शृणुयात् कर्णे ज्योतिर्नैत्रे न पश्यति ॥२७ ॥
स्वभ्रे यो निपतेत् स्वप्ने द्वारच्छास्य न विद्यते ।
न चोत्तिष्ठति यः स्वभ्रात्तदन्तं तस्य जीवितं ॥ २८ ॥

ऊर्द्धा च दृष्टिर्न च सम्प्रतिष्ठा
रक्ता पुनः सम्परिवर्त्तमाना ।
मुखस्य चोष्मा शुषिरा च नाभि-
रत्युष्णमूत्रो विषमस्थ एव ॥ २९ ॥

दिवा वा यदि वा रात्रौ प्रत्यक्षं योऽभिहन्यते ।
तं पश्येदथ हन्तारं स हतस्तु न जीवति ॥ ३० ॥
अग्निप्रवेशं कुरुते स्वप्नान्ते यस्तु मानवः ।
स्मृतिं नोपलभेच्चापि तदन्तं तस्य जीवितं ॥ ३१ ॥



यस्तु प्रावरणं शुक्लं स्वकं पश्यति मानवः ।
रक्तं कृष्णमपि स्वप्ने तस्य मृत्युरुपस्थितः ॥ ३२ ॥
अरिष्टसूचिते देहे तस्मिन्काल उपागते ।
त्यक्त्वा भयविषादच्च उद्गच्छेद्बुद्धिमान्नरः ॥ ३३ ॥
प्राचीं वा यदि वोदीचीं दिशं निष्क्रम्य वै शुचिः ।
समेऽतिस्थावरे देशे विविक्ते जनवर्जिते ॥ ३४ ॥
उदङ्मुखः प्राङ्मुखो वा स्वस्थः स्वाचान्त एव च ।
स्वस्तिकोपनिविष्टश्च नमस्कृत्वा महेश्वरं ।
समकायशिरोग्रीवन्धारयेन्नावलोकयेत् ॥ ३५ ॥
यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
प्रागुदक्प्रवणे देशे तस्माद्युञ्जीत योगवित् ॥ ३६ ॥
प्राणे च रमते नित्यं चक्षुषोः स्पर्शने तथा ।
श्रोत्रे मनसि बुद्धौ च तथा वक्त्रसि धारयेत् ॥ ३७ ॥
कालधर्म्मञ्च विज्ञाय समूहच्चैव सर्व्वगः ।
द्वादशाध्यात्म इत्येवं योगधारणमुच्यते ॥ ३८ ॥
शतमष्टशतं वापि धारणां मूर्द्ध्नि धारयेत् ।
न तस्य धारणायोगाद्वायुः सर्व्वं प्रवर्त्तते ॥ ३९ ॥
ततस्त्वापूरयेद्देहं ओंकारेण समाहितः ।
अथोङ्कारमयो योगी न चरेत्त्वचरो भवेत् ॥ ४० ॥

इति श्रीमहापुराणे वायुप्रोक्ते अरिष्टानि नामोनविंशोऽध्यायः ।

# अथ विंशोऽध्यायः।

———000———

## ओंकारप्राप्तिलक्षणं।

वायुरुवाच। अत ऊर्द्धं प्रवक्ष्यामि ओंकारप्राप्तिलक्षणं।
एष त्रिमात्रो विज्ञेयो व्यञ्जनञ्चाच सस्वरं ॥ १ ॥
प्रथमा वैद्युती मात्रा द्वितीया तामसी स्मृता।
तृतीया निर्गुणी विद्यान्मात्रामक्षरगामिनीं ॥ २ ॥
गन्धर्व्वीति च विज्ञेया गान्धारस्वरसम्भवा।
पिपीलिकासमस्पर्शा प्रयुक्ता मूर्द्ध्नि लक्ष्यते ॥ ३ ॥
तथा प्रयुक्तमोङ्कारं प्रतिनिर्वाति मूर्द्धनि।
तथोङ्कारमयो योगी ह्यक्षरे त्वक्षरी भवेत् ॥ ४ ॥
प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।
अप्रमत्तेन चेद्वध्यं शरवत्तन्मयो भवेत् ॥ ५ ॥
ओंमित्येकाक्षरं ब्रह्म गुहायां निहितं पदं।
ओमित्येतत् त्रयो वेदास्त्रयो लोकास्त्रयोऽग्नयः।
विष्णुक्रमास्त्रयस्त्वेते ऋक्सामानि यजूंषि च ॥ ६ ॥
मात्राश्चाच चतस्रस्तु विज्ञेयाः परमार्थतः।
तत्र युक्तश्च यो योगी तस्य सालोक्यतां व्रजेत् ॥ ७ ॥
अकारस्त्वक्षरो ज्ञेय उकारः स्वरितः स्मृतः।
मकारस्तु प्लुतो ज्ञेयस्त्रिमात्र इति संज्ञितः ॥ ८ ॥
अकारस्त्वथ भूर्लोक उकारो भुव उच्यते।



सव्यञ्जनो मकारश्च स्वर्लोकश्च विधीयते ॥ ९ ॥
ओंकारस्तु त्रयो लोकाः शिरस्तस्य त्रिपिष्टपं।
भुवनान्तञ्च तत्सर्व्वं ब्राह्मन्तत्पदमुच्यते ॥ १० ॥
मात्रापदं रुद्रलोको ह्यमात्रस्तु शिवं पदं।
एवन्ध्यानविशेषेण तत्पदं समुपासते ॥ ११ ॥
तस्माद्ध्यानरतिर्नित्यममात्रं हि तदक्षरं।
उपास्यं हि प्रयत्नेन शाश्वतं पदमिच्छता ॥ १२ ॥
ह्रस्वा तु प्रथमा मात्रा ततो दीर्घा त्वनन्तरं।
ततः प्लुतवती चैव तृतीया उपदिश्यते ॥ १३ ॥
एतास्तु मात्रा विज्ञेया यथावदनुपूर्व्वशः।
यावच्चैव तु शक्यन्ते धार्य्यन्ते तावदेव हि ॥ १४ ॥
इन्द्रियाणि मनो बुद्धिं ध्यायन्नात्मनि यः सदा।
अत्राष्टमात्रमपि चेच्छृणुयात्फलमाप्नुयात् ॥ १५ ॥
मासे मासेऽश्वमेधेन यो यजेत शतं समाः।
न स तत् प्राप्नुयात् पुण्यं मात्रया यदवाप्नुयात् ॥ १६ ॥
अविन्दुं यः कुशाग्रेण मासे मासे पिबेन्नरः।
संवत्सरशतं पूर्णं मात्रया तदवाप्नुयात् ॥ १७ ॥
इष्टापूर्त्तस्य यज्ञस्य सत्यवाक्ये च यत्फलं।
अतक्षणे च मांसस्य मात्रया तदवाप्नुयात् ॥ १८ ॥
स्वाम्यर्थं युध्यमानानां शूराणामनिवर्त्तिनां(१)।
यज्ञवेत्तत्फलं दृष्टं मात्रया तदवाप्नुयात् ॥ १९ ॥

---

१ शूनानामनिवर्त्तिनामिति क०, घ० च।

न तथा तपसोग्रेण न यज्ञैर्भूरिदक्षिणैः ।
यत्फलं प्राप्नुयात् सम्यक् मात्रया तदवाप्नुयात् ॥ २० ॥
तत्र वै योऽर्द्धमात्रो यः प्लुतो नामोपदिश्यते ।
एषा एव भवेत्कार्य्या गृहस्थानान्तु योगिनां ॥ २१ ॥
एषा चैव विशेषेण ऐश्वर्य्यसमलक्षणा ।
योगिनान्तु विशेषेण ऐश्वर्य्यं ह्यष्टलक्षणे ।
अणिमाद्येतिविज्ञेया तस्माद्युञ्जीत तां द्विजः ॥ २२ ॥
एवं हि योगी संयुक्तः शुचिर्दान्तो जितेन्द्रियः ।
आत्मानं विन्दते यस्तु स सर्व्वं विन्दते द्विजः ॥ २३ ॥
ऋचो यजूंषि सामानि वेदोपनिषदस्तथा ।
योगज्ञानादवाप्नोति ब्राह्मणो ध्यानचिन्तकः ॥ २४ ॥
सर्व्वभूतलयो भूत्वा अभूतः स तु जायते ।
योगिसङ्क्रमणं कृत्वा याति वै शाश्वतं पदं ॥ २५ ॥
अपि चात्र चतुर्ह्योतां ध्यायमानश्चतुर्मुखीं ।
प्रकृतिं विश्वरूपाख्यां दृष्ट्वा दिव्येन चक्षुषा ॥ २६ ॥
अजामेतां लोहितशुक्लकृष्णां वह्वीः प्रजाः सृजमानां स्वरूपां ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ।

अष्टाक्षरां षोड़शपाणिपादां
चतुर्मुखीं त्रिशिखामेकशृङ्गां ।
आद्यामजां विश्वसृजां स्वरूपां
ज्ञात्वा बुधास्त्वमृतत्वं व्रजन्ति ।
ये ब्राह्मणाः प्रणवं वेदयन्ति
न ते पुनः संसरन्तीह भूयः ॥ २७ ॥



इत्येतदक्षरं ब्रह्म परमोङ्कारसंज्ञितं ।
यस्तु वेदयते सम्यक् तथा ध्यायति वा पुनः ॥ २८ ॥
संसारचक्रमुत्सृज्य मुक्तबन्धनबन्धनः ।
अचलं निर्गुणं स्थानं शिवं प्राप्नोत्यसंशयः ।
इत्येतद्वै मया प्रोक्तमोङ्कारप्राप्तिलक्षनं ॥ २९ ॥

नमो लोकेश्वराय सङ्कल्पकल्पग्रहणाय(१) महान्तमुपतिष्ठते तद्वो हितं यद्ब्रह्मणे नमः ।

सर्व्वत्र स्थानिने निर्गुणाय सम्भक्तयोगीश्वराय च ।

पुष्करपर्णमिवाङ्गिर्विशुद्धमिव ब्रह्ममुपतिष्ठेत्पवित्रं पवित्राणां पवित्रं पवित्रेण परिपूरितेन पवित्रेण ऋस्वन्दीर्घप्लुतमिति तदेतमोङ्कारमशब्दमस्पर्शमरूपमरसमगन्धं पर्य्युपासेत अविद्येशानाय विश्वरूपो न तस्य अविद्येशानाय नमो योगीश्वरायेति च येन द्यौरुग्रा पृथिवी च दृढ़ा येन स्वस्तनितं येन नाकस्तयोरन्तरीक्षं इमे वरीयसो देवानां हृदयं विश्वरूपो न तस्य प्राणापानोपमश्चास्ति ओंकारोविश्वविश्वा वै यज्ञः यज्ञो वै वेदः वेदो वै नमस्कारः नमस्कारो रुद्रः नमो रुद्राय योगेश्वराधिपतये नमः ॥

इति सिद्धिप्रत्युपस्थानं सायं प्रातर्मध्याह्ने नम इति ।

सर्व्वकामफलोरुद्रः ।

यथा ह्युत्तात्फलं पक्वं पवनेन समीरितं ।
नमस्कारेण रुद्रस्य तथा पापं प्रणश्यति ॥ ३० ॥
यथा रुद्रनमस्कारः सर्व्वधर्म्मफलो ध्रुवः ।

---

१ सङ्कल्पसङ्कल्परचणायेति घ० । सङ्कल्पलक्षणायेति ख० ।

अन्यदेवनमस्कारो न तत् फलमवाप्नुयात् ॥ ३१ ॥
तस्मात्त्रिषवणं योगो उपासीत महेश्वरं ।
दशविस्तारकं ब्रह्म तथा च ब्रह्म विस्तरं ॥ ३२ ॥
ओंकारं सर्व्वतः काले सर्व्वं विहितवान् प्रभुः ।
तेन तेन तु विष्णुत्वं नमस्कारं महायशाः ॥ ३३ ॥
नमस्कारस्तथा चैव प्रणवस्तुवते प्रभुं ।
प्रणवं स्तुवते यज्ञो यज्ञं संस्तुवते नमः ।
नमस्तुवति वै रुद्रस्तस्मात् रुद्रपदं शिवं ॥ ३४ ॥
इत्येतानि रहस्यानि यतीनां वै यथाक्रमं ।
यस्तु वेदयते ध्यानं स परं प्राप्नुयात्पदं ॥ ३५ ॥

इति श्रीमहापुराणे वायुप्रोक्ते ओंकारप्राप्तिलक्षणं नाम विंशोऽध्यायः ।

---

पाशुपतयोगः समाप्तः ।

---

# अथैकविंशोऽध्यायः ।

## कल्पनिरूपणं ।

सूत उवाच । ऋषीणामग्निकल्पानां नैमिषारण्यवासिनां ।
ऋषिः श्रुतिधरः प्राज्ञः सावर्णिर्नाम नामतः ॥ १ ॥
तेषां सोप्यऽयतो भूत्वा वायुं वाक्यविशारदः ।
सातत्यं तत्र कुर्व्वन्तं प्रियार्थं सत्रयाजिनां ।
विनयेनोपसङ्गम्य पप्रच्छ स महाद्युतिं ॥ २ ॥
सावर्णिरुवाच । विभो पुराणसम्बद्धां कथां वै वेदसम्मितां ।
श्रोतुमिच्छामहे सम्यक् प्रसादात्सर्व्वदर्शिनः ॥ ३ ॥
हिरण्यगर्भो भगवान् ललाटान्नीललोहितं ।
कथं तत्तेजसन्देवं लब्धवान् पुत्रमात्मनः ॥ ४ ॥
कथञ्च भगवान् जज्ञे ब्रह्मा कमलसम्भवः ।
रुद्रत्वञ्चैव सर्व्वस्य स्वात्मजस्य कथं पुनः ॥ ५ ॥
कथञ्च विष्णोरुद्रेण सार्द्धं प्रीतिरनुत्तमा ।
सर्व्वे विष्णुमया देवा सर्व्वविष्णुमया गणाः ॥ ६ ॥
न च विष्णुसमा काचिद्गतिरन्या विधीयते ।
इत्येवं सततं देवा गायन्ते नात्र संशयः ।
भवस्य स कथं नित्यं प्रणामं कुरुते हरिः ॥ ७ ॥
सूत उवाच । एवमुक्तो तु भगवान् वायुः सावर्णिमब्रवीत् ।
अहो साधु त्वया साधो पृष्टः प्रश्नो ह्यनुत्तमः ॥ ८ ॥

भवस्य पुत्रजन्मत्वं ब्रह्मणः सोऽभवद्यथा ।
ब्रह्मणः पद्मयोनित्वं रुद्रत्वं शङ्करस्य च ॥ ९ ॥
हाभ्यामपि च सम्प्रीतिर्विष्णोश्चैव भवस्य च ।
यच्चापि कुरुते नित्यं प्रणामं शङ्करस्य च ।
विस्तरेणानुपूर्व्याच्च शृणुत ब्रुवतो मम ॥ १० ॥
मन्वन्तरस्य संहारे पश्चिमस्य महात्मनः ।
आसीत्तु सप्तमः कल्पः पद्मोनाम (१) द्विजोत्तम ।
वाराहः साम्प्रतस्तेषां तस्य वक्ष्यामि विस्तरं ॥ ११ ॥

सावर्णिरुवाच । कियता चैव कालेन कल्पः सम्भवते कथं ।
किञ्च प्रमाणं कल्पस्य तत्र ब्रूहि पृच्छतां ॥ १२ ॥

वायुरुवाच । मन्वन्तराणां सप्तानां कालसंख्या यथाक्रमं ।
प्रवक्ष्यामि समासेन ब्रुवतो मे निबोधत ॥ १३ ॥
कोटीनां द्वे सहस्रे वै अष्टौ कोटिशतानि च ।
द्विषष्टिश्च तथा कोट्यो नियुतानि च सप्ततिः ।
कल्पाद्यस्य तु संख्यायामेतत् सर्व्वमुदाहृतं ॥ १४ ॥
पूर्व्वोक्तौ च गुणच्छेदौ वर्षाग्रं लब्धमादिशेत् ।
शतञ्चैव तु कोटीनां कोटीनामष्टसप्ततिः ।
द्वे च शतसहस्रे तु नवतिर्नियुतानि च ॥ १५ ॥
मानुषेण प्रमाणेन यावद्वैवस्वतान्तरं ।
एष कल्पस्तु विज्ञेयः कल्पाद्यैर्द्विगुणीकृतः ॥ १६ ॥
अनागतानां सप्तानामेतदेव यथाक्रमं ।

१ पद्मो नामेति घ० ।



प्रमाणं कालसंख्याया विज्ञेयं मतमैश्वरं ॥ १७ ॥
नियुतान्यष्टपञ्चाशत्तथाशीतिशतानि च ।
चतुरशीति चान्यानि प्रयुतानि (१) प्रमाणतः ॥ १८ ॥
सप्तर्षयो मनुश्चैव देवाश्चेन्द्रपुरोगमाः ।
एतत् कालस्य विज्ञेयं वर्षाग्रन्तु प्रमाणतः ॥ १९ ॥
एवं मन्वन्तरं तेषां मानुषान्तः प्रकीर्त्तितः ।
प्रणवान्ताश्च ये देवाः साध्या देवगणाश्च ये ।
विश्वे देवाश्च ये नित्याः कल्पं जीवन्ति ते गणाः ॥ २० ॥
अयं यो वर्त्तते कल्पो वाराहः स तु कीर्त्यते ।
यस्मिन् स्वायम्भुवाद्याश्च मनवश्च चतुर्दश ॥ २१ ॥

ऋषय ऊचुः । कस्माद्वाराह कल्पोऽयं नामतः परिकीर्त्तितः ।
कस्माच्च कारणाद्देवो वराह इति कीर्त्यते ॥ २२ ॥
को वा वराहो भगवान् कस्य योनिः किमात्मकः ।
वराहः कथमुत्पन्न एतदिच्छाम वेदितुं ॥ २३ ॥

वायुरुवाच । वराहस्तु यथोत्पन्नो यस्मिन्नर्थे च कल्पितः ।
वाराहश्च यथा कल्पः कल्पत्वं कल्पना च या ॥ २४ ॥
कल्पयोरन्तरं यच्च तस्य चास्य च कल्पितं ।
तत्सर्व्वं सम्प्रवक्ष्यामि यथा दृष्टं यथा श्रुतं ॥ २५ ॥
भवस्तु प्रथमः कल्पो लोकादौ प्रथितः पुरा ।
ज्ञातव्यो भगवांश्चैव ह्यानन्दः साम्प्रतः स्वयं ॥ २६ ॥

१ प्रयुक्तानीति घ० ।
२ कल्पस्येति घ०, ङ० च ।

ब्रह्मस्थानमिदं दिव्यं प्राप्तं वा दिव्यसम्भवं ।
द्वितीयस्तु भूवः कल्पस्तृतीयस्तप उच्यते ॥ १७ ॥
भवश्चतुर्थो विज्ञेयः पञ्चमो रुभ एव च ।
ऋतुकल्पस्तथा षष्ठः सप्तमस्तु क्रतुः स्मृतः ॥ २८ ॥
अष्टमस्तु भवेद्वह्निर्नवमो हव्यवाहनः ।
सावित्रो दशमः कल्पो भुवस्त्वेकादशः स्मृतः ॥ २९ ॥
उशिको द्वादशस्तत्र कुशिकस्तु त्रयोदशः ।
चतुर्दशस्तु गन्धर्वो गान्धर्वो यत्र वै स्वरः ।
उत्पन्नस्तु यथा नादो गन्धर्व्वा यत्र चोत्थिताः ॥ ३० ॥
ऋषभस्तुततः कल्पो ज्ञेयः पञ्चदशो द्विजाः ।
ऋषयो यत्र सम्भूताः स्वरो लोकमनोहरः ॥ ३१ ॥
षड्जस्तु षोड़शः कल्पः षड्जना यत्र चर्षयः ।
शिशिरश्च वसन्तश्च निदाघो वर्ष एव च ॥ ३२ ॥
शरद्धेमन्त इत्येते मानसा ब्रह्मणः सुताः ।
उत्पन्नाः षड्जसंसिद्धाः पुत्राः कल्पे तु षोड़शे ॥ ३३ ॥
यस्माज्जातैश्च तैः षड्भिः सद्योजातो महेश्वरः ।
तस्मात् समुत्थितः षड्जः स्वरस्तूदधिसन्निभः ॥ ३४ ॥
ततः सप्तदशः कल्पो मार्जालीय इति स्मृतः ।
मार्ज्जालीयन्तु तत् कर्म्म यस्माद्ब्राह्मकल्पयत् ॥ ३५ ॥
ततस्तु मध्यमो नाम कल्पोऽष्टादश उच्यते ।
यस्मिंस्तु मध्यमो नाम स्वरो धैवतपूजितः ।
उत्पन्नः सर्व्वभूतेषु मध्यमो वै स्वयम्भुवः ॥ ३६ ॥
ततस्त्वेकोनविंशस्तु कल्पो वैराजकः स्मृतः ।



वैराजो यत्र भगवान् मनुर्वै ब्रह्मणः सुतः ।। ३७ ॥
तस्य पुत्रस्तु धर्म्मात्मा दधीचिर्न्नाम धार्म्मिकः ।
प्रजापतिर्महातेजा बभूव त्रिदशेश्वरः ॥ ३८ ॥
अकामयत गायत्री यजमानं प्रजापतिं ।
तस्मात्(१)जज्ञे स्वरः स्निग्धः पुत्रस्तस्य दधीचिनः ॥३९॥
ततो विंशतिमः कल्पो निषादः परिकीर्त्तितः ।
प्रजापतिस्तु तं दृष्ट्वा स्वयम्भूप्रभवं तदा ।
विरराम प्रजाः स्रष्टुं निषादस्तु तपोऽतपत् ॥ ४० ॥
दिव्यं वर्षसहस्रन्तु निराहारो जितेन्द्रियः ।
तमुवाच महातेजा ब्रह्मा लोकपितामहः ॥ ४१ ॥
ऊर्द्ध्वबाहुं तपोग्लानं दुःखितं क्षुत्पिपासितं ।
निषीदेत्यब्रवीदेनं पुत्रं शान्तं पितामहः ।
तस्मान्निषादः सम्भूतः स्वरस्तु स निषादवान् ॥ ४२ ॥
एकविंशतिमः कल्पो विज्ञेयः पञ्चमो द्विजाः ।
प्राणोऽपानः समानश्च उदानो व्यान एव च ॥ ४३ ॥
ब्रह्मणो मानसाः पुत्राः पञ्चैते ब्रह्मणः समाः ।
तैस्त्वर्थवादिभिर्युक्तैर्वाग्भिरिष्टो महेश्वरः ॥ ४४ ॥
यस्मात्परिगतैर्गीतः पञ्चभिस्तैर्महात्मभिः ।
स्वरस्तु पञ्चमः स्निग्धः तस्मात्कल्पस्तु पञ्चमः ॥ ४५ ॥
द्वाविंशस्तु तथा कल्पो विज्ञेयो मेघवाहनः ।
यत्र विष्णुर्महाबाहुर्मेघीभूत्वा महेश्वरं ।

---

१ तस्येति घ० ।

दिव्यं वर्षसहस्रन्तु अवहत् क्रत्तिवाससं ॥ ४६ ॥
तस्य निश्वसमानस्य भाराक्रान्तस्य वै मुखात् ।
निर्जगाम महाकायः कालो लोकप्रकाशनः ।
यस्त्वयं यठते विप्रैर्विष्णुर्वै कश्यपात्मजः ॥ ४७ ॥
त्रयोविंशतिमः कल्पो विज्ञेयश्चिन्तकस्तथा ।
प्रजापतिसुतः श्रीमान् चितिश्च मिथुनञ्च तौ ॥ ४८ ॥
ध्यायतो ब्रह्मणश्चैव यस्माच्चिन्ता समुत्थिता ।
तस्मात्तु चिन्तकः सो वै कल्पः प्रोक्तः स्वयम्भुवा ॥ ४९ ॥
चतुर्विंशतिमश्चापि ह्याकूतिः कल्प उच्यते ।
आकूतिश्च तथा देवी मिथुनं सम्बभूव ह ॥ ५० ॥
प्रजाः स्रष्टुं तथाकूतिं यस्मादाह प्रजापतिः ।
तस्मात् स पुरुषो ज्ञेय आकूतिः कल्पसंज्ञितः ॥ ५१ ॥
पञ्चविंशतिमः कल्पो विज्ञातिः परिकीर्त्तितः ।
विज्ञातिश्च तथा देवी मिथुनं संप्रसूयते ॥ ५२ ॥
ध्यायतः पुत्रकामस्य मनस्यध्यात्मसंज्ञितं ।
विज्ञातं वै समासेन विज्ञातिस्तु ततः स्मृतः ॥ ५३ ॥
षड्विंशस्तु ततः कल्पो मन इत्यभिधीयते ।
देवी च शङ्करी नाम मिथुनं सम्प्रसूयते ॥ ५४ ॥
प्रजा वै चिन्तमानस्य स्रष्टुकामस्य वै तदा ।
यस्मात् प्रजासम्भवनादुत्पन्नस्तु स्वयम्भुवा ।
तस्मात् प्रजासम्भवनाद्भावनासम्भवः स्मृतः ॥ ५५ ॥
सप्तविंशतिमः कल्पो भावो वै कल्पसंज्ञितः ।
पौर्णमासी तथा देवी मिथुनं समपद्यत ॥ ५६ ॥



प्रजा वै स्रष्टुकामस्य ब्रह्मणः परमेष्ठिनः ।
ध्यायतस्तु परं ध्यानं परमात्मानमीश्वरं ॥ ५७ ॥
अग्निस्तु मण्डलीभूत्वा रश्मिजालसमावृतः ।
भुवन्दिवञ्च विष्टभ्य दीप्यते स महावपुः ॥ ५८ ॥
ततो वर्षसहस्रान्ते सम्पूर्णे ज्योतिमण्डले ।
आविष्टया सहोत्पन्नमपश्यत् सूर्य्यमण्डलं ॥ ५९ ॥
यस्माददृश्यो भूतानां ब्रह्मणा परमेष्ठिना ।
दृष्टस्तु भगवान् देवः सूर्य्यः सम्पूर्णमण्डलः ॥ ६० ॥
सर्वे योगाश्च मन्त्राश्च मण्डलेन सहोत्थिताः ।
यस्मात्कल्पो ह्ययं दृष्टस्तस्मात्तं दर्शमुच्यते ॥ ६१ ॥
यस्मान्मनसि सम्पूर्णो ब्रह्मणः परमेष्ठिनः ।
पुरा वै भगवान् सोमः पौर्णमासी ततः स्मृता ॥ ६२ ॥
तस्मात्तु पर्व्वदर्शे वै पौर्णमासञ्च योगिभिः ।
उभयोः पक्षयोर्ज्येष्ठमात्मनो हितकाम्यया ॥ ६३ ॥
दर्शञ्च पौर्णमासञ्च ये यजन्ति द्विजातयः ।
न तेषां पुनरावृत्तिर्ब्रह्मलोकात् कदाचन ॥ ६४ ॥
योऽनाहिताग्निः प्रयतो वीराध्वानं गतोपि वा ।
समाधाय मनस्तीव्रं मन्त्रमुच्चारयेच्छनैः ॥ ६५ ॥
त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्व्वो मारुतं पृष्ट ईशिषे
त्वं पाशगन्धर्व्वशिषं पूषा विधत्तपासिना (१) ।
इत्येव मन्त्रं मनसा सम्यगुच्चारयेद् द्विजः ।

---

१ ल॑ वातैर्यासि शङ्कराय त्वं पूषोज्झितधामामि इति ख०, ङ० च ।

अग्निं प्रविशते यस्तु रुद्रलोकं स गच्छति ॥ ६६ ॥
सोमश्चाग्निस्तु भगवान् कालो रुद्र इति श्रुतिः ।
तस्माद्यः प्रविशेदग्निं स रुद्रान्न निवर्त्तते ॥ ६७ ॥
अष्टाविंशतिमः कल्पो बृहदित्यभिसंज्ञितः ।
ब्रह्मणः पुत्रकामस्य स्रष्टुकामस्य वै प्रजाः ।
ध्यायमानस्य मनसा बृहत्साम रथन्तरं ॥ ६८ ॥
यस्मात्तत्र समुत्पन्नो बृहतः सर्व्वतोमुखः ।
तस्मात्तु बृहतः कल्पो विज्ञेयस्तत्त्वचिन्तकैः ॥ ६९ ॥
अष्टाशीतिसहस्राणां योजननां प्रमाणतः ।
रथन्तरन्तु विज्ञेयं परमं सूर्य्यमण्डलं ।
तस्मादण्डन्तु विज्ञेयमभेद्यं सूर्य्यमण्डलं ॥ ७० ॥
यत्सूर्य्यमण्डलञ्चापि बृहत्साम तु भिद्यते ।
भित्त्वा चैनं द्विजा यान्ति योगात्मानो दृढ़व्रताः ।
सङ्घातमुपनीताश्च अन्ये कल्पा रथन्तरे ॥ ७१ ॥
इत्येतत्तु मया प्रोक्तं चित्रमध्यात्मदर्शनं ।
अतः परं प्रवक्ष्यामि कल्पानां विस्तरं शुभं ॥ ७२ ॥

इति श्रीमहापुराणे वायुप्रोक्ते कल्पनिरूपणं नामैकविंशोऽध्यायः ।

---

# अथ द्वाविंशोऽध्यायः ।

———ooo@ooo———

## कल्पसंख्यानिरूपणं ।

ऋषय ऊचुः । अत्यद्भुतमिदं सर्व्वं कल्पानान्ते महामुने ।
रहस्यं वै समाख्यातं मन्वाणाञ्च प्रकल्पनं ॥ १ ॥
न तवाविदितं किञ्चित् त्रिषु लोकेषु विद्यते ।
तस्माद्विस्तरतः सर्व्वाः कल्पसंख्या ब्रवीहि नः ॥ २ ॥

वायुरुवाच । अत्र वः कथयिष्यामि कल्पसंख्या यथा तथा ।
युगाग्रञ्च वर्षाग्रन्तु ब्रह्मणः परमेष्ठिनः ॥ ३ ॥
एकं कल्पसहस्रन्तु ब्रह्मणोऽब्दः प्रकीर्त्तितः ।
एतद्दृष्टसहस्रन्तु ब्रह्मणस्तद्युगं स्मृतं ॥ ४ ॥
एकं युगसहस्रन्तु सवनं तत् प्रजापतेः ।
सवनानां सहस्रन्तु द्विगुणं त्रिहृतं तथा ॥ ५ ॥
ब्रह्मणः स्थितिकालस्य चैतत्सर्व्वं प्रकीर्त्तितं ।
तस्य संख्यां प्रवक्ष्यामि पुरस्ताद्वै यथाक्रमं ॥ ६ ॥
अष्टाविंशतिर्ये कल्पा नामतः परिकीर्त्तिताः ।
तेषां पुरस्ताद्वक्ष्यामि कल्पसंज्ञा यथाक्रमं ॥ ७ ॥
रथन्तरस्य साम्नस्तु उपरिष्टान्निबोधत ।
कल्पान्ते नामधेयानि मन्वोत्पत्तिश्च यस्य या ॥ ८ ॥
एकोनविंशकः कल्पो विज्ञेयः श्वेतलोहितः ।
यस्मिंस्तत् परमध्यानं ध्यायतो ब्रह्मणस्तथा ॥ ९ ॥

श्वेतोष्णीषः श्वेतमाल्यः श्वेताम्बरधरः शिखी ।
उत्पन्नस्तु महातेजाः कुमारः पावकोपमः ॥ १० ॥
भीमं मुखं महारौद्रं सुघोरं श्वेतलोहितं ।
दीप्तं दीप्तेन वपुषा महास्यं श्वेतवर्चसं ॥ ११ ॥
तं दृष्ट्वा पुरुषः श्रीमान् ब्रह्मा वै विश्वतो मुखः ।
कुमारं लोकधातारं विश्वरूपं महेश्वरं ॥ १२ ॥
पुराणपुरुषं देवं विश्वात्मा योगिनां चिरं ।
ववन्दे देवदेवेशं ब्रह्मा लोकपितामहः ॥ १३ ॥
हृदि कृत्वा महादेवं परमात्मानमीश्वरं ।
सद्योजातं ततो ब्रह्म ब्रह्मा वै समचिन्तयत् ।
ज्ञात्वा मुमोच देवेशो हृष्टो हासं जगत्पतिः ॥ १४ ॥
ततोऽस्य पार्श्वतः श्वेता ऋषयो ब्रह्मवर्चसः ।
प्रादुर्भूता महात्मानः श्वेतमाल्यानुलेपनाः ॥ १५ ॥
सुनन्दो नन्दकश्चैव विश्वनन्दोऽथ नन्दनः ।
शिखास्ते वै महात्मानो यैस्तु ब्रह्म ततो हुतं ॥ १६ ॥
तस्याग्रे श्वेतवर्णाभः श्वेतनामा महामुनिः ।
विजज्ञेऽथ महातेजा यस्माज्जज्ञे नरस्त्वसौ ॥ १७ ॥
तत्र ते ऋषयः सर्वे सद्योजातं महेश्वरं ।
तस्माद्विश्वेश्वरं देवं ये प्रपश्यन्ति (१) वै द्विजाः ।
प्राणायामपरा युक्ता ब्रह्मणि व्यवसायिनः ॥ १८ ॥
ते सर्वे पापनिर्मुक्ता विमला ब्रह्मवर्चसः ।

१ प्रपद्यन्तीति घ० ।



ब्रह्मलोकमतिक्रम्य ब्रह्मलोकं व्रजन्ति च ॥ १९ ॥
वायुरुवाच । ततस्त्विंशत्तमः कल्पो रक्तो नाम प्रकीर्त्तितः ।
रक्तो यत्र महातेजा रक्तवर्णमधारयत् ॥ २० ॥
ध्यायतः पुत्रकामस्य ब्रह्मणः परमेष्ठिनः ।
प्रादुर्भूतो महातेजाः कुमारो रक्तविग्रहः ।
रक्तमाल्याम्बरधरो रक्तनेत्रः प्रतापवान् ॥ २१ ॥
स तं दृष्ट्वा महादेवं कुमारं रक्तवाससं ।
ध्यानयोगं परङ्गत्वा बुबुधे विश्वमीश्वरं ॥ २२ ॥
स तं प्रणम्य भगवान् ब्रह्मा परमयन्त्रितः ।
वामदेवं ततो ब्रह्मा ब्रह्मात्मकं व्यचिन्तयत् ॥ २३ ॥
एवं ध्यातो महादेवो ब्रह्मणा परमेष्ठिना ।
मनसा प्रीतियुक्तेन पितामहमथाब्रवीत् ॥ २४ ॥
ध्यायता पुत्रकामेन यस्मात्त्वेहं पितामह ।
दृष्टः परमया भक्त्या ध्यानयोगेन सत्तम ॥ २५ ॥
तस्माद्वरं परं प्राप्य कल्पे कल्पे महातपाः ।
वेत्स्यसे मां महासत्त्व लोकधातारमीश्वरं ।
एवमुक्त्वा ततः शर्व्वः अट्टहासं मुमोच ह ॥ २६ ॥
ततस्तस्य महात्मानश्चत्वारश्च कुमारकाः ।
सम्बभूवुर्महात्मानो विरेजुः शुद्धबुद्धयः ॥ २७ ॥
विरजश्च विवाहश्च (१) विशोको विश्वभावनः ।
ब्रह्मण्या ब्रह्मणस्तुल्या वीरा अध्यवसायिनः ॥ २८ ॥

१ विराजश्चेति ख० ।

रक्ताम्बरधराः सर्व्वे रक्तमाल्यानुलेपनाः।
रक्तभस्मानुलिप्ताङ्गा रक्तास्या रक्तलोचनाः॥ २९॥
ततो वर्षसहस्रान्ते ब्रह्मण्या व्यवसायिनः।
गृणन्तश्च महात्मानो ब्रह्म तद्दामदैवकं॥ ३०॥
अनुग्रहार्थं लोकानां शिष्याणां हितकाम्यया।
धर्मोपदेशमखिलं श्रुत्वा ते ब्राह्मणाः स्वयं।
पुनरेव महादेवं प्रविष्टा रुद्रमव्ययं॥ ३१॥
येऽपि चान्ये द्विजश्रेष्ठा युञ्जाना वाममीश्वरं।
प्रपद्यन्ति महादेवं तद्भक्तास्तत्परायणाः॥ ३२॥
ते सर्व्वे पापनिर्मुक्ता विमला ब्रह्मवर्चसः।
रुद्रलोकं गमिष्यन्ति पुनरावृत्तिदुर्ल्लभं॥ ३३॥
इति श्रीमहापुराणे वायुप्रोक्ते कल्पसंख्यानिरूपणं नाम
द्वाविंशोऽध्यायः।

---

# अथ त्रयोविंशोऽध्यायः।

———000———

माहेश्वरावतारयोगः।

वायुरुवाच। एकत्रिंशत्तमः कल्पः पीतवासा इति स्मृतः।
ब्रह्मा यत्र महातेजाः पीतवर्णत्वमागतः॥ १॥
ध्यायतः पुत्रकामस्य ब्रह्मणः परमेष्ठिनः।
प्रादुर्भूतो महातेजाः कुमारः पीतवस्त्रवान्॥ २॥
पीतगन्धानुलिप्ताङ्गः पीतमाल्यधरो युवा।
पीतयज्ञोपवीतश्च पीतोष्णीषो महाभुजः॥ ३॥
तं दृष्ट्वा ध्यानसंयुक्तं ब्रह्मा लोकेश्वरं प्रभुं।
मनसा लोकधातारं ववन्दे परमेश्वरं॥ ४॥
ततो ध्यानगतस्तत्र ब्रह्मा माहेश्वरीं परां।
अपश्यन्नां विरूपाक्ष महेश्वरमुखच्युतां॥ ५॥
चतुष्पदां चतुर्व्वक्त्रां चतुर्हस्तां चतुस्तनीं।
चतुर्न्नेत्रां चतुःशृङ्गीं चतुर्ईष्ट्रां चतुर्मुखीं।
द्वात्रिंशल्लोकसंयुक्तां ईश्वरीं सर्व्वतोमुखीं॥ ६॥
स तां दृष्ट्वा महातेजा महादेवीं महेश्वरीं।
पुनराह महादेवः सर्व्वदेवनमस्कृतः॥ ७॥
मतिः स्मृतिर्बुद्धिरिति गायमानः पुनः पुनः।
एह्येहीति महादेवी सोत्तिष्ठत् प्राञ्जलिर्ऋषं॥ ८॥
विश्वमावृत्य योगेन जगत्सर्व्वं वशीकुरु।

अथ वा महादेवेन रुद्राणी त्वं भविष्यसि ।
ब्राह्मणानां हितार्थाय परमार्थं भविष्यसि ॥ ९ ॥
अथैनां पुत्रकामस्य ध्यायतः परमेष्ठिनः ।
प्रददौ देवदेवेशश्चतुष्पादां महेश्वरीं ।
ततस्तां ध्यानयोगेन विदित्वा परमेश्वरीं ॥ १० ॥
ब्रह्मा लोकनमस्कार्यः प्रपद्य तां महेश्वरीं ।
गायत्रीन्तु ततो रौद्रीं ध्यात्वा ब्रह्मा सुयन्त्रितः ॥ ११ ॥
इत्येतां वैदिकीं विद्यां रौद्रीं गायत्रीमर्पितां ।
जपित्वा तु महादेवीं रुद्रलोकनमस्कृतां ।
प्रपन्नस्तु महादेवं ध्यानयुक्तेन चेतसा ॥ १२ ॥
ततस्तस्य महादेवो दिव्यं योगं पुनः स्मृतः ।
ऐश्वर्यं ज्ञानसम्पत्तिं वैराग्यञ्च ददौ पुनः ॥ १३ ॥
अथाट्टहासं सुमुचे भीषणं दीप्तमीश्वरः ।
ततोऽस्य सर्व्वतो दीप्ताः प्रादुर्भूताः कुमारकाः ॥ १४ ॥
पीतमाल्याम्बरधराः पीतगन्धविलेपनाः ।
पीतोष्णीषशिराश्चैव पीतास्याः पीतमूर्द्धजाः ॥ १५ ॥
ततो वर्षसहस्रान्ते उषित्वा विमलौजसः ।
योगात्मानस्ततः स्नाता ब्राह्मणानां हितैषिणः ॥ १६ ॥
धर्म्मयोगबलोपेता ऋषीणां दीर्घसत्रिणां ।
उपदिश्य तु ते योगं प्रविष्टा रुद्रमीश्वरं ॥ १७ ॥
एवमेतेन विधिना प्रपन्ना ये महेश्वरं ।
अन्येपि नियतात्मानो ध्यानयुक्ता जितेन्द्रियाः ॥ १८ ॥
ते सर्व्वे पापमुत्सृज्य विरजा ब्रह्मवर्च्चसः ।



प्रविशन्ति महादेवं रुद्रन्ते त्वपुनर्भवाः ॥ १९ ॥
वायुरुवाच । ततस्तस्मिन् गते कल्पे पीतवर्णे स्वयम्भुवः ।
पुनरन्यः प्रवृत्तस्तु सितकल्पो हि नामतः ॥ २० ॥
एकार्णवे तदा वृत्ते दिव्ये वर्षसहस्रके ।
स्रष्टुकामः प्रजा ब्रह्मा चिन्तयामास दुःखितः ॥ २१ ॥
तस्य चिन्तयमानस्य पुत्रकामस्य वै प्रभोः ।
कृष्णः समभवद्वर्णो ध्यायतः परमेष्ठिनः ॥ २२ ॥
अथापश्यन्महातेजाः प्रादुर्भूतं कुमारकं ।
कृष्णवर्णं महावीर्य्यं दीप्यमानं स्वतेजसा ॥ २३ ॥
कृष्णाम्बरवरोष्णीषं कृष्णयज्ञोपवीतिनं ।
कृष्णेन मौलिना युक्तं कृष्णस्रगनुलेपनं ॥ २४ ॥
स तं दृष्ट्वा महात्मानममरं घोरमन्त्रिणं ।
ववन्दे देवदेवेशं विश्वेशं कृष्णपिङ्गलं ॥ २५ ॥
प्राणायामपरः श्रीमान् हृदि कृत्वा महेश्वरं ।
मनसा ध्यानसंयुक्तं प्रपन्नस्तु यतीश्वरं ।
अघोरेति ततो ब्रह्मा ब्रह्म एवानुचिन्तयन् । २६ ॥
एवं वै ध्यायतस्तस्य ब्रह्मणः परमेष्ठिनः ।
सुमोच भगवान् रुद्रः अट्टहासं महास्वनं । २७ ॥
अथास्य पार्श्वतः कृष्णाः कृष्णस्रगनुलेपनाः ।
चत्वारस्तु महात्मानः सम्बभूवुः कुमारकाः ॥ २८ ॥
कृष्णाः कृष्णाम्बरोष्णीषाः कृष्णास्याः कृष्णवाससः ।
तैश्चाट्टहासः सुमहान् हुंकारश्चैव पुष्कलः ।
नमस्कारश्च सुमहान् पुनः पुनरुदीरितः ॥ २९ ॥

ततो वर्षसहस्रान्ते योगात्तत् पारमेश्वरं।
उपासित्वा महाभागाः शिष्येभ्यः प्रददुस्ततः॥ २०॥
योगेन योगसम्पन्नाः प्रविश्य मनसा शिवं।
अमलं निर्गुणं स्थानं प्रविष्टा विश्वमीश्वरं॥ २१॥
एवमेतेन योगेन ये चाप्यन्ये द्विजातयः।
स्मरिष्यन्ति विधानज्ञा गन्तारो रुद्रमव्ययं॥ २२॥
ततस्तस्मिन् गते कल्पे क्षणरूपे भयानके।
अन्यः प्रवर्त्तितः कल्पो विश्वरूपस्तु नामतः॥ २३॥
विनिवृत्ते तु संहारे पुनः सृष्टे चराचरे।
ब्रह्मणः पुत्रकामस्य ध्यायतः परमेष्ठिनः।
प्रादुर्भूता महानादा विश्वरूपा सरस्वती॥ २४॥
विश्वमाल्याम्बरधरं विश्वयज्ञोपवीतिनं।
विश्वोष्णीषं विश्वगन्धं विश्वस्थानं महाभुजं॥ २५॥
अथ तं मनसा ध्यात्वा युक्तात्मा वै पितामहः।
ववन्दे देवमीशानं सर्व्वेशं सर्व्वगं प्रभुं॥ २६॥
ओमीशान नमस्तेऽस्तु, महादेव नमोऽस्तु ते।
एवं ध्यानगतं तत्र प्रणमन्तं पितामहं।
उवाच भगवानीशः प्रीतोऽहन्ते किमिच्छसि॥ २७॥
ततस्तु, प्रणतो भूत्वा वाग्भिः स्तुत्वा महेश्वरं।
उवाच भगवान् ब्रह्मा प्रीतः प्रीतेन चेतसा॥ २८॥
यदिदं विश्वरूपन्ते विश्वगं विश्वमीश्वरं।
एतद्वेदितुमिच्छामि कश्चायं परमेश्वरः॥ २९॥
कैषा भगवती देवी चतुःष्पादा चतुर्मुखी।



चतुःशृङ्गी चतुर्व्वक्त्रा चदुर्हस्ता चतुःस्तनी॥ ४०॥
चतुर्हस्ता चतुर्व्वेत्रा विश्वरूपा कथं स्मृता (१)।
किन्नामधेया कोऽस्यात्मा किंवीर्य्या वापि कर्म्मतः॥ ४१॥
महेश्वर उवाच। रहस्यं सर्व्वमन्त्राणां पावनं पुष्टिवर्द्धनं।
शृणुष्वैतत्परं गुह्यमादिसर्गे यथातथं (२)॥ ४२॥
अयं यो वर्त्तते कल्पो विश्वरूपस्त्वसौ स्मृतः।
यस्मिन् भवादयो देवाः षड्विंशन्मनवः स्मृताः॥ ४३॥
ब्रह्मस्थानमिदञ्चापि यदा प्राप्तं त्वया विभो।
तदाप्रभृति कल्पश्च त्रयस्त्रिंशत्तमो ह्ययं॥ ४४॥
शतं शतसहस्राणामतीता ये स्वयम्भुवः।
पुरस्तात्तव देवेश तान् शृणुष्व महामुने॥ ४५॥
आनन्दस्तु स विज्ञेय आनन्दन्ते महालयः (३)।
गालव्यगोचतपसा मम पुत्रत्वमागतः॥ ४६॥
त्वयि योगश्च साङ्गश्च तपो विद्याविधिः क्रिया।
ऋतं सत्यञ्च यद्ब्रह्म अहिंसा सन्ततिक्रमाः॥ ४७॥
ध्यानं ध्यानवपुः शान्तिर्विद्याऽविद्यामतिर्धृतिः।
कान्तिः शान्तिः स्मृतिर्मेधा लज्जा शुद्धिः सरस्वती।
तुष्टिः पुष्टिः क्रिया चैव लज्जा चान्तिः प्रतिष्ठिता॥ ४८॥
षड्विंशत्सङ्गुणा ह्येषा दाक्षिण्याचरसंज्ञिता।
प्रकृतिं विद्धि तां ब्रह्मन् त्वत्प्रसूतिं महेश्वरीं॥ ४९॥

---

१ तनुः स्मृतेति ख०।
२ यथाक्रममिति ख०।
३ महातपा इति ङ०।

सैषा भगवती देवी तत्प्रसूतिः स्वयम्भुवः ।
चतुर्मुखो जगद्योनिः प्रकृतिर्गौः प्रकीर्त्तिता ।
प्रधानं प्रकृतिश्चैव यदाहुस्तत्त्वचिन्तकाः ॥ ५० ॥

अजामेतां लोहितां शुक्लकृष्णां
विश्वं संप्रसूजमानां सरूपां ।
अजोऽहं वै बुद्धिमान्विश्वरूपां
गायत्रीं गां विश्वरूपां हि बुद्ध्वा (१) ॥ ५१ ॥

एवमुक्त्वा महादेवः अट्टहासमथाकरोत् ।
वलितास्फोटितरवं कहाकहनदन्तथा ॥ ५२ ॥
ततोऽस्य पार्श्वतो दिव्याः सर्वरूपाः कुमारकाः ।
जटी मुण्डी शिखण्डी च अर्द्धमुण्डश्च जज्ञिरे ॥ ५३ ॥
ततस्ते तु यथोक्तेन योगेन सुमहौजसः ।
दिव्यं वर्षसहस्रन्तु उपासित्वा महेश्वरं ॥ ५४ ॥
धर्म्मोपदेशं नियतं कृत्वा योगमयं दृढं ।
शिष्टानां नियतात्मानः प्रविष्टा रुद्रमीश्वरं ॥ ५५ ॥

वायुरुवाच । ततो विस्मयमापन्नो ब्रह्मा लोकपितामहः ।
प्रपन्नस्तु महादेवं भक्तियुक्तेन चेतसा ।
उवाच वचनं सर्वं श्वेतत्वन्ते कथं विभो ॥ ५६ ॥

भगवानुवाच । श्वेतकल्पो यदाह्यासीदहं श्वेतस्ततोऽभवं ।
श्वेतोष्णीषः श्वेतमाल्यः श्वेताम्बरधरः शिवः ॥ ५७ ॥
श्वेतास्थिमांसरोमा च श्वेतत्वक् श्वेतलोहितः ।

१ ध्यात्वेति ख० ।



तेन नाम्ना च विख्यातः श्वेतकल्पस्तदा ह्यसौ ॥ ५८ ॥
मत्प्रसादाच्च देवेशः श्वेताङ्गः श्वेतलोहितः ।
श्वेतवर्णा तदा ह्यासीद्गायत्री ब्रह्मसंज्ञिता ॥ ५९ ॥
यस्मादहञ्च देवेश त्वया गुह्ये पदे स्थितः ।
विज्ञातः स्वेन तपसा सद्योजातः सनातनः ।
सद्योजातेति ब्रह्मैतद् गुह्यञ्चैव प्रकीर्तितं ॥ ६० ॥
तस्माद् गुह्यत्वमापन्नं ये वेत्स्यन्ति द्विजातयः ।
तत्समीपङ्गमिष्यन्ति पुनरावृत्तिदुर्लभं ॥ ६१ ॥
यदाऽहञ्च पुनस्त्वासं लोहितो नामनामतः ।
समस्तेन वर्णेन कल्पो वै लोहितः स्मृतः ॥ ६२ ॥
तदा लोहितमांसास्थिलोहितक्षीरसन्निभा (१) ।
लोहितास्तनवती गायत्री गौः प्रकीर्त्तिता ॥ ६३ ॥
ततोऽस्य लोहितत्वेन वर्णस्य च विपर्य्यये ।
वामत्वाच्चैव योगस्य वामदेवत्वमागतः ॥ ६४ ॥
तथापि हि महासत्त्व त्वयाऽहं नियतात्मना ।
विज्ञातः श्वेतवर्णेन तस्माद्वर्णोत्तमः स्मृतः ।
ततोऽहं वामदेवेति ख्यातिं यातो महीतले ॥ ६५ ॥
ये चापि वामदेवत्वं ज्ञास्यन्तीह द्विजातयः ।
विज्ञाय चेमां रुद्राणीं(२)गायत्रीं मातरं विभो ॥ ६६ ॥
सर्वपापविनिर्मुक्ता विरजा ब्रह्मवर्चसः ।

१ लोहितमांसास्थिलोहितक्षीरमिश्रितेति ख० ।
२ ये चेमान्तु च रुद्राणीमिति घ० । ये चेमां रुद्ररुद्राणीमिति ङ० ।

रुद्रलोकं गमिष्यन्ति पुनरावृत्तिदुर्लभं॥ ६७॥
यदा तु पुनरेवायं कृष्णवर्णो भयानकः।
मत्कृतेन च वर्णेन मत्कल्पः कृष्ण उच्यते॥ ६८॥
तत्राऽहं कालसंकाशः कालो लोकप्रकाशनः।
विज्ञातोऽहन्त्वया ब्रह्मन् घोरो घोरपराक्रमः॥ ६९॥
तस्माद्घोरत्वमापन्नं ये मां वेत्स्यन्ति भूतले।
तेषामघोरः शान्तश्च भविष्याम्यहमव्ययः। ७०॥
तस्माद्दिग्वत्वमापन्नं ये मां पश्यन्ति भूतले।
तेषां शिवश्च सौम्यश्च भविष्यामि सदैव तु॥ ७१॥
तस्माच्च विश्वरूपो वै कल्पोऽयं समुदाहृतः।
विश्वरूपा तथा चेयं सावित्री समुदाहृता॥ ७२॥
सर्वरूपास्तथा चे मे संवृत्ता मम पुत्रकाः।
चत्वारस्ते समाख्याताः पादा वै लोकसम्मताः॥ ७३॥
तस्माच्च सर्ववर्णत्वं प्रजात्वं मे भविष्यति।
सर्वभक्ष्या च मेध्या च वर्णतश्च भविष्यति॥ ७४॥
मोक्षो धर्मस्तथार्थश्च कामश्चेति चतुष्टयं।
तस्माद्वित्ता च वेद्यश्च चतुर्धा वै भविष्यति॥ ७५॥
भूतग्रामाश्च चत्वारः आश्रमाश्चतुरस्तथा।
धर्मस्य पादाश्चत्वारश्चत्वारो मम पुत्रकाः॥ ७६॥
तस्माच्चतुर्युगावस्थं जगद्वै सचराचरं।
चतुर्धाऽवस्थितश्चैव चतुष्पादं भविष्यति॥ ७७॥
भूर्लोकोऽथ भुवो लोकः स्वर्लोकोऽथ महस्तथा।
जनस्तपश्च शान्तश्च रुद्रलोकस्ततः परं॥ ७८॥



स्वर्लोको हि तृतीयस्तु चतुर्थस्तु महः स्मृतः।
तत्र लोकः परं स्थानं परन्तद्योगिनां स्मृतं॥ ७९॥
निर्ममा निरहङ्काराः कामक्रोधविवर्जिताः।
द्रक्ष्यन्ते तद्दिदृक्षा युक्ता ध्यानतत्परयुञ्जकाः॥ ८०॥
यस्माच्चतुष्पदा ह्येषा त्वया दृष्टा सरस्वती।
तस्माच्च पशवः सर्वे भविष्यन्ति चतुष्पदाः।
तस्माच्चैषां भविष्यन्ति चत्वारो वै पयोधराः॥ ८१॥
सोमश्च मन्त्रसंयुक्तो यस्मान्मम मुखाच्च्युतः।
जीवः प्राणभृतां ब्रह्मन् सर्वः पीत्वा स्तनैर्धृतं॥ ८२॥
तस्मात् सोममयश्चैतदमृतश्चैव संस्मृतं।
चतुष्पादा भविष्यन्ति क्षेत्रत्वाच्चास्य तेन तत्॥ ८३॥
यस्माच्चैवं क्रिया भूत्वा द्विपादा वै महेश्वरी।
दृष्टा पुनस्त्वया चैषा सावित्री लोकभाविनी।
तस्माद्वै द्विपदाः सर्वे द्विस्तनाश्च नराः स्मृताः॥ ८४॥
यस्माच्चैवमजा भूत्वा सर्ववर्णा महेश्वरी।
दृष्टा त्वया महासत्त्वा सर्वभूतधरा परा।
तस्मात्तु विश्वरूपत्वमजानां वै भविष्यति॥ ८५॥
अजश्चैव महातेजा विश्वरूपो भविष्यति।
अमोघरेताः सर्वत्र मुखे चास्य हुताशनः।
तस्मात् सर्वगतो मेध्यः पशुरूपी हुताशनः॥ ८६॥
तपसा भावितात्मानो ये वै द्रक्ष्यन्ति वै द्विजाः।
ईशित्वे च शिवत्वे च (१) सर्वगं सर्वतः स्थिरं॥ ८७॥

१ वशित्वे चेति घ०।

रजस्तमोविनिर्मुक्तास्त्वक्ता मानुष्यकम्भुवि ।
मत्समीपं गमिष्यन्ति पुनरावृत्तिदुर्लभं ॥ ८८ ॥
इत्येवमुक्तो भगवान् ब्रह्मा रुद्रेण वै द्विजाः ।
प्रणम्य प्रयतो भूत्वा पुनराह पितामहः ॥ ८९ ॥

ब्रह्मोवाच । भगवन् देवदेवेश विश्वरूपो महेश्वरः ।
द्रमास्तव महादेव तनवो लोकवन्दिताः (१) ॥ ९० ॥
विश्वरूप महासत्त्व कस्मिन् काले महाभुज ।
कस्यां वा युगसभ्भूत्यां द्रक्ष्यन्ति त्वां द्विजातयः ॥ ९१ ॥
केन वा तत्त्वयोगेन ध्यानयोगेन केन वा ।
तनवस्ते महादेव शक्या द्रष्टुं द्विजातिभिः ॥ ९२ ॥

भगवानुवाच । तपसा नैव योगेन दानधर्म्मफलेन वा ।
न तीर्थफलयोगेन क्रतुभिर्वा सदक्षिणैः ॥ ९३ ॥
न वेदाध्यापनैर्वापि न चित्तेन निवेदनैः ।
शक्योऽहं मानुषैर्द्रष्टुं ऋते ध्यानात्परं न हि ॥ ९४ ॥
साध्यो नारायणश्चैव विष्णुस्त्रिभुवनेश्वरः ।
भविष्यतीह नाम्ना तु वाराहो नाम विश्रुतः ॥ ९५ ॥
चतुर्बाहुश्चतुष्पादश्चतुर्नेत्रश्चतुर्मुखः ।
तदा संवत्सरो भूत्वा यज्ञरूपो भविष्यति ।
षड्ङ्गश्च त्रिपादश्च त्रिस्थाने त्रिशरीरवान् ॥ ९६ ॥
कृतन्त्रेता द्वापरश्च कलिश्चैव चतुर्युगं ।
एतस्य पादाश्चत्वारः अङ्गानि क्रतवस्तथा ॥ ९७ ॥

१ लोकवेदिता इति ध० ।



भुजाश्च वेदाश्चत्वारो ऋतुः सन्धिमुखानि च ।
हे मुखे हे च अयने नेत्राश्च चतुरस्तथा ॥ ९८ ॥
शिरांसि त्रीणि पर्वाणि फाल्गुन्याषाढकृत्तिकाः ।
दिव्यान्तरीक्षभौमानि त्रीणि स्थानानि यानि तु ।
सम्भवः प्रलयश्चैव आश्रमौ द्वौ प्रकीर्त्तितौ ॥ ९९ ॥
स यदा कालरूपाभो वराहत्वे व्यवस्थितः ।
भविष्यति यदा साध्यो विष्णुर्नारायणः प्रभुः ॥ १०० ॥
तदा त्वमपि देवेश चतुर्व्यक्तो भविष्यसि ।
ब्रह्मलोकनमस्कार्यो विष्णुर्नारायणः प्रभुः ॥ १०१ ॥
एकार्णवे प्लवे चैव शयानं पुरुषं हरिं ।
यदा द्रक्ष्यसि देवेशं ध्यानयुक्तं महामुनिं ॥ १०२ ॥
तदावां मम योगेन मोहितौ नष्टचेतसौ ।
अन्योन्यस्पर्द्धिनौ राजावविज्ञाय परस्परं ॥ १०३ ॥
एकैकस्योदरस्थांस्तु दृष्ट्वा लोकांश्चराचरान् ।
विस्मयं परमङ्गत्वा ध्यानाद्बुद्धा तु मानुषौ ॥ १०४ ॥
ततस्त्वं पद्मसंभूतः पद्मनाभः सनातनः ।
पद्माङ्कितस्तदा कल्पे ख्यातिं यास्यसि पुष्कलां ॥ १०५ ॥
ततस्तस्मिन् तदा कल्पे वाराहे सप्तमे प्रभोः ।
पुनर्विष्णुर्महातेजाः कालो लोकप्रकालनः (१) ।
मनुर्वैवस्वतो नाम तव पुत्रो भविष्यति ॥ १०६ ॥
तदा चतुर्युगावस्थे कल्पे तस्मिन् युगान्तके ।
भविष्यामि शिखायुक्तः श्वेतो नाम महामुनिः ॥ १०७ ॥

१ लोकप्रकाशन इति ध० ।

हिमवच्छिखरे रम्ये छागले पर्व्वतोत्तमे ।
चतुःशिखाः शिवे युक्ता भविष्यन्ति तदा मम ॥ १०८ ॥
श्वेतश्चैव शिखण्डश्चैव श्वेताश्वः श्वेतलोहितः ।
चत्वारस्ते महात्मानो ब्राह्मणा वेदपारगाः ॥ १०९ ॥
ततस्ते ब्रह्मभूयिष्ठा दृष्ट्वा ब्रह्मगतिं परां ।
तत्समीपं गमिष्यन्ति पुनरावृत्तिदुर्लभं ॥ ११० ॥
पुनस्तु मम देवेशो द्वितीयद्वापरे प्रभुः ।
प्रजापतिर्यदा व्यासः सत्यो नाम भविष्यति ॥ १११ ॥
तदा लोकहितार्थाय सुतारो नाम नामतः ।
भविष्यामि कलौ तस्मिन् लोकानुग्रहकारणात् ॥ ११२ ॥
तत्रापि मम ते पुत्रा भविष्या नामनामतः ।
दुन्दुभिः शतरूपश्च ऋचीकः कतुमांस्तथा ॥ ११३ ॥
प्राप्य योगं तथा ज्ञानं ब्रह्म चैव सनातनं ।
रुद्रलोकं गमिष्यन्ति पुनरावृत्तिदुर्लभं ॥ ११४ ।
तृतीये द्वापरे चैव यदा व्यासस्तु भार्गवः ।
तदा ह्यहं भविष्यामि दमनस्तु युगान्तिके ॥ ११५ ॥
तत्रापि च भविष्यन्ति चत्वारो मम पुत्रकाः ।
विशोकश्च विकेशश्च विशापः शापनाशनः ॥ ११६ ॥
तेऽपि तेनैव मार्गेण योगोक्तेन महौजसः ।
रुद्रलोकं गमिष्यन्ति पुनरावृत्तिदुर्लभं ॥ ११७ ॥
चतुर्थे द्वापरे चैव यदाव्यासोऽङ्गिराः स्मृतः ।
तदाऽप्यहं भविष्यामि सुहोत्रो नामनामतः ॥ ११८ ॥
तत्रापि मम सत्पुत्रास्चत्वारश्च तपोधनाः ।



भविष्यन्ति द्विजश्रेष्ठा योगात्मानो दृढ़व्रताः ॥ ११९ ॥
सुमुखो दुर्मुखश्चैव दुर्दमो दुरतिक्रमः ।
प्राप्य योगगतिं सूक्ष्मां विमला दग्धकिल्बिषाः ।
तेऽपि तेनैव मार्गेण गमिष्यन्ति न संशयः ॥ १२० ॥
पञ्चमे द्वापरे चैव व्यासस्तु सविता यदा ।
तदा चापि भविष्यामि कङ्को नाम महातपाः ।
अनुग्रहार्थं लोकानां योगात्मा नैककर्म्मकृत् ॥ १२१ ॥
चत्वारस्तु महाभागा विरजाः शुद्धयोनयः ।
पुत्रा मम भविष्यन्ति योगात्मानो दृढ़व्रताः ॥ १२२ ॥
सनः सनन्दनश्चैव प्रभुर्यश्च सनातनः ।
ऋतुः सनत्कुमारश्च निर्ममानिरहंकृताः ।
तत्समीपं गमिष्यन्ति पुनरावृत्तिदुर्लभं ॥ १२३ ॥
परिवृत्ते पुनः षष्ठे मृत्युर्व्यासो यदा विभुः ।
तदाऽप्यहं भविष्यामि लोकाच्चिर्नामनामतः ॥ १२४ ॥
शिष्याश्च मम ते दिव्या योगात्मानो दृढ़व्रताः ।
भविष्यन्ति महाभागाश्चत्वारो लोकसम्मताः ॥ १२५ ॥
सुधामा विरजश्चैव शङ्खपाद्रव एव च ।
योगात्मानो महात्मानस्ते सर्व्वे दग्धकिल्बिषाः ।
तेऽपि तेनैव मार्गेण गमिष्यन्ति न संशयः ॥ १२६ ॥
सप्तमे परिवर्त्ते तु यदा व्यासः शतक्रतुः ।
विभुर्नाम महातेजाः पूर्व्वमासीच्छतक्रतुः ॥ १२७ ॥
तदाऽप्यहं भविष्यामि कलौ तस्मिन् युगान्तिके ।
जैगीषव्येति विख्यातः सर्व्वेषां योगिनां वरः ॥ १२८ ॥

तत्रापि मम ते पुत्रा भविष्यन्ति युगे तदा।
सारस्वतः सुमेधश्च वसुवाहः सुवाहनः॥ १२९
तेऽपि तेनैव मार्गेण ध्यानयुक्तिं समाश्रिताः।
भविष्यन्ति महात्मानो रुद्रलोकपरायणाः॥ १३०॥
वसिष्ठश्चाष्टमे व्यासः परिवर्त्ते भविष्यति।
कपिलश्चासुरिश्चैव तथा पञ्चशिखो मुनिः।
वाग्बलिश्च महायोगी सर्व्व एव महौजसः॥ १३१॥
प्राप्य माहेश्वरं योगं ध्यानिनो दग्धकल्मषाः।
मत्समीपं गमिष्यन्ति पुनरावृत्तिदुर्लभं॥ १३२॥
परिवर्त्तेऽथ नवमे व्यासः सारस्वतो यदा।
तदा चाहं भविष्यामि ऋषभो नामनामतः।
तत्रापि मम ते पुत्रा भविष्यन्ति महौजसः॥ १३३॥
पराशरश्च गार्ग्यश्च भार्गवो ह्यङ्गिरास्तथा।
भविष्यन्ति महात्मानो ब्राह्मणा वेदपारगाः॥ १३४॥
सर्वे तपोबलोत्कृष्टाः शापानुग्रहकोविदाः।
तेपि तेनैव मार्गेण योगोक्तेन तपस्विनः।
ध्यानमार्गं समासाद्य गमिष्यन्ति तथैव ते॥ १३५॥
दशमे द्वापरे व्यासस्त्रिधामा नामनामतः।
यदा भविष्यति विप्रास्तदाऽहं भविता पुनः॥ १३६॥
हिमवच्छिखरे रम्ये भृगुतुङ्गे नगोत्तमे।
नाम्ना भृगोस्तु शिखरन्तस्मात्तच्छिखरं भृगुः॥ १३७॥
तत्रैव मम ते पुत्रा भविष्यन्ति दृढ़व्रताः।
बलवन्धुर्निरामित्रः केतुशृङ्गस्तपोधनः॥ १३८॥



योगात्मानो महात्मानो ध्यानयोगसमन्विताः।
रुद्रलोकं गमिष्यन्ति तपसा दग्धकल्मषाः॥ १३९॥
एकादशे द्वापरे तु त्रिशिखो व्यास इष्यते।
तदाऽप्यहं भविष्यामि गङ्गाद्वारे कलेर्धुरि॥ १४०॥
उग्रा नाम महानादास्तत्रैव मम पुत्रकाः।
भविष्यन्ति महौजस्काः सुव्रता लोकविश्रुताः॥ १४१॥
लम्बोदरश्च लम्बश्च लम्बात्मो लम्बकेशकः।
प्राप्य माहेश्वरं योगं रुद्रलोकाय संस्थिताः।
तेऽपि तेनैव मार्गेण गमिष्यन्ति परां गतिं॥ १४२॥
द्वादशे परिवर्त्ते तु शततेजा महामुनिः।
भविष्यति महासत्त्वो व्यासः कविवरोत्तमः॥ १४३॥
ततोऽप्यहं भविष्यामि अत्रिर्नाम युगान्तिके।
हैमकं वनमासाद्य योगमाख्याय भूतले॥ १४४॥
अत्रापि मम ते पुत्रा भस्मस्नानानुलेपनाः।
भविष्यन्ति महायोगा रुद्रलोकपरायणाः॥ १४५॥
सर्व्वज्ञः समबुद्धिश्च साध्यः सर्व्वस्तथैव च।
रुद्रलोकं गमिष्यन्ति ध्यानयोगपरायणाः॥ १४६॥
त्रयोदशे पुनः प्राप्ते परिवर्त्ते क्रमेण तु।
धर्म्मो नारायणो नाम व्यासस्तु भविता यदा॥ १४७॥
तदाप्यहं भविष्यामि वालिर्नाम महामुनिः।
वालिखिल्याश्रमे पुण्ये पर्व्वते गन्धमादने॥ १४८॥
तत्रापि मम ते पुत्रा भविष्यन्ति तपोधनाः।
सुधामा काश्यपश्चैव वसिष्ठो विरजास्तथा॥ १४९॥

महायोगबलोपेता विमला ऊर्द्धरेतसः।
तेनैव योगमार्गेण गमिष्यन्ति न संशयः॥ १५०॥
यदा व्यासः सुरक्षेण पर्य्यायेस्तु चतुर्दशे।
तत्रापि पुनरेवाहं भविष्यामि युगान्तिके॥ १५१॥
वंशे त्वङ्गिरसः श्रेष्ठो गौतमो नाम योगवित्।
तस्माज्जनिष्यते पुण्यं गौतमं नाम तद्वनं॥ १५२॥
तत्रापि मम ते पुत्रा भविष्यन्ति कलौ तथा।
अत्रिरुग्यतपाश्चैव श्रवणोऽथ स्रविष्टकः॥ १५३॥
योगात्मानो महात्मानो ध्यानयोगपरायणाः।
तेऽपि तेनैव मार्गेण रुद्रलोकनिवासिनः॥ १५४॥
ततः प्राप्ते पञ्चदशे परिवर्त्ते क्रमागते।
आरुणिस्तु यदाव्यासो द्वापरे भविता प्रभुः॥ १५५॥
तदाप्यहं भविष्यामि नाम्ना वेदशिरा द्विजाः।
तत्र वेदशिरा नाम स्रवन्त्यारभेश्वरं॥ १५६॥
भविष्यति महावीर्य्यं वेदशीर्षश्च पर्व्वतः।
हिमवत्पृष्ठमाश्रित्य सरस्वत्या नगोत्तमे॥ १५७॥
तदापि मम ते पुत्रा भविष्यन्ति तपोधनाः।
कुणिश्च कुणिबाहुश्च कुशरीरः कुनेत्रकः॥ १५८॥
योगात्मानो महात्मानो ब्रह्मिष्ठाश्चोर्द्धरेतसः।
तेऽपि तेनैव मार्गेण रुद्रलोकं गतास्तु ते॥ १५९॥
ततः षोडशमे चापि परिवर्त्ते क्रमागते।
व्यासस्तु यौगीष्य नाम भविष्यति तदा प्रभुः॥ १६०॥
तदाऽप्यहं भविष्यामि गोकर्णो नामनामतः।



तस्माज्जनिष्यते पुण्य गोकर्णनाम तद्वनं॥ १६१॥
तत्रापि मम ते पुत्रा भविष्यन्ति महौजसः।
कश्यपो ह्यशनाश्चैव च्यवनोऽथ बृहस्पतिः।
तेऽपि तेनैव मार्गेण गमिष्यन्ति परं पदं॥ १६२॥
ततः सप्तदशे चैव परिवर्त्ते क्रमागते।
तदा भविष्यते व्यासो नाम्ना देवकृतञ्जयः॥ १६३॥
तदाप्यहं भविष्यामि गुहावासीति नामतः।
हिमवच्छिखरे चैव महातुङ्गे महालये।
सिद्धिक्षेत्रं महापुण्यं भविष्यति महालयं॥ १६४॥
तत्रापि मम ते पुत्रा ब्रह्मण्या योगवेदिनः।
भविष्यन्ति महात्मानो मर्मज्ञा निरञ्जनाः॥ १६५॥
उतथ्यो वामदेवश्च महाकालो महालयः।
तेषां शतसहस्रन्तु शिष्याणां ध्यानसाधनं॥ १६६॥
भविष्यन्ति तदा कल्पे सर्व्वे ते ध्यानयुञ्जकाः।
ते तु सन्निहित योगे हृदि कृत्वा महेश्वरं।
महालये पदं क्षिप्त्वा प्रविष्टाः शिवमव्ययं॥ १६७॥
ये चान्येऽपि महात्मानः काले तस्मिन् युगान्तिके।
ध्यानयुक्तेन मनसा विमलाः शुद्धबुद्धयः॥ १६८॥
गत्वा महालयं पुण्यं दृष्ट्वा माहेश्वरं पदं।
तूर्णं तारयते जन्तून्दशपूर्व्वान् दशापरान्॥ १६९॥
आत्मानमेकविंशञ्च तारयित्वा महार्णवं।
मम प्रसादाद्यास्यन्ति रुद्रलोकं गतज्वराः॥ १७०॥
ततोऽष्टादशमे चैव वरिवर्त्ते यदा भवेत्।

तदा ऋतञ्जयो नाम व्यासस्तु भविता मुनिः।
तदाऽप्यहं भविष्यामि शिखण्डी नामनामतः॥ १७१॥
सिद्धक्षेत्रे महापुण्ये देवदानवपूजिते।
हिमवच्छिखरे पुण्ये शिखण्डी यत्र पर्व्वतः।
शिखेण्डिनो वनञ्चापि ऋषिसिद्ध निषेवित॥१७२॥
तत्रापि मम ते पुत्रा भविष्यन्ति तपोधनाः।
वाचस्रवा ऋक्षीकश्च श्यावास्य दृढ़व्रतः॥ १७३॥
योगात्मानो महासत्त्वाः सर्व्वे ते वेद पारगाः।
प्राप्य माहेश्वरं योगं रुद्रलोकं व्रजन्ति ते॥ १७४॥
ततस्त्वेकोनविंशे तु परिवर्त्ते क्रमागते।
व्यासस्तु भविता नाम्ना भरद्वाजो महामुनिः॥ १७५॥
तत्राप्यहं भविष्यामि जटामालीति नामतः।
हिमवच्छिखरे रम्ये जटायुर्यत्र पर्व्वतः॥ १७६॥
तत्रापि मम ते पुत्रा भविष्यन्ति महौजसः।
हिरण्यनाभा कौशिल्यः काक्षीवः कुशुमिस्तथा॥ १७७॥
ईश्वरा योगधर्म्माणः सर्व्वे ते ह्यूर्द्धरेतसः।
प्राप्य माहेश्वरं योगं गमिष्यन्ति न संशयः॥ १७८॥
ततो विंशतिमे सर्गे परिवर्त्ते क्रमेण तु।
वाचःश्रवाः स्मृतो व्यासो भविष्यति महामतिः॥ १७९॥
तदाप्यहं भविष्यामि ह्यट्टहासतो नामतः।
अट्टहासप्रियाश्चापि भविष्यन्ति तदा नराः॥ १७०॥
तत्रैव हिमवत्पृष्ठे सिद्धचारण सेविते।
तत्रापि मम ते पुत्रा भविष्यन्ति महौजसः।



युक्तात्मानो महा सत्त्वा ध्यानिनो नियतव्रताः॥ १८०॥
सुमन्तुर्व्वर्वरिर्विद्वान् सुबन्धुः कुशिकन्धरः।
प्राप्य माहेश्वरं योगं रुद्रलोकाय ते गताः॥ १८१॥
एकविंशे पुनः प्राप्ते परिवर्त्ते क्रमेण तु।
वाचस्पतिः स्मृतो व्यासो यदा स ऋषिसत्तमः॥ १८२॥
तदाऽप्यहं भविष्यामि दारुको नाम नामतः।
तस्माद्गविषाते पुण्यं देवदारुवनं महत्॥ १८३॥
तत्रापि मम ते पुत्रा भविष्यन्ति महौजसः।
पुत्तो दात्तायणिश्चैव (१) केतुमाली वकस्तथा (२)॥ १८४॥
योगात्मानो महात्मानो नियता ह्यूर्द्धरेतसः।
परमं योगमास्थाय रुद्रं प्रापास्तथानघाः॥ १८५॥
द्वाविंशे परिवर्त्ते तु व्यासः शुक्लायनो यदा।
तदाऽप्यहं भविष्यामि वाराणस्यां महामुनिः॥ १८६॥
नाम्ना वै लाङ्गली भौमो यत्र देवाः सवासवाः।
द्रक्ष्यन्ति मां कलौ तस्मिन्नवतीर्णं हलायुधं॥ १८७॥
तत्रापि मम ते पुत्रा भविष्यन्ति सुधार्म्मिकाः।
तुल्यार्चिर्मधुपिङ्गाक्षः शतकेतुस्तथैव च (३)॥ १८८॥
तेपि माहेश्वरं योगं प्राप्य ध्यानपरायणाः।
विरजा ब्रह्मभूयिष्ठा रुद्रलोकाय संस्थिताः॥ ८९॥
परिवर्त्ते त्रयोविंशे तृणबिन्दुर्यदा मुनिः।

---

१ दात्तभ्यायनिन्यश्चैवेति घ०, ङ० च।
२ नकस्तथेति घ०, ङ० च।
३ चेकितानस्तथैव चेति ङ०।

व्यासो भविष्यति ब्रह्मा तदाऽहं भविता पुनः।
शतो नाम महाकायो मुनिपुत्रः सुधार्म्मिकः ॥ १९० ॥
तच्च कालञ्जरिष्यामि तदा गिरिवरोत्तमे।
तेन कालञ्जरो नाम भविष्यति स पर्व्वतः। १९१ ॥
तत्रापि मम ते पुत्रा भविष्यन्ति महौजसः।
ऊर्ध्वजो बृहदुक्थ्यश्च देवलः कविरेव च।
प्राप्य माहेश्वरं योगं रुद्रलोकं गता हि ते ॥ १९२ ॥
परिवर्त्ते चतुर्विंशे ऋक्षो व्यासो भविष्यति।
तत्राऽहं भविता ब्रह्मन् कलौ तस्मिन् युगान्तिके।
शूली नाम महायोगी नैमिषे योगिवन्दिते ॥ १९३ ॥
तत्रापि मम ते पुत्रा भविष्यन्ति तपस्विनः।
शालिहोत्रोऽग्निवेश्यश्च युवनाश्वः शरद्वसुः।
तेऽपि योगबलोपेता रुद्रं यास्यन्ति सुव्रताः ॥ १९४ ॥
पञ्चविंशे पुनः प्राप्ते परिवर्त्ते यथाक्रमं।
वासिष्ठस्तु यदा व्यासः शक्तिर्नाम भविष्यति ॥ १९५ ॥
तदाऽप्यहं भविष्यामि दण्डी मुण्डीश्वरः प्रभुः।
कोटिवर्षं समासाद्य (१) नगरं देवपूजितं ॥ १९६ ॥
तत्रापि मम ते पुत्रा भविष्यन्ति क्रमागताः।
योगात्मानो महात्मानः सर्व्वे ते ह्यूर्द्धरेतसः ॥ १९७ ॥
छगलः कुम्भकर्णाश्वः (२) कुम्भश्चैव प्रवाहुकः।

१ कोटिवर्षसहस्रन्विति ङ०।
२ कुम्भकर्ण श्चेति ङ०।



प्राप्य माहेश्वरं योगं गमिष्यन्ति तथैव ते ॥ १९८ ॥
षड्विंशे परिवर्त्ते तु यदा व्यासः पराशरः।
तदाऽप्यहं भविष्यामि सहिष्णुर्नामनामतः।
पुण्यं रुद्रवटं प्राप्य कलौ तस्मिन् युगान्तिके ॥ १९९ ॥
तत्रापि मम ते पुत्रा भविष्यन्ति सुधार्म्मिकाः।
उलूको वैद्युतश्चैव (१) सर्वकः (२) ह्याश्वलायनः।
प्राप्य माहेश्वरं योगं गन्तारस्ते तथैव हि ॥ २०० ॥
सप्तविंशतिमे प्राप्ते परिवर्त्ते क्रमागते।
जातूकर्ण्यो यदा व्यासो भविष्यति तपोधनः ॥ २०१ ॥
तदाऽप्यहं भविष्यामि सोमशर्म्मा द्विजोत्तमः।
प्रभासतीर्थमासाद्य योगात्मा लोकविश्रुतः ॥ २०२ ॥
तत्रापि मम ते पुत्रा भविष्यन्ति तपोधनाः।
अक्षपादः कणादश्च उलूको वत्स एव च ॥ २०३ ॥
योगात्मानो महात्मानो विमलाः शुद्धबुद्धयः।
प्राप्य माहेश्वरं योगं रुद्रलोकं ततो गताः ॥ २०४ ॥
अष्टाविंशे पुनः प्राप्ते परिवर्त्ते क्रमागते।
पराशरसुतः श्रीमान् विष्णुर्लोकपितामहः ॥ २०५ ॥
यदा भविष्यति व्यासो नाम्ना द्वैपायनः प्रभुः।
तदा षष्ठेन चांशेन कृष्णः पुरुषसत्तमः।
वसुदेवाद्यदुश्रेष्ठो वासुदेवो भविष्यति ॥ २०६ ॥
तदा चाहं भविष्यामि योगात्मा योगमायया।

१ विद्युतिश्चैवेति ङ०।
२ शर्व्वक इति ङ०। घचिह्नितपुस्तके सर्व्वक इति नालक्ष्यशकारघटितः।

लोकविस्मयनार्थाय ब्रह्मचारिशरीरकः ॥ २०७ ॥
श्मशाने मृतमुत्सृष्टं दृष्ट्वा लोकमनाथकं ।
ब्राह्मणानां हितार्थाय प्रविष्टो योगमायया ॥ २०८ ॥
दिव्यां मेरुगुहां पुण्यां त्वया सार्द्धञ्च विष्णुना ।
भविष्यामि तदा ब्रह्मन् नकुली नामनामतः । २०९ ॥
कायारोहणमित्येवं सिद्धक्षेत्रञ्च वै तदा ।
भविष्यति तु विख्यातं यावद्भूमिर्द्धरिष्यति ॥ २१० ॥
तत्रापि मम ते पुत्रा भविष्यन्ति तपस्विनः ।
कुशिकश्चैव गार्ग्यश्च मित्रको रुष्ट एव च ॥ २११ ॥
योगयुक्ता महात्मानो ब्राह्मणा वेदपारगाः ।
प्राप्य माहेश्वरं योगं विमला ह्यूर्द्धरेतसः ।
रुद्रलोकं गमिष्यन्ति पुनरावृत्तिदुर्लभं ॥ २१२ ॥
इत्येतद्वै मया प्रोक्तमवतारेषु लक्षणं ।
मन्वादिकल्पपर्य्यन्तमष्टाविंशयुगक्रमात् ।
तत्र स्मृतिसमूहानां (१) विभागो धर्म्मलक्षणं ॥ २१३ ॥

इति श्रीमहापुराणे वायुप्रोक्ते माहेश्वरावतारयोगो नाम त्रयोविंशोऽध्यायः ।

---

१ स्मृतिसमूहानामिति ङ० ।

# अथ चतुर्विंशोऽध्यायः ।

## शार्व्वस्तवं ।

वायुरुवाच । चत्वारि भारते वर्षे युगानि मुनयो विदुः ।
कृतं त्रेता द्वापरञ्च तिष्यश्चेति चतुर्युगं ॥ १ ॥
एतत्सहस्रपर्य्यन्तमहर्यद्ब्रह्मणः स्मृतं ।
यामाद्यास्तु गणाः सप्त रोमवन्तश्चतुर्दश ॥ २ ॥
सशरीराः श्रयन्तेस्म जनलोकं सहानुगाः ।
एवं देवेष्वतीतेषु महर्लोकाज्जनन्तपः ॥ ३ ॥
मन्वन्तरेष्वतीतेषु देवाः सर्व्वे महौजसः ।
ततस्तेषु गतेषूर्द्धं सायुज्यं कल्पवासिनां ॥ ४ ॥
समेत्य देवैस्ते देवाः प्राप्ते सङ्क्षालने तदा ।
महर्लोकं परित्यज्य गणास्ते वै चतुर्दश ॥ ५ ॥
भूतादिष्ववशिष्टेषु (१) स्थावरान्तेषु वै तदा ।
शून्येषु तेषु लोकेषु महोन्तेषु भुवादिषु ।
देवेष्वथ गतेषूर्द्धं कल्पवासिषु वै जनं ॥ ६ ॥
तत्संहृत्य ततो ब्रह्मा देवर्षिगणदानवान् ।
संस्थापयति वै सर्व्वान् दाहहत्या युगक्षये ॥ ७ ॥

१ भूतादिष्वेषु शिष्टेष्विति घ० ।

योऽतीतः सप्तमः कल्पो मया वः परिकीर्त्तितः ।
समुद्रैः सप्तभिर्गाढ़मेकीभूतैर्महार्णवैः (१) ।
आसीदेकार्णवङ्घोरमविभागं तमोमयं ॥ ८ ॥
माययैकार्णवे तस्मिन् शङ्खचक्रगदाधरः ।
जीमूताभोऽम्बुजाक्षश्च किरीटी श्रीपतिर्हरिः ॥ ९ ॥
नारायणमुखोद्गीर्णः सोऽष्टमः पुरुषोत्तमः ।
अष्टबाहुर्महोरस्को लोकानां योनिरुच्यते ।
किमप्यचिन्त्यं युक्तात्मा योगमास्थाय योगवित् ॥ १० ॥
फणासहस्रकलितन्तमप्रतिमवर्चसं ।
महाभोगपतेर्भोगमन्वास्तीर्य्य महोरगं ।
तस्मिन्महति पर्य्यङ्के शेते वै कनकप्रभो ॥ ११ ॥
एवं तत्र शयानेन विष्णुना प्रभविष्णुना ।
आत्मारामेण क्रीड़ार्थं सृष्टं नाभ्यान्तु पङ्कजं ॥ १२ ॥
शतयोजनविस्तीर्णं तरुणादित्यवर्चसं ।
वज्रदण्डं महोत्सेधं लीलया प्रभविष्णुना ॥ १३ ॥
तस्यैवं क्रीड़मानस्य सगोपं देवमीदृषः ।
हेमब्रह्माण्डजो ब्रह्मा रक्तवर्णो द्युतीन्द्रियः ।
चतुर्मुखो विशालाक्षः समागम्य यदृच्छया ॥ १४ ॥
श्रिया युक्तेन नव्येन सुप्रभेण सुगन्धिना ।
तं क्रीड़मानं पद्मेन दृष्ट्वा ब्रह्मा तु भेजिवान् ॥ १५ ॥
स विस्मयमथागम्य श्लक्ष्णसंपूर्णया गिरा ।

१ महाप्रभैरिति पा० ।



प्रोवाच को भवान् शेते आश्रितो मध्यमम्भसां ॥ १६ ॥
अथ तस्याच्युतः श्रुत्वा ब्रह्मणस्तु शुभं वचः ।
उदतिष्ठत पर्य्यङ्कादिस्मयोत्फुल्ललोचनः ॥ १७ ॥
प्रत्युवाचोत्तरञ्चैव क्रियते यच्च किञ्चन ।
द्यौरन्तरीक्षं भूतञ्च परं पदमहं प्रभुः ॥ १८ ॥
तमेवमुक्ता भगवान् विष्णुः पुनरथाब्रवीत् ।
कस्त्वं खलु समायातः समीपं भगवान् कुतः ।
कुतश्च भूयो गन्तव्यं कुत्र वा ते प्रतिश्रयः ॥ १९ ॥
को भवान् विश्वमूर्त्तिस्त्वं कर्त्तव्यं किञ्च ते मया ।
एवं ब्रुवाणं वैकुण्ठं प्रत्युवाच पितामहः ॥ २० ॥
यथा भवांस्तथा चाहमादिकर्त्ता प्रजापतिः ।
नारायणसमाख्यातः सर्व्वं वै मयि तिष्ठति ॥ २१ ।
सविस्मयं परं श्रुत्वा ब्रह्मणा लोककर्त्तृणा ।
सोऽनुज्ञातो भगवता वैकुण्ठो विश्वसम्भवः ॥ २२ ॥
कौतूहलान्महायोगी प्रविष्टो ब्रह्मणो मुखं ।
दृमानष्टादशद्वीपान् ससमुद्रान् सपर्व्वतान् ।
प्रविश्य स महातेजाश्चातुर्व्वर्ण्यसमाकुलान् ।
ब्रह्मादिस्तम्बपर्य्यन्तान्सप्तलोकान्सनातनान् ॥ २३ ॥
ब्रह्मणस्तूदरे दृष्ट्वा सर्व्वान् विष्णुर्महायशाः ।
अहोऽस्य तपसो वीर्य्यं पुनः पुनरभाषत ॥ २४ ॥
पर्य्यटन् विविधान् लोकान् विष्णुर्नानाविधाश्रमान् ।
ततो वर्षसहस्रान्ते नान्तं हि दृष्टवे तदा ॥ २५ ॥
तदाऽस्य वक्त्रान्निष्क्रम्य पन्नगेन्द्रारिकेतनः ।

अजातशत्रुर्भगवान् पितामहमथाब्रवीत् ॥ २६ ॥
भगवन् आदि मध्यञ्च अन्तं कालदिशोनं च ।
नाहमन्तं प्रपश्यामि ह्युदरस्य तवानघ ॥ २७ ॥
एवमुक्ताब्रवीद्भूयः पितामहमिदं हरिः ।
भवानप्येवमेवाद्य ह्युदरं मम शाश्वतं ।
प्रविश्य लोकान्पश्येतान्नीपम्यान् द्विजोत्तम ॥ २८ ॥
मनः प्रह्लादनीं वाणीं श्रुत्वा तस्याभिनन्द्य च ।
श्रीपतेरुदरं भूयः प्रविवेश पितामहः ॥ २९ ॥
तानेव लोकान् गर्भस्थः पश्यन् सोऽचिन्त्यविक्रमः ।
पर्य्यटित्वादिदेवस्य ददर्शान्तं न वै हरेः ॥ ३० ॥

ज्ञात्वागमन्तस्य पितामहस्य
द्वाराणि सर्व्वाणि पिधाय विष्णुः ।
विर्भुर्म्मनः कर्त्तुमियेष चाशु
सुखं प्रसुप्तोऽस्मि महाजलौघे ॥ ३१ ॥

ततो द्वाराणि सर्व्वाणि पिहितान्युपलक्ष्यते ।
सूक्ष्मं कृत्वात्मनो रूपं नाभ्यां द्वारमविन्दत ॥ ३२ ॥
पद्मसूत्रानुमार्गेण ह्यनुगम्य पितामहः ।
उज्जहारात्मनो रूपं पुष्कराच्चतुराननः ।
विरराजारविन्दस्थः पद्मगर्भसमद्युतिः ॥ ३३ ॥
एतस्मिन्नन्तरेताभ्यां एकैकस्य तु कात्स्न्र्यतः ।
प्रवर्त्तमाने संहर्षे मध्ये तस्यार्णवस्य तु ॥ ३४ ॥

सूत उवाच । ततो ह्युपरि मेयात्मा भूतानां प्रभुरीश्वरः ।
शूलपाणिर्महादेवो हैमचीराम्बरच्छदः ।



आगच्छद् यत्र सोऽनन्तो नागभोगपतिर्हरिः ॥ ३५ ॥
शीघ्रं विक्रमतस्तस्य पन्नगामत्यन्तपीड़िताः ।
उद्भूतास्तूर्णमाकाशे पृथुलास्तोयबिन्दवः ।
अत्युष्णाश्चातिशीताश्च वायुस्तत्र ववौ भृशं ॥ ३६ ॥
तद्दृष्ट्वा महदाश्चर्य्यं ब्रह्मा विष्णुमभाषत ।
अब्बिन्दवो हि स्थूलोष्णाः कम्पते चाम्बुजं भृशं ।
एतं मे संशयं ब्रूहि किञ्चान्यत् त्वञ्चिकीर्षसि ॥ ३७ ॥
एतदेवंविधं वाक्यं पितामहमुखोद्भवं ।
श्रुत्वाप्रतिमकर्म्माह भगवानसुरान्तकृत् ॥ ३८ ॥
किन्नु खल्वत्र मे नाभ्यां भूतमन्यत्कृतालयं ।
वदति प्रियमत्यर्थं विप्रियेपि च ते मया ॥ ३९ ॥
इत्येवं मनसा ध्यात्वा प्रत्युवाचेदमुत्तरं ।
किन्नु त्वत्र भगवान् तस्मिन् पुष्करे जातसम्भ्रमः ॥ ४० ॥
किं मया यत् कृतन्देव यन्मां प्रियमनुत्तमं ।
भाषसे पुरुषश्रेष्ठ किमर्थं ब्रूहि तत्त्वतः ॥ ४१ ॥
एवं ब्रुवाणं देवेशं लोकयात्रान्तु तत्त्वगां ।
प्रत्युवाचाम्बुजाभाक्षः ब्रह्मा वेदनिधिः प्रभुः ॥ ४२ ॥
योऽसौ तवोदरं पूर्व्वं प्रविष्टोऽहं त्वदिच्छया ।
यथा ममोदरे लोकाः सर्व्वे दृष्टास्त्वया प्रभो ।
तथैव दृष्टाः कात्स्न्र्येन मया लोकास्तवोदरे ॥ ४३ ॥
ततो वर्षसहस्रान्ते उपावृत्तस्य मेऽनघ ।
नूनं मत्सरभावेन मां वशीकर्तुमिच्छता ।
आशु द्वाराणि सर्व्वाणि घटितानि त्वया पुनः ॥ ४४ ॥

ततो मया महाभाग सञ्चिन्त्य स्वेन चेतसा ।
लब्धो नाभ्यां प्रवेशस्तु पद्मसूत्रादिनिर्गमः ॥ ४५ ॥
माभूत्ते मनसोऽल्पोऽपि व्याघातोऽयं कथञ्चन ।
इत्येषानुगतिर्विष्णोः कार्य्याणामौपसर्गिकी ॥ ४६ ॥
यन्मयानन्तरं कार्य्यं मयाध्यवसितं त्वयि ।
त्वञ्चावाधितुकामेन क्रीड़ापूर्व्वं यदृच्छया ।
आशु द्वाराणि सर्व्वाणि घटितानि मया पुनः ॥ ४७ ॥
न तेऽन्यथावमन्तव्यो मान्यः पूज्यश्च मे भवान् ।
सर्व्वं मर्षय कल्याण यन्मया यत्कृतन्तव ।
तस्मान्मयोच्यमानस्त्वं पद्मादवतर प्रभो ॥ ४८ ॥
नाहं भवन्तं शक्नोमि सोढुन्तेजोमयं गुरुं ।
स चोवाच वरं ब्रूहि पद्मादवतराम्यहं ॥ ४९ ॥

विष्णुरुवाच । पुत्रो भव ममारिघ्न मुदं प्राप्तासि शोभनं ।
सत्यधनो महायोगी त्वमीड्यः (१) प्रणवात्मकः ॥ ५० ॥
अद्यप्रभृति सर्व्वेषु श्वेतोष्णीषविभूषणः ।
पद्मयोनिरितीत्येवं ख्यातो नाम्ना भविष्यसि ।
पुत्रो मे त्वं भव ब्रह्मन् सर्व्वलोकाधिप प्रभो ॥ ५१ ॥
ततः स भगवान् ब्रह्मा वरं गृह्य किरीटिनः ।
एवं भवतु चेत्युक्त्वा प्रीतात्मा गतमत्सरः ॥ ५२ ॥
प्रत्यासन्नमथायातं बालार्काभं महाननं ।
भूतमत्यद्भुतं दृष्ट्वा नारायणमथाब्रवीत् ॥ ५३ ॥

१ त्वमीश इति ख० ।



अप्रमेयो महावक्त्रो दंष्ट्री व्यस्तशिरोरुहः ।
दृश्यवाहुस्त्रिशूलाङ्को नयनैर्विश्वतोमुखः ॥ ५४ ॥
लोकप्रभुः स्वयं साक्षाद्विकृतो मुञ्जमेखली ।
मेट्टेणोर्द्धेन सहता नदमानोऽतिभैरवं ॥ ५५ ॥
कः खल्वेष पुमान् विष्णोते जोराशिर्महाद्युतिः ।
व्याप्य सर्व्वा दिशो यात्र इत एवाभिवर्त्तते ॥ ५६ ॥
तेनैवमुक्तो भगवान् विष्णुर्ब्रह्माणमब्रवीत् ।
पद्मान्ताल्ललनिपातेन यस्य विक्रमतोऽर्णवे ।
वेगेन महताकाशे व्यथिताश्च जलाशयाः ॥ ५७ ॥
छटाभिर्विश्रमतोऽत्यर्थं सिच्यते पद्मसम्भवः ।
घ्राणजेन च वातेन कम्पमानं त्वया सह ।
दोधूयते महापद्मं स्वच्छन्दं मम नाभिजं ॥ ५८ ॥
स एष भगवानीशो ह्यनादिश्चान्तकृद्विभुः ।
भवानहञ्च स्तोत्रेण ह्युपतिष्ठाव गोध्वजं ॥ ५९ ॥
ततः क्रुद्धोऽम्बुजाभाक्षं ब्रह्मा प्रोवाच केशवं ।
न भवान् न्यूनमात्मानं लोकानां योनिमुत्तमं ॥ ६० ॥
ब्रह्माणं लोककर्त्तारं मान्च वेत्ति सनातनं ।
कोऽयं भोः शङ्करो नाम ह्यावयोर्व्यतिरिच्यते ॥ ६१ ॥
तस्य तत् क्रोधजं वाक्यं श्रुत्वा विष्णुरभाषत ।
मा मैवं वद कल्याण परिवादं महात्मनः ॥ ६२ ॥
मायायोगेश्वरो धर्म्मो दुराधर्षो वरप्रदः ।
हेतुरस्यात्र जगतः पुराणः पुरुषोऽव्ययः ॥ ६३ ॥
जीवः खल्वेष जीवानां ज्योतिरेकं प्रकाशते ।

बालक्रीड़नकैर्देवः क्रीड़तेशङ्करः स्वयं ॥ ६४ ॥
प्रधानमव्ययं ज्योतिरव्यक्तं प्रकृतिस्तमः ।
अस्य चैतानि नामानि नित्यं प्रसवधर्म्मिणः ।
यः कः स इति दुःखार्त्तैर्मृग्यते यतिभिः शिवः ॥ ६५ ॥
एष वीजी भवान्वीजमहं योनिः सनातनः ।
एवमुक्तोऽथ विश्वात्मा ब्रह्मा विष्णुमभाषत ॥ ६६ ॥
भवान्योनिरहं वीजं कथं वीजी महेश्वरः ।
एतन्मे सूक्ष्ममव्यक्तं संशयं छेत्तुमर्हसि ॥ ६७ ॥
ज्ञात्वा चैवं समुत्पत्तिं ब्रह्मणा लोकतन्त्रिणा ।
इदं परमसादृश्यं प्रश्नमभ्यवदद्धरिः ॥ ६८ ॥
अस्मान्महत्तरं गुह्यं भूतमन्यन्नविद्यते ।
महतः परमं धाम शिवमध्यात्मिनां पदं ॥ ६९ ॥
द्वैधीभावेन चात्मानं प्रविष्टस्तु व्यवस्थितः ।
निष्कलः सूक्ष्ममव्यक्तः सकलश्च महेश्वरः ॥ ७० ॥
अस्य मायाविधिज्ञस्य अगम्यगहनस्य च ।
पुरा लिङ्गं भवद्वीजं प्रथमं त्वादिसर्गिकं ॥ ७१ ॥
मयि योनौ समायुक्तं तद्वीजं कालपर्य्ययात् ।
हिरण्मयमपारन्तद्योन्यामण्डमजायत ॥ ७२ ॥
शतानि दशवर्षाणामण्डञ्चाप्सु प्रतिष्ठितं ।
अन्ते वर्षसहस्रस्य वायुना तद्द्विधा कृतं ॥ ७३ ॥
कपालमेकं द्यौर्ज्ज्ञे कपालमपरं क्षितिः ।
उल्वन्तस्य महोल्बेधं योऽसैकनकपर्वतः ॥ ७४ ॥
ततस्तस्मात् प्रबुद्धात्मा देवो देववरः प्रभुः ।



हिरण्यगर्भो भगवान् अहं जज्ञे चतुर्भुजः ॥ ७५ ॥
ततोऽवर्षसहस्रान्ते वायुना तद्द्विधाकृतं ।
अतारार्कैन्दुनक्षत्रं शून्यं लोकमवेक्ष्य च ।
कोऽयमत्रेत्यभिध्याते (१) कुमारास्तेऽभवंस्तदा ॥ ७६ ॥
प्रियदर्शनास्तु तनवो येऽतीताः पूर्व्वजास्तव ।
भूयो वर्षसहस्रान्ते तत एवान्मजास्तव ।
भुवनानलसङ्काशाः पद्मपत्रायतेक्षणाः ॥ ७७ ॥
श्रीमान् सनत्कुमारस्तु ऋतुश्चैवोर्द्धरेतसौ ।
सनातनश्च सनकस्तथैव च सनन्दनः ।
उत्पन्नाः समकालन्ते बुद्धातीन्द्रियदर्शनाः ॥ ७८ ॥
उत्पन्नाः प्रतिघात्मानो जगदुश्चैतदेव हि ।
नारभ्यन्ते च कर्म्माणि तापत्रयविवर्जिताः ॥ ७९ ॥
अस्य सौम्यं बहुक्लेशं जराशोकसमन्वितं ।
जीवितं मरणञ्चैव सम्भवश्च पुनः पुनः ॥ ८० ॥
स्वप्नभूतं पुनः स्वर्गे दुःखानि नरकांस्तथा ।
विदित्वा चागमं सर्व्वमवश्यं भवितव्यताम् ॥ ८१ ॥
ऋभुं सनत्कुमारञ्च दृष्ट्वा तव वशे स्थितौ ।
त्रयस्तु चीन् गुणान् हित्वा आत्मजाः सनकादयः ।
वैवर्त्तेन तु ज्ञानेन निवृत्तास्ते महौजसः ॥ ८२ ॥
ततस्तेष्वपवृत्तेषु सनकादिषु वै त्रिषु ।
भविष्यसि विमूढस्तु मायया शङ्करस्य तु ॥ ८३ ॥

---

१ कोऽयमत्रेत्य भिख्याते इति घ० ।

एवं कल्पे तु वैकल्पे (१) संज्ञा नश्यति तेऽनघ।
कल्पशेषाणि भूतानि सूक्ष्माणि पार्थिवानि च ॥ ८४ ॥
सा चैषा ह्यैश्वरी माया जगतः समुदाहृता।
स एष पर्व्वतो मेरुर्देवलोक उदाहृतः ॥ ८५ ॥
तवैवेदं हि माहात्म्यं दृष्ट्वा चात्मानमात्मना।
ज्ञात्वा चेश्वरसद्भावं ज्ञात्वा मामम्बुजेक्षणं ॥ ८६ ॥
महादेवं महायोगं भूतानां वरदं प्रभुं।
प्रणवात्मानमासाद्य नमस्कृत्वा जगद्गुरुं।
त्वाच्च माञ्चैव संक्रुद्धो निश्वासान्निर्द्दहेदयं ॥ ८७ ॥
एवं ज्ञात्वा महायोगं अभ्युत्तिष्ठनं महाबलः।
अहं त्वामयतः कृत्वा स्तोष्येहमनलप्रभं॥ ८८ ॥

सूत उवाच। ब्रह्माणमयतः कृत्वा ततः स गरुड़ध्वजः।
अतीतैश्च भविष्येश्च वर्त्तमानैस्तथैव च।
नामभिश्छान्दसैश्चैव इदं स्तोत्रमुदीरयत्। ८९ ॥
नमस्तुभ्यं भगवते सुव्रतेऽनन्ततेजसे।
नमः क्षेत्राधिपतये वीजिने शूलिने नमः ॥ ९० ॥
अमेढ्रायोर्द्धमेढ्राय नमो वैकुण्ठरेतसे।
नमो ज्येष्ठाय श्रेष्ठाय अपूर्व्वप्रथमाय च ॥ ९१ ॥
नमो हव्याय पूज्याय सद्योजाताय वै नमः।
गङ्गराय धनेशाय हैमचीराम्बराय च ॥ ९२ ॥
नमस्ते ह्यस्मदादीनां भूतानां प्रभावाय च।

१ वैवस्व इति ध०।



वेदकर्म्माविदानानां द्रव्याणां प्रभवे नमः ॥ ९३ ॥
नमो योगस्य प्रभवे सांख्यस्य प्रभवे नमः।
नमो ध्रुवनिशीथान।मृषीणां पतये नमः ॥ ९४ ॥
विद्युदशनिमेघानां गर्ज्जितप्रभवे नमः।
उदधीनाञ्च प्रभवे द्वीपानां प्रभवे नमः ॥ ९५ ॥
अद्रीनां प्रभवे चैव वर्षाणां प्रभवे नमः।
नमो नदानां प्रभवे नदीनां प्रभवे नमः ॥ ९६ ॥
नमश्चौषधिप्रभवे वृक्षाणां प्रभवे नमः।
धर्म्माध्यक्षाय धर्म्माय स्थितीनां प्रभवे नमः ॥ ९७ ॥
नमो रसानां प्रभवे रत्नानां प्रभवे नमः।
नमः क्षणानां प्रभवे कलानां प्रभवे नमः ॥ ९८ ॥
निमेषप्रभवे चैव काष्ठानां प्रभवे नमः।
अहोरात्राईमासानां मासानां प्रभवे नमः ॥ ९९ ॥
नम ऋतूनां प्रभवे संख्यायाः प्रभवे नमः।
प्रभवे च परार्द्धस्य परस्य प्रभवे नमः ॥ २२० ॥
नमः पुराणप्रभवे युगस्य प्रभवे नमः।
चतुर्व्विधस्य सर्गस्य प्रभवेऽनन्तचक्षुषे ॥ २०१ ॥
कल्पोदये निबद्धानां वार्त्तानां प्रभवे नमः।
नमो विश्वस्य प्रभवे ब्रह्मादि प्रभवे नमः ॥ २०२ ॥
विद्यानां प्रभवे चैव विद्यानां पतये नमः।
नमो व्रतानां पतये मन्त्राणां पतये नमः ॥ २०३ ॥
पितृणां पतये चैव पशूनां पतये।
वाग्वृषाय नमस्तुभ्यं पुराणवृषभाय च ॥ २०४ ॥

सुचारुचारुकेशाय ऊर्द्ध्वचक्षुःशिराय च ।
नमः पशूनां पतये गोवृषेन्द्रध्वजाय च ॥ २०५ ॥
प्रजापतीनां पतये सिद्धानां पतये नमः ।
गरुडोरगसर्पाणां पक्षिणां पतये नमः ॥ २०६ ॥
गोकर्णाय च गोष्ठाय शङ्कुकर्णाय वै नमः ।
वाराहायाप्रमेयाय रक्षोधिपतये नमः ॥ २०७ ॥
नमोऽप्सराणां पतये गणानां क्षौमयें नमः ।
अम्भसां पतये चैव तेजसां पतये नमः ॥ २०८ ॥
नमोऽस्तु लक्ष्मीपतये श्रीमते द्रीभते नमः ।
बलाबलसमूहाय ह्यक्षोभ्यक्षोभणाय च ॥ २०९ ॥
दीर्घशृङ्गैकशृङ्गाय वृषभाय ककुद्मिने ।
नमस्थैर्य्याय वपुषे तेजसे सुप्रभाय च ॥ २१० ॥
भूताय च भविष्याय वर्त्तमानाय वै नमः ।
सुवर्चसेऽथ वीराय शूराय ह्यतिगाय च ॥ २११ ॥
वरदाय वरेण्याय नमः सर्व्वगताय च ।
नमो भूताय भव्याय भवाय महते तथा ॥ २१२ ॥
जनाय च नमस्तुभ्यं तपसे वरदाय च ।
नमो वन्द्याय मोक्षाय जनाय नरकाय च ॥ २१३ ॥
भवाय भजमानाय इष्टाय याजकाय च ।
अभ्युदीर्णाय दीप्ताय तत्त्वाय निर्गुणाय च ॥ २१४ ॥
नमः पाशाय हस्ताय नमः स्वाभरणाय च ।
हुताय अपहुताय प्रहुतप्राशिताय च ॥ २१५ ॥
नमस्त्वष्टाय मूर्त्ताय ह्यग्निष्टोमर्त्विजाय च ।



नम ऋताय सत्याय भूताधिपतये नम ॥ २१६ ॥
सदस्याय नमश्चैव दक्षिणावभृथाय च ।
अहिंसायाथ लोकानां पशुमन्त्रौषधाय च ॥ २१७ ॥
नमस्तुष्टिप्रदानाय त्र्यम्बकाय सुगन्धिने ।
नमोऽस्त्विन्द्रियपतये परिहाराय स्रग्विने ॥ २१८ ॥
विश्वाय विश्वरूपाय विश्वतोऽक्षिमुखाय च ।
सर्व्वतः पाणिपादाय रुद्रायाप्रमिताय च ॥ २१९ ॥
नमो हव्याय कव्याय हव्यकव्याय वै नमः ।
नमः सिद्धाय मेध्याय चेष्टाय त्वव्ययाय च ॥ २२० ॥
सुवीराय सुघोराय ह्यक्षोभ्यक्षोभणाय च ।
सुमेधसे सुप्रजाय दीप्ताय भास्कराय च ॥ २२१ ॥
नमो नमः सुपर्णाय तपनीयनिभाय च ।
विरूपाक्षाय त्र्यक्षाय पिङ्गलाय महौजसे ॥ २२२ ॥
दृष्टिघ्नाय नमश्चैव नमः सौम्येक्षणाय च ।
नमो धूम्राय श्वेताय कृष्णाय लोहिताय च ॥ २२४ ॥
पिशिताय पिशङ्गाय पीताय च निषङ्गिणे ।
नमस्ते सविशेषाय निर्विशेषाय वै नमः ॥ २२५ ॥
नमो वै पद्मवर्णाय मृत्युघ्नाय च मृत्यवे ।
नमः श्यामाय गौराय कद्रवे रोहिताय च ॥ २२५ ॥
नमः कान्ताय सन्ध्याभ्रवर्णाय बहुरूपिणे ।
नमः कपालहस्ताय दिग्वस्त्राय कपर्द्दिने ॥ २२६ ॥
अप्रमेयाय शर्वाय ह्यवध्याय वराय च ।
पुरस्तात् पृष्ठतश्चैव विभ्राणाय कृशानवे ॥ २२७ ॥

दुर्गाय महते चैव रोधाय कपिलाय चः ।
अर्कप्रभशरीराय बलिने रंहसाय च ॥ २२८ ॥
पिनाकिने प्रसिद्धाय स्फीताय प्रसृताय च ।
सुमेधसेऽच्चमालाय दिग्वासाय शिखण्डिने ॥ २२९ ॥
चित्राय चित्रवर्णाय विचित्राय धराय च (१)।
चेकितानाय तुष्टाय नमस्त्वनिहिताय च ॥ २३० ॥
नमः क्षान्ताय शान्ताय वज्रसंहननाय च ।
रक्षोघ्नाय मखघ्नाय शितिकण्ठोर्द्धरेतसे ॥ २३१ ॥
अरिहाय कृतान्ताय तिग्मायुधधराय च ।
समोदाय प्रमोदाय हरिणायैव ते नमः ॥ २३२ ॥
प्रणवप्रणवेशाय भक्तानां शर्मदाय च ।
मृगव्याधाय दक्षाय दक्षयज्ञहराय च ॥ २३३ ॥
सर्व्वभूताय भूताय सर्व्वेशातिशयाय च ।
पुरभेत्ते च शान्ताय सुगन्धाय वरेण्यवे ॥ २३४ ॥
पुष्यवेन्त स्वरूपाय भगनेत्रान्तकाय च ।
कणादाय वरिष्ठाय कामाङ्गदहनाय च ॥ २३५ ॥
रवेः करालचक्राय नागेन्द्रदमनाय च ।
दैत्यानामन्तकायाथो दिव्याक्रन्दकराय च ॥ २३६ ॥
श्मशानरतिनित्याय नमस्त्रास्वकधारिणे ।
नमस्ते प्राणपालाय ध्वजमालाधराय च ॥ २३७ ॥
प्रहीणशोकैर्विविधैर्भूतैः परिष्टुताय च।

१ चित्रवर्म्मधराय चेति घ० ।



नरनारीशरीराय देव्याः प्रियकराय च ॥ २३८ ॥
जटिने दण्डिने तुभ्यं व्यालयज्ञोपवीतिने ।
नमोऽस्तु नृत्यशीलाय वाद्य नृत्यप्रियाय च ॥ २३९ ॥
मन्यवे शीतशीलाय सुगीतिगायते नमः ।
कटकराय भीमाय चीरूपधराय च ॥ २४० ॥
विभीषणाय भीमाय भगघ्नमथनाय च ।
सिद्धैसङ्घातगीताय महाभागाय वै नमः ॥ २४१ ॥
नमो मुक्ताट्टहासाय क्ष्वेड़ितास्फोटिताय च ।
नदते कूर्दते चैव नमः प्रभुदिताय च ॥ २४२ ॥
नमोऽद्भुताय स्वपते धावते प्रस्थिताय च ।
ध्यायते जृम्भते चैव तुदते द्रवते नमः ॥ २४३ ॥
चलते क्रीड़ते चैव लम्बोदरशरीरिणे ।
नमः क्षताय कम्पाय मुण्डाय विकराय च ॥ २४४ ॥
नम उन्मत्तवेषाय किंकिणीकाय वै नमः ।
नमो विकृतवेषाय क्रूरोग्रामर्षणाय च ॥ २४५ ॥
अप्रमेयाय दीप्ताय दीप्तये निर्गुणाय च ।
नमः प्रियाय वादाय मुद्रामणिधराय च ॥ २४६ ॥
नमस्लोकाय तनवे गुणैरप्रतिमाय च ।
नमो गणाय गुह्याय अगम्यागमनाय च ॥ २४७ ॥
लोकधात्री स्त्रियं भूमिः पादौ सज्जनसेवितौ ।
सर्व्वेषां सिद्धयोगानामधिष्ठानन्तवोदरं ॥ २४८ ॥
मध्येऽन्तरीक्षं विस्तीर्णन्तारागणविभूषितं ।
तारापथ इवाभाति श्रीमान्हारस्तवोरसि ॥ २४९ ॥

दिशो दशभुजास्ते वै केयूराङ्गदभूषिताः ।
विस्तीर्णपरिणाहश्च नीलाम्बुदचयोपमः ॥ २५० ॥
कण्ठस्ते शोभते श्रीमान् हेमसूत्रविभूषितः ।
दंष्ट्राकरालदुर्द्धर्षमनौपम्यं मुखं तव ॥ २५१ ॥
पद्ममालाकृतोष्णीषं शीर्षण्यं शोभते कथं ।
दीप्तिः सूर्य्ये वपुश्चन्द्रे स्थैर्य्यंभूर्ह्यनिलो बले ॥ २५२ ॥
तैक्ष्ण्यमग्नौ प्रभा चन्द्रे खे शब्दः शैत्यमप्सु च ।
अक्षरोत्तमनिष्यन्दान् गुणानेतान्विदुर्बुधाः ॥ २५३ ॥
जपो जप्यो महायोगी महादेवो महेश्वरः ।
पुरेशयो गुहावासी खेचरो रजनीचरः ॥ २५४ ॥
तपोनिधिर्गुहगुरुर्नन्दनो नन्दिवर्द्धनः ।
हयशीर्षा धराधाता विधाता भूतिवाहनः ॥ २५५ ॥
बोद्धव्यो बोधनो नेता धूर्व्वहो दुःप्रकम्पकः ।
बृहद्रथो भीमकर्म्मा बृहत्कीर्त्तिर्धनञ्जयः ॥ २५६ ॥
घण्टाप्रियो ध्वजी छत्री पताकाध्वजिनीपतिः ।
कवची पट्टिशी शङ्खी पाशहस्तः परश्वधृत् ॥ २५७ ॥
अगमस्त्वनघः शूरो देवराजारिमर्दनः ।
त्वां प्रसाद्य पुराऽस्माभिर्हिंषन्तो निर्हता युधि ॥ २५८ ॥
अग्निस्त्वं चाग्र्यवान्सर्वान् पिबन्नेव न तृप्यसे ।
क्रोधागारः प्रसन्नात्मा कामहा कामदः प्रियः ॥ २५९ ॥
ब्रह्मण्यो ब्रह्मचारी च गोघ्नस्त्वं शिष्टपूजितः ।
वेदानामव्ययः कोशस्त्वया यज्ञः प्रकल्पितः ॥ २६० ॥
हव्यञ्च वेदं वहति वेदोक्तं हव्यवाहनः ।



प्रीते त्वयि महादेव वयं प्रीता भवामहे ॥ २६१ ॥
भवानीशो नादिमान् धामराशि-
र्ब्रह्मा लोकानान्त्वं कर्त्ता त्वादिसर्गः ।
साङ्ख्याः प्रकृतिभ्यः परमं त्वां विदित्वा
क्षीणध्यानास्ते न मृत्युं विशन्ति ॥ २६२ ॥
योगेन त्वान्ध्यानिनो नित्ययुक्ताः
श्रुत्वा भोगान् सन्त्यजन्ते पुनस्तान् ।
येऽन्ये मर्त्यास्त्वां प्रपन्ना विशुद्धाः
ते कर्म्मभिर्दिव्यभोगान् भजन्ते ॥ २६३ ॥
अप्रमेयस्य तत्त्वस्य यथा विज्ञः स्वयम्भितः ।
कीर्त्तितं तव माहात्म्यम पारं परमात्मनः ।
शिवो नो भव सर्व्वत्र योऽसि सोऽसि नमोऽस्तु ते ॥ २६४ ॥

इति श्रीमहापुराणे वायुप्रोक्ते शार्व्वस्तवं नाम
चतुर्विंशोऽध्यायः ।

---

# अथ पञ्चविंशोऽध्यायः ।

मधुकैटभोत्पत्तिविनाशवर्णनं ।

सूत उवाच । संप्रबुद्धमिव तौ दृष्ट्वा मधुपिङ्गायतेक्षणः ।
प्रहृष्टवदनोऽत्यर्थमभवच्च स्वकीर्त्तनात् ॥ १ ॥
उमापतिर्विरूपाक्षो दक्षयज्ञविनाशनः ।
पिनाकी खण्डपरशुर्भूतप्रान्तस्त्रिलोचनः ॥ २ ॥
ततः स भगवान् देवः श्रुत्वा वाक्यामृतन्त्वयोः ।
जानन्नपि महाभागः प्रीतपूर्व्वमथाब्रवीत् ॥ ३ ॥
कौ भवन्तौ महात्मानौ परस्परहितैषिणौ ।
समेतावम्बुजाभाक्षौ तस्मिन् घोरे जलप्लवे ॥ ४ ॥
तावूचतुर्महात्मानौ सन्निरीक्ष्य परस्परं ।
भगवन् किञ्च तथ्येन विज्ञातेन त्वया विभो ।
कुत्र वा सुखमानन्त्यमिच्छाचारमृते त्वया ॥ ५ ॥
उवाच भगवान् देवो मधुरश्लक्ष्णया गिरा ।
भो भो हिरण्यगर्भ त्वां त्वां च कृष्ण वदाम्यहं ॥ ६ ॥
प्रीतोऽहमनया भक्त्या शाश्वताचरयुक्तया ।
भवन्तौ माननीयौ वै मम ह्यर्हतरावुभौ ।
युवाभ्यां किन्ददाम्यद्य वराणां वरमुत्तमं ॥ ७ ॥
तेनैवमुक्ते वचने ब्रह्मानं विष्णुरब्रवीत् ।
ब्रूहि ब्रूहि महाभाग वरो यस्ते विवक्षितः ॥ ८ ॥



प्रजाकामोऽस्म्यहं विष्णो पुत्रमिच्छामि धूर्व्वहं ।
ततः स भगवान् ब्रह्मा वरेषुः पुत्रलिप्सया ॥ ९ ॥
अथ विष्णुरुवाचेदं प्रजाकामं प्रजापतिं ।
वीरमप्रतिमं पुत्रं यत् त्वमिच्छसि धूर्व्वहं ॥ १० ॥
पुत्रत्वेनाभियुङ्क्ष्व त्वं देवदेवं महेश्वरं ।
स तस्य काक्यं संपूज्य केशवस्य पितामहः ॥ ११ ॥
ईशानं वरदं रुद्रमभिवाद्य कृताञ्जलिः ।
उवाच पुत्रकामस्तु वाक्यानि सह विष्णुना ॥ १२ ॥
यदि मे भगवान् प्रीतः पुत्रकामस्य नित्यशः ।
पुत्रो मे भव विश्वात्मन् स्वतुल्यो वापि धूर्व्वहः ।
नान्यं वरमहं वव्रे प्रीते त्वयि महेश्वर ॥ १३ ॥
तस्य तां प्रार्थनां श्रुत्वा भगवान् भगनेत्रहा ।
निष्कल्मषममायश्च वाढ़मित्यब्रवीद्वचः ॥ १४ ॥
यदा कार्य्यसमारम्भे कस्मिंश्चित्तव सुव्रत ।
अनिष्पत्तौ च कार्य्यस्य क्रोधस्त्वां समुपेष्यति ।
आत्मैकादश ये रुद्रा विहिताः प्राणहेतवः ॥ १५ ॥
सोऽहमेकादशात्मा वै शूलहस्तः सहानुगः ।
ऋषिर्म्मित्रो महात्मा वै ललाटाङ्कविता तदा ॥ १६ ॥
प्रसादमतुलं कृत्वा ब्रह्मणस्तादृशं पुरा ।
विष्णुं पुनरुवाचेदं ददामि च वरन्तव ॥ १७ ॥
स होवाच महाभागो विष्णुर्भवमिदं वचः ।
सर्व्वमेतत् कृतं देव परितुष्टोऽसि मे यदि ।
त्वयि मे सुप्रतिष्ठाऽस्तु भक्तिरम्बुदवाहन ॥ १८ ॥

एवमुक्तस्ततो देवः समभाषत केशवं।
विष्णो शृणु यथा देव प्रीतोऽहन्तव शाश्वत ॥ १९ ॥
प्रकाशश्चाप्रकाशश्च जङ्गमं स्थावरञ्च यत्।
विश्वरूपमिदं सर्व्वं रुद्रनारायणात्मकं ॥ २० ॥
अहमग्निर्भवान् सोमो भवान् रात्रिरहं दिनं।
भवान्तमहं सत्यं भवान् ऋतुरहं फलं ॥ २१ ॥
भवान् ज्ञानमहं ज्ञेयं यज्जपित्वा सदा जनाः।
मां विशन्ति त्वयि प्रीते जनाः सुकृतकारिणः।
आवाभ्यां सहिता चैव गतिर्नान्या युगत्रये ॥ २२ ॥
आत्मानं प्रकृतिं विद्धि मां विद्धि पुरुषं शिवं।
भवानष्टशरीरं मे त्वहन्तव तथैव च ॥ २३ ॥
वामपार्श्वमहञ्चाद्यं श्यामं श्रीवत्सलक्षणं।
त्वञ्च वामेतरं पार्श्वंत्वहं वै नीललोहितः ॥ २४ ॥
त्वञ्च मे हृदयं विष्णो तव चाहं हृदि स्थितः।
भवान्सर्व्वस्य कार्य्यस्य कर्त्ताहमधिदैवतं ॥ २५ ॥
तदेहि स्वस्ति ते वत्स गमिष्याम्यम्बुदप्रभ।
एवमुक्त्वा गतो विष्णोर्देवोऽन्तर्द्धानमीश्वरः ॥ २६ ॥
ततः सोऽन्तर्हिते देवे संप्रहृष्टस्तदा पुनः।
अशेत शयने भूप प्रविश्यान्तर्जले हरिः ॥ २७ ॥
तं पद्मं पद्मगर्भाभं पद्माक्षः पद्मसम्भवः।
सम्प्रहृष्टमना ब्रह्मा भेजे ब्राह्मं तदासनं ॥ २८ ॥
अथ दीर्घेण कालेन तत्राप्यप्रतिमावुभौ।
महाबलौ महासत्त्वौ भ्रातरौ मधुकैटभौ ॥ २९ ॥



ऊचतुश्चैव वचनं मच्चो वै नौ भविष्यसि।
एवमुक्त्वा तु तौ तस्मिन्नन्तर्द्धानं गतावुभौ ॥ ३० ॥
दारुणन्तु तयोर्भावं ज्ञात्वा पुष्करसम्भवः।
माहात्म्याच्चात्मनो बुद्ध्वा विघ्नार्तुमुपचक्रमे ॥ ३१ ॥
कर्णिकाघटनं भूयो नाभ्यजानादृयदा गतिं।
ततः स पद्मनालेन अवतीर्य्य रसातलं।
कृष्णाजिनोत्तरासङ्गन्ददृशेऽन्तर्जले हरिं ॥ ३२ ॥
स च तं बोधयामास विबुद्ध्वेदमब्रवीत्।
भूतेभ्यो मे भयं देव त्रायस्वोत्तिष्ठ शङ्गुरु ॥ ३३ ॥
ततः स भगवान् विष्णुः सप्रहासमरिन्दमः।
न भेतव्यं न भेतव्यमित्युवाच मुनिः स्वयं ॥ ३४ ॥
तस्मात्पूर्व्वं त्वया चोक्तं भूतेभ्यो मे महद्भयं।
तस्माज्जूतादिवाक्यैस्तौ दैत्यौ त्वं नाशयिष्यसि ॥ ३५ ॥
भूर्भुवःस्वःस्ततो देवं विविशुस्तमयोनिजं।
ततः प्रदक्षिणं कृत्वा तमेवासीनमागतं ॥ ३६ ॥
गते तस्मिंस्ततोऽनन्त उन्नीय्य भ्रातरौ मुखात्।
विष्णुं जिष्णुञ्च प्रोवाच ब्रह्माणमभिरक्षतां।
मधुकैटभयोर्ज्ञात्वा तयोरागमनं पुनः ॥ ३७ ॥
चक्राते रूपसादृश्यं विष्णोर्जिष्णोश्च सत्तमौ।
कृतसादृश्यरूपौ तौ तावेवाभिमुखौ स्थितौ ॥ ३८ ॥
ततस्तौ प्रोचतुर्दैत्यौ ब्रह्माणं दारुणं वचः।
अस्माकं युध्यमानानां मध्ये वै प्राप्निको भव ॥ ३९ ॥
ततस्तौ जलमाविश्य संस्तम्भ्यापः स्वमायया।

चक्रतुस्तुमुलं युद्धं यस्य येनेप्सितं तदा ॥ ४० ॥
तेषान्तु युध्यमानानां दिव्यं वर्षशतङ्गतं।
न च युद्धमदोत्सिक्तो ह्यन्योन्यं संन्यवर्त्तत ॥ ४१ ॥
लक्षणद्वयसंस्थानाद्रुपवन्तौ स्थितेङ्गितौ।
साट्टस्याद्व्याकुलमना ब्रह्मा ध्यानमुपागमत् ॥ ४२ ॥
स तयोरन्तरं बुद्ध्वा ब्रह्मा दिव्येन चक्षुषा।
पद्मकेसरजं सूक्ष्मं ववन्ध कवचन्तयोः।
आमेखलञ्च गात्रञ्च ततो मन्त्रमुदाहरत् ॥ ४३ ॥
जपतस्त्वभवत्कन्या विश्वरूपसमुत्थिता।
पद्मेन्दुवदनप्रख्या पद्महस्ता शुभा सती।
तां दृष्ट्वा व्यथितौ दैत्यौ भयाद्वर्णविवर्जितौ ॥ ४४ ॥
ततः प्रोवाच तां कन्यां ब्रह्मा मधुरया गिरा।
काऽत्र त्वमवगन्तव्या ब्रूहि सत्यमनिन्दिते ॥ ४५ ॥
साम्ना संपूज्य सा कन्या ब्रह्माणं प्राञ्जलिस्थिता।
मोहिनीं विद्धि मां मायां विष्णोः सन्देशकारिणीं ॥ ४६ ॥
त्वया सङ्कीर्त्यमानाऽहं ब्रह्मन् प्राप्ता त्वरायुता।
अस्याः प्रीतमना ब्रह्मा गौणं नाम चकार ह ॥ ४७ ॥
मया च व्याहृता यस्मात्त्वञ्चैव समुपस्थिता।
महाव्याहृतिरित्येव नाम ते विचरिष्यति ॥ ४८ ॥
उत्थिता च शिरो भित्त्वा सावित्री तेन चोच्यते।
एकानंशात्तु यस्मात्त्वमनेकांशा भविष्यसि ॥ ४९ ॥
गौणानि तावदेतानि कर्म्मजान्यपराणि च।
नामानि ते भविष्यन्ति मत्प्रसादात् शुभानन ॥ ५० ॥

MAY 15 1933

BIBLIOTHECA INDICA.


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 428.




UNIVERSITY OF CALIFORNIA

वायुपुराणम्।

# The Váyu Purána:

A SYSTEM OF HINDU MYTHOLOGY AND TRADITION.

EDITED BY


RÁJENDRALÁLA MITRA, LL.D., C.I.E.

FASCICULUS III.

CALCUTTA.

PRINTED BY K. N. BHATTÁCHÁRYA, AT THE GANEŚA PRESS.

1879.





ततस्तौ पीड्यमानौ तु वरमेनमयाचतां ।
अनावृतं नौ मरणं पुत्रत्वञ्च भवेत्तव ॥ ५१ ॥
तथेत्युक्ता ततस्तूर्णमनयद्यमसादनं ।
अनयत्कैटभं विष्णुर्जिष्णुश्चाप्यनयन्मधुं ॥ ५२ ॥
एवन्तौ निहतौ दैत्यौ विष्णुना जिष्णुना सह ।
प्रीतेन ब्रह्मणा चाथ लोकानां हितकाम्यया ॥ ५३ ॥
पुत्रत्वमौग्रेन यथा ह्यात्मा दत्तो निबोधत ।
विष्णुना जिष्णुना सार्द्धं मधुकैटभयोस्तथा ।
सम्मराये व्यतिक्रान्ते ब्रह्मा विष्णुमभाषत ॥ ५४ ॥
अद्य वर्षशतं पूर्णं सभयः प्रत्युपस्थितः ।
संक्षेपसम्भवङ्कोरं स्वस्थानं यामि चाप्यहं ॥ ५५ ॥
स तस्य वचसा देवः संहारमकरोत्तदा ।
महीं निस्थावरां कृत्वा प्रकृतिस्थांश्च जङ्गमान् ॥ ५६ ॥
यदि गोविन्द भद्रन्ते चित्तस्ते यादसां पतिः ।
कूहि यत् करणीयं स्यान्मया ते लक्ष्मिवर्द्धन(१) ॥ ५७ ॥
वाढ़ं शृणु त्वं हेमाभ पद्मयोने वचो मम ।
प्रसादो यस्त्वया लब्ध ईश्वरात् पुत्रलिप्सया ॥ ५८ ॥
तन्तथा सफलं कृत्वा मत्तोऽभूदनृणो भवान् ।
चतुर्विधानि भूतानि सृज त्वं विसृजस्व वा(२) ॥ ५९ ॥
अवाप्य संज्ञाङ्गोविन्दात् पद्मयोनिः पितामहः ।
प्रजाः स्रष्टुमनास्तेपे तप उग्रं ततो महत् ॥ ६० ॥

---

१ प्रयोगोऽयं आर्षः ।
२ विसृजस्व चेति ङ० ।

तस्यैवन्तप्यमानस्य न किञ्चित्समवर्त्तत ।
ततो दीर्घेण कालेन दुःखात् क्रोधो व्यवर्द्धत ॥ ६१ ॥
सक्रोधाविष्टनेत्राभ्यामपतन्नश्रुविन्दवः ।
ततस्तेभ्योऽश्रुविन्दुभ्यो वातपित्तकफात्मकाः ॥ ६२ ॥
महाभागा महासत्त्वाः स्वस्तिकैरभ्यलङ्कृताः ।
प्रकीर्णकेशाः सर्पास्ते प्रादुर्भूता महाविषाः ॥ ६३ ॥
सर्पांस्तथाग्रजान् दृष्ट्वा ब्रह्मात्मानमनिन्दत ।
अहो धिक् तपसा मह्यं फलमीदृशकं यदि ।
लोकवैनाशिकी जज्ञे आदावेव प्रजा मम ॥ ६४ ॥
तस्य तीव्राभवन्मूर्च्छा क्रोधामर्षसमुद्भवा ।
मूर्च्छाभितापेन तदा जहौ प्राणान् प्रजापतिः ॥ ६५ ॥
तस्याप्रतिमवीर्य्यस्य देहात् कारुण्यपूर्वकं ।
आत्मैकादश ते रुद्राः प्रोद्भूतारुदतस्तथा ।
रोदनात् खलु रुद्रास्ते रुद्रत्वं तेन तेषु तत् ॥ ६६ ॥
ये रुद्राः खलु ते प्राणा ये प्राणास्ते तदात्मकाः ।
प्राणाः प्राणभृतां ज्ञेयाः सर्व्वभूतेष्ववस्थिताः ॥ ६७ ॥
अत्युग्रस्य महत्त्वस्य साधुना चरितस्य च ।
तस्य प्राणान् ददौ भूयस्त्रिशूली नीललोहितः ।
ललाटात् पद्मयोनेस्तु प्रभुरेकादशात्मकः ॥ ६८ ॥
ब्रह्मणः सोऽददात् प्राणानात्मजः स तदा प्रभुः ।
प्रहृष्टवदनो रुद्रः किञ्चित् प्रत्यागतासवं ।
अभ्यभाषत्तदा देवो ब्रह्माणं परमं वचः ॥ ६९ ॥
उपयाचस्व मां ब्रह्मन् स्मर्त्तुमर्हसि चात्मनः ।



मां च वेत्थात्मजं रुद्रं प्रसादं कुरु मे प्रभो ॥ ७० ॥
श्रुत्वा त्विदं वचस्तस्य प्रभूतञ्च मनोगतं ।
पितामहः प्रसन्नात्मा नेत्रैः फुल्लाम्बुजप्रभैः ॥ ७१ ॥
ततः प्रत्यागतप्राणः स्निग्धगम्भीरया गिरा ।
उवाच भगवान् ब्रह्मा शुद्धजाम्बूनदप्रभः ॥ ७२ ॥
भो भो वद महाभाग आनन्दयसि मे मनः ।
को भवान् विश्वभूतिस्त्वं स्थित एकादशात्मकः ॥ ७३ ॥
एवमुक्तो भगवता ब्रह्मणाऽनन्ततेजसा ।
ततः प्रत्यवदद्रुद्रो ह्यभिवाद्यात्मजैः सह ॥ ७४ ॥
यत्ते वरमहं ब्रह्मन् याचितो विष्णुना सह ।
पुत्रो मे भव देवेति त्वत्तुल्यो वापि धूर्व्वहः ॥ ७५ ॥
लोकेषु विश्रुतैः कार्य्यं सर्व्वैर्विश्वात्मसम्भवैः ।
विषादन्त्यज देवेश लोकांस्त्वं स्रष्टुमर्हसि ॥ ७६ ॥
एवं स भगवानुक्तो ब्रह्मा प्रीतमनाभवत् ।
रुद्रं प्रत्यवदद् भूयो लोकान्ते नीललोहितं ॥ ७७ ॥
साहाय्यं मम कार्य्यार्थं प्रजाः सृज मया सह ।
बीजी त्वं सर्व्वभूतानां तत् प्रपन्नस्तथा भव ।
वाढ़मित्येव तां वाणीं प्रतिजग्राह शङ्करः ॥ ७८ ॥
ततः स भगवान् ब्रह्मा कृष्णाजिनविभूषितः ।
मनोऽग्रे सोऽसृजद्देवो भूतानां धारणं ततः ।
जिह्वां सरस्वतीञ्चैव ततस्तां विश्वरूपिणीं ॥ ७९ ॥
भृगुमङ्गिरसं दक्षं पुलस्त्यं पुलहं क्रतुं ।
वसिष्ठञ्च महातेजाः ससृजे सप्त मानसान् ॥ ८० ॥

पुत्रानात्मसमानन्यान् (१) सोऽसृजद्दिव्यसम्भवान्।
तेषां भूयोऽनुमार्गेण गावो वक्त्रादिजज्ञिरे ॥ ८१ ॥
ओंकारप्रमुखान् वेदानभिमान्याश्च देवताः।
एवमेतान् यथा प्रोक्तान् ब्रह्मा लोकपितामहः ॥ ८२ ॥
दक्षाद्यान् मानसान् पुत्रान् प्रोवाच भगवान् प्रभुः।
प्रजाः सृजत भद्रं वो रुद्रेण सह धीमता ॥ ८३ ॥
अनुगम्य महात्मानं प्रजानां पतयस्तदा।
वयमिच्छामहे देव प्रजाः स्रष्टुं त्वया सह।
ब्रह्मणस्त्वेष सन्देशस्तव चैव महेश्वर ॥ ८४ ॥
तैरेवमुक्तो भगवान् रुद्रः प्रोवाच तान् प्रभुः।
ब्रह्मणश्चात्मजा मह्यं प्राणान् गृह्य च वै सुराः ॥ ८५ ॥
कृत्वाग्रजाग्रजानेतान् ब्राह्मणानात्मजान्मम।
ब्रह्मादिस्तम्बपर्य्यन्तान् सप्तलोकान्ममात्मकान्।
भवन्तः स्रष्टुमर्हन्ति वचनान्मम सत्तम वः ॥ ८६ ॥
तेनैवमुक्ताः प्रत्यूचुः रुद्रमाद्यन्तिशूलिनं।
यथाज्ञापयसे देव तथा तद्वै भविष्यति ॥ ८७ ॥
अनुमान्य महादेवं प्रजानां पतयस्तदा।
ऊचुर्दक्षं महात्मानं भवान् श्रेष्ठः प्रजापतिः।
त्वां पुरस्कृत्य भद्रन्ते प्रजाः स्रक्ष्यामहे वयं ॥ ८८ ॥
एवमस्त्विति वै दक्षः प्रत्यपद्यत भाषितं।
तैः सह स्रष्टुमारेभे प्रजाकामः प्रजापतिः।
सर्गस्थिते ततः स्थाणौ ब्रह्मा सर्गमथासृजत् ॥ ८९ ॥

१ पुत्रानात्मसमानेतानिति ङ०।



अथास्य सप्तमेऽतीते कल्पे वै सम्भवत्युः।
ऋभुः सनत्कुमारश्च तपोलोकनिवासिनौ।
ततो महर्षीनन्यान् स मानसानसृजत् प्रभुः ॥ ९० ॥

इति श्रीमहापुराणे वायुप्रोक्ते मधुकैटभोत्पत्तिविनाश-
वर्णनं नाम पञ्चविंशोऽध्यायः।

---

# अथ षड्विंशोऽध्यायः।

———000———

## स्वरोत्पत्तिः।

सूत उवाच। अहो विस्मयनीयानि रहस्यानि महामते।
त्वयोक्तानि यथातत्त्वं लोकानुग्रहकारणात् ॥ १ ॥
तत्र वै संशयो मह्यमववारेषु शूलिनः।
किं कारणं महादेवः कलिं प्राप्य सुदारुणं।
हित्वा युगानि पूर्व्वाणि अवतारं करोति वै ॥ २ ॥
अस्मिन्मन्वन्तरे चैव प्राप्ते वैवस्वते प्रभो।
अवतारं कथञ्चक्रे एतदिच्छामि वेदितुं ॥ ३ ॥
न तेऽस्त्यविदितं किञ्चिदिह लोके परत्र च।
भक्तानामुपदेशार्थं विनयात् पृच्छतो मम।
कथयस्व महाप्राज्ञ यदि आख्यं महामतं ॥ ४ ॥
लोमश उवाच(१)। एवं पृष्टोऽथ भगवान् वायुर्लोकहिते रतः।
इदमाह महातेजा वायुर्लोकनमस्कृतः ॥ ५ ॥
एतद्गुप्ततमं(२) लोके यन्मान्त्वं परिपृच्छसि।
तत्सर्व्वं शृणु गाधेय उच्यमानं यथाक्रमं ॥ ६ ॥
पुरा ह्येकार्णवे वृत्ते दिव्ये वर्षसहस्रके।

१ लोमहर्षण उवाचेति ङ०।
२ एतद्गुह्यतममिति घ०।



सृष्टुकामः प्रजा ब्रह्मा चिन्तयामास दुःखितः ॥ ७ ॥
तस्य चिन्तयमानस्य प्रादुर्भूतः कुमारकः।
दिव्यगन्धः सुधापेचौ दिव्यां श्रुतिमुदीरयन् ॥ ८ ॥
अशब्दस्पर्शरूपान्तामगन्धां रसवर्ज्जितां।
श्रुतिं ह्युदीरयन् देवो यामविन्दच्चतुर्म्मुखः ॥ ९ ॥
ततस्तु ध्यानसंयुक्तस्तप आस्थाय भैरवं।
चिन्तयामास मनसा त्रितयं कोऽन्वयन्विति ॥ १० ॥
तस्य चिन्तयमानस्य प्रादुर्भूतं तदक्षरं।
अशब्दस्पर्शरूपञ्च रसगन्धविवर्ज्जितं ॥ ११ ॥
अथोत्तमं स लोकेषु स्वमूर्त्तिञ्चापि पश्यति।
ध्यायन्वै स तदा देवमथैनं पश्यते पुनः ॥ १२ ॥
तं श्वेतमथ रक्तञ्च पीतं कृष्णं तदा पुनः।
वर्णस्थं तत्र पश्येत न स्त्री न च नपुंसकं ॥ १३ ॥
तत्सर्व्वं सुचिरं ज्ञात्वा चिन्तयन् हि तदक्षरं।
तस्य चिन्तयमानस्य कण्ठादुत्तिष्ठतेऽक्षरः ॥ १४ ॥
एकमात्रो महाघोषः श्वेतवर्णः सुनिर्म्मलः।
स ओंकारो भवेद्वेदः अक्षरं वै महेश्वरः ॥ १५ ॥
ततश्चिन्तयमानस्य त्वक्षरं वै स्वयम्भुवः।
प्रादुर्भूतन्तु रक्तन्तु स देवः प्रथमः स्मृतः ॥ १६ ॥
ऋग्वेदं प्रथमं तस्य त्वग्निमीले पुरोहितं।
एतां दृष्ट्वा ऋचं ब्रह्मा चिन्तयामास वै पुनः।
तदक्षरं महातेजाः किमेतदिति लोककृत् ॥ १७ ॥
तस्य चिन्तयमानस्य तस्मिन्नथ महेश्वरः।

द्विमात्रमक्षरं जज्ञे ईशित्वेन द्विमात्रिकं ॥ १८ ॥
ततः पुनर्द्विमात्रन्तु चिन्तयामास चाक्षरं ।
प्रादुर्भूतञ्च रक्तन्तत् क्षेदने गृह्य सा यजुः ॥ १९ ॥
इषे त्वोर्ज्जेत्वा वायवः स्थ देवो वः सविता पुनः ।
ऋग्वेद एकमात्रस्तु द्विमात्रन्तु यजुः स्मृतं ॥ २० ॥
ततो वेदं द्विमात्रन्तु दृष्ट्वा चैव तदक्षरं ।
द्विमात्रं चिन्तयन् ब्रह्मा त्वक्षरं पुनरीश्वरः ॥ २१ ॥
तस्य चिन्तयमानस्य चोङ्कारः सम्बभूव ह ।
ततस्तदक्षरं ब्रह्मा ओंकारं समचिन्तयत् ॥ २२ ॥
अथापश्यत्ततः पीतामृक्चञ्चैव समुत्थिताम् ।
अग्न आयाहि वीतये गृणानो हव्यदातये ॥ २३ ॥
ततस्तु स महातेजा दृष्ट्वा वेदानुपस्थितान् ।
चिन्तयित्वा च भगवांस्त्रिसन्ध्यं यत्तिरक्षरं ।
त्रिवर्णं यत् त्रिषवणमोङ्कारं ब्रह्मसञ्ज्ञितं ॥ २४ ॥
ततश्चैव त्रिसंयोगात् त्रिवर्णन्तु तदक्षरं ।
लक्ष्यालक्ष्यप्रदृश्यञ्च सहितं त्रिदिवं त्रिकं ॥ २५ ॥
त्रिमात्रन्त्रिपदञ्चैव त्रियोगञ्चैव शाश्वतं ।
तस्मात्तदक्षरं ब्रह्मा चिन्तयामास वै प्रभुः ॥ २६ ॥
तस्मात्तदक्षरं सोऽथ ब्रह्म रूपं स्वयम्भुवः।
चतुर्दशमुखं देवं पश्यते दीप्ततेजसं ।
तमोंकारं स कृत्वादौ विज्ञेयः स स्वयम्भुवः ॥ २७ ॥
चतुर्मुखमुखात्तस्मादजायन्त चतुर्दश ।
नानावर्णाः स्वरा दिव्यमाद्यन्तञ्च तदक्षरं ।



तस्मात् त्रिषष्टिवर्णा वै अकारप्रभवाः स्मृताः ॥ २८ ॥
ततः साधारणार्थाय वर्णानान्तु स्वयम्भुवः ।
अकाररूप आदौ तु स्थितः स प्रथमः स्वरः ॥ २९ ॥
ततस्तेभ्यः स्वरेभ्यस्तु चतुर्दश महासुखाः ।
मनवः सम्प्रसूयन्ते दिव्या मन्वन्तरे स्वराः ॥ ३० ॥
चतुर्दशमुखो यश्च अकारो ब्रह्मसंज्ञितः ।
ब्रह्मकल्पः समाख्यातः सर्ववर्णः प्रजापतिः ॥ ३१ ॥
मुखात्तु प्रथमात्तस्य मनुः स्वायम्भुवः स्मृतः ।
अकारस्तु स विज्ञेयः श्वेतवर्णः स्वयम्भुवः ॥ ३२ ॥
द्वितीयात्तु मुखात्तस्य आकारो वै मुखः स्मृतः ।
नाम्ना सारोचिषो नाम वर्णः पाण्डुर उच्यते ॥ ३३ ॥
तृतीयात्तु मुखात्तस्य इकारो यजुषां वरः ।
यजुर्मयः स चादित्यो यजुर्व्वेदो यतः स्मृतः ॥ ३४ ॥
ईकारः स मनुर्ज्ञेयो रक्तवर्णः प्रतापवान् ।
ततः क्षत्रं प्रवर्त्तत तस्माद्रक्तस्तु क्षत्रियः ॥ ३५ ॥
चतुर्थात्तु मुखात्तस्य उकारः स्वर उच्यते ।
वर्णतस्तु स्मृतस्ताम्रः स मनुस्तामसः स्मृतः ॥ ३६ ॥
पञ्चमात्तु मुखात्तस्य ऊकारो नाम जायते ।
पीतको वर्णतश्चैव मनुश्चापि चरिष्णवः ॥ ३७ ॥
ततः षष्ठान्मुखात्तस्य ओंकारः कपिलः स्मृतः ।
वरिष्ठश्च ततः षष्ठो विजयः स महातपाः ॥ ३८ ॥
सप्तमात्तु मुखात्तस्य ततो वैवस्वतो मनुः ।
ऋकारश्च स्वरस्तत्र वर्णतः कृष्ण उच्यते ॥ ३९ ॥

अष्टमात्तु मुखात्तस्य ऋकारः श्यामवर्णतः।
श्यामाच्चरसवर्णश्च ततः सावर्णिरुच्यते ॥ ४० ॥
मुखात्तु नवमात्तस्य ऌकारो नवमः स्मृतः।
धूम्रो वै वर्णतश्चापि धूम्रश्च मनुरुच्यते ॥ ४१ ॥
दशमात्तु मुखात्तस्य ऌकारः प्रभुरुच्यते।
समश्चैव सवर्णश्च बभौ सावर्णिको मनुः ॥ ४२ ॥
मुखादेकादशात्तस्य एकारो मनुरुच्यते।
पिशङ्गो वर्णतश्चैव पिशङ्गो वर्ण उच्यते ॥ ४३ ॥
द्वादशात्तु मुखात्तस्य ऐकारो नाम उच्यते।
पिशङ्गो भस्मवर्णाभः पिशङ्गो मनुरुच्यते ॥ ४४ ॥
त्रयोदशान्मुखात्तस्य ओकारो वर्ण उच्यते।
पञ्चवर्णसमायुक्त ओकारो वर्ण उत्तमः ॥ ४५ ॥
चतुर्दशमुखात्तस्य औकारो वर्ण उच्यते।
कर्बूरो वर्णतश्चैव मनुः सावर्णिरुच्यते ॥ ४६ ॥
इत्येते मनवश्चैव स्वरा वर्णाश्च कल्पतः।
विज्ञेया हि यथातत्त्वं स्वरतो वर्णतस्तथा ॥ ४७ ॥
परस्परसवर्णाश्च स्वरा यस्माद् हृता हि वै।
तस्मात्तेषां सवर्णत्वादन्वयस्तु प्रकीर्तितः ॥ ४८ ॥
सवर्णाः सदृशाश्चैव यस्माज्जातास्तु कल्पजाः।
तस्मात् प्रजानां लोकेऽस्मिन् सवर्णाः सर्वसन्मयः ॥ ४९ ॥
भविष्यन्ति यथाशैलं वर्णाश्च न्यायतोऽर्थतः।
अभ्यासात्सन्मयश्चैव तस्माज्ज्ञेयाः स्वरा इति ॥ ५० ॥

इति श्रीमहापुराणे वायुप्रोक्ते स्वरोत्पत्तिर्नाम
षड्विंशोऽध्यायः।

# अथ सप्तविंशोऽध्यायः।

—ooo(ॐ)ooo—

## महादेवतनुवर्णनं।

ऋषय ऊचुः। अस्मिन् कल्पे त्वया चोक्तः प्रादुर्भावो महात्मनः।
महादेवस्य रुद्रस्य साधकैर्मुनिभिः सह ॥ १ ॥
सूत उवाच। उत्पत्तिरादिसर्गस्य मया प्रोक्ता समासतः।
विस्तरेणास्य वक्ष्यामि नामानि तनुभिः सह ॥ २ ॥
पत्नीषु जनयामास महादेवः सुतान् वह्नन्।
कल्पेऽष्टमे व्यतीते तु(१) यस्मिन् कल्पे तु तच्छृणु ॥ ३ ॥
कल्पादौ चात्मनस्तुल्यं सुतं प्रध्यायतः प्रभोः।
प्रादुरासीत्ततोऽङ्केऽस्य कुमारो नीललोहितः।
तं दधे सुस्वरं घोरं निर्दहन्निव तेजसा ॥ ४ ॥
दृष्ट्वा रुदन्तं सहसा कुमारं नीललोहितं।
किं रोदिषि कुमारेति ब्रह्मा तं प्रत्यभाषत ॥ ५ ॥
सोऽब्रवीद्देहि मे नाम प्रथमं वै पितामह।
रुद्रस्त्वं देव नाम्नासि इत्युक्तः सोऽरुदत्पुनः ॥ ६ ॥
किं रोदिषीति तं ब्रह्मा रुदन्तं पुनरब्रवीत्।
नाम देहि द्वितीयं मे इत्युवाच स्वयम्भुवं ॥ ७ ॥
भवस्त्वं देव नाम्नासि इत्युक्तः सोऽरुदत्पुनः।
किं रोदिषीति तं ब्रह्मा प्रत्युवाचाथ शङ्करं ॥ ८ ॥
तृतीयं देहि मे नाम इत्युक्तः प्रत्युवाच तं।

१ कल्पेष्वन्येष्वतीतेष्विति घ०।

शिवस्त्वं देव नाम्नासि इत्युक्तः सोऽरुदत्पुनः ॥ ९ ॥
किं रोदिषीति तं ब्रह्मा रुदन्तं पुनरब्रवीत् ।
चतुर्थं देहि मे नाम इत्युवाच स्वयम्भुवं ॥ १० ॥
पशूनां त्वं पतिर्ह्येव इत्युक्तः सोऽरुदत्पुनः ।
किं रोदिषीति तं ब्रह्मा रुदन्तं पुनरब्रवीत् ॥ ११ ॥
पञ्चमं देहि मे नाम इत्युक्तः प्रत्युवाच तं ।
ईशस्त्वं देव नाम्नासि इत्युक्तः सोऽरुदत्पुनः ॥ १२ ॥
किं रोदिषीति तं ब्रह्मा रुदन्तं पुनरब्रवीत् ।
षष्ठं मे नाम देहीति इत्युवाचाथ तं प्रभुं ॥ १३ ॥
भीमस्त्वं देव नाम्नासि इत्युक्तः सोऽरुदत्पुनः ।
किं रोदिषीति तं ब्रह्मा रुदन्तं पुनरब्रवीत् ॥ १४ ॥
सप्तमं देहि मे नाम इत्युक्तः प्रत्युवाच तं ।
उग्रस्त्वं देव नाम्नासि इत्युक्तः सोऽरुदत्पुनः ॥ १५ ॥
किं रोदिषीति तं ब्रह्मा रुदन्तं पुनरब्रवीत् ।
अष्टमं देहि मे नाम त्वं विभो पुनरब्रवीत् ।
महादेवस्तु नाम्नासि इत्युक्तो विरराम ह ॥ १६ ॥
लब्ध्वा नामानि चैतानि ब्रह्मणो नीललोहितः ।
प्रोवाच नाम्नामेतेषां भूतानि प्रदिशेति ह ॥ १७ ॥
ततोऽभि सृष्टास्तनव एषां नाम्नां स्वयम्भुवा ।
सूर्यो मही जलं वह्निर्वायुराकाशमेव च ॥ १८ ॥
दीक्षितो ब्राह्मणश्चन्द्र इत्येते ब्रह्मधातवः ।
तेषु पूज्यश्च वन्द्यः स्याद्रुद्रस्तान्न हिनस्ति वै ॥ १९ ॥
ततोऽब्रवीत् पुनर्ब्रह्मा तं देवं नीललोहितं ।



द्वितीयं नामधेयन्ते मया प्रोक्तं भवेति यत् ।
एतस्यापो द्वितीया ते तनुर्नाम्ना भविष्यति ॥ २० ॥
इत्युक्ते यत् स्थिरं तस्य शरीरस्थं रसात्मकं ।
तद्विवेश ततस्तोयं तस्मादापो भवः स्मृतः ॥ २१ ॥
यस्माद् भवन्ति भूतानि ताभ्यस्ता भावयन्ति च ।
भवनाद्भावनाच्चैव भूतानां सम्भवः स्मृतः ॥ २२ ॥
तस्मान्मूत्रं पुरीषञ्च नाप्सु कुर्वीत सर्वदा ।
न स्नायेदप्सु नग्नश्च न निष्ठीवेत् कदाचन ॥ २३ ॥
मैथुनं नैव सेवेत शिरःस्नानञ्च वर्जयेत् ।
न प्रीतः परिचक्षीत वहन्न संस्थितोपि वा ॥ २४ ॥
मेध्यामेध्यशरीरत्वान्नैव दुष्यन्त्यापः क्वचित् ।
विवर्णरसगन्धाश्च अल्पाश्च परिवर्जयेत् ॥ २५ ॥
अपां योनिः समुद्रश्च तस्मात्तं कामयन्ति ताः ।
मेध्याश्चैवामृताश्चैव भवन्ति प्राप्य सागरम् ॥ २६ ॥
तस्मादपो न रुन्धीत समुद्रं कामयन्ति ताः ।
न हिनस्ति भवो देवः सदैवं योऽप्सु वर्त्तते ॥ २७ ॥
ततोऽब्रवीत् पुनर्ब्रह्मा तं देवं कृष्णलोहितं ।
शर्व्व स्त्वमिति यन्नाम तृतीयं समुदाहृतं ।
तस्य भूमिस्तृतीया तु तनुर्नाम्ना भवित्रियं ॥ २८ ॥
इत्युक्ते यत्स्थिरं तस्य शरीरस्थास्थिसञ्ज्ञितं ।
तद्विवेश ततो भूमिस्तस्माद्वः शर्व उच्यते ॥ २९ ॥
तस्मात् कुर्वीत नो विद्वान् पुरीषमूत्रमेव वा ।
न च्छायायां न सोपाने स्वच्छायां नापि मेहयेत् ॥ ३० ॥

शिरः प्राहृत्य कुर्वीत अन्तर्धाय त्रिणैर्महीं।
य एवं वर्त्तते भूमौ तं शर्व्वो न हिनस्ति वै॥ ३१॥
ततोऽब्रवीत्पुनर्ब्रह्मा तं देवं नीललोहितं।
ईशान इति यत् प्रोक्तं चतुर्थं नाम ते मया॥ ३२॥
चतुर्थस्य चतुर्थी स्यादवायुर्नाम्ना तनुस्तव।
इत्युक्ते यच्छरीरस्थं पञ्चधा प्राणसंज्ञितं॥ ३३॥
विवेश तं तदा वायुरीशानो वायुरुच्यते।
तस्मादेनं परिवदेदायतं वायुमीश्वरं।
एवं युक्तमथेशानो नैव देवो हिनस्ति तं॥ ३४॥
ततोऽब्रवीत् पुनर्ब्रह्मा तं देवं धूम्रलोहितं।
यत्ते पशुपतेत्युक्तं मया नामेह पञ्चमं।
पञ्चमो पञ्चमस्यैव तनुर्नाम्नाग्निरस्तु ते॥ ३५॥
इत्युक्ते यच्छरीरस्थं तेजस्तस्योपसंज्ञितम्।
विवेश तत्तदा ह्यग्निस्तस्मात्पशुपतिः पतिः(१)॥ ३६॥
चन्द्रमास्तु स्मृतः सोमः तस्यात्मा ह्योषधीगणः।
एवं यो वर्त्तते विद्वान् सदा पर्व्वणि पर्व्वणि।
न हन्ति तं महादेव एवं वन्देत तं प्रभुं(२)॥ ३७॥
गोपायति दिवादित्यः प्रजा नक्तन्तु चन्द्रमाः।
एकरात्रे समेयातां सूर्य्याचन्द्रमसावुभौ।
अमावास्यानिशायान्तु तस्यां युक्तः सदा वसेत्॥ ३८॥
तत्राविष्टं सर्वमिदन्तनुभिर्नामभिः सह।

१ पशुपतिः स्मृत इति ङ०।
२ एवं वै दैवतं प्रभूमिति ङ०।



एकाकी यश्चरत्येष सूर्य्योऽसौ चन्द्र उच्यते॥ ३९॥
सूर्य्यस्य यत्प्रकाशेन वीक्ष्यन्ते चक्षुषा प्रजाः।
शुक्लात्मा संस्थितो रुद्रः पिबत्यम्भो गभस्तिभिः॥ ४०॥
अद्यते पीयते चैवाप्यन्नपानात्मकानि या।
तनुरात्मभवा सा वै देहेष्वेवोपचीयते॥ ४१॥
यया धत्ते प्रजाः सर्व्वाः स्थिरीभूतेन चेतसा।
पार्थिवी सा तनुस्तस्य शार्व्वी धारयति प्रजाः॥ ४२॥
यावत् स्थिता शरीरेषु भूतानां प्राणवृत्तिभिः।
वायव्यात्मिका तु ऐशानी सा प्राणाः प्राणिना सह॥ ४३॥
पीताग्नितानि पचति भूतानां जठरेषु या।
ततः पाशुपती तस्य पाचिका शक्तिरुच्यते॥ ४४॥
यानीह सुषिराणि स्युर्देहेष्वन्तर्गतानि वै।
वायोः सञ्चरणार्थाय सा भीमा चोच्यते तनुः॥ ४५॥
वैतानदीक्षितानान्तु या स्थितिर्ब्रह्मवादिनां।
तनुरग्न्यात्मिका सा तु तेनोग्रो दीक्षितः स्मृतः॥ ४६॥
यत्तु सङ्कल्पकं तस्य प्रजास्विह समं स्थितं।
सा तनुर्मानसी तस्य चन्द्रमाः प्राणिषु स्थितः॥ ४७॥
नवो नवो भवति हि जायमानः पुनः पुनः।
नीयते यो यथाकामं विबुधैः पितृभिः सह।
महादेवोऽमृतात्माऽसौ ह्यम्बयश्चन्द्रमाः स्मृतः॥ ४८॥
तस्य या प्रथमा नाम्ना तनूरौद्री प्रकीर्त्तिता।
पत्नी सुवर्चला तस्य पुत्रस्तस्याः शनैश्चरः॥ ४९॥
भवस्य या द्वितीया तु तनुरापः स्मृता तु वै।

तस्योषाच स्मृता पत्नी पुत्रश्चाप्यृचनाः स्मृतः ॥ ५० ॥
शर्वस्य या तृतीया तु नाम भूमिस्तनुः स्मृता।
पत्नी तस्य विकेशीति पुत्रश्चाङ्गारकः स्मृतः ॥ ५१ ॥
ईशानस्य चतुर्थस्य स्वर्गतस्य(१) च या तनुः।
तस्य पत्नी शिवा नाम पुत्रश्चास्य मनोजवः ॥ ५२ ॥
नाम्ना पशुपतेर्या तु तनुरग्निर्द्विजैः स्मृता।
तस्य पत्नी स्मृता स्वाहा स्कन्दश्चापि सुतः स्मृतः ॥ ५३ ॥
नाम्ना षष्ठस्य या भीमा तनुराकाश उच्यते।
दिशः पत्न्यः स्मृतास्तस्य स्वर्गश्चास्य सुतः स्मृतः ॥ ५४ ॥
उग्रा तनुः सप्तमी या दीप्तितैर्ब्राह्मणैः स्मृता।
दीप्ता पत्नी स्मृता तस्य सन्तानः पुत्र उच्यते ॥ ५५ ॥
नाम्नाऽष्टमस्य महतस्तनुर्या चन्द्रमाः स्मृतः।
पत्नी तु रोहिणी तस्य पुत्रश्चास्य बुधः स्मृतः ॥ ५६ ॥
इत्येतास्तनवस्तस्य नामभिः परिकीर्त्तिताः।
तास्तु वन्द्या नमस्याश्च प्रतिनाम तनूषु वै ॥ ५७ ॥
भक्तैः सूर्येऽप्सु पृथिव्यां वायुग्निव्योमदीप्तितः।
तथा च वै चन्द्रमसि तनुभिर्नामभिः सह।
प्रजावानेति सायुज्यमीश्वरस्य नरो हि सः ॥ ५८ ॥
इत्येतद्वो मयाख्यातं गुह्यं भीमस्य तद्यशः।
शत्रोऽस्तु द्विपदे नित्यं शत्रोऽस्तु च चतुष्पदे ॥ ५९ ॥
एतत् प्रोक्तं निदानं वस्तनूनां नामभिः सह।
महादेवस्य देवस्य भृगोस्तु शृणुत प्रजाः ॥ ६० ॥

इति श्रीमहापुराणे वायुप्रोक्ते महादेवतनुवर्णनं नाम सप्तविंशोऽध्यायः।

१ स्वर्गश्चास्येति ख०।

# अथाष्टाविंशोऽध्यायः।

———ooo@ooo———

## ऋषिवंशानुकीर्त्तनं।

सूत उवाच। भृगोः ख्यातिर्विजज्ञेऽथ ईश्वरौ सुखदुःखयोः।
शुभाशुभप्रदातारौ सर्वप्राणभृतामिह।
देवौ धाताविधातारौ मन्वन्तरविचारिणौ ॥ १ ॥
तयोर्ज्येष्ठा तु भगिनी देवी श्रीर्लोकभाविनी।
सा तु नारायणं देवं पतिमासाद्य शोभनं।
नारायणात्मजौ साध्वी(१) बलोत्साहौ व्यजायत ॥ २ ॥
तस्यास्तु मानसाः पुत्रा ये चान्ये दिव्यचारिणः।
ये वहन्ति विमानानि देवानां पुण्यकर्म्मणां ॥ ३ ॥
द्वे तु कन्ये स्मृते भार्य्ये विधातुर्धातुरेव च।
आयतिर्नियतिश्चैव तयोः पुत्रौ दृढव्रतौ ॥ ४ ॥
पाण्डुश्चैव मृकण्डुश्च ब्रह्मकोशौ सनातनौ।
मनस्विन्यां मृकण्डोश्च मार्कण्डेयो बभूव ह ॥ ५ ॥
सुतो वेदशिरास्तस्य मूर्ध्न्यायामजायत।
पीवर्य्यां वेदशिरसः पुत्रा वंशकराः स्मृताः।
मार्कण्डेय इतिख्याता ऋषयो वेदपारगाः ॥ ६ ॥
पाण्डोश्च पुण्डरीकायां द्युतिमानात्मजोऽभवत्।
उत्पन्नौ द्युतिमन्तश्च सृजवानश्च(२) तावुभौ।

१ देवाविति ख०।
२ सृजवामश्चेति ध०।

तयोः पुत्राश्च पौत्राश्च भार्गवाणां परस्परं ।
स्वायम्भुवेऽन्तरेऽतीते मरीचेः शृणुत प्रजाः ॥ ७ ॥
पत्नी मरीचेः सम्भूतिर्विजज्ञे सात्मसम्भवं ।
प्रजायते(१) पूर्णमासं कन्याश्चेमा निबोधत ।
कुष्टिः पृष्टिस्त्विषा चैव तथा चापचितिः शुभा ॥ ८ ॥
पूर्णमासः सरस्वत्यां द्वौ पुत्रावुदपादयत् ।
विरजश्चैव धर्म्मिष्ठं पर्व्वसञ्चैव तावुभौ ॥ ९ ॥
विरजस्यात्मजो विद्वान् सुधामा नामविश्रुतः ।
सुधामसुतवैराजः प्राच्यान्दिग्नि समाश्रितः(२) ॥ १० ॥
लोकपालः सुधर्म्मात्मा गौरीपुत्रः प्रतापवान् ।
पर्वसः सर्वगणानाम्प्रविष्टः स महायशाः ॥ ११ ॥
पर्वसः पर्वसायान्तु जनयामास वै सुतौ ।
यज्ञवाहञ्च श्रीमन्तं सुतं काश्यपमेव च ।
तयोर्गोत्रकरौ पुत्रौ तौ जातौ धर्म्मनिश्चितौ ॥ १२ ॥
स्मृतिश्चाङ्गिरसः पत्नी जज्ञे तावात्मसम्भवौ ।
पुत्री कन्याश्चतस्रश्च पुण्यास्ता लोकविश्रुताः ॥ १३ ॥
सिनीवाली कुहुश्चैव राका चानुमतिस्तथा ।
तथैव भरताग्निञ्च कीर्त्तिमन्तञ्च तावुभौ ॥ १४ ॥
अग्नेः पुत्रन्तु पर्जन्यं संज्ञती सुषुवे प्रभुं ।
हिरण्यरोमा पर्जन्यो मारीच्यामुदपादयत् ।
आभूतसंप्लवस्थायी लोकपालः स वै स्मृतः ॥ १५ ॥

१ प्रजायत इत्यनिजन्तपाठो न समीचीनः ।
२ सदा स्थित इति ख० ।



जज्ञे कीर्त्तिमतश्चापि धेनुका तावकल्मषौ ।
वरिष्ठं धृतिमन्तञ्चाप्युभावङ्गिरसां वरौ ॥ १६ ॥
तयोः पुत्राश्च पौत्राश्च येऽतीता वै सहस्रशः ।
अनसूयापि जज्ञे तान् पञ्चाचेयानकल्मषान् ॥ १७ ॥
कन्याश्चैव श्रुतिं नाम माता शङ्खपदस्य या ।
कर्दमस्य तु या पत्नी पुलहस्य प्रजापतेः ॥ १८ ॥
सत्यनेत्रश्च हव्यश्च आपो मूर्त्तिः शनोश्चरः(१) ।
सोमश्च पञ्चमस्तेषामासीत् स्वायम्भुवेन्तरे ।
यामेऽतीते महातीताः पञ्चाचेयाः प्रकीर्त्तिताः ॥ १९ ॥
तेषां पुत्राश्च पौत्राश्च ह्यचिणा वै महात्मना ।
स्वायम्भुवेऽन्तरे यामे शतशोऽथ सहस्रशः ॥ २० ॥
प्रीत्यां पुलस्त्यभार्य्यायां दत्तालिस्तत् सुतोऽभवत् ।
पूर्वजन्मनि सोऽगस्त्यः स्मृतः स्वायम्भुवेऽन्तरे ।
मध्यमो देववाहुश्च विनीतो नाम ते त्रयः ॥ २१ ॥
स्वसा यवीयसी तेषां सहती नाम विश्रुता ।
पर्जन्यजननी शुभ्रा पत्नी त्वग्नेः स्मृता शुभा ॥ २२ ॥
पौलस्त्यस्य ऋषेश्चापि प्रीतिपुत्रस्य धीमतः ।
दत्तालेः सुषुवे पत्नी सुजङ्घादीन् वह्नन् सुतान् ।
पौलस्त्या इति विख्याताः स्मृताः स्वायम्भुवेऽन्तरे ॥ २३ ॥
क्षमा तु सुषुवे पुत्रान् पुलहस्य प्रजापतेः ।
ते चाग्निवर्चसः सर्वे येषां कीर्त्तिः प्रतिष्ठिता ॥ २४ ॥
कर्दमश्चाम्बरीषश्च महिष्णुश्चेति ते त्रयः ।

१ शनैश्चर इति ख० ।

ऋषिर्धनकपीवांश्च शुभा कन्या च पीवरी ॥ २५ ॥
कर्दमस्य श्रुतिः पत्नी आलेय्यजनयत्सुतान् ।
पुत्रं शङ्खपदञ्चैव कन्यां काम्यां तथैव च ॥ २६ ॥
स वै शङ्खपदः श्रीमान् लोकपालः प्रजापतिः ।
दक्षिणस्यां दिशि रतः काम्यां दत्वा प्रियव्रते ॥ २७ ॥
काम्या प्रियव्रतालेभे स्वायम्भुवसमान् सुतान् ।
दशकन्याश्चयश्चैव यैः क्षत्रं सम्प्रवर्त्तितं ॥ २८ ॥
पुत्रो धनकपीवांश्च(१) सहिष्णुर्नामविश्रुतः ।
यशोधारी विजज्ञे वै कामदेवः सुमध्यमः ॥ २९ ॥
ऋतोः क्रतुसमः पुत्रो विजज्ञे सन्ततिः शुभा ।
नैषां भार्य्यास्ति पुत्रो वा सर्व्वे ते ह्यूर्द्धरेतसः ।
षष्ट्येतानि सहस्राणि बालखिल्या इतिश्रुताः ॥ ३० ॥
अरुणस्याग्रतो यान्ति परिवार्य्य दिवाकरं ।
आभूतसंप्लवात्सर्वे पतङ्गसहचारिणः ॥ ३१ ॥
स्वसारौ तु यवीयस्यौ पुण्यात्मसुमती च ते ।
पर्व्वस्य सुषे ते वै पूर्णमाससुतस्य वै ॥ ३२ ॥
ऊर्जायान्तु वसिष्ठस्य पुत्रा वै सप्त जज्ञिरे ।
ज्यायसी च स्वसा तेषां पुण्डरीका सुमध्यमा ॥ ३३ ॥
जननी सा द्युतिमतः पाण्डोस्तु महिषी प्रिया ।
अस्यां त्विमे यवीयांसो वासिष्ठाः सप्त विश्रुताः ॥ ३४ ॥
रजःपुत्रोऽर्ष्टिषेणश्च सवनश्चाधनश्च यः ।
सुतपाः शुक्र इत्येते सर्वे सप्तर्षयः स्मृताः ॥ ३५ ॥

१ धनकपीन्द्रश्चेति घ०, ङ० च ।



रजसो वाप्यजनयन्मार्कण्डेयो यशस्विनी ।
प्रतीच्यां दिशि राजन्यं केतुमन्तं प्रजापतिं ॥ ३६ ॥
गोत्राणि नामभिस्तेषां वासिष्ठानां महात्मनां ।
स्वायम्भुवेन्तरेऽतीतास्वग्नेस्तु शृणुत प्रजाः ॥ ३७ ॥
इत्येष ऋषिसर्गस्तु सानुबन्धः प्रकीर्त्तितः ।
विस्तरेणानुपूर्व्या चाग्नेस्तु शृणुत प्रजाः ॥ ३८ ॥

इति श्रीमहापुराणे वायुप्रोक्ते ऋषिवंशानुकीर्त्तनं
नामाष्टाविंशोऽध्यायः ।

# अथोनत्रिंशोऽध्यायः ।

—ooOoo—

## अग्निवंशवर्णनं ।

योऽसावग्निरभिमानी ह्यासीत् स्वायम्भुवेऽन्तरे ।
ब्रह्मणो मानसः पुत्रस्तस्मात्स्वाहा व्यजायत ॥ १ ॥
पावकः पवमानश्च पावमानश्च यः स्मृतः ।
शुचिः शौरस्तु विज्ञेयः स्वाहापुत्रास्त्रयस्तु ते ॥ २ ॥
निर्मथ्य पवमानस्तु शुचिः शौरस्तु यः स्मृतः ।
पावका वैद्युताश्चैव तेषां स्थानानि यानि वै ॥ ३ ॥
पवमानात्मजश्चैव कव्यवाहन उच्यते ।
पावकात् सहरच्चस्तु हव्यवाहः शुचेः सुतः ॥ ४ ॥
देवानां हव्यवाहोऽग्निः पितॄणां कव्यवाहनः ।
सहरच्चोऽसुराणान्तु त्रयाणान्तु त्रयोऽग्नयः ॥ ५ ॥
एतेषां पुत्रपौत्रास्तु चत्वारिंशन्नवैव तु ।
वक्ष्यामि नामतस्तेषां प्रविभागं पृथक् पृथक् ॥ ६ ॥
वैद्युतो लौकिकाग्निस्तु प्रथमो ब्रह्मणः सुतः ।
ब्रह्मौदनाग्निस्तत् पुत्रो भरतो नाम विश्रुतः ॥ ७ ॥
वैश्वानरमुखस्तस्य महः काव्यो ह्यपां रसः(१) ।
अमृतोऽथर्वणा पूर्व्वं मथितः पुष्करोदधौ ।
सोऽथर्व्वा लौकिकाग्निस्तु दध्यङ्गोऽथर्वणः सुतः ॥ ८ ॥

१ मपारग इति घ० ।



अथर्वा तु भृगुर्ज्ञेयोऽप्यङ्गिराऽथर्वणः सुतः ।
तस्मात् स लौकिकाग्निस्तु दध्यङ्गोऽथर्वणः सुतः ॥ ९ ॥
अथ यः पवमानोऽग्निर्निर्म्मन्थ्यः कविभिः स्मृतः ।
स ज्ञेयो गार्हपत्योऽग्निस्ततः पुत्रत्रयं स्मृतं ॥ १० ॥
शंस्यस्त्वाहवनीयोऽग्निर्यः स्मृतो हव्यवाहनः ।
द्वितीयस्तु सुतः प्रोक्तः शुक्रोऽग्निर्य्यः प्रणीयते ॥ ११ ॥
तथा(१) सभ्यावसथ्यौ वै शंस्यस्याग्नेः सुतावुभौ ।
शंस्यास्तु षोड़शनदीष्वकमे हव्यवाहनः ।
योऽसावाहवनीयोऽग्निरभिमानी द्विजैः स्मृतः ॥ १२ ॥
कावेरीं कृष्णवेणीञ्च नर्मदां यमुनान्तथा ।
गोदावरीं वितस्ताञ्च चन्द्रभागामिरावतीं ॥ १३ ॥
विपाशाङ्कौशिकीञ्चैव शतद्रुं सरयून्तथा ।
सौतां सरस्वतीञ्चैव ह्लादिनीं पावनीं तथा ॥ १४ ॥
तासु षोड़शधात्मानं प्रविभज्य पृथक् पृथक् ।
आत्मानं व्यदधात्तासु धिष्णीष्वथ बभूव सः ॥ १५ ॥
धिष्ण्यो दिव्यभिचारिण्यस्तासूत्पन्नास्तु धिष्णयः ।
धिष्णीषु यज्ञिरे यस्माद्धिष्णयस्तेन कीर्त्तिताः ॥ १६ ॥
इत्येते वै नदीपुत्रा धिष्णीष्वेव विजज्ञिरे ।
तेषां विहरणोया ये उपस्थेयाश्च येऽग्नयः ।
तान् शृणुध्वं समासेन कीर्त्तमानान् यथा तथा ॥ १७ ॥
ऋतुः प्रवाहणोऽग्नीध्रः पुरस्ताद्धिष्णयोऽपरे ।
विधीयन्ते यथास्थानं सौत्येऽह्नि सवनक्रमात् ॥ १८ ॥

१ यथेति ङ० ।

अनिर्देश्यान्यवाच्यानामग्नीनां शृणुत क्रमं ।
सम्राड़ग्निः क्रियार्नुयो द्वितीयोत्तरवेदिकः ॥ १९ ॥
सम्राड़ग्निः स्मृता ह्यष्टौ उपतिष्ठन्ति तान् द्विजाः ।
अधस्तात्यर्षदन्यस्तु द्वितीयः सोऽत्र दृश्यते ॥ २० ॥
प्रतहोचे नभो नाम चत्वारि स विभाव्यते ।
ब्रह्मज्योतिर्वसुर्नाम ब्रह्मस्थाने स उच्यते ॥ २१ ॥
हव्यसूर्य्याद्यसंसृष्टः शमित्रे स विभाव्यते ।
विश्वस्याथ समुद्रोग्निर्ब्रह्मस्थाने स कीर्त्यते ॥ २२ ॥
ऋतुधामा च सुज्योतिरौदुम्बर्य्यां स कीर्त्यते ।
ब्रह्मज्योतिर्वसुर्नाम ब्रह्मस्थाने स उच्यते ॥ २३ ॥
अजैकपादुपस्थेयः स वै शालामुखीयकः ।
अनुद्देश्योप्यहिबुध्नः(१) सोऽग्निर्गृहपतिः स्मृतः ॥ २४ ॥
शंस्यस्यैव सुताः सर्व्वे उपस्थेया द्विजैः स्मृताः ।
ततो विहरणीयांश्च वक्ष्याम्यष्टौ तु तत्सुतान् ॥ २५ ॥
क्रतुप्रवाहनोऽग्नीध्रस्तत्रस्था धिष्णयोऽपरे ।
विक्रियन्ते यथास्थानं सौम्यैऽङ्गि सवनक्रमात् ॥ २६ ॥
पौत्रेयस्तु ततो ह्यग्निः स्मृतो यो हव्यवाहनः ।
शान्तिश्चाग्निः प्रचेतास्तु द्वितीयः सत्य उच्यते(२) ॥ २७ ॥
तथाग्निर्विश्वदेवस्तु ब्रह्मस्थाने स उच्यते ।
अवत्तुरच्छावाकस्तु भुवः स्थाने विभाव्यते ॥ २८ ॥
उशीराग्निः सवीर्यस्तु नैष्ठीयः संविभाव्यते ।

१ अनिर्देश्योप्यहिबुध्न इति ख० ।
२ साम्य उच्यत इति ख० । शंस्य उच्यत इति ङ० ।



अष्टमस्तु व्यरत्तिस्तु मार्जालीयः प्रकीर्तितः ॥ २९ ॥
धिष्णया विहरणीया ये सौम्येनान्येन चैव हि ।
तयोर्यः पावको नाम स चापां गर्भ उच्यते ॥ ३० ॥
अग्निः सोऽवभृथो ज्ञेयः सम्यक् प्राप्याप्सु हूयते ।
हृच्छयस्तत्सुतो ह्यग्निर्जठरे यो नृणां स्थितः ॥ ३१ ॥
मन्युमान् जाठरस्याग्नेर्विद्वानग्निः सुतः स्मृतः ।
परस्परोच्छ्रितः सोऽग्निर्भूतानां ह विभुर्महान् ॥ ३२ ॥
पुत्रः सोऽग्नेर्मन्युमतो घोरः संवर्त्तकः स्मृतः ।
पिबन्नपः स वसति समुद्रे वड़वामुखः ॥ ३३ ॥
समुद्रवासिनः पुत्रः सहरक्षो विभाव्यते ।
सहरक्षसुतः क्षामो गृहाणि स दहेन्नृणां ॥ ३४ ॥
क्रव्यादोऽग्निः सुतस्तस्य पुरुषानत्ति यो मृतान् ।
इत्येते पावकस्याग्नेः पुत्रा ह्येवं प्रकीर्त्तिताः ॥ ३५ ॥
ततः शुचेस्तु यैः सौरैर्गन्धर्वैरसुराहृतैः ।
मथितो यस्त्वरण्यां वै सोऽग्निरग्निः समिध्यते ॥ ३६ ॥
आयुर्नामाथ भगवान् पशौ यस्तु प्रणीयते ।
आयुषो महिमान् पुत्रः सप्तावान्नामतः सुतः(१) ॥ ३७ ॥
पाकयज्ञेष्वभिमानी सोऽग्निस्तु सवनः स्मृतः ।
पुत्रश्च सवनस्याग्नेरद्भुतः स महायशाः ॥ ३८ ॥
विविचिस्त्वद्भुतस्यापि पुत्रोऽग्नेः स महान् स्मृतः ।
प्रायश्चित्तेऽथ भीमानां हुतं भुङ्क्ते हविः सदा ॥ ३९ ॥

१ स समन्नात्तनः श्रुत इति ख० ।

विविचेस्तु सुतो ह्यर्को योऽग्निस्तस्य सुतास्त्विमे।
अनीकवान् वासृजवांश्च रत्नोहा पिटलक्तथा।
सुरभिर्वसुरत्नादो प्रविष्टो यश्च रुक्मवान्॥ ४०॥
शुचेरग्नेः प्रजा ह्येषा वङ्क्ष्यस्तु चतुर्दश।
इत्येते वङ्क्ष्यः प्रोक्ताः प्रणीयन्तेऽध्वरेषु ये॥ ४१॥
आदिसर्गे ह्यतीता वै यामैः सह सुरोत्तमैः।
स्वायम्भुवेऽन्तरे पूर्वमग्नयस्तेऽभिमानिनः॥ ४२॥
एते विहरणीयास्तु चेतनाचेतनेष्विह।
स्थानाभिमानिनो लोके प्रागासन् हव्यवाहनाः॥ ४३॥
काम्यनैमित्तिकाजस्रेष्वेते कर्मस्ववस्थिताः।
पूर्वमन्वन्तरेऽतीते शुक्रैर्यामैः सुतैः सह।
देवैर्महात्मभिः पुण्यैः प्रथमस्यान्तरे मनोः॥ ४४॥
इत्येतानि मयोक्तानि स्थानानि स्थानिनश्च ह।
तैरेव तु प्रसंख्यातमतीतानागतेष्वपि॥ ४५॥
मन्वन्तरेषु सर्वेषु लक्षणं जातवेदसां।
सर्वे तपस्विनो ह्येते सर्वे ह्यवभृथास्तथा।
प्रजानां पतयः सर्वे ज्योतिष्मन्तश्च ते स्मृताः॥ ४६॥
स्वारोचिषादिषु ज्ञेयाः सावर्ण्यन्तेषु सप्तसु।
मन्वन्तरेषु सर्वेषु नानारूपप्रयोजनैः॥ ४७॥
वर्त्तन्ते वर्त्तमानैश्च देवैरिह सहाग्नयः।
अनागतैः सुरैः सार्द्धं वर्त्तन्तेऽनागताग्नयः॥ ४८॥



इत्येष विनयोऽग्नीनां मया प्रोक्तो यथातथं।
विस्तरेणानुपूर्व्या च पितॄणां वक्ष्यते ततः॥ ४९॥

इति श्रीमहापुराणे वायुप्रोक्ते अग्निवंशवर्णनं
नामोनत्रिंशोऽध्यायः।

# अथ त्रिंशोऽध्यायः।

———000———

## दक्षशापवर्णनं।

सूत उवाच। ब्रह्मणः सृजतः पुत्रान् पूर्वं स्वायम्भुवेऽन्तरे।
अभ्रांसि जज्ञिरे तानि मनुष्यासुरदेवताः॥ १॥
पिप्टवन्म्लन्यमानस्य जज्ञिरे पितरोऽस्य वै।
तेषान्निसर्गः प्रागुक्तो विस्तरस्तस्य वक्ष्यते॥ २॥
देवासुरमनुष्याणां दृष्ट्वा देवोऽभ्यभाषत।
पिप्टवन्म्लन्यमानस्य जज्ञिरे वोपयच्चिताः॥ ३॥
मध्वादयः षड्ऋतवस्तान् पितॄन् परिचक्षते।
ऋतवः पितरो देवा इत्येषा वैदिकी श्रुतिः(१)॥ ४॥
मन्वन्तरेषु सर्वेषु ह्यतीतानागतेष्वपि।
ऐते स्वायम्भुवे पूर्वमुत्पन्ना ह्यन्तरे शुभे॥ ५॥
अग्निष्वात्ताः स्मृता नाम्ना तथा वर्हिषदश्च वै।
अयज्वानस्तथातेषामासन् वै गृहमेधिनः।
अग्निष्वात्ताः स्मृतास्ते वै पितरोऽनाहिताग्नयः॥ ६॥
यज्वानस्तेषु ये ह्यासन् पितरः सोमपीथिनः।
स्मृता वर्हिषदस्ते वै पितरस्त्वग्निहोत्रिणः।
ऋतवः पितरो देवाः शास्त्रेऽस्मिन्निश्चयो मतः॥ ७॥

१ स्मृतिरिति क०, घ० च।



मधुमाधवौ रसौ ज्ञेयौ शुचिशुक्रौ तु शुक्मिणौ।
नभश्चैव नभस्यश्च जीवावेतावुदाहृतौ॥ ८॥
इषश्चैव तथोर्जश्च सुधावन्तावुदाहृतौ।
सहश्चैव सहस्यश्च मन्युमन्तौ तु तौ स्मृतौ।
तपश्चैव तपस्यश्च घोरावेतौ तु शैशिरौ॥ ९॥
कालावस्थास्तु षट् तेषाम्मासाख्या वै व्यवस्थिताः।
त इमे ऋतवः प्रोक्तास्ते तनाचेतनास्तु वै॥ १०॥
ऋतवो ब्रह्मणः पुत्रा विज्ञेयास्तेऽभिमानिनः।
मासार्द्धमासस्थानेषु स्थानञ्च ऋतवोर्त्तवाः(१)॥ ११॥
स्थानानां व्यतिरेकेण ज्ञेयाः स्थानाभिमानिनः।
अहोरात्रञ्च मासाश्च ऋतवश्चायनानि च॥ १२॥
संवत्सराश्च स्थानानि कालावस्थाभिमानिनः।
निमेषाश्च कलाः काष्ठा मुहूर्त्ता वै दिनक्षपाः॥ १३॥
एतेषु स्थानिनो ये तु कालावस्थास्ववस्थिताः।
तन्मयत्वात्तदात्मानस्तान् वक्ष्यामि निबोधत॥ १४॥
पर्व्वण्यास्तिथयः सन्ध्या पञ्च मासार्द्धसंज्ञिताः।
द्वावर्द्धमासौ मासस्तु द्वौ मासावृतुरुच्यते॥ १५॥
ऋतुत्रयञ्चाप्ययनं देऽयने दक्षिणोत्तरे।
संवत्सरः समेकस्तु स्थानान्येतानि स्थानिनां॥ १६॥
ऋतवः सुमेकपुत्रा विज्ञेया ह्यष्टधा तु षट्।
ऋतुपुत्राः स्मृताः पञ्च प्रजास्वार्त्तवलक्षणाः॥ १७॥

१ अर्त्तवा इत्यर्थं प्रयोग आर्षः।

यस्माच्चैवार्त्तवेयास्तु जायन्ते स्थाणुजङ्गमाः।
आर्त्तवाः पितरश्चैव ऋतवश्च पितामहाः॥ १८॥
सुमेकात्तु प्रसूयन्ते म्रियन्ते च प्रजातयः।
तस्मात् स्मृतः प्राजानां वै सुमेकः प्रपितामहः॥ १९॥
स्थानेषु स्थानिनो ह्येते स्थानात्मानः प्रकीर्त्तिताः।
तदाख्यास्तन्मयत्वाच्च तदात्मानश्च ते स्मृताः॥ २०॥
प्रजापतिः स्मृतो यस्तु, स तु संवत्सरो मतः।
संवत्सरः स्मृतो ह्यग्निः ऋतमित्युच्यते द्विजैः॥ २१॥
ऋतात्तु ऋतवो यस्मात् जज्ञिरे ऋतवस्ततः।
मासाः षट् ऋतवो ज्ञेयास्तेषां पञ्चार्त्तवाः सुताः॥ २२॥
द्विपदाश्चतुष्पदाश्चैव पक्षिसंसर्पतामपि।
स्थावराणाञ्च पञ्चानां पुष्पं कालार्त्तवं स्मृतं॥ २३॥
ऋतुत्वमार्त्तवत्वञ्च पितृत्वञ्च प्रकीर्त्तितं।
इत्येते पितरो ज्ञेया ऋतवश्चार्त्तवाश्च ये॥ २४॥
सर्व्वभूतानि तेभ्योऽथ ऋतुकालाद्विजज्ञिरे।
तस्मादेतेऽपि पितर आर्त्तवा इति नः श्रुतं॥ २५॥
मन्वन्तरेषु सर्व्वेषु स्थिताः कालाभिमानिनः।
स्थानाभिमानिनो ह्येते तिष्ठन्तीह प्रसंयमात्॥ २६॥
अग्निष्वात्ता वर्हिषदः पितरो द्विविधाः स्मृताः।
जज्ञाते च पितृभ्यस्तु द्वे कन्ये लोकविश्रुते॥ २७॥
मेना च धारिणी चैव याभ्यां विश्वमिदं धृतं।
पितरस्ते निजे कन्ये धर्म्मार्थं प्रददुः शुभे।
त उभे ब्रह्मवादिन्यौ योगिन्यौ चैव ते उभे॥ २८॥



अग्निष्वात्तास्तु ये प्रोक्तास्तेषां मेना तु मानसी।
धारणी मानसी चैव कन्या वर्हिषदां स्मृता॥ २९॥
मेरोस्तु धारणीं नाम पत्न्यर्थं व्यसृजन् शुभां।
पितरस्ते वर्हिषदः स्मृता ये सोमपीथिनः॥ ३०॥
अग्निष्वात्तास्तु तां मेनां पत्नीं हिमवते ददुः।
स्मृतास्ते वै तु दौहित्रास्तद्दौहित्रान् निबोधत(१)॥ ३१॥
मेना हिमवतः पत्नी मैनाकं साऽन्वसूयत।
गङ्गा सरिद्वरा चैव पत्नी या लवणोदधेः।
मैनाकस्यानुजः क्रौञ्चः क्रौञ्चद्वीपो यतः स्मृतः॥ ३२॥
मेरोस्तु धारणी पत्नी दिव्यौषधिसमन्वितं।
मन्दरं सुषुवे पुत्रं तिस्रः कन्याश्च विश्रुताः॥ ३३॥
वेला च नियतिश्चैव तृतीया चायतिः पुनः।
धातुश्चैवायतिः पत्नी विधातुर्नियतिः स्मृता॥ ३४॥
स्वायम्भुवेऽन्तरे पूर्व्वन्त्योर्वै कीर्त्तिताः प्रजाः।
सुषुवे सागराद्वेला कन्यामेकामनिन्दितां॥ ३५॥
सावर्णिना च सामुद्री पत्नी प्राचीनवर्हिषः।
सवर्णा साथ सामुद्री दशप्राचीनवर्हिषः।
सर्व्वे प्रचेतसो नाम धनुर्वेदस्य पारगाः॥ ३६॥
तेषां स्वायम्भुवो दक्षः पुत्रत्वे जज्ञिवान् प्रभुः।
त्र्यम्बकस्याभिशापेन चाक्षुषस्यान्तरे मनोः॥ ३७॥
एतच्छ्रुत्वा ततः सूतमपृच्छञ्छ्रांशपायनः।

---

१ उपस्थिताः स्मृतास्ते वै तद्दौहित्रान् निबोधतेति ख०। उपस्थिताः स्मृतास्तत्र तद्दौहित्रान् निबोधतेति घ०।

उत्पन्नः स कथं दक्षो ह्यभिशापाद्भवस्य तु ।
चाक्षुषस्यान्वये पूर्वं तन्नः प्रब्रूहि पृच्छतां ॥ ३८ ॥
इत्युक्तः कथयामास सूतो दक्षाश्रितां कथां ।
शांशपायनमामन्त्र्य त्र्यम्बकाच्छापकारणं ॥ ३९ ॥
दक्षस्यासन् सुता ह्यष्टौ कन्या याः कीर्त्तिता मया ।
स्वेभ्यो गृहेभ्यो ह्यानाय्य ताः पिताभ्यर्चयद् गृहे ।
ततस्त्वभ्यर्चिताः सर्व्वा न्यवसंस्ताः पितुर्गृहे ॥ ४० ॥
तासां ज्येष्ठा सती नाम पत्नी या त्र्यम्बकस्य वै ।
नाजुहावात्मजां तां वै दक्षो रुद्रमभिद्विषन् ॥ ४१ ॥
अकरोत्स नतिं दक्षे न कदाचिन्महेश्वरः ।
जामाता श्वशुरे तस्मिन् स्वभावात् तेजसि स्थितः ॥ ४२ ॥
ततो ज्ञात्वा सती सर्व्वाः स्वस्रः(१) प्राप्ताः पितुर्गृहं ।
जगाम साप्यनाहूता सती तत् स्वं पितुर्गृहं ॥ ४३ ॥
ततोऽब्रवीत्सा पितरं देवी क्रोधादमर्षिता ।
यवीयसीभ्यो ज्यायसीं किन्तु पूजामिमां प्रभो ।
असम्मतामवज्ञाय कृतवानसि गर्हितां ॥ ४४ ॥
अहं ज्येष्ठा वरिष्ठा हि न त्वसत्कर्त्तुमर्हसि ।
एवमुक्तोऽब्रवीदेनां दक्षः संरक्तलोचनः ॥ ४५ ॥
त्वन्तु श्रेष्ठा वरिष्ठा च पूज्या बाला सदा मम ।
तासां ये चैव भर्त्तारस्ते मे बहुमताः सदा ॥ ४६ ॥
ब्रह्मिष्ठाश्च तपिष्ठाश्च महायोगाः सुधार्म्मिकाः ।
गुणैश्चैवाधिकाः श्लाघ्याः सर्व्वे ते त्र्यम्बकात्सति ॥ ४७ ॥

१ स्वस्रादित्ययं प्रयोग आर्षः ।



वसिष्ठोऽत्रिः पुलस्त्यश्च अङ्गिराः पुलहः क्रतुः ।
भृगुर्मरीचिश्च तथा श्रेष्ठा जामातरो मम ॥ ४८ ॥
तस्यात्मा स च ते शर्व्वो भक्ता चासि हितं सदा ।
तेन त्वां न बुभूषामि प्रतिकूलो हि मे भवः ॥ ४९ ॥
इत्युवाच तदा दक्षः संप्रमूढेन चेतसा ।
शापार्थमात्मनश्चैव ये चोक्ताः परमर्षयः ॥ ५० ॥
तथोक्ता पितरं सा वै क्रुद्धा देवीदमब्रवीत् ।
वाङ्मनःकर्म्मभिर्य्यस्मादद्दुष्टां मां विगर्हसे ।
तस्मात्त्यजाम्यहन्देहमिदन्तात तवात्मजं ॥ ५१ ॥
ततस्तेनावमानेन सती दुःखादमर्षिता ।
अब्रवीद्वचनं देवी नमस्कृत्वा महेश्वरं ॥ ५२ ॥
यत्राहमुपपत्स्येहं पुनर्देहेन भास्वता ।
तत्राप्यहमसंमूढा सम्भूता धार्म्मिकी पुनः ।
गच्छेयं धर्म्मपत्नीत्वं त्र्यम्बकस्यैव धर्म्मतः ॥ ५३ ॥
तत्रैवाथ समासीना युक्तात्मानं समादधे ।
धारयामास चाग्नेयीं धारणां मनसात्मनः ॥ ५४ ॥
तत आग्नेयीसमुत्थेन वायुना समुदीरितः ।
सर्व्वाङ्गेभ्यो विनिःसृत्य वह्निर्भस्म चकार तां ॥ ५५ ॥
तदुपश्रुत्य निधनं सत्या देवोऽथ शूलभृक्(१) ।
संवादञ्च तयोर्बुद्ध्वा याथातथ्येन शङ्करः ।
दक्षस्याथ ऋषीणाञ्च चुकोप भगवान् प्रभुः ॥ ५६ ॥

१ शूलभृदिति घ०, ङ० च ।

यस्मादवमता दक्ष मत्कृते नाम सा सती ।
प्रशस्ताश्चेतराः सर्व्वाः स्वसुताः(१) भर्त्तृभिः सह ॥ ५७ ॥
तस्माद्दैवस्वतं प्राप्य पुनरेव महर्षयः ।
उत्पत्स्यन्ते दितीये वै मम यज्ञे ह्ययोनिजाः ॥ ५८ ॥
हुते वै ब्रह्मणा शुक्ले चाक्षुषस्यान्तरे मनोः ।
अभिव्याहृत्य च ऋषीन् दक्षमभ्यगमत् पुनः ॥ ५९ ॥
भविता चाक्षुषो राजा चाक्षुषस्य समन्वये ।
प्राचीनवर्हिषः पौत्रः पुत्रश्चैव प्रचेतसः ॥ ६० ॥
दक्ष इत्येव नाम्ना त्वं मार्षायां जनयिष्यसि ।
कन्यायां शाखिनाश्चैव प्राप्ते वै चाक्षुषेऽन्तरे ॥ ६१ ॥

दक्ष उवाच । अहं तत्रापि ते विघ्नमाचरिष्यामि दुर्म्मते ।
धर्म्मार्थकामयुक्तेषु कर्म्मस्विह पुनः पुनः ॥ ६२ ॥
यस्मात् त्वं मत्कृते क्रूरमृषीन् व्याहृतवानसि ।
तस्मात्सार्द्धं सुरैर्यज्ञे न त्वां यक्ष्यन्ति वै द्विजाः ॥ ६३ ॥
हुत्वाहुतिं ततः क्रूर अपस्यक्ष्यन्ति(२) कर्म्मसु ।
इहैव वत्स्यसि तथा दिवं हित्वा युगक्षयात् ॥ ६४ ॥

रुद्र उवाच । सर्वेषामेव लोकानां भूर्लोकस्त्वादिरुच्यते ।
तमहं धारयिष्यामि निदेशात् परमेष्ठिनः ॥ ६५ ॥
अस्याङ्क्षितौ हृताः(३)लोकाः सर्व्वे तिष्ठन्ति भास्कराः(४)।
तानहं धारयामीह सततं न तवाज्ञया ॥ ६६ ॥
चातुर्व्वर्ण्यं हि देवानां ते चाप्येकत्र भुञ्जते ।

१ स्वसार इति घ० । ३ धृता इति ङ० ।
२ आपः प्रक्ष्यन्तीति ख०, ङ० च । ४ भास्करा इति ख० ।



नाहं तैः सह भोक्ष्यामि ततो दास्यन्ति ते पृथक् ।
ततो देवैः स तैः सार्द्धं नेष्यते पृथगिज्यते ॥ ६७ ॥
ततोऽभिव्याहृतो दक्षो रुद्रेणामिततेजसा ।
स्वायम्भुवेऽन्तरे त्यक्त्वा उत्पन्नो मानुषेष्विह ॥ ६८ ॥
ज्ञात्वा गृहपतिं दक्षं ज्ञानानामीश्वरं प्रभुं ।
दक्षो नाम महायज्ञैः सोऽयजद्दैवतैः सह ॥ ६९ ॥
अथ देवी सती या तु प्राप्ते वैवस्वतेऽन्तरे ।
मेनायां तामुमां देवीं जनयामास शैलराट् ॥ ७० ॥
सा तु देवी सती पूर्व्वं ततः पश्चादुमाऽभवत् ।
सहव्रता भवस्यैषा न तया मुच्यते भवः ।
यावदिच्छति संस्थातुं प्रभुर्मन्वन्तरेष्विह ॥ ७१ ॥
मारीचं कश्यपं देवी यथा दितिरनुव्रता ।
साध्यं नारायणं श्रीस्तु मघवन्तं शची यथा ॥ ७२ ॥
विष्णुं कीर्त्तिः रुचिः सूर्य्यं वशिष्ठञ्चाप्यरुन्धती
नैतास्तु विजहत्यैतान् भर्तॄन् देव्यः कथञ्चन ।
आवर्त्तमानकल्पेषु पुनर्जायन्ति तैः सह ॥ ७३ ॥
एवं प्राचेतसो दक्षो जज्ञे वै चाक्षुषेऽन्तरे ।
प्राचीनवर्हिषः पौत्रः पुत्रश्चैव प्रचेतसः ॥ ७४ ॥
दशभ्यस्तु प्रचेतोभ्यो मार्षायाञ्च पुनर्नृपः ।
जज्ञे रुद्राभिशापेन द्वितीयेऽस्मिन्नतिद्युतः ॥ ७५ ॥
भृग्वाद्यस्तु ते सर्वे जज्ञिरे वै महर्षयः ।
आद्ये त्रेतायुगे पूर्वं मनोर्वैवस्वतस्य ह ।
देवस्य महतो यज्ञे वारुणीं विभ्रतस्तनुं ॥ ७६ ॥

इति सानुशयोऽभ्यासीत्तयोर्जात्यन्तरागतः।
प्रजापतेस्तु दक्षस्य त्र्यम्बकस्य च धीमतः ॥ ७७ ॥
तस्मान्नानुशयः कार्य्यो वैरिण्यिह कदाचन।
जात्यन्तरगतस्यापि भावितस्य शुभाशुभैः।
जन्तुं न मुञ्चति ख्यातिस्तत्र कार्य्यं विजानता ॥ ७८ ॥

ऋषय ऊचुः। प्राचेतसस्य दक्षस्य कथं वैवस्वतेऽन्तरे।
विनाशमगमत् सूत हयमेधः प्रजापतेः ॥ ७९ ॥
देव्या मृत्युं कृतं मत्वा क्रुद्धं सर्वात्मकं प्रभुं।
कथं प्रासादयद्दक्षः स यज्ञः साधितः कथं।
एतद्वेदितुमिच्छामस्तन्नो ब्रूहि यथातथं ॥ ८० ॥

सूत उवाच। पुरा मेरोर्द्विजश्रेष्ठाः शृङ्गं त्रैलोक्यविश्रुतं।
ज्योतिष्कं नाम सावित्रं सर्वरत्नविभूषितं ॥ ८१ ॥
अप्रमेयमनाधृष्यं सर्वलोकनमस्कृतं।
तस्मिन् (१) देवो गिरिश्रेष्ठे सर्वधातुविभूषिते।
पर्य्यङ्क इव विभ्राजन्नुपविष्टो बभूव ह ॥ ८२ ॥
शैलराजसुता चास्य नित्यं पार्श्वस्थिताऽभवत्।
आदित्याश्च महात्मानो वसवश्चामितौजसः ॥ ८३ ॥
तथैव च महात्मानावश्विनौ भिषजां वरौ।
तथा वैश्रवणो राजा गुह्यकैः परिवारितः ॥ ८४ ॥
यक्षाणामीश्वरः श्रीमान् कैलासनिलयः प्रभुः।
उपासते महात्मानं उशनाश्च महामुनिः।
सनत्कुमारप्रमुखास्ते चैव परमर्षयः ॥ ८५ ॥

१ तत्रेति घ०।



अङ्गिरःप्रमुखाश्चैव तथा देवर्षयोऽपरे।
विश्वावसुश्च गन्धर्वस्तथा नारदपर्वतौ ॥ ८६ ॥
अप्सरोगणसङ्घाश्च समाजग्मुरनेकशः।
ववौ शिवः सुखो वायुर्नानागन्धवहः शुचिः ॥ ८७ ॥
सर्वर्त्तुकुसुमोपेताः पुष्पवन्तो द्रुमास्तथा।
तथा विद्याधराश्चैव सिद्धाश्चैव तपोधनाः ॥ ८८ ॥
महादेवं पशुपतिं पर्य्युपासन्ति तत्र वै।
भूतानि च तथान्यानि नानारूपधराण्यथ ॥ ८९ ॥
राक्षसाश्च महारौद्राः पिशाचाश्च महाबलाः।
बहुरूपधरा हृष्टा नानाप्रहरणोद्यताः ॥ ९० ॥
देवस्यानुचरास्तत्र तस्थुर्वैश्वानरोपमाः।
नन्दीश्वरश्च भगवान् देवस्यानुमते स्थितः ॥ ९१ ॥
प्रगृह्य ज्वलितं शूलं दीप्यमानं स्वतेजसा।
गङ्गा च सरितां श्रेष्ठा सर्वतीर्थजलोद्भवा।
पर्य्युपासत तन्देवरूपिणी द्विजसत्तमाः ॥ ९२ ॥
एवं स भगवांस्तत्र दीप्यमानः सुरर्षिभिः।
देवैश्च सुमहाभागैर्महादेवो व्यवस्थितः ॥ ९३ ॥
पुरा हिमवतः पृष्ठे दक्षो वै यज्ञमारभत्।
गङ्गाद्वारे शुभे देशे ऋषिसिद्धनिषेविते ॥ ९४ ॥
ततस्तस्य मखे देवाः शतक्रतुपुरोगमाः।
गमनाय समागम्य बुद्धिमापेदिरे तदा ॥ ९५ ॥
स्वैर्विमानैर्महात्मानो ज्वलद्भिर्ज्वलनप्रभाः।
देवस्यानुमतेऽगच्छन् गङ्गाद्वार इति श्रुतिः ॥ ९६ ॥

गन्धर्वाप्सरसाकीर्णं नानाद्रुमलताव्रतं ।
ऋषिसङ्घैः परिवृतं दक्षं धर्म्मभृतां वरं ॥ ९७ ॥
पृथिव्यामन्तरीक्षे वा ये च स्वर्लोकवासिनः ।
सर्वे प्राञ्जलयो भूत्वा उपतस्थुः प्रजापतिं ॥ ९८ ॥
आदित्या वसवो रुद्राः साध्याः सह मरुद्गणैः ।
जिष्णुना सहिताः सर्वे आगता यज्ञभागिनः ॥ ९९ ॥
उष्मपाः सोमपाश्चैव आज्यपा धूमपास्तथा ।
अग्निनी पितरश्चैव आगता ब्रह्मणा सह ॥ १०० ॥
एते चान्ये च बहवो भूतग्रामास्तथैव च ।
जरायुजाण्डजाश्चैव स्वेदजोद्भिज्जकास्तथा ॥ १०१ ॥
आहूता मन्त्रतः सर्वे देवाश्च सह पत्निभिः (१) ।
विराजन्ते विमानस्था दीप्यमाना इवाग्नयः ॥ १०२ ॥
तान् दृष्ट्वा मन्युमाविष्टो दधीचो वाक्यमब्रवीत् ।
अपूज्यपूजने चैव पूज्यानां चाप्यपूजने ।
नरः पापमवाप्नोति महद्वै नात्र संशयः ॥ १०३ ॥
एवमुक्त्वा तु विप्रर्षिः पुनर्दक्षमभाषत ।
पूज्यन्तु पशुभर्त्तारं कस्मान्नाद्रियसे प्रभुं ॥ १०४ ॥

दक्ष उवाच । सन्ति मे बहवो रुद्राः शूलहस्ताः कपर्दिनः ।
एकादशावस्थगता नान्यं वेद्मि महेश्वरं ॥ १०५ ॥

दधीच उवाच । सर्वे निमन्त्रिता देवा येन ईशो निमन्त्रितः ।
यथाहं शङ्करादूर्द्धं नान्यं पश्यामि देवतं ।
तथा दक्षस्य विपुलो यज्ञोऽयं न भविष्यति ॥ १०६ ॥

१ प्रयोगोयमार्षः ।



दक्ष उवाच । एतन्मखे शूर सुवर्णपात्रे
हविः समस्तं विधिमन्त्रपूतं ।
विष्णोर्नयाम्यप्रतिमस्य सर्वं
प्रभोर्विभो ह्याहवनीय नित्यं ॥ १०७ ॥
गतास्तु देवता ज्ञात्वा शैलराजसुता तदा ।
उवाच वचनं साध्वी देवं पशुपतिं तदा(१) ॥ १०८ ॥

उमा उवाच । भगवन् क्व गता ह्येते देवाः शक्रपुरोगमाः ।
ब्रूहि तत्त्वेन तत्त्वज्ञ संशयो मे महानयं ॥ १०९ ॥

महेश्वर उवाच । दक्षो नाम महाभागो प्रजानां पतिरुत्तमः ।
हयमेधेन यजते तत्र यान्ति दिवौकसः ॥ ११० ॥

देव्युवाच । यज्ञमेतं महाभाग किमर्थं न गतोऽसि वै ।
केन वा प्रतिषेधेन गमनं प्रतिषिध्यते ॥ १११ ॥

महेश्वर उवाच । सुरैरेव महाभागे सर्व्वमेतदनुष्ठितं ।
यज्ञेषु मम सर्व्वेषु न भाग उपकल्पितः ॥ ११२ ॥
पूर्व्वोपायोपपन्नेन मार्गेण वरवर्णिनि ।
न मे सुराः प्रयच्छन्ति भागं यज्ञस्य धीमतः ॥ ११३ ॥

देव्युवाच । भगवन् सर्वदेवेषु प्रभावानधिको गुणैः ।
अजेयश्चाप्यधृष्यश्च तेजसा यशसा श्रिया ॥ ११४ ॥
अनेन तु महाभाग प्रतिषेधेन नामतः ।
अतीव दुःखमापन्ना वेपथुश्च ममानघ ॥ ११५ ॥
किं नाम दानं नियमन्तपो वा
कुर्य्यामहं येन पतिर्म्ममाद्य ।

१ पतिमिति घ० ।

लभेत भागं भगवानचिन्त्यो
यज्ञस्य चार्द्धमथ वा तृतीयं ॥ ११६ ॥
एवं ब्रुवाणां भगवानचिन्त्यः
पत्नीं प्रहृष्टः क्षुभितामुवाच ।
न वेत्सि देवेशि क्षयोदराङ्गि
किं नाम युक्तं वचनन्तवेदं ॥ ११७ ॥
अहं हि जानामि विशालनेत्रे
ध्यानेन सर्व्वं हि वदन्ति सन्तः ।
न वाद्य मोहेन महेन्द्रदेवो
लोकत्रयं सर्व्वथा संप्रमूढ़ं ॥ ११८ ॥
मामध्वरे शंसितारः स्तुवन्ति
रथन्तरे साम गायन्ति गेयं ।
मा ब्राह्मणा ब्रह्मसत्रे यजन्ते
माध्वर्य्यवः कल्पयन्ते च भागं ॥ ११९ ॥

देव्युवाच । अप्राकृतोऽपि भगवान् सर्व्वस्त्रीजनसंसदि ।
स्तौति गोपायते(१) वापि स्वमात्मानं न संशयः ॥ १२० ॥

भगवानुवाच । नात्मानं स्तौमि देवेशि पश्य त्वमुपगच्छ च ।
यं स्तुत्यामि वरारोहे भागार्थं वरवर्णिनि ॥ १२१ ॥
एवमुक्ता तु भगवान् पत्नीं प्राणैरपि प्रियां ।
सोऽसृजद्भगवान्वक्त्राद्भूतं क्रोधाग्निसन्निभं ॥ १२२ ॥
सहस्रशीर्षं देवञ्च सहस्रचरणेक्षणं ।
सहस्रमुद्गरधरं सहस्रशरपाणिनं ॥ १२३ ॥

१ गोपयत इति ख०, घ० च।



शङ्खचक्रगदापाणिं दीप्तकार्मुकधारिणं ।
परश्वसिधरं देवं महारौद्रं भयावहं ॥ १२४ ॥
घोररूपेण दीप्यन्तं चन्द्रार्द्धकृतभूषणं ।
वसानं चर्म्म वैयाघ्रं महारुधिरनिस्रवं ॥ १२५ ॥
दंष्ट्राकरालं विभ्रान्तं महावक्त्रं महोदरं ।
विद्युज्जिह्वं प्रलम्बोष्ठं लम्बकर्णं(१) दुरासदं ॥ १२६ ॥
कुलिशोद्योतितकरभ्राभिर्ज्वलितमूर्द्धजं ।
ज्वालामालापरिक्षिप्तं मुक्तादामविभूषितं ॥ १२७ ॥
तेजसा चैव दीप्यन्तं युगान्तमिव पावकं ।
आकर्णदारितास्यान्तञ्चतुर्दिक्षु भयानकं(२) ॥ १२८ ॥
महाबलं महातेजं महापुरुषमीश्वरं ।
विश्वहर्त्तमहाकायं महान्यग्रोधमण्डलं ।
युगपच्चन्द्रशतवद्दीप्यन्तं मन्मथाग्निवत् ॥ १२९ ॥
चतुर्महास्यं सिततीक्ष्णदंष्ट्रं
महोग्रतेजोबलकौतुकाढ्यं ।
युगान्तसूर्य्याग्निसहस्रभासं
सहस्रचन्द्रामलकान्तिकान्तं ।
प्रदीप्तसर्व्वौषधिमन्दराभं
सुमेरुकैलासहिमाद्रितुल्यं ॥ १३० ॥
युगार्कभं महावीर्य्यञ्चारुनासं महाननं ।

१ लम्बकर्णमिति घ०, ङ० च।
२ चतुर्दंष्ट्रं भयानकमिति घ०, ङ० च।

प्रचण्डगण्डं दीप्ताक्षं(१) अग्निज्वालाविलाननं(२)॥१२१॥
मृगेन्द्रकृत्तिवसनं महाभुजगवेष्टितं ।
उष्णीषिणं चन्द्रधरं क्वचिदुग्रं क्वचित्समं ॥ १२२ ॥
नानाकुसुममूर्द्धानं नानागन्धानुलेपनं ।
नानारत्नविचित्राङ्गं नानाभरणभूषितं ॥ १२३ ॥
कर्णिकारस्रजं दीप्तं क्रोधादुद्भ्रान्तलोचनं ।
क्वचिन्नृत्यति चित्राङ्गं क्वचिद्वदति सुस्वरं(३)॥ १२४ ॥
क्वचिद्गायति युक्तात्मा क्वचित्स्थूलं प्रमार्जति ।
क्वचिद्गायति विख्यात्मा क्वचिद्रौति मुहुर्मुहुः ॥ १२५ ॥
ज्ञानं वैराग्यमैश्वर्य्यन्तपः सत्यं क्षमा धृतिः ।
प्रभुत्वमात्मसम्बोधो ह्यधिष्ठानगुणैर्युतः ॥ १२६ ॥
जानुभ्यामवनिं गत्वा प्रणतः प्राञ्जलिः स्थितः ।
आज्ञापय त्वं देवेश किं कार्य्यं करवाणि ते ॥ १२७ ॥
तमुवाचाच्छिप मखं दक्षस्येह महेश्वरः ।
देवस्यानुमतिं श्रुत्वा वीरभद्रो महाबलः ।
प्रणम्य शिरसा पादौ देवेशस्य उमापतेः ॥ १२८ ॥
ततो बन्धात् प्रमुक्तेन सिंहेनेवेह लीलया ।
देव्या मन्युकृतं मत्वा हतो दक्षस्य स क्रतुः ॥ १२९ ॥
मन्युना च महाभीमा भद्रकाली महेश्वरी ।
आत्मनः सर्वसाच्चित्वे तेन सार्द्धं सहानुगा ॥ १३० ॥

१ प्रचण्डमतिदीप्ताक्षमिति क० ।
२ ऽग्निज्वालाविलासिनमिति क० ।
३ सुखनमिति घ० ।



स एष भगवान् क्रुद्धः प्रेतावासकृतालयः ।
वीरभद्र इतिख्यातो देव्या मन्युप्रमार्जकः ॥ १४१ ॥
सोऽसृजद्रोमकूपेभ्यो रौद्रान्नाम गणेश्वरान् ।
रुद्रानुगा महावीर्य्या रुद्रवीर्य्यपराक्रमाः ॥ १४२ ॥
रुद्रस्यानुचराः सर्व्वे सर्व्वे रुद्रसमप्रभाः ।
ते निपेतुस्ततस्तूर्णं शतशोऽथ सहस्रशः ॥ १४३ ॥
ततः किलकिला शब्द आकाशं पूरयन्निव ।
तेन शब्देन महता त्रस्ताः सर्व्वे दिवौकसः ॥ १४४ ॥
पर्वताश्च व्यशीर्य्यन्त कम्पते च वसुन्धरा ।
मेरुश्च घूर्णते विप्राः क्षुभ्यन्ते वरुणालयाः ॥ १४५ ॥
अग्नयो नैव दीप्यन्ते न च दीप्यति भास्करः ।
ग्रहा नैव प्रकाशन्ते नक्षत्राणि न तारकाः ॥ १४६ ॥
ऋषयो नाभ्यभाषन्त न देवा न च दानवाः ।
एवं हि तिमिरीभूतं निर्हृह्रन्ति विमानिताः ॥ १४७ ॥
सिंहनादं प्रमुञ्चन्ते घोररूपा महाबलाः ।
प्रभञ्जन्ते परे घोरा यूपानुत्पाटयन्ति च ॥ १४८ ॥
प्रमर्द्दन्ति तथा चान्ये विनृत्यन्ति तथाऽपरे ।
आधावन्ति प्रधावन्ति वायुवेगा मनोजवाः ॥ १४९ ॥
चूर्णन्ते यज्ञपात्राणि यागस्यायतनानि च ।
शीर्य्यमाणानि दृश्यन्ते तारा इव नभस्तलात् ॥ १५० ॥
दिव्यान्नपानभक्षाणां राशयः पर्वतोपमाः ।
क्षीरनद्यस्तथा चान्या घृतपायसकर्दमाः ।
मधुमण्डोदका दिव्याः खण्डशर्करवालुकाः ॥ १५१ ॥

षड्साञ्चिवहन्त्यन्या गुड़कुल्या मनोरमाः।
उच्चावचानि मांसानि भक्ष्याणि विविधानि च ॥ १५२ ॥
यानि कानि च दिव्यानि लेह्यचोष्यं तथाऽपरे।
भुञ्जते विविधैर्वक्त्रैर्विलुण्ठन्ति च सर्वशः।
क्रीड़न्ति विविधाकाराश्चिच्चियुः सुरयोषितः ॥ १५३ ॥
रुद्रकोपप्रयुक्तास्तु सर्वदेवैः सुरक्षितं।
तं यज्ञमहनन् शीघ्रं रुद्रकल्याः समीपतः ॥ १५४ ॥
चक्रुरन्ये तथा नादान् सर्वभूतभयङ्करान्।
छित्त्वा शिरोऽन्ये यज्ञस्य विनदन्ति भयङ्कराः ॥ १५५ ॥
दक्षो दक्षपतिश्चैव देवो यज्ञपतिस्तथा।
मृगरूपेण चाकाशे प्रपलायितुमारभत् ॥ १५६ ॥
वीरभद्रोऽप्रमेयात्मा ज्ञात्वा तस्य बलन्तदा।
अन्तरीक्षगतस्याशु चिच्छेदास्य शिरो महान् ॥ १५७ ॥
दक्षः प्रजापतिश्चैव विनष्टः भ्रान्तचेतनः।
क्रुद्धेन वीरभद्रेण शिरः पादेन पीड़ितः।
जराभिभूततीव्रात्मा निपपात महीतले ॥ १५८ ॥
त्रयस्त्रिंशद्देवतानां ताः कोट्यो विमलात्मकाः।
पाशेनाग्निबलेनाशु बद्धाः सिंहबलेन च ॥ १५९ ॥
ततो जग्मुर्महात्मानं सर्वे देवा महाबलं।
प्रसीद भगवन् रुद्र भृत्यानां मा क्रुधः प्रभो ॥ १६० ॥
ततो ब्रह्मादयो देवा दक्षश्चैव प्रजापतिः।
ऊचुः प्राञ्जलयो भूत्वा कथ्यतां को भवानिति ॥ १६१ ॥
वीरभद्र उवाच। न च देवो न चादित्यो न च भोक्तुमिहागतः।



नैव द्रष्टुं हि देवेन्द्रान्न च कौतूहलान्वितः ॥ १६२ ॥
दक्षयज्ञविनाशार्थं सम्प्राप्तं विद्धि मामिह।
वीरभद्र इतिख्यातं रुद्रकोपाद्विनिर्गतं ॥ १६३ ॥
भद्रकाली च विज्ञेया देव्याः क्रोधाद्विनिर्गता।
प्रेषिता देवदेवेन यज्ञान्तिकमिहागता ॥ १६४ ॥
शरणं गच्छ राजेन्द्र देवन्तं त्वमुमापतिं।
वरं क्रोधोऽपि रुद्रस्य वरदानं न देवतः(१) ॥ १६५ ॥
वीरभद्रवचः श्रुत्वा दक्षो धर्ममृतां वरः।
तोषयामास देवेशं शूलपाणिं महेश्वरं ॥ १६६ ॥
प्रदुष्टे(२) यज्ञवाटे तु विद्रुतेषु द्विजातिषु।
तारामृगमये दीप्ते रौद्रे भीममहानले ॥ १६७ ॥
शूलनिर्भिन्नवदनैः कूजद्भिः परिचारकैः।
निखातोत्पाटितैर्यूपैरपविद्धैर्यतस्ततः ॥ १६८ ॥
उत्पतद्भिः पतद्भिश्च गृध्रैरामिषगृद्धुभिः।
पक्षपातविनिर्धूतैः शिवाशतनिनादितैः ॥ १६९ ॥
प्राणापानौ सन्निरुध्य ततः स्थानेन यत्नतः।
विचार्य्य सर्वतो दृष्टिं बहुदृष्टिरमित्रजित् ॥ १७० ॥
सहसा देवदेवेशः अग्निकुण्डादुपागतः।
चन्द्रसूर्य्यसहस्रस्य तेजः सम्वर्त्तकोपमं ॥ १७१ ॥
प्रहस्य चैनं भगवानिदं वचनमब्रवीत्।
नष्टस्ते ज्ञानतो दक्ष प्रीतिस्ते मयि साम्प्रतं ॥ १७२ ॥

---

१ दैवतमिति घ०।
२ प्रदीप्ते इति ख०।

स्मितं कृत्वाऽब्रवीद्दाक्ष्यं ब्रूहि किङ्करवाणि ते।
आवितञ्च समाख्याय देवानाङ्गुरुभिः सह ॥ १७३ ॥
तमुवाचाञ्जलिं कृत्वा दक्षो देवं प्रजापतिः।
भीतशङ्कितविस्रस्तः सवाष्पवदनेक्षणः ॥ १७४ ॥
यदि प्रसन्नो भगवान् यदि वाहन्तव प्रियः।
यदि वाहमनुग्राह्यो यदि देयो वरो मम ॥ १७५ ॥
यज्जग्धं भक्षितं पीतमग्नितं यच्च नाग्नितं।
चूर्णीकृतञ्चापविद्धं यज्ञसम्भारमीदृशं ॥ १७६ ॥
दीर्घकालेन महता प्रयत्नेन च सञ्चितं।
तन्न मिथ्या भवेन्मह्यं वरमेतं वृणोम्यहं ॥ १७७ ॥
तथास्त्वित्याह भगवान् भगनेत्रहरो हरः।
धर्म्माध्यक्षं महादेवं यज्ञन्तं वै प्रजापतिः ॥ १७८ ॥
जानुभ्यामवनीकृत्वा दक्षो लब्ध्वा भवाद्वरं।
नाम्नामष्टसहस्रेण स्तुतवान् वृषभध्वजं ॥ १७९ ॥

दक्ष उवाच। नमस्ते देवदेवेश देवारिबलसूदन।
देवेन्द्र ह्यमरश्रेष्ठ देवदानवपूजित ॥ १८० ॥
सहस्राक्ष विरूपाक्ष त्र्यक्ष यज्ञाधिप प्रिय।
सर्वतः पाणिपादस्त्वं(१) सर्वतोऽक्षिशिरोमुखः।
सर्वतः श्रुतिमान् लोके सर्वानावृत्य तिष्ठसि ॥ १८१ ॥
शङ्कुकर्ण महाकर्ण कुम्भकर्णार्णवालय।
गजेन्द्रकर्ण गोकर्ण पाणिकर्ण नमोऽस्तु ते ॥ १८२ ॥

१ पाणिपादान्त इति ख०।



शतोदर शतावर्त्त शतजिह्व शतानन।
गायन्ति त्वां गायत्रिणो ह्यर्चयन्ति तथार्चिनः ॥ १८३ ॥
देवदानवगोप्ता च ब्रह्मा च त्वं शतक्रतुः।
मूर्त्तीश त्वं महामूर्त्ते समुद्राम्बुधराय च ॥ १८४ ॥
सर्वा ह्यस्मिन् देवतास्ते गावो गोष्ठ इवासते।
शरीरन्ते प्रपश्यामि सोममग्निं जलेश्वरं ॥ १८५ ॥
आदित्यमथ विष्णुञ्च ब्रह्माणं सबृहस्पतिं।
क्रिया कार्य्यं कारणञ्च कर्त्ता करणमेव च ॥ १८६ ॥
असच्च सदसच्चैव तथैव प्रभवाव्ययं।
नमो भवाय शर्वाय रुद्राय वरदाय च ॥ १८७ ॥
पशूनां पतये चैव नमस्त्वन्धकघातिने।
त्रिजटाय त्रिशीर्षाय त्रिशूलवरधारिणे ॥ १८८ ॥
त्र्यम्बकाय त्रिनेत्राय त्रिपुरघ्नाय वै नमः।
नमश्चण्डाय मुण्डाय प्रचण्डाय धराय च ॥ १८९ ॥
दण्डिमासक्तकर्णाय(१) दण्डिमुण्डाय(२) वै नमः।
नमोऽर्द्धदण्डकेशाय निष्काय विकृताय च ॥ १९० ॥
विलोहिताय धूम्राय नीलग्रीवाय ते नमः।
नमस्त्वप्रतिरूपाय शिवाय च नमोऽस्तु ते ॥ १९१ ॥
सूर्य्याय सूर्य्यपतये सूर्य्यध्वजपताकिने।
नमः प्रमथनाथाय वृषस्कन्धाय धन्विने ॥ १९२ ॥
नमो हिरण्यगर्भाय हिरण्यकवचाय च।

१ पाठोऽयं न समीचीनः।
२ मुण्डिमुण्डायेति ख०।

हिरण्यकृतचूड़ाय हिरण्यपतये नमः ॥ १९३ ॥
सत्रघाताय(२) दण्डाय वर्णपानपुटाय च।
नमस्तुताय स्तुत्याय स्तूयमानाय वै नमः ॥ १९४ ॥
सर्वाद्याभक्ष्यभक्ष्याय सर्वभूतान्तरात्मने।
नमो होत्राय मन्त्राय शुक्लध्वजपताकिने ॥ १९५ ॥
नमो नमाय नम्याय नमः किलिकिलाय(२) च।
नमस्ते शयमानाय शयितायोत्थिताय च ॥ १९६ ॥
स्थिताय चलमानाय मुद्राय कुटिलाय च।
नमो नर्त्तनशीलाय मुखवादित्रकारिणे ॥ १९७ ॥
नाट्योपहारलुब्धाय गीतवाद्यरताय च।
नमो ज्येष्ठाय श्रेष्ठाय बलप्रमथनाय च ॥ १९८ ॥
कलनाय च कल्याय चयायोपचयाय च।
भीमदुन्दुभिहासाय भीमसेनप्रियाय च ॥ १९९ ॥
उग्राय च नमो नित्यं नमस्ते दशवाहवे।
नमः कपालहस्ताय चिताभस्मप्रियाय च ॥ २०० ॥
विभीषणाय भीष्माय भीष्मव्रतधराय च।
नमो विकृतवक्त्राय खड्गजिह्वाग्रदंष्ट्रिणे ॥ २०१ ॥
पक्वाममांसलुब्धाय तुम्बवीणाप्रियाय च।
नमो वृषाय वृष्याय वृषणे वृषणाय च ॥ २०२ ॥
कटङ्कटाय चण्डाय नमः सावयवाय च।
नमस्ते वरकृष्णाय वराय वरदाय च ॥ २०३ ॥

१ सद्योजातायेति ख०।
२ किल्किकिलायेति क०, घ०, ङ० च।



वरगन्धमाल्यवस्त्राय वरातिवरये नमः।
नमो वर्षाय वाताय छायायै आतपाय च ॥ २०४ ॥
नमो रक्तविरक्ताय शोभनायाक्षमालिने।
सभिन्नाय विभिन्नाय विविक्तविकटाय च ॥ २०५ ॥
अघोररूपरूपाय(१) घोरघोरतराय च।
नमः शिवाय शान्ताय नमः शान्ततराय च ॥ २०६ ॥
एकपादद्विनेत्राय एकशीर्ष नमोऽस्तु ते।
नमो वृद्धाय लुब्धाय संविभागप्रियाय च ॥ २०७ ॥
पञ्चमालाचिताङ्गाय नमः पाशुपताय च।
नमश्चण्डाय घाण्टाय घण्टया जगद्धरिष्णे ॥ २०८ ॥
सहस्रशतघण्टाय घण्टामालाप्रियाय च।
प्राणदण्डाय(२) त्यागाय नमो हिलिहिलाय च ॥ २०९ ॥
हुंहुङ्काराय पाराय हुंहुङ्कारप्रियाय च।
नमश्च शम्भवे नित्यं गिरित्रशकलाय च ॥ २१० ॥
गर्भमांसभृगालाय तारकाय तराय च।
नमो यज्ञाधिपतये द्रुतायोपद्रुताय च ॥ २११ ॥
यज्ञवाहाय दानाय(३) तप्याय तपनाय च।
नमस्तटाय भव्याय तड़ितां पतये(४) नमः ॥ २१२ ॥
अन्नदायान्नपतये नमोऽस्त्वन्नभवाय च।

१ अघोरघोररूपायेति ख०।
२ प्राणिदण्डायेति घ०, ङ० च।
३ दान्तायेति ख०।
४ दण्डिनां पतय इति ख०।

नमः सहस्रशीर्षाय सहस्रचरणाय च ॥ २१३ ॥
सहस्रोद्यतशूलाय सहस्रनयनाय च ।
नमोऽस्तु बालरूपाय बालरूपधराय च ॥ २१४ ॥
बालानाञ्चैव गोप्त्रे च बालक्रीड़नकाय च ।
नमः शुद्धाय बुद्धाय क्षोभणायाच्युताय च ॥ २१५ ॥
तरङ्गाङ्कितकेशाय मुक्तकेशाय वै नमः ।
नमः षट्कर्म्मनिष्ठाय विकर्म्मनिरताय च ॥ २१६ ॥
वर्णाश्रमाणां विधिवत् पृथक् कर्म्मप्रवर्तिने ।
नमो घोषाय घोषाय नमः कलकलाय च ॥ २१७ ॥
श्वेतपिङ्गललनेत्राय कृष्णरक्तेक्षणाय च ।
धर्म्मार्थकाममोक्षाय क्रथाय क्रथनाय च ॥ २१८ ॥
साङ्ख्याय साङ्ख्यमुख्याय योगाधिपतयेनमः ।
नमो रथ्यविरथ्याय चतुष्पथरताय च ॥ २१९ ॥
कृष्णाजिनोत्तरीयाय व्यालयज्ञोपवीतिने ।
ईशान वज्रसंहाय हरिकेश नमोऽस्तु ते ।
अविवेकैकनाथाय व्यक्ताव्यक्त नमोऽस्तु ते ॥ २२० ॥
काम कामद कामघ्न धृष्टादृष्टनिसूदनः ।
सर्व्व सर्व्वद सर्व्वज्ञ सन्न्यासराग नमोऽस्तु ते ॥ २२१ ॥
महाबाल महाबाहो महासत्व महाद्युते ।
महामेघवरप्रेक्ष महाकाल नमोऽस्तु ते ॥ २२२ ॥
स्थूलजीर्णाङ्गजटिने वल्कलाजिनधारिणे ।
दीप्तसूर्य्याग्निजटिने वल्कलाजिनवाससे ।
सहस्रसूर्य्यप्रतिम तपोनित्य नमोऽस्तु ते ॥ २२३ ॥



उन्मादनशतावर्त्त गङ्गातोयार्द्रमूर्द्धज ।
चन्द्रावर्त्त युगावर्त्त मेघावर्त्त नमोऽस्तु ते ॥ २२४ ॥
त्वमन्नमन्नकर्त्ता च अन्नदश्च त्वमेव हि ।
अन्नस्रष्टा च पक्ता च पक्वभुक्तपचे नमः ॥ २२५ ॥
जरायुजोऽण्डजश्चैव स्वेदजोद्भिज्ज एव च ।
त्वमेव देवदेवेशो भूतग्रामश्चतुर्विधः ॥ २२६ ॥
चराचरस्य ब्रह्मा (१) त्वं प्रतिहर्त्ता त्वमेव च ।
त्वमेव ब्रह्मविदुषामपि ब्रह्मविदां वरः ॥ २२७ ॥
सत्वस्य परमा योनिरब्वायुज्योतिषां निधिः ।
ऋक्सामानि तथौङ्कारमाहुस्त्वां ब्रह्मवादिनः ॥ २२८ ॥
हविर्हावी हवो हावी हुवां वाचाहुतिः सदा ।
गायन्ति त्वां सुरश्रेष्ठ सामगा ब्रह्मवादिनः ॥ २२९ ॥
जज्ञुर्म्मयो ऋङ्मयश्च सामाथर्वमयस्तथा ।
पठासे ब्रह्मविद्भिस्त्वं कल्पोपनिषदां गणैः ॥ २३० ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णावराश्च ये ।
त्वामेव मेघसङ्घाश्च विश्वस्तनितगर्ज्जितं ॥ २३१ ॥
संवत्सरस्त्वमृतवो मासा मासार्द्धमेव च ।
कलाकाष्ठानिमेषाश्च नक्षत्राणि युगा ग्रहाः ॥ २३२ ॥
वृषाणां ककुदं त्वं हि गिरीणां शिखराणि च ।
सिंहो मृगाणां पततां तार्क्ष्योऽनन्तश्च भोगिनां ॥ २३३ ॥
क्षीरोदो ह्युदधीनाञ्च यन्त्राणां धनुरेव च ।

१ ब्रह्मेति ख०।

वज्रमप्रहरणानाञ्च व्रतानां सत्यमेव च ॥ २३४ ॥
इच्छा द्वेषश्च रागश्च मोहः क्षमा दमः शमः।
व्यवसायो धृतिर्लोभः कामक्रोधौ जयाजयौ ॥ २३५ ॥
खड्गदी खं शरी चापि खट्वाङ्गी भृङ्गरी तथा(१)।
क्षेत्ता भेत्ता प्रहर्त्ता च त्वं नेताऽप्यन्तको मतः ॥ २३६ ॥
दशलक्षणसंयुक्तो धर्म्मोऽर्थः काम एव च।
इन्द्रः समुद्राः सरितः पल्वलानि सरांसि च ॥ २३७ ॥
लतावल्ली तृणौषध्यः पशवो मृगपक्षिणः।
द्रव्यकर्म्मगुणारम्भः कालपुष्पफलप्रदः ॥ २३८ ॥
आदिश्चान्तश्च मध्यश्च गायत्र्योङ्कार एव च।
हरितो लोहितः कृष्णो नीलः पीतस्तथाऽरुणः ॥ २३९ ॥
कद्रुश्च कपिलश्चैव कपोतो मेचकस्तथा।
सुवर्णरेता विख्यातः सुवर्णश्चाप्यतो मतः ॥ २४० ॥
सुवर्णनामा च तथा सुवर्णप्रिय एव च।
त्वमिन्द्रोऽथ यमश्चैव वरुणो धनदोऽनलः ॥ २४१ ॥
उत्फुल्लश्चित्रभानुश्च स्वर्भानुर्भानुरेव च।
होत्रं होता च होमस्त्वं हुतश्च प्रहुतं प्रभुः ॥ २४२ ॥
सुपर्णश्च तथा ब्रह्म यजुषां शतरुद्रियं।
पवित्राणां पवित्रञ्च मङ्गलानाञ्च मङ्गलं ॥ २४३ ॥
गिरिः श्लोकस्तथा वृक्षो जीवः पुद्गल एव च।
सत्त्वं त्वञ्च रजस्त्वञ्च तमश्च प्रजनं तथा ॥ २४४ ॥

१ खट्वाङ्गवरधारक इति ख०।



प्राणोऽपानः समानश्च उदानो व्यान एव च।
उन्मेषश्चैव मेषश्च तथा जृम्भितमेव च ॥ २४५ ॥
लोहिताङ्गो गदी दंष्ट्री महावक्त्रो महोदरः।
शुचिरोमा हरित्श्मश्रुरूर्द्धकेशस्त्रिलोचनः ॥ २४६ ॥
गीतवादित्रनृत्याङ्गो गीतवादनकप्रियः।
मत्स्यो जली जलो(१) जल्पो जवः कालः कलीकलः ॥ २४७ ॥
विकालश्च सुकालश्च दुःष्कालः कलनाशनः।
मृत्युश्चैव क्षयोऽन्तश्च क्षमापायकरो हरः ॥ २४८ ॥
संवर्त्तकोऽन्तकश्चैव संवर्त्तकबलाहकौ।
घटी घटीको घण्टीको चूड़ालोलबलो वलं(२) ॥ २४९ ॥
ब्रह्मकालोऽग्निवक्त्रश्च दण्डो मुण्डो च दण्डधृक्।
चतुर्युगश्चतुर्वेदश्चतुर्होत्रश्चतुष्पथः ॥ २५० ॥
चतुराश्रमवेत्ता च चातुर्वर्ण्यकरश्च ह।
चराचरप्रियो धूर्त्तोऽगण्योऽगण्यगणाधिपः ॥ २५१ ॥
रुद्राक्षमाल्याम्बरधरो गिरिको गिरिकप्रियः।
शिल्पीशः शिल्पिनां श्रेष्ठः सर्व्वशिल्पप्रवर्त्तकः ॥ २५२ ॥
भगनेत्रान्तकश्चन्द्रः पूषणो दन्तविनाशनः।
गूढ़ावर्त्तश्च गूढ़श्च गूढ़प्रतिनिषेविता ॥ २५३ ॥
तरणस्तारकश्चैव सर्व्वभूतसुतारणः।
धाता विधाता सत्वानान्निधाता धारणो धरः ॥ २५४ ॥
तपो ब्रह्म च सत्यञ्च ब्रह्मचर्य्यमथार्जवं।

१ मत्स्यो जलो जघन्यश्चेति ख०।
२ बलीति ख०।

भूतात्मा भूतकृद्भूतो भूतभव्यभवोद्भवः ॥ २५५ ॥
भूर्भुवस्वरितश्चैव तथोत्पत्तिर्महेश्वरः।
ईशानो वीक्षणः शान्तो दुर्दान्तो दन्तनाशनः ॥ २५६ ॥
ब्रह्मावर्त्त सुरावर्त्त कामावर्त्त नमोऽस्तु ते।
कामविघ्ननिहर्त्ता च कर्णिकाररजःप्रियः ॥ २५७ ॥
मुखचन्द्रो भीममुखः सुमुखो दुर्मुखो मुखः।
चतुर्मुखो बहुमुखो रणे ह्यभिमुखः सदा ॥ २५८ ॥
हिरण्यगर्भः शकुनिर्महोदधिः परो विराट्।
अधर्महा महादण्डो दण्डधारी रणप्रियः ॥ २५९ ॥
गोतमो गोप्रतारश्च गोवृषेश्वरवाहनः।
धर्मकृद्धर्मसृष्टा च धर्म्मो धर्मविदुत्तमः ॥ २६० ॥
त्रैलोक्यगोप्ता गोविन्दो मानदो मान एव च(१)।
तिष्ठंस्थिरश्च स्थाणुश्च निष्कम्पः कम्प एव च ॥ २६१ ॥
दुर्वारणो दुर्विषदो दुःसहो दुरतिक्रमः।
दुर्द्धरो दुष्प्रकम्पश्च दुर्विदो दुर्ज्जयो जयः ॥ २६२ ॥
शशः शशाङ्कः शमनः शीतोष्णं दुर्जराऽथ हट्।
आधयो व्याधयश्चैव व्याधिहा व्याधिगश्च ह ॥ २६३ ॥
सह्यो यज्ञो मृगा व्याधो व्याधीनामाकरोऽकरः।
शिखण्डी पुण्डरीकाक्षः पुण्डरीकावलोकनः ॥ २६४ ॥
दण्डधरः सदण्डश्च दण्डमुण्डविभूषितः(२)।
विषपोऽमृतपश्चैव सुरापः क्षीरसोमपः ॥ २६५ ॥

१ त्रैलोक्यमार्गगः साङ्गो गोमार्गो मार्ग एव चेति घ०।
२ रुद्रदण्डविनाशन इति घ०, ङ० च।



मधुपश्चाज्यपश्चैव सर्व्वपश्च महाबलः।
वृषाक्षवाह्यो वृषभस्तथा वृषभलोचनः ॥ २६६ ॥
वृषभश्चैव विख्यातो लोकानां लोकसत्कृतः।
चन्द्रादित्यौ चक्षुषी ते हृदयञ्च पितामहः।
अग्निरापस्तथा देवो धर्म्मकर्म्मप्रसाधितः ॥ २६७ ॥
न ब्रह्मा न च गोविन्दः पुराण ऋषयो न च।
माहात्म्यं वेदितुं शक्ता याथातथ्येन ते शिव ॥ २६८ ॥
या मूर्त्तयः सुसूक्ष्मास्ते न मर्त्या यान्ति दर्शनं।
ताभिर्म्मां सततं रक्ष पिता पुत्रमिवौरस ॥ २६९ ॥
रक्ष मां रक्षणीयोऽहन्त्वानघ नमोऽस्तु ते।
भक्तानुकम्पी भगवान् भक्तश्चाहं सदा त्वयि(१) ॥ २७० ॥
यः सहस्राण्यनेकानि पुंसामाहृत्य दुर्ग्रहः।
तिष्ठत्येकः समुद्रान्ते स मे गोप्ताऽस्तु नित्यशः ॥ २७१ ॥
यं विनिद्रा जितश्वासाः सत्वस्थाः समदर्शिनः।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ॥ २७२ ॥
संभक्ष्य सर्व्वभूतानि युगान्ते समुपस्थिते।
यः शेते जलमध्यस्थस्तं प्रपद्येऽप्सु शायिनं ॥ २७३ ॥
प्रविश्य वदने राहोर्य्यः सोमं ग्रसते निशि।
ग्रसत्यर्कञ्च स्वर्भानुर्भूत्वा सोमाग्निरेव च ॥ २७४ ॥
येऽङ्गुष्ठमात्राः पुरुषा देहस्थाः सर्व्वदेहिनां।
रक्षन्तु ते हि मां नित्यं नित्यमाप्याययन्तु मां ॥ २७५ ॥
ये चाप्युत्पतिता गर्भादधोभागगताश्च ये।

१ प्रिय इति घ०।

तेषां स्वाहाः स्वधाश्चैव आप्नुवन्तु स्वदन्तु च ॥ २७६ ॥
ये न रादन्ति देहस्थाः प्राणिनो रोदयन्ति च।
हर्षयन्ति च हृष्यन्ति नमस्तेभ्यस्तु नित्यशः ॥ २७७ ॥
ये समुद्रे नदीदुर्गे पर्वतेषु गुहासु च।
वृक्षमूलेषु गोष्ठेषु कान्तारगहनेषु च ॥ २७८ ॥
चतुष्पथेषु रथ्यासु चत्वरेषु सभासु च।
चन्द्रार्कयोर्मध्यगता ये च चन्द्रार्करश्मिषु ॥ २७९ ॥
रसातलगता ये च ये च तस्मात्परङ्गताः।
नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्यश्च नित्यशः।
सूक्ष्माः स्थूलाः कृशा कृत्वा नमस्तेभ्यस्तु नित्यशः ॥२८०॥
सर्व्वस्त्वं सर्व्वगो देव सर्व्वभूतपतिर्भवान्।
सर्व्वभूतान्तरात्मा च तेन त्वं न निमन्त्रितः ॥ २८१ ॥
त्वमेव चेज्यसे यस्मादृग्यज्ञैर्विविधदक्षिणैः।
त्वमेव कर्त्ता सर्व्वस्य तेन त्वन्न निमन्त्रितः ॥ २८२ ॥
अथ वा मायया देव मोहितः सूक्ष्मया त्वया।
एतस्मात्कारणादापि तेन त्वन्न निमन्त्रितः ॥ २८३ ॥
प्रसीद मम देवेश त्वमेव शरणं मम।
त्वद्गतिस्त्वं प्रतिष्ठा च न चान्यास्ति न मे गतिः ॥ २८४ ॥
स्तुत्वैवं स महादेवं विरराम प्रजापतिः।
भगवानपि सुप्रीतः पुनर्दक्षमभाषत ॥ २८५ ॥
परितुष्टोऽस्मि ते दक्ष स्तवेनानेन सुव्रत।
बहुनात्र किमुक्तेन मत्समीपं गमिष्यसि ॥ २८६ ॥
अथैनमब्रवीद्वाक्यं त्रैलोक्याधिपतिर्भवः।



कृत्वाश्वासकरं वाक्यं वाक्यज्ञो वाक्यमाहृतं ॥ २८७ ॥
दक्ष दक्ष न कर्त्तव्यो मन्युर्विघ्नमिमं प्रति।
अहं यज्ञहा न त्वन्यो दृश्यते तत्पुरा त्वया ॥ २८८ ॥
भूयश्च तं वरमिमं मत्तो गृह्णीष्व सुव्रत।
प्रसन्नवदनो भूत्वा त्वमेकाग्रमनाः शृणु ॥ २८९ ॥
अश्वमेधसहस्रस्य वाजपेयशतस्य च।
प्रजापते मत्प्रसादात् फलभागी भविष्यसि ॥ २९० ॥
वेदान् षड्वङ्गानुद्धृत्य सांख्यान्योगांश्च कृत्स्नशः।
तपश्च विपुलन्तप्त्वा दुःसहं देवदानवैः ॥ २९१ ॥
अर्थैर्ग्राम्यसंयुक्तैर्गूढमप्राज्ञनिर्म्मितं।
वर्णाश्रमकृतैर्धर्म्मैर्विपरीतं क्वचित्क्वचित् ॥ २९२ ॥
श्रुत्यर्थैरध्यवसितं पशुपाशविमोक्षणं।
सर्वेषामाश्रमाणान्तु मया पाशुपतं व्रतं।
उत्पादितं शुभं दक्ष सर्वपापविमोक्षणं ॥ २९३ ॥
अस्य चीर्णस्य यत्सम्यक्फलं भवति पुष्कलं।
तदस्तु ते महाभाग मानसस्त्यज्यतां ज्वरः ॥ २९४ ॥
एवमुक्त्वा महादेवः सपत्नीकः सहानुगः।
अदर्शनमनुप्राप्तो दक्षस्यामितविक्रमः ॥ २९५ ॥
अवाप्य च तदा भागं यथोक्तं ब्रह्मणा भवः।
ज्वरश्च सर्वधर्म्मज्ञो बहुधा व्यभजत्तदा।
ख्याप्यर्थं सर्व्वभूतानां शृणुध्वन्तत्र वै द्विजाः ॥ २९६ ॥
शीर्षाभितापो नागानां पर्वतानां शिलाक्षयः।
अपान्तु नालिकां विद्यात्रिर्मोकभुजगेष्वपि ॥ २९७ ॥

खोरक्तः सौरभेयाणां जघरः पृथिवीतले ।
द्रुमाणामपि धर्म्मज्ञ दृष्टिप्रत्यवरोधनं ॥ २९८ ॥
रक्तोद्भूतं (१)तथाश्वानां गिरवोद्भेदश्च बर्हिणां ।
नेचरोगः कोकिलानां ज्वरः प्रोक्तो महात्मभिः ॥ २९९ ॥
अजानां पित्तभेदश्च सर्वेषामिति नः श्रुतं ।
शुकानामपि सर्वेषां हिमिका प्रोच्यते ज्वरः ।
शार्दूलेष्वपि वै विप्राः शमो ज्वर इहोच्यते ॥ ३०० ॥
मानुषेषु तु सर्वज्ञ(२) ज्वरो नामैष कीर्तितः ।
मरणे जन्मनि तथा मध्ये च विद्यते सदा ॥ ३०१ ॥
एतन्माहेश्वरं तेजो ज्वरो नाम सुदारुणः ।
नमस्यश्चैव(३) मान्यश्च सर्वप्राणिभिरीश्वरः ॥ ३०२ ॥

इमां ज्वरोत्पत्तिमदीनमानसः
पठेत्सदा यः सुसमाहितो नरः ।
विमुक्तरोगः स नरो मुदा युतो
लभेत कामान् स यथा मनोषितान् ॥ ३०३ ॥

दक्षप्रोक्तं स्तवञ्चापि कीर्त्तयेद्यः शृणोति वा ।
नाशुभं प्राप्नुयात् किञ्चित् दीर्घञ्चायुरवाप्नुयात् ॥ ३०४ ॥
यथा सर्वेषु देवेषु वरिष्ठो योगवान् हरः ।
तथा स्तवो वरिष्ठोऽयं स्तवानां ब्रह्मनिर्म्मितः ॥ ३०५ ॥
यशोराज्यसुखैश्वर्य्यवित्तायुर्धनकाङ्क्षिभिः ।

१ रक्तोद्भवमिति घ० ।
२ सर्वज्ञेति ख० ।
३ मनस्यश्चैवेति घ० ।



स्तोतव्यो भक्तिमास्थाय विद्याकामैश्च यत्नतः ॥ ३०६ ॥
व्याधितो दुःखितो दीनश्चौरत्रस्तो भयार्दितः ।
राजकार्य्यनियुक्तो वा मुच्यते महतो भयात् ॥ ३०७ ॥
अनेन चैव देहेन गणानां स गणाधिपः ।
इह लोके सुखं प्राप्य गण एवोपपद्यते(१) ॥ ३०८ ॥
न च यक्षाः पिशाचा वा न नागा न विनायकाः ।
कुर्य्युर्विघ्नं गृहे तस्य यत्र संस्तूयते भवः ॥ ३०९ ॥
शृणुयाद्वा इदं नारी सुभक्त्या ब्रह्मचारिणी ।
पितृभिर्भर्तृपक्षाभ्यां पूज्या भवति देववत् ॥ ३१० ॥
शृणुयाद्वा इदं सर्वं कीर्त्तयेद्वाप्यभीक्ष्णशः ।
तस्य सर्वाणि कार्य्याणि सिद्धिं गच्छन्त्यविघ्नतः ॥ ३११ ॥
मनसा चिन्तितं यच्च यच्च वाचाप्युदाहृतं ।
सर्वं सम्पद्यते तस्य स्तवनस्यानुकीर्त्तनात् ॥ ३१२ ॥
देवस्य सगुहस्याथ देव्या नन्दीश्वरस्य तु ।
बलिं विभवतः कृत्वा दमेन नियमेन च ॥ ३१३ ॥
ततः स युक्तो गच्छीयान्नामान्याशु यथाक्रमं ।
ईप्सितान् लभतेऽत्यर्थं कामान् भोगांश्च मानवः ।
मृतश्च स्वर्गमाप्नोति स्त्रीसहस्रपरीवृतः ॥ ३१४ ॥
सर्वकर्म्मसु युक्तो वा युक्तो वा सर्वपातकैः ।
पठन् दक्षकृतं स्तोत्रं सर्वपापैः प्रमुच्यते ।
मृतश्च गणसालोक्यं पूज्यमानः सुरासुरैः ॥ ३१५ ॥

१ परत्र उपपद्यत इति ख० ।

ऋषेव विधियुक्तेन विमानेन विराजते ।
आभूतसंप्लवस्थायी रुद्रस्यानुचरो भवेत् ॥ ११६ ॥
इत्याह भगवान् व्यासः पराशरसुतः प्रभुः ।
नैतद्देयते कस्मिन्नेदं श्राव्यन्तु कस्यचित् ॥ ११७ ॥
श्रुत्वैतत्परमङ्गुह्यं येऽपि स्युः पापकारिणः ।
वैश्या स्त्रियश्च शूद्राश्च रुद्रलोकमवाप्नुयुः ॥ ११८ ॥
श्रावयेद्यस्तु विप्रेभ्यः सदा पर्व्वसु पर्व्वसु ।
रुद्रलोकमवाप्नोति द्विजो वै नात्र संशयः ॥ ११९ ॥

इति श्रीमहापुराणे वायुप्रोक्ते दक्षशापवर्णनं
नाम त्रिंशोऽध्यायः ।

---

# अथैकत्रिंशोऽध्यायः ।

---

## देववंशवर्णनं ।

सूत उवाच । इत्येषा समनुज्ञाता कथा पापप्रणाशिनी ।
या दक्षमधिकृत्येह कथा शर्व्वादुपागता ॥ १ ॥
पितृवंशप्रसङ्गेन कथा ह्येषा प्रकीर्त्तिता ।
पितृणामानुपूर्व्येण देवान् वक्ष्याम्यतः परं ॥ २ ॥
त्रेतायुगमुखे पूर्व्वमासन् स्वायम्भुवेऽन्तरे ।
देवा यामा इतिख्याताः पूर्वं ये यज्ञसूनवः ॥ ३ ॥
अजिता ब्रह्मणः पुत्रा जिता जिदजिताश्च ये ।
पुत्राः स्वायम्भुवस्यैते शुक्रनाम्ना तु मानसाः ॥ ४ ॥
दशमिमन्तो गणा ह्येते देवानान्तु चयः स्मृताः ।
छन्दोगास्तु त्रयस्त्रिंशत्सर्वे स्वायम्भुवस्य ह ॥ ५ ॥
यदुर्य्ययातिर्हौं देवी दीधयः स्रवसो मतिः ।
विभासश्च क्रतुश्चैव प्रजातिर्विशतो द्युतिः ॥ ६ ॥
वायसो मङ्गलश्चैव यामा द्वादश कीर्तिताः ।
अभिमन्युरुग्रदृष्टिः समयोऽथ शुचिश्रवाः ।
केवलो विश्वरूपश्च सुपक्षो मधुपस्तथा ॥ ७ ॥
तुरीयो निर्हपुश्चैव युक्तो यावाजिनस्तु ते ।
यमिनो विश्वदेवाद्यं यविष्ठोऽमृतवानपि ॥ ८ ॥
अजिरो विभुर्विभावश्च मृलिकोऽथ दिदेहकः ।
श्रुतिश्रुणो ह्यहच्छुक्रो देवा द्वादश कीर्तिताः ॥ ९ ॥

आसन् स्वायम्भुवस्यैते अन्तरे सोमपायिनः ।
त्रिषिमन्तो गणा ह्येते वीर्य्यवन्तो महाबलाः ॥ १० ॥
तेषामिन्द्रः सदा ह्यासीद् विश्वभुक् प्रथमो विभुः ।
असुरा ये तदा तेषामासन् दायादबान्धवाः ॥ ११ ॥
सुपर्णयक्षगन्धर्व्वाः पिशाचोरगराक्षसाः ।
अष्टौ ते पितृभिः सार्द्धं(१) नामतो देवयोनयः ॥ १२ ॥
स्वायम्भुवेऽन्तरेऽतीताः प्रजास्त्वासां सहस्रशः ।
प्रभावरूपसम्पन्ना आयुषा च बलेन च ॥ १३ ॥
विस्तरादिह नोच्यन्ते मा प्रसङ्गो भवत्विह ।
स्वायम्भुवो निसर्गश्च विज्ञेयः साम्प्रतं मनुः ॥ १४ ॥
अतीते वर्त्तमाने न दृष्टो वैवस्वतेन सः ।
प्रजाभिर्देवताभिश्च ऋषिभिः पितृभिः सह ॥ १५ ॥
तेषां सप्तर्षयः पूर्वमामन्त्रे तान् निबोधत ।
भृग्वङ्गिरा मरीचिश्च पुलस्त्यः पुलहः क्रतुः ॥ १६ ॥
अत्रिश्चैव वसिष्ठश्च सप्त स्वायम्भुवेऽन्तरे ।
अग्नीध्रश्चातिबाहुश्च मेधा मेधातिथिर्वसुः ॥ १७ ॥
ज्योतिष्मान् द्युतिमान्(२) हव्यः सवनः पुत्र एव च ।
मनोः स्वाम्भुवस्यैते दशपुत्रा महौजसः ॥ १८ ॥
वायुप्रोक्ता महात्मानो राजानः प्रथमेऽन्तरे ।
सासुरन्तत्सगन्धर्वं सयक्षोरगराक्षसं ।
सपिशाचमनुष्यञ्च सुपर्णाप्सरसाङ्कुलं ॥ १९ ॥

१ नेऽनिष्ठन् मनुमा सार्द्धमिति ख० ।
२ द्युतिमानिति घ० ।



नो शक्यमानुपूर्व्येण वक्तुं वर्षशतैरपि ।
बहुत्वान्नामधेयानां संख्या तेषां कुले तथा(१) ॥ २० ॥
या वै व्रजकुलाख्यास्तु आसन् स्वायम्भुवेऽन्तरे ।
कालेन बहुनातीता अयनाब्दयुगक्रमैः ॥ २१ ॥
ऋषय ऊचुः । क एष भगवान् कालः सर्वभूतापहारकः ।
कस्य योनिः किमादिश्च किंतत्त्वं स किमात्मजः ॥ २२ ॥
किमस्य चक्षुः का मूर्त्तिः के चास्यावयवाः स्मृताः ।
किंनामधेयः कोऽस्यात्मा एतत् प्रब्रूहि पृच्छतां ॥ २३ ॥
सूत उवाच । श्रूयतां कालसद्भावः श्रुत्वा चैवावधार्य्यतां ।
सूर्य्ययोनिर्निमेषादिः सङ्ख्याचक्षुः स उच्यते ॥ २४ ॥
मूर्त्तिरस्य त्वहोरात्रे निमेषावयवश्च सः ।
संवत्सरशतं त्वस्य नाम चास्य कलात्मकं ।
साम्प्रतानागतातीतकालात्मा स प्रजापतिः ॥ २५ ॥
पञ्चानां प्रविभक्तानां कालावस्थान्निबोधत ।
दिनार्द्धमासमासैस्तु ऋतुभिस्त्वयनैस्तथा ॥ २६ ॥
संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः ।
इद्वत्सरस्तृतीयस्तु चतुर्थश्चानुवत्सरः ॥ २७ ॥
वत्सरः पञ्चमस्तेषां कालः स युगसंज्ञितः ।
तेषान्तु तत्त्वं वक्ष्यामि कीर्त्यमानन्निबोधत ॥ २८ ॥
ऋतुरग्निस्तु यः प्रोक्तः स तु संवत्सरो मतः ।
आदित्येयस्त्वयो सारः कालाग्निः परिवत्सरः ॥ २९ ॥
शुक्लकृष्णा गतिश्चापि अपां सारमयः खगः ।

१ कुले कुल इति ङ० ।

स इदावत्सरः सोमः पुराणे निश्चयो मतः ॥ ३० ॥
यश्चायन्तपते लोकांस्तनुभिः सप्तसप्तभिः।
आशु कर्त्ता च लोकस्य स वायुरिति वत्सरः(१) ॥ ३१ ॥
अहङ्कारात् रुदन् रुद्रः सञ्जातो ब्रह्मणस्त्रयः।
स रुद्रो वत्सरस्तेषां विज्ञेयो नीललोहितः।
तेषां हि तत्त्वं वक्ष्यामि कीर्त्यमानं निबोधत ॥ ३२ ॥
अङ्गात्यङ्गसंयोगात् कालात्मा प्रपितामहः।
ऋक्सामयजुषां योनिः पञ्चानां पतिरीश्वरः ॥ ३३ ॥
सोऽग्निर्यज्जुश्च सोमश्च स भूतः स प्रजापतिः।
प्रोक्तः संवत्सरश्चेति सूर्य्यो योऽग्निर्मनीषिभिः ॥ ३४ ॥
यस्मात्कालविभागानां मासर्त्वयनयोरपि।
ग्रहनक्षत्रशीतोष्णवर्षायुःकर्म्मणां तथा।
योजितः प्रविभागानां दिवसानाञ्च भास्करः ॥ ३५ ॥
वैकारिकः प्रसन्नात्मा ब्रह्मपुत्रः प्रजापतिः।
एकैनैकोऽथ दिवसो मासोऽयर्त्तुः पितामहः ॥ ३६ ॥
आदित्यः सविता भानुर्जीवनो ब्रह्मसत्कृतः।
प्रभवश्चाप्ययश्चैव भूतानां तेन भास्करः ॥ ३७ ॥
ताराभिमानी विज्ञेयस्तृतीयः परिवत्सरः।
सोमः सर्वौषधिपतिर्य्यस्मात्स प्रपितामहः ॥ ३८ ॥
आजीवः सर्वभूतानां योगक्षेमकृदीश्वरः।
अवेक्षमाणः सततं विभर्ति जगदंशुभिः ॥ ३९ ॥
तिथीनां पर्व्वसन्धीनां पूर्णिमादर्शयोरपि।

१ स वायः परिवत्सर इति घ०।



योनिर्निग्राकरो यश्च योऽमृतात्मा प्रजापतिः ॥ ४० ॥
तस्मात् स पितृमान् सोम ऋग्यजुश्छन्दसात्मकः।
प्राणापानसमानाद्यैर्व्यानोदानात्मकैरपि ॥ ४१ ॥
कर्म्मभिः प्राणिनां लोके सर्वचेष्टाप्रवर्त्तकः।
प्राणापानसमानानां वायूनाञ्च प्रवर्त्तकः ॥ ४२ ॥
पञ्चानाञ्चेन्द्रियमनोबुद्धिस्मृतिजलात्मनां।
समानकाल करणः क्रियाः सम्पादयन्निव ॥ ४३ ॥
सर्व्वात्मा सर्वलोकानामावहः प्रवहादिभिः।
विधाता सर्वभूतानां चमी नित्यं प्रभञ्जनः ॥ ४४ ॥
योनिरग्नेरपां भूमेरवेश्चन्द्रमसश्च यः।
वायुः प्रजापतिर्भूतं लोकात्मा प्रपितामहः ॥ ४५ ॥
प्रजापतिमुखैर्देवैः सम्यगिष्टफलार्थिभिः।
त्रिभिरेव कपालैस्तु अम्बकैरोषधित्रये।
पूज्यते भगवान् यस्मात्तस्मात्र्यम्बक उच्यते ॥ ४६ ॥
गायत्री चैव त्रिष्टुप् च जगती चैव या स्मृता।
त्र्यम्बका नामतः प्रोक्ता योनयः सवनस्य ताः ॥ ४७ ॥
ताभिरेकत्वभूताभिस्त्रिविधाभिः स्ववीर्य्यतः।
त्रिसाधनपुरोडाशस्त्रिकपालः स वै स्मृतः ॥ ४८ ॥
इत्येतत्पञ्चवर्षं हि युगं प्रोक्तं मनीषिभिः।
यश्चैव पञ्चधात्मा वै प्रोक्तः संवत्सरो द्विजैः।
सैकं षट्कं विजज्ञेऽथ मध्वादीनृतवः किल ॥ ४९ ॥
ऋतुपुत्रार्त्तवः पञ्च इति सर्गः समासतः।
इत्येष पवमानो वै प्राणिनां जीवितानि तु ॥ ५० ॥

नद्दीवेगसमायुक्तं कालो धावति संहरन्।
अहोरात्रकरस्तस्मात् स वायुरभवत्पुनः॥ ५१॥
एते प्राजानां पतयः प्रधानाः सर्वदेहिनां(१)।
पितरः सर्वलोकानां लोकात्मानः प्रकीर्तिताः॥ ५२॥
ध्यायतो ब्रह्मणो वक्त्रादुद्यन् समभवद्भवः।
ऋषिर्विप्रो महादेवो भूतात्मा प्रपितामहः॥ ५३॥
ईश्वरः सर्वभूतानां प्रणवायोपपद्यते।
आत्मवेशेन भूतानामङ्गप्रत्यङ्गसम्भवः॥ ५४॥
अग्निः संवत्सरः सूर्य्यश्चन्द्रमा वायुरेव च।
युगाभिमानी कालात्मा नित्यं संचेपकृद्विभुः।
उन्मादकोऽनुग्रहकृत्स इडत्सर उच्यते॥ ५५॥
रुद्राविष्टो भगवता जगत्यस्मिन् स्वतेजसा।
आप्ययाप्ययसंयोगात्तनुभिर्नामभिस्तथा॥ ५६॥
ततस्तस्य तु वीर्य्येण लोकानुग्रहकारकं।
द्वितीयं भद्रसंयोगं सन्तस्यैककारकं॥ ५७॥
देवत्वञ्च पितृत्वञ्च कालत्वञ्चास्य यत्परं।
तस्माद्वै सर्व्वथा भद्रस्तद्भद्रिरभिपूज्यते॥ ५८॥
पतिः पतीनां भगवान् प्रजेशानां प्रजापतिः।
भवनः सर्वभूतानां सर्वेषां नीललोहितः।
ओषधीः प्रतिसन्धत्ते रुद्रः क्षीणाः पुनः पुनः॥ ५९॥

१ चत्वार उपपद्यन्ते इति घ०, ङ० च।



इत्येषां यदपत्यं वै न तच्छक्यं प्रमाणतः।
बहुत्वात् परिसंख्यातुं पुत्रपौत्रमनन्तकं॥ ६०॥
इमं वंशं प्रजेशानां महतां पुण्यकर्म्मणां।
कीर्त्तयन् स्थिरकीर्त्तीनां महतीं सिद्धिमाप्नुयात्॥ ६१॥

इति श्रीमहापुराणे वायुप्रोक्ते देववंशवर्णनं
नामैकत्रिंशोऽध्यायः।

# अथ द्वात्रिंशोऽध्यायः ।

———ooo@ooo———

## युगधर्म्माः ।

वायुरुवाच । अत ऊर्द्धं प्रवक्ष्यामि प्रणवस्य विनिश्चयं ।
ओंकारमक्षरं ब्रह्म त्रिवर्णञ्चादितः स्मृतं ॥ १ ॥
यो यो यस्य यथा वर्णो विहितो देवतास्तथा ।
ऋचो यजूंषि सामानि वायुरग्निस्तथा जलं ॥ २ ॥
तस्मात्तु अक्षरादेव पुनरन्ये प्रजज्ञिरे ।
चतुर्दश महात्मानो देवानां ये तु देवताः ॥ ३ ॥
तेषु सर्वगतश्चैव सर्वगः सर्वयोगवित् ।
अनुग्रहाय लोकानामादिमध्यान्त उच्यते ॥ ४ ॥
सप्तर्षयस्तथेन्द्रा ये देवाश्च पितृभिः सह ।
अक्षरान्निःसृताः सर्वे देवदेवान्महेश्वरात् ॥ ५ ॥
इहामुत्र हितार्थाय वदन्ति परमं पदं ।
पूर्वमेव मयोक्तस्ते कालस्तु युगसंज्ञितः ॥ ६ ॥
कृतं त्रेता द्वापरञ्च युगादिः कलिना सह ।
परिवर्त्तमानैस्तैरेव भ्रममाणेषु चक्रवत् ॥ ७ ॥
देवतास्तु तदोद्विग्नाः कालस्य वशमागताः ।
न शक्नुवन्ति तन्मानं संख्यापयितुमात्मना ॥ ८ ॥
तदा ते वाग्यता भूत्वा आदौ मन्वन्तरस्य वै ।
ऋषयश्चैव देवाश्च इन्द्रश्चैव महातपाः(१) । ९ ॥

१ महायशा इति ख० ।



समाधाय मनस्तीव्रं सहस्रं परिवत्सरान् ।
प्रपन्नास्ते महादेवं भीताः कालस्य वै तदा ॥ १० ॥
अयं हि कालो देवेशश्चतुर्भूर्त्तिश्चतुर्मुखः ।
कोऽस्य विद्यान्महादेव अगाधस्य महेश्वर ॥ ११ ॥
अथ दृष्ट्वा महादेवस्तान् कालश्चतुर्मुखं ।
न भेतव्यमिति प्राह को वः कामः प्रदीयतां ॥ १२ ॥
तत्करिष्याम्यहं सर्वं न ह्यशायं परिश्रमः ।
उवाच देवो भगवान् स्वयङ्कालः सुदुर्जयः ॥ १३ ॥
यदेतस्य मुखं श्वेतं चतुर्जिह्वं हि लक्ष्यते ।
एतत् कृतयुगं नाम तस्य कालस्य वै मुखं ।
असौ देवः सुरश्रेष्ठो ब्रह्मा वैवस्वतो मुखः ॥ १४ ॥
यदेतद्रक्तवर्णाभं दृतीयं वः स्मृतं मया ।
त्रिजिह्वं(१) लेलिहानन्तु एतत् त्रेतायुगं द्विजाः ॥ १५ ॥
अत्र यज्ञप्रवृत्तिस्तु जायते हि महेश्वरात् ।
ततोऽत्र इज्यते यज्ञस्त्रिस्रो जिह्वास्त्रयोऽग्नयः ।
दृष्ट्वा चैवाग्नयो विप्राः कालजिह्वा प्रवर्त्तते ॥ १६ ॥
यदेतद्वै मुखं भीमं द्विजिह्वं रक्तपिङ्गलं ।
द्विपादोऽत्र भविष्यामि द्वापरं नाम तद्युगं ॥ १७ ॥
यदेतत् कृष्णवर्णाभन्तुरीयं रक्तलोचनं ।
एकजिह्वं पृथु श्यामं लेलिहानं पुनः पुनः ॥ १८ ॥
ततः कलियुगं घोरं सर्वलोकभयङ्करं ।

१ त्रिनेत्रमिति ख० ।

कल्पस्य तु मुखं ह्येतच्चतुर्थं नाम भीषणं ॥ १८ ॥
न सुखं नापि निर्वाणं तस्मिन् भवति वै युगे।
कालग्रस्ता प्रजा चापि युगे तस्मिन् भविष्यति ॥ २० ॥
ब्रह्मा कृतयुगे पूज्यस्त्रेतायां यज्ञ उच्यते।
द्वापरे पूज्यते विष्णुरहम्पूज्यश्चतुर्ष्वपि ॥ २१ ॥
ब्रह्मा विष्णुश्च यज्ञश्च कालस्यैव कलाक्षयः।
सर्व्वेष्वेव हि कालेषु चतुर्मूर्त्तिर्महेश्वरः ॥ २२ ॥
अहं जनो जनयिता वः कालः कालप्रवर्त्तकः।
युगकर्त्ता तथा चैव परं परपरायणः ॥ २३ ॥
तस्मात् कलियुगं प्राप्य लोकानां हितकारणात्।
अभयार्थञ्च देवानामुभयोर्लोकयोरपि ॥ २४ ॥
तदा भव्यश्च पूज्यश्च भविष्यामि सुरोत्तमाः।
तस्माद्भयं न कार्य्यञ्च कलिं प्राप्य महौजसः ॥ २५ ॥
एवमुक्तास्ततः सर्वा देवता ऋषिभिः सह।
प्रणम्य शिरसा देवं पुनरूचुर्जगत्पतिं ॥ २६ ॥

देवर्षय ऊचुः। महातेजा महाकायो महावीर्य्यो महाद्युतिः।
भीषणः सर्वभूतानां कथं कालश्चतुर्मुखः ॥ २७ ॥

महादेव उवाच। एष कालश्चतुर्मूर्त्तिश्चतुर्दंष्ट्रश्च तुर्मुखः।
लोकसंरक्षणार्थाय अतिक्रामति सर्वशः ॥ २८ ॥
नासाध्यं विद्यते चास्य सर्वस्मिन् सचराचरे।
कालः सृजति भूतानि पुनः संहरति क्रमात् ॥ २९ ॥
सर्वं कालस्य वशगा न कालः कस्यचिद्वशे।
तस्मात्तु सर्वभूतानि कालः कलयते सदा ॥ ३० ॥



विक्रमस्य पदान्यस्य पूर्वोक्तान्येकसप्ततिः।
तानि मन्वन्तराणीह परिवृत्तयुगक्रमात् ॥ ३१ ॥
एकं पदं परिक्रम्य पदानामेकसप्ततिः।
यदा कालः प्रक्रमते तदा मन्वन्तरक्षयः ॥ ३२ ॥
एवमुक्त्वा तु भगवान् देवर्षिपितृदानवान्।
नमस्कृतश्च तैः सर्वैस्तत्रैवान्तरधीयत ॥ ३३ ॥
एवं स काले भगवान् देवर्षिपितृदानवान्।
पुनः पुनः संहरते सृजते च पुनः पुनः ॥ ३४ ॥
अतो मन्वन्तरे चैव देवर्षिपितृदानवैः।
पूज्यते भगवानीशो भयात् कालस्य तस्य वै ॥ ३५ ॥
तस्मात् सर्वप्रयत्नेन कलौ कुर्य्यात्तपो द्विजः।
प्रपन्नस्य महादेवं तस्य पुण्यफलं महत्।
तस्माद्देवा दिवङ्गत्वा अवतीर्य्य च भूतले ॥ ३६ ॥
ऋषयश्चैव देवाश्च कलिम्प्राप्य सुदारुणं।
तप इच्छन्ति भूयिष्ठं कर्त्तुं धर्म्मपरायणाः।
अवतारान् कलिं प्राप्य करोति च पुनः पुनः ॥ ३७ ॥
एवं कालान्तरे सर्व्वे येऽतीता वै सहस्रशः।
वैवस्वतेऽन्तरे तस्मिन् देवराजर्षयस्तथा ॥ ३८ ॥
देवापिः पौरवो राजा मनुश्चेक्ष्वाकुवंशजाः।
महायोगबलोपेताः कालान्तरमुपासते ॥ ३९ ॥
क्षीणे कलियुगे तस्मिन् तिष्ये त्रेतायुगे कृते।
सप्तर्षिभिश्चैव सार्द्धं भाव्ये त्रेतायुगे पुनः।
गोत्राणां क्षत्रियाणाञ्च भविष्यास्ते प्रकीर्तिताः ॥ ४० ॥

द्वापरान्ते प्रतिष्ठन्ते क्षत्रिया ऋषिभिः सह।
कृते त्रेतायुगे चैव तथा त्रीणे च द्वापरे।
नराः पातकिनो ये वै वर्त्तन्ते ते कलौ स्मृताः॥ ४१॥
मन्वन्तराणां सप्तानां सान्तानार्थो श्रुतिः स्मृतिः।
एवमेतेषु सर्व्वेषु युगक्षयक्रमस्तथा॥ ४२॥
परस्परं युगानाञ्च ब्रह्मक्षत्रस्य चोद्भवः।
यथा वै प्रकृतिस्तेभ्यः प्रवृत्तानां यथाक्षयं॥ ४३॥
जामदग्न्येन रामेण क्षत्रे निरवशेषिते।
क्रियन्ते कुलटाः सर्वाः क्षत्रियैर्वसुधाधिपैः।
दिवङ्गतानहन्तुभ्यं कीर्त्तयिष्ये निबोधत॥ ४४॥
ऐड़मिक्ष्वाकुवंशस्य प्रकृतिं परिचक्षते।
राजानः श्रेणिवन्धास्तु तथाऽन्ये क्षत्रिया भुवि॥ ४५॥
ऐडवंशेऽथ सम्भूता यथा चेक्ष्वाकवो नृपाः।
तेभ्य एव शतं पूर्णं कुलानामभिषेचितं॥ ४६॥
तावदेव तु भोजानां विस्तरो द्विगुणः स्मृतः।
भोजन्तु त्रिशतं क्षत्रं चतुर्द्धा तद्यथादिशं॥ ४७॥
तेष्वतीतास्तु राजानो ब्रुवतस्तान्निबोधत।
शतं वै प्रतिविन्ध्यानां हैहयानां तथा शतं॥ ४८॥
धार्त्तराष्ट्रास्त्वेकशतं अशीतिर्जनमेजयाः।
शतं वै ब्रह्मदत्तानां कुलानां वीर्य्यिणां शतं॥ ४९॥
ततः शतन्तु पौलानां शतं काशिकुशादयः।
तथाऽपरं सहस्रन्तु येऽतीताः शशविन्दवः।
द्रुजानास्तेऽश्वमेधैस्तु सर्वे नियुतदक्षिणैः॥ ५०॥



एवं संक्षेपतः प्रोक्ता न शक्या विस्तरेण तु।
वक्तुं राजर्षयः कृत्स्ना येऽतीतास्तैर्युगैः सह॥ ५१॥
एते ययातिवंशस्य बभूवुर्वंशवर्द्धनाः।
कीर्तिताः द्युतिमन्तस्ते ये लोकान् धारयन्ति वै(१)॥ ५२॥
लभन्ते च वरान्पञ्च दुर्लभान् ब्रह्मलौकिकान्।
आयुः पुत्रा धनङ्कीर्तिरैश्वर्य्यं भूतिरेव च॥ ५३॥
धारणाच्छ्रवणाच्चैव पञ्चवर्गस्य धीमतां।
तथोक्ता लौकिकाश्चैव ब्रह्मलोकं व्रजन्ति वै॥ ५४॥
चत्वार्य्याहुः सहस्राणि वर्षाणाञ्च कृतं युगं।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः॥ ५५॥
कृते वै प्रक्रियापादश्चतुःसाहस्र उच्यते।
तस्माच्चतुःशतं सन्ध्या सन्ध्यांशश्च तथाविधः॥ ५६॥
त्रेतादीनि सहस्राणि संख्यया मुनिभिः सह।
तस्यापि त्रिशती सन्ध्या सन्ध्यांशस्त्रिशतः स्मृतः॥ ५७॥
अनुषङ्गपादस्त्रेतायास्त्रिसाहस्रस्तु संख्यया।
द्वापरे द्वे सहस्रे तु वर्षाणां सम्यक्कीर्त्तितं॥ ५८॥
तस्यापि द्विशती सन्ध्या सन्ध्यांशो द्विशतस्तथा।
उपोद्घातस्तृतीयस्तु द्वापरे पाद उच्यते॥ ५९॥
कलिं वर्षसहस्रन्तु प्राहुः संख्याविदो जनाः।
तस्यापि शतिका सन्ध्या सन्ध्यांशः शतमेव च॥ ६०॥
संहारपादः संख्यातश्चतुर्थो वै कलौ युगे।
ससन्ध्यानि सहांशानि चत्वारि तु युगानि वै॥ ६१॥

१ सर्व यशःपरायणा इति ख०।

एतत् द्वादशसाहस्रं चतुर्युगमिति स्मृतं।
एवं पादैः सहस्राणि श्लोकानां पञ्च पञ्च च ॥ ६२ ॥
सन्ध्यासन्ध्यांशकैरेव द्वे सहस्रे तथाऽपरे।
एवं द्वादशसाहस्रं पुराणं कवयो विदुः ॥ ६३ ॥
यथा वेदश्चतुष्पादश्चतुष्पादं तथा युगं।
यथा युगश्चतुष्पादं विधात्रा विहितं स्वयं।
चतुष्पादं सुराणान्तु ब्रह्मणा विहितं पुरा ॥ ६४ ॥

इति श्रीमहापुराणे वायुप्रोक्ते युगधर्म्मनिरूपणं नाम द्वात्रिंशोऽध्यायः।

---

# अथ त्रयस्त्रिंशोऽध्यायः।

———ooo@ooo———

## स्वायम्भुववंशवर्णनं।

सूत उवाच। मन्वन्तरेषु सर्वेषु अतीतानागतेष्विह।
तुल्याभिमानिनः सर्वे जायन्ते नामरूपतः ॥ १ ॥
देवाश्च विविधा ये च तस्मिन् मन्वन्तरेऽधिपाः।
ऋषयो मानवाश्चैव सर्वे तुल्याभिमानिनः ॥ २ ॥
महर्षिसर्गः प्रोक्तो वै वंशं स्वायम्भुवस्य तु।
विस्तरेणानुपूर्व्या च कीर्त्यमानं निबोधत ॥ ३ ॥
मनोः स्वायम्भुवस्यासन्दश पौत्रास्तु तत्समाः।
यैरियं पृथिवी सर्वा सप्तद्वीपसमन्विता(१) ॥ ४ ॥
ससमुद्रा करवती प्रतिवर्षन्निवेशिता।
स्वायम्भुवेऽन्तरे पूर्वमाद्ये चेतायुगे तदा ॥ ५ ॥
प्रियव्रतस्य पुत्रैस्तैः पौत्रैः स्वायम्भुवस्य तु।
प्रजासर्गतपोयोगैस्तैरियं विनिवेशिता ॥ ६ ॥
प्रियव्रतात् प्रजावन्तः(२) वीरात् कन्या व्यजायत।
कन्या सा तु महाभागा कर्दमस्य प्रजापतेः ॥ ७ ॥
कन्ये द्वे शतपुत्रांश्च सम्राट् कुक्षिश्च ते उभे।
तयोर्वै भ्रातरः शूराः प्रजापतिसमा दश ॥ ८ ॥

---

१ सप्तद्वीपा सपत्तना इति घ०, ङ० च।
२ पाठोऽयं न समीचीनः।

अग्नीध्रश्च वपुष्मांश्च(१) मेधा मेधातिथिर्विभुः ।
ज्योतिष्मान् द्युतिमान् हव्यः सवनः सर्व्व एव च(२) ॥ ९ ॥
प्रियव्रतोऽभिषिच्चैतान् सप्त सप्तसु पार्थिवान् ।
द्वीपेषु तेषु धर्मेण द्वीपांस्तांश्च निबोधत ॥ १० ॥
जम्बूद्वीपेश्वरं चक्रे अग्नीध्रन्तु महाबलं ।
प्लक्षद्वीपेश्वरस्यापि तेन मेधातिथिः कृतः ॥ ११ ॥
शाल्मली तु वपुष्मन्तं राजानमभिषिक्तवान् ।
ज्योतिष्मन्तं कुशद्वीपे राजानं कृतवान् प्रभुः ॥ १२ ॥
द्युतिमन्तञ्च राजानं क्रौञ्चद्वीपे समादिशत् ।
शाकद्वीपेश्वरञ्चापि हव्यञ्चक्रे प्रियव्रतः ॥ १३ ॥
पुष्कराधिपतिञ्चापि सवनं कृतवान् प्रभुः ।
पुष्करे सवनस्यापि महावीतः सुतोऽभवत् ।
धातकिश्चैव द्वावेतौ पुत्रौ पुत्रवतां वरौ ॥ १४ ॥
महावीतं स्मृतं वर्षं तस्य नाम्ना महात्मनः ।
नाम्ना तु धातकेश्चापि धातकीखण्ड उच्यते ॥ १५ ॥
हव्यो व्यजनयत् पुत्रान् शाकद्वीपेश्वरान् प्रभुः ।
जलदञ्च कुमारञ्च सुकुमारं मणीचकं(३) ।
वसुमोदं सुमोदाकं सप्तमञ्च महाद्रुमं ॥ १६ ॥
जलदं जलदस्याथ वर्षं प्रथममुच्यते ।
कुमारस्य च कौमारं द्वितीयं परिकीर्त्तितं ॥ १७ ॥

१ अग्नीध्रश्चाग्निवाहश्चेति घ०, ङ० च ।
२ सत्य एव चेति ख० । पुत्र एव चेति ङ० ।
३ मनीचकस्थाने सर्व्वत्र मनीवकेति घ०पुस्तकपाठः ।



सुकुमारं तृतीयन्तु सुकुमारस्य कीर्त्तितं ।
मणीचकस्य चतुर्थं मणीचकमिहोच्यते ॥ १८ ॥
वसुमोदस्य वै वर्षं पञ्चमं वसुमोदकं ।
मोदाकस्य तु मोदाकं वर्षं षष्ठं प्रकीर्त्तितं ॥ १९ ॥
महाद्रुमस्य नाम्ना तु सप्तमन्तु महाद्रुमं ।
एषान्तु नामभिस्तानि सप्तवर्षाणि तत्र वै ॥ २० ॥
क्रौञ्चद्वीपेश्वरस्यापि पुत्रा द्युतिमतस्तु वै ।
कुशलो मनुगश्चोष्णः पीवरश्चान्धकारकः ।
मुनिश्च दुन्दुभिश्चैव सुता द्युतिमतस्तु वै ॥ २१ ॥
तेषां स्वनामभिर्देशाः क्रौञ्चद्वीपाश्रयाः शुभाः ।
उष्णस्योष्णः स्मृतो देशः पीवरस्यापि पीवरः ॥ २२ ॥
अन्धकारकदेशस्तु अन्धकारश्च कीर्त्यते ।
मुनेस्तु मुनिदेशो वै दुन्दुभेर्दुन्दुभिः स्मृतः ।
एते जनपदाः सप्त क्रौञ्चद्वीपे तु भास्वराः ॥ २३ ॥
ज्योतिष्मतः कुशद्वीपे सप्तैते सुमहौजसः ।
उद्भिदो वेणुमांश्चैव स्वैरथो लवणो धृतिः ।
षष्ठः प्रभाकरश्चैव सप्तमः कपिलः स्मृतः ॥ २४ ॥
उद्भिदं प्रथमं वर्षं द्वितीयं वेणुमण्डलं ।
तृतीयं स्वैरथाकारं चतुर्थं लवणं स्मृतं ॥ २५ ॥
पञ्चमं धृतिमद्वर्षं षष्ठं वर्षं प्रभाकरं ।
सप्तमं कपिलं नाम कपिलस्य प्रकीर्त्तितं ॥ २६ ॥
तेषां द्वीपाः कुशद्वीपे तन्नामान एव तु ।
आश्रमाचारयुक्ताभिः प्रजाभिः समलङ्कृताः ॥ २७ ॥

शाल्मलस्येश्वराः सप्त पुत्रास्ते तु वपुष्मतः।
श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा।
वैद्युतो मानसश्चैव सुप्रभः सप्तमस्तथा ॥ २८ ॥
श्वेतस्य श्वेतदेशस्तु रोहितस्य च रोहितः।
जीमूतस्य च जीमूतो हरितस्य च हारितः ॥ २९ ॥
वैद्युतो वैद्युतस्यापि मानसस्यापि मानसः।
सुप्रभः सुप्रभस्यापि सप्तैते देशपालकाः ॥ ३० ॥
सप्तद्वीपे तु वक्ष्यामि जम्बुद्वीपादनन्तरं।
सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरा नृपाः ॥ ३१ ॥
ज्येष्ठः शान्तभयस्तेषां सप्तवर्षाणि तानि वै।
तस्माच्छान्तभयाच्चैव(१) शिशिरस्तु सुखोदयः।
आनन्दश्च ध्रुवश्चैव क्षेमकश्च शिवस्तथा ॥ ३२ ॥
तानि तेषां सनामानि सप्तवर्षाणि भागशः।
निवेशितानि तैस्तानि पूर्वं स्वायम्भुवेऽन्तरे ॥ ३३ ॥
मेधातिथेस्तु पुत्रैस्तैः सप्तद्वीपनिवासिभिः।
वर्णाश्रमाचारयुक्ताः प्लक्षद्वीपे प्रजाः कृताः ॥ ३४ ॥
प्लक्षद्वीपादिकेष्वेव शाकद्वीपान्तरेषु वै।
ज्ञेयः पञ्चसु धर्मो वै वर्णाश्रमविभागशः ॥ ३५ ॥
सुखमायुश्च रूपञ्च बलं धर्मश्च नित्यशः।
पञ्चस्वेतेषु द्वीपेषु सर्वं साधारणं स्मृतं ॥ ३६ ॥
सप्तद्वीपपरिक्रान्तं(२) जम्बूद्वीपं निबोधत।

१ शाल्मलश्चैवेति क०, घ० च।
२ प्लक्षद्वीपपरिक्रान्तमिति ख०, घ० च।



अग्नीध्रं ज्येष्ठदायादं कन्यापुत्रं महाबलं।
प्रियव्रतोऽभ्यषिञ्चत्तं जम्बूद्वीपेश्वरं नृपं ॥ ३७ ॥
तस्य पुत्रा बभूवुर्हि प्रजापतिसमौजसः।
ज्येष्ठो नाभिरितिख्यातस्तस्य किंपुरुषोऽनुजः ॥ ३८ ॥
हरिवर्षस्तृतीयस्तु चतुर्थोऽभूदिलावृतः।
रम्यः स्यात्पञ्चमः पुत्रो हरिण्मान् षष्ठ उच्यते ॥ ३९ ॥
कुरुस्तु सप्तमस्तेषां भद्राश्वो ह्यष्टमः स्मृतः।
नवमः केतुमालस्तु तेषां देशान्निबोधत ॥ ४० ॥
नाभेस्तु दक्षिणं वर्षं हिमाह्वन्तु(१) पिता ददौ।
हेमकूटन्तु यद्वर्षं ददौ किंपुरुषाय तत् ॥ ४१ ॥
नैषधं यत् स्मृतं वर्षं हरिवर्षाय तद्ददौ।
मध्यमं यत्सुमेरोस्तु स ददौ तदिलावृते ॥ ४२ ॥
नीलन्तु यत्स्मृतं वर्षं रम्यायैतत् पिता ददौ।
श्वेतं यदुत्तरं तस्मात् पित्रा दत्तं हरिण्मते(२) ॥ ४३ ॥
यदुत्तरं शृङ्गवतो वर्षं तत् कुरवे ददौ।
वर्षं माल्यवतश्चापि भद्राश्वाय न्यवेदयेत् ॥ ४४ ॥
गन्धमादनवर्षन्तु केतुमाले न्यवेदयत्।
इत्येतानि महान्तीह नववर्षाणि भागशः ॥ ४५ ॥
अग्नीध्रस्तेषु सर्वेषु पुत्रांस्तानभ्यषिञ्चत।
यथाक्रमं स धर्मात्मा ततस्तु तपसि स्थितः ॥ ४६ ॥
इत्येतैः सप्तभिः कृत्स्नाः सप्तद्वीपा निवेशिताः।

१ प्रीत्या तस्मै इति ख०।
२ हरिण्मतः स्थाने सर्वत्र हिरण्मदिति पाठः ख०, घ० चिह्नितपुस्तके वर्त्तते।

प्रियव्रतस्य पुत्रैस्तैः पौत्रैः स्वायम्भुवस्य तु ॥ ४७ ॥
यानि किम्पुरुषाद्यानि वर्षाण्यष्टौ शुभानि तु ।
तेषां स्वभावतः सिद्धिः सुखप्राया ह्ययत्नतः ॥ ४८ ॥
विपर्य्ययो न तेष्वस्ति जरामृत्युभयं न च ।
धर्म्माधर्म्मौ न तेष्वास्तां नोत्तमाधममध्यमाः ।
न तेष्वस्ति युगावस्था त्रेतेष्वेव तु सर्व्वगः ॥ ४९ ॥
नाभेर्हिं सर्गं व्यख्यामि हिमाह्वे तन्निबोधत ।
नाभिस्त्वजनयत् पुत्रं मरुदेव्यां महाद्युतिः(१) ।
ऋषभं पार्थिवश्रेष्ठं सर्व्वक्षत्रस्य पूर्व्वजं ॥ ५० ॥
ऋषभाद्भरतो जज्ञे वीरः पुत्रशताग्रजः ।
सोऽभिषिच्याथ भरतः पुत्रं प्राव्राज्यमास्थितः ॥ ५१ ॥
हिमाह्वं दक्षिणं वर्षं भरताय न्यवेदयत् ।
तस्माच्चद्भारतं वर्षं तस्य नाम्ना विदुर्बुधाः ॥ ५२ ॥
भरतस्यात्मजो विद्वान् सुमतिर्नाम धार्म्मिकः ।
बभूव तस्मिंस्तद्राज्यं भरतः संन्ययोजयत् ।
पुत्रसंक्रामितश्रीको वनं राजा विवेश सः ॥ ५३ ॥
तेजसस्तु सुतश्चापि प्रजापतिरमित्रजित् ।
तेजसस्यात्मजो विद्वान् इन्द्रद्युम्न इतिश्रुतः ॥ ५४ ॥
परमेष्ठी सुतश्चाथ निधने तस्य शोभनः ।
प्रतीहारकुले तस्य नाम्ना जज्ञे तदन्वयात् ।
प्रतिहर्त्तेति विख्यातो जज्ञे तस्यापि धीमतः ॥ ५५ ॥

१ महाद्युतिमिति ङ० ।



उन्नेता प्रतिहर्त्तुस्तु भुवस्तस्य सुतः स्मृतः ।
उद्गीथस्तस्य पुत्रोऽभूत्प्रतावित्यपि(१) तत्सुतः ॥ ५६ ॥
प्रतावेस्तु(२) विभुः पुत्रः पृथुस्तस्य सुतो मतः ।
पृथोश्चापि सुतो नक्तो नक्तस्यापि गयः स्मृतः ॥ ५७ ॥
गयस्य तु नरः पुत्रो नरस्यापि सुतो विराट् ।
विराट्सुतो महावीर्य्यो धीमांस्तस्य सुतोऽभवत् ॥ ५८ ॥
धीमतश्च महान् पुत्रो महतश्चापि भौवनः ।
भौवनस्य सुतस्त्वष्टा अरिजस्तस्य चात्मजः ॥ ५९ ॥
अरिजस्य रजः पुत्रः शतजिद्रजसो मतः ।
तस्य पुत्रशतन्त्वासीद्राजानः सर्व एव ते ॥ ६० ॥
विश्वज्योतिःप्रधाना यैस्तैरिमा वर्द्धिताः प्रजाः ।
तेरिदं भारतं वर्षं सप्तखण्डं कृतं पुरा(३) ॥ ६१ ॥
तेषां वंशप्रसूतैस्तु भुक्तेयं भारती धरा ।
कृतत्रेतादियुक्तानि युगाख्यान्येकसप्ततिः ॥ ६२ ॥
येऽतीतास्तैर्य्युगैः सार्द्धं राजानस्ते तदन्वयाः ।
स्वायम्भुवेऽन्तरे पूर्व्वं शतशोऽथ सहस्रशः ॥ ६३ ॥
एष स्वायम्भुवः सर्गो येनेदं पूरितं जगत् ।
ऋषिभिर्दैवतैश्चापि पितृगन्धर्व्वराक्षसैः ॥ ६४ ॥
यक्षभूतपिशाचैश्च मनुष्यमृगपक्षिभिः ।
तेषां सृष्टिरियं लोके युगैः सह विवर्त्तते ॥ ६५ ॥

इति श्रीमहापुराणे वायुप्रोक्ते स्वायम्भुववंशानुकीर्त्तनं नाम त्रयस्त्रिंशोऽध्यायः ।

१ प्रगाथस्यापीति ख० । प्रस्तावित्यापीति ङ० ।
२ प्रगाथस्येति ख० । प्रस्तावेस्त्विति ङ० । ३ सप्तद्वीपमिदान्त्विकमिति घ०, ङ० च ।

# अथ चतुस्त्रिंशोऽध्यायः।

## जम्बुद्वीपवर्णनं।

———000———

ऋषय ऊचुः। एवं प्रजासन्निवेशं श्रुत्वा च ऋषिपुङ्गवः।
पप्रच्छ निपुणः सूतं पृथिव्यायामविस्तरौ ॥ १ ॥
कति द्वीपाः समुद्रा वा पर्व्वताश्च कति प्रभो।
कियन्ति चैव वर्षाणि तेषु नद्यश्च काः स्मृताः ॥ २ ॥
महाभूतप्रमाणञ्च लोकालोकौ तथैव च।
पर्य्यायपरिमाणञ्च गतिश्चन्द्रार्कयोस्तथा।
एतत् प्रब्रूहि नः सर्व्वं विस्तरेण यथा तथा ॥ ३ ॥
सूत उवाच। अत ऊर्द्धं प्रवक्ष्यामि पृथिव्यायामविस्तरं।
सङ्ख्यायैव समुद्राणां द्वीपानाञ्चैव विस्तरं ॥ ४ ॥
यावन्ति चैव वर्षाणि तेषु नद्यश्च याः स्मृताः।
महाभूतप्रमाणञ्च लोकालोकौ तथैव च।
पर्य्यायपरिमाणञ्च(१) गतिश्चन्द्रार्कयोस्तथा ॥ ५ ॥
द्वीपभेदसहस्राणि सप्तस्वन्तर्गतानि वै।
न शक्यन्ते प्रमाणेन वक्तुं वर्षशतैरपि ॥ ६ ॥
सप्तद्वीपन्तु वक्ष्यामि चन्द्रादित्यग्रहैः सह।
येषां मनुष्यास्तर्केण प्रमाणानि प्रचक्षते ॥ ७ ॥
अचिन्त्याः खलु ये भावा न तांस्तर्केण भावयेत्॥
प्रकृतिभ्यः परं यच्च तन्नित्यञ्च प्रचक्ष्यते(२) ॥ ८ ॥

१ पर्य्यायपरिमाणञ्चेति ख०। २ प्रभाषत इति घ०, ङ० च।



नववर्षं प्रवक्ष्यामि जम्बूद्वीपं यथा तथा।
विस्तरान् मण्डलाच्चैव योजनैस्तन्निबोधत ॥ ९ ॥
शतमेकं सहस्राणां योजनानां प्रमाणतः।
नानाजनपदाकीर्णैः पुरैश्च विविधैः शुभैः ॥ १० ॥
सिद्धचारणगन्धर्व्वपर्व्वतैरुपशोभितं।
सर्व्वधातुनिबद्धैश्च शिलाजालसमुच्चयैः।
पर्व्वतप्रभवाभिश्च नदीभिः पर्व्वतैस्तथा ॥ ११ ॥
जम्बूद्वीपः पृथुः श्रीमान् सर्व्वतः परिवारितः।
नवभिश्चावृतः सर्व्वैर्भुवनैर्भूतभावनैः।
लवणेन समुद्रेण सर्व्वतः परिवारितः ॥ १२ ॥
जम्बूद्वीपस्य विस्तारात् समेन तु समन्ततः।
प्रागायताः सुपर्व्वाणः षडिमे वर्षपर्व्वताः।
अवगाढ़ा उभयतः समुद्रौ पूर्व्वपश्चिमौ ॥ १३ ॥
हिमप्रायश्च हिमवान् हेमकूटश्च हेमवान्।
तरुणादित्यवर्णाभो हैरण्यो निषधः स्मृतः ॥ १४ ॥
चातुर्वर्ण्यस्तु सौवर्णो मेरुश्चोच्चतमः स्मृतः।
मृताकृतिप्रमाणश्च(१) चतुरस्रः समुच्छ्रितः ॥ १५ ॥
नानावर्णस्तु पार्श्वेषु प्रजापतिगुणान्वितः।
नाभिबन्धनसम्भूतो ब्रह्मणोऽव्यक्तजन्मनः ॥ १६ ॥
पूर्व्वतः श्वेतवर्णोऽसौ ब्राह्मण्यं तस्य तेन तत्।

१ चतुर्श्चप्रमाणश्चेति ख०।

पीतश्च दक्षिणेनासौ तेन वैश्यत्वमिष्यते(१) ॥ १७ ॥
भृङ्गपत्रनिभश्चासौ पश्चिमेन महाबलः।
तेनास्य शूद्रता दृष्टा मेरोर्नानार्थकारणात् ॥ १८ ॥
पार्श्वमुत्तरतस्तस्य रक्तवर्णं स्वभावतः।
तेनास्य क्षत्रता च स्यादिति वर्णाः प्रकीर्तिताः।
व्यक्ताः स्वभावतः प्रोक्तो वर्णतः परिमाणतः ॥ १९ ॥
नीलश्च वैदूर्य्यमयः श्वेतशृङ्गो हिरण्मयः।
मयूरवर्हवर्णस्तु शातकौम्भस्तु शृङ्गवान् ॥ २० ॥
एते पर्व्वतराजानः सिद्धचारणसेविताः।
तेषामन्तरविष्कम्भो नवसाहस्र उच्यते ॥ २१ ॥
मध्ये त्विलावृतं यस्तु महामेरोः समन्ततः।
नवैव तु सहस्राणि विस्तीर्णः पर्व्वतस्तु सः।
मध्ये तस्य महामेरोर्निर्धूम इव पावकः ॥ २२ ॥
वैद्युतं दक्षिणं मेरोरुत्तरार्द्धं तथोत्तरं।
वर्षाणि यानि सप्तात्र तेषां ये वर्षपर्व्वताः।
द्वे द्वे सहस्रे विस्तीर्णा योजनानि समुच्छ्रयात् ॥ २३ ॥
जम्बूद्वीपस्य विस्तारात्तेषामायाम उच्यते।
योजनानां सहस्राणि शते द्वे मध्यमौ गिरी ॥ २४ ॥
नीलश्च निषधश्चैव ताभ्यां हीनास्तु येऽपरे(२)।
श्वेतश्च हेमकूटश्च हिमवान् शृङ्गवांश्च यः ॥ २५ ॥
नवतिर्द्वावशीतिर्द्वौ सहस्राण्यायतास्तु ये।

१ वैश्यत्वमीक्ष्यत इति ख०।
२ द्वावेतौ च समन्विताविति ख०।



तेषां मध्ये जनपदास्तानि वर्षाणि सप्त वै ॥ २६ ॥
सम्यातविषमैस्तैस्तु पर्व्वतैराहृतानि च।
सन्ततानि नदीभेदैरगम्यानि परस्परं।
वसन्ति तेषु सत्वानि नाना जातीनि भागशः ॥ २७ ॥
इदं हैमवतं वर्षं भारतं नाम विश्रुतं।
हेमकूटं परं तस्मान्नाम्ना किंपुरुषं स्मृतं ॥ २८ ॥
नैषधं हेमकूटन्तु हरिवर्षं तदुच्यते।
हरिवर्षात्परश्चैव मेरोश्च तदिलावृतं ॥ २९ ॥
इलावृतपरं नीलं रम्यकं नाम विश्रुतं।
रम्यात्परतरं श्वेतं विश्रुतन्तद्धिरण्मयं।
हिरण्मयात्परश्चापि शृङ्गवांस्तु कुरु स्मृतं ॥ ३० ॥
धनुःसंस्थे च विज्ञेये द्वे वर्षे दक्षिणोत्तरे।
दीर्घाणि तत्र चत्वारि मध्यमन्तदिलावृतं ॥ ३१ ॥
अर्वाक् च निषधस्याथ वैद्युतं दक्षिणं स्मृतं।
परं नीलवतो यच्च वैद्युतन्तु तदुत्तरं।
वैद्युतं दक्षिणे त्रीणि वर्षाणि त्रीणि चोत्तरे ॥ ३२ ॥
तयोर्मध्ये तु विज्ञेयं मेरुमध्यमिलावृतं।
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ॥ ३३ ॥
उद्गायतो महाशैलो माल्यवान्नाम पर्व्वतः।
योजनानां सहस्रोरुरानीलनिषधायतः।
आयामतश्चतुस्त्रिंशत्सहस्राणि प्रकीर्तितः ॥ ३४ ॥
तस्य प्रतीच्यां विज्ञेयः पर्वतो गन्धमादनः।
आयामादथ विस्तारान्माल्यवानिति विश्रुतः ॥ ३५ ॥

परिमण्डलयोर्मध्येमेरुरुत्तमपर्वतः।
चतुर्वर्णः सुसौवर्णश्चतुरस्रः समुच्छ्रितः।
अव्यक्ता धातवः सर्व्वे समुत्पन्ना जलादयः॥ ३६॥
अव्यक्तात् पृथिवीपद्मं मेरुपर्वतकर्णिकं।
चतुष्पथं समुत्पन्नं व्यक्तं पञ्चगुणं महत्॥ ३७॥
ततः सर्व्वाः समुत्पन्ना दक्षयो द्विजसत्तमाः।
नैककल्पार्जितैः पुण्यैर्विविधैः प्रागुपार्जितैः॥ ३८॥
कृतात्मभिर्विनीतात्मा महात्मा पुरुषोत्तमः।
महादेवो महायोगी जगज्ज्येष्ठो महेश्वरः।
सर्वलोकगतोऽनन्तो ह्यमूर्त्तित्वादजायत॥ ३९॥
न तस्य प्राकृतामूर्त्तिर्मांसमेदोऽस्थिसम्भवा।
योगाच्चैवेश्वरत्वाच्च सर्व्वात्मागत एव(१) सः॥ ४०॥
तन्निमित्तं समुत्पन्नं लोकपद्मं सनातनं।
कल्पशेषस्य तस्यादौ कालस्य गतिरीदृशी॥ ४१॥
तस्मिन् पद्मे समुत्पन्नो देवदेवश्चतुर्मुखः।
प्रजापतिपतिर्ब्रह्मा ईशानो जगतः प्रभुः॥ ४२॥
तस्य वीजानि सर्गो हि पुष्करस्य यथार्थवत्।
कृत्स्नः प्रजानिसर्गेण विस्तरेणेह कथ्यते॥ ४३॥
यदङ्गं वैष्णवं कार्य्यं ततस्तन्नाभितोऽभवत्।
पद्माकारा समुत्पन्ना पृथिवी सवनद्रुमा॥ ४४॥
तदस्य लोकपद्मस्य विस्तरेण प्रकाशितं।

१ सर्वथागत एवेति ख०।



वर्णमानं विभागेन क्रमशः शृणुत द्विजाः॥ ४५॥
महाद्वीपास्तु विख्याताश्चत्वारः पत्रसंस्थिताः।
ततः कर्णिकसंस्थानो मेरुर्नाम महाबलः॥ ४६॥
नानावर्णेषु पार्श्वेषु पूर्वतः श्वेत उच्यते।
पीतन्तु दक्षिणं तस्य शृङ्गं कृष्णं तथाऽपरं॥ ४७॥
उत्तरं तस्य रक्तं वै शोभिवर्णसमन्वितं।
मेरुस्तु शोभते शुभ्रो राजवत्स तु धिष्ठितः॥ ४८॥
तरुणादित्यवर्णाभो विधूम इव पावकः।
चतुरशीतिसाहस्र उत्सेधेन प्रकीर्त्तितः॥ ४९॥
प्रविष्टः षोड़शाधस्ताद्विस्तृतस्तावदेव तु।
स शरावस्थितः पूर्व्वं द्वात्रिंशन्मूर्द्धि विस्तृतः॥ ५०॥
विस्तारात् त्रि गुणश्चास्य परिणाहः समन्ततः।
मण्डलेन प्रमाणेन व्यस्रेऽर्द्धन्तु तद्दिश्यते॥ ५१॥
चत्वारिंशत्सहस्राणि योजनानां समन्ततः।
अष्टाभिरधिकानि स्युः चतुरस्रे माने प्रकीर्त्तितं॥ ५२॥
चतुरस्रेण मानेन परिणाहः समन्ततः।
चतुःषष्टिसहस्राणि योजनानां विधीयते॥ ५३॥
स पर्वतो महादिव्यो दिव्यौषधिसमन्वितः।
भुवनैरावृतः सर्वो जातरूपमयैः शुभैः॥ ५४॥
तत्र देवगणाः सर्वे गन्धर्वोरगराक्षसाः।
शैलराजैः प्रदृश्यन्ते शुभाश्चाप्सरसाङ्गणाः॥ ५५॥
स तु मेरुः परिवृतो भुवनैर्भूतभावनः।
चत्वारो यस्य देशा वै नानापार्श्वेष्वधिष्ठिताः॥ ५६॥

भद्राश्वो भरतश्चैव केतुमालश्च पश्चिमः ।
उत्तराः कुरवश्चैव कृतपुण्यप्रतिश्रयाः ॥ ५७ ॥
कर्णिका तस्य पद्मस्य समन्तात्परिमण्डला ।
योजनानां सहस्राणि नवतिः षट् प्रकीर्त्तिताः ।
चत्वारश्चाप्यशीतिश्च अन्तरान्तरधिष्ठिताः ॥ ५८ ॥
त्रिशतञ्च सहस्राणि योजनानां प्रमाणतः ।
तस्य केशरजालानि विस्तीर्णानि समन्ततः ॥ ५९ ॥
शतसाहस्रिकायामा साशीतिपृथुलायता ।
चत्वारि तस्य पत्राणि योजनानाञ्चतुर्दिशं ॥ ६० ॥
तत्र याऽसौ मया पूर्वं कर्णिकेत्यभिशब्दिता ।
तां वर्ण्यमानामेकाग्राः समासेन निबोधत ॥ ६१ ॥
शताश्रिमेनं मेनेऽत्रिः सहस्राश्रिमृषिर्भृगुः ।
अष्टाश्रिमेनं सावर्णिश्चतुरस्रन्तु भागुरिः ॥ ६२ ॥
वर्षायणिस्तु सामुद्रं शरावञ्चैव गालवः ।
ऊर्द्ध्ववेणीकृतज्ञार्य्यः क्रोष्टुकिः परिमण्डलं ॥ ६३ ॥
यद्यदृश्यस्य हि यत्पार्श्वं पर्वताधिपतेर्ऋषिः ।
तत्तदेवास्य वेदासौ ब्रह्मैनं वेद कृत्स्नशः ॥ ६४ ॥
मणिरत्नमयं चित्रं नानावर्णप्रभायुतं ।
अनेकवर्णनिचयं सौवर्णमरुणप्रभं ॥ ६५ ॥
कान्तं सहस्रपर्वाणं सहस्रोदककन्दरं ।
सहस्रशतपत्रन्तं विद्धि मेरुवरोत्तमं ॥ ६६ ॥
मणिरत्नार्पितस्तम्भैर्मणिचित्रितवेदिकैः ।
सुवर्णमणिचित्राङ्गं तथा विद्रुमतोरणैः ॥ ६७ ॥



विमानयानैः श्रीमद्भिः शतसङ्ख्यैर्दिवौकसां ।
प्रभादीपितपर्य्यन्तं मेरुं पर्वणि पर्वणि ॥ ६८ ॥
तस्य पर्वसहस्रेऽस्मिन् नानाश्रयविभूषिते(१) ।
सर्वदेवनिकायानि सन्निविष्टान्यनेकशः ॥ ६९ ॥
समावसन्नीडतले(२) देवदेवश्चतुर्मुखः ।
ब्रह्मा ब्रह्मविदां श्रेष्ठो वरिष्ठस्त्रिदिवौकसां ॥ ७० ॥
महाभुवनसम्भूतैः सर्व्वैः कामफलप्रदैः(३) ।
महासुरसहस्रैस्तं दिव्यनेकसमाकुलं ॥ ७१ ॥
तत्र ब्रह्मसभा रम्या ब्रह्मर्षिगणसेविता ।
नाम्ना मनोवती नाम सर्वलोकेषु विश्रुता ॥ ७२ ॥
तत्रेशानस्य देवस्य सहस्रादित्यवर्चसं ।
महाविमानं संस्थाप्य महिम्ना वर्तते सदा ॥ ७३ ॥
तत्र सर्षिगणा देवाश्चतुर्व्वक्त्रस्य ते तदा(४) ।
तदेव तेजसां राशिर्दैवानां तत्र कीर्त्यते ॥ ७४ ॥
तत्रास्ते श्रीपतिः श्रीमान् सहस्राक्षः पुरन्दरः ।
उपास्यमानस्त्रिदशैर्महायोगैः सुरर्षिभिः ॥ ७५ ॥
तत्र लोकपतेः स्थानमादित्यसमवर्चसः ।
महेन्द्रस्य महाराज्ञः सर्व्वसिद्धैर्नमस्कृतं ॥ ७६ ॥
तमिन्द्रलोकं लोकस्य ऋद्ध्या परमया युतं ।
दीप्यते त्वमरश्रेष्ठैस्त्रिदिवैर्नित्यसेवितं ॥ ७७ ॥

---

१ नानाश्रमविभूषिते इति ख० ।
२ तेषां मध्ये सुरश्रेष्ठ इति ख० ।
३ कामगुणोत्तरैः इति ङ० ।
४ चतुर्वक्त्रस्य सन्निधाविति ङ० ।

द्वितीयेऽप्यन्तरतटे वैदिश्ये पूर्व्वदक्षिणे ।
नानाधातुशतैश्चित्रैः सुरम्यमतितेजसं ॥ ७८ ॥
नैकरत्नार्थिततलमनेकस्तम्भसंयुतं ।
जाम्बूनदकृतोद्यानं नानारत्नसुवेदिकं ॥ ७९ ॥
कूटागारैर्विनिक्षिप्तमनेकैर्भवनोत्तमैः ।
महाविमानं प्रथितं भास्करं जातवेदसं ॥ ८० ॥
सा हि तेजोवती नाम हुताशस्य महासभा ।
साक्षात्तत्र सुरश्रेष्ठः सर्वदेवमुखोऽनलः ॥ ८१ ॥
शिखाशतसहस्राढ्यो ज्वालामाली विभावसुः ।
स्तूयते ह्रूयते चैव तत्र सर्षिगणैः सुरैः ॥ ८२ ॥
अधिदैवकृतं विप्रैर्विशेषः स तु उच्यते ।
सविभागश्च तेजश्च सर्व एव(१) न संशयः ॥ ८३ ॥
भोगान्तरमनुप्राप्त एकतेजो विभुः स्मृतः ।
पृथक्त्वञ्च हि युक्त्या तु कार्य्यकारणमिश्रितं ॥ ८४ ॥
तमग्निं लोकलोकज्ञैस्तद्दीप्यैस्तत्परात्मकैः ।
महात्मभिर्महासिद्धैर्महाभागैर्नमस्कृतं ॥ ८५ ॥
तृतीयेऽप्यन्तरतटे एवमेव महासभा ।
वैवस्वतस्य विज्ञेया लोके ख्याता सुसंयमा ॥ ८६ ॥
तथा चतुर्थदिग् देशे नैर्ऋत्याधिपतेः सभा ।
नाम्ना कृष्णाङ्गना नाम विरूपाक्षस्य धीमतः ॥ ८७ ॥
पञ्चमेऽप्यन्तरतटे एवमेव महासभा ।

१ एक एवेति ख०, ङ० च ।



वैवस्वतस्य विज्ञेया नाम्ना शुभवती सती(१) ।
उदकाधिपतेः ख्याता वरुणस्य महात्मनः ॥ ८८ ॥
परोत्तरे तथा देशे षष्ठेऽन्तरतटे शिवे ।
वायोर्गन्धवती नाम सभा सर्वगुणोत्तरा ॥ ८९ ॥
सप्तमेऽप्यन्तरतटे नक्षत्राधिपतेः सभा ।
नाम्ना महोदया नाम शुद्धवैदूर्य्यवेदिका ॥ ९० ॥
तथाऽष्टमेऽन्तरतटे ईशानस्य महात्मनः ।
यशोवती नाम सभा तप्तकाञ्चनसुप्रभा ॥ ९१ ॥
महाविमानान्येतानि दिक्ष्वष्टासु शुभानि हि ।
अष्टानां देवमुख्यानामिन्द्रादीनां महात्मनां ॥ ९२ ॥
ऋषिभिर्देवगन्धर्वैरप्सरोभिर्महोरगैः ।
सेवितानि महाभागैरुपस्थानगतैः सदा ॥ ९३ ॥
नाकपृष्ठं दिवं स्वर्गमिति यैः परिपठ्यते ।
वेदवेदाङ्गविद्भिर्हि शब्दैः पर्य्यायवाचकैः ॥ ९४ ॥
तदेतत् सर्वदेवानामधिवासे कृतात्मनां ।
देवलोके गिरौ तस्मिन् सर्व्वश्रुतिषु गीयते(२) ॥ ९५ ॥
नियमैर्विविधैर्यज्ञैर्व्वहुभिर्नियतात्मभिः ।
पुण्यैरन्यैश्च विविधैर्नैकजातिशतार्जितैः ।
प्राप्नोति देवलोकं तं स स्वर्ग इति घोच्यते ॥ ९६ ॥
इति श्रीमहापुराणे वायुप्रोक्ते जम्बुद्वीपवर्णनं नाम
चतुस्त्रिंशोऽध्यायः ।

१ समेति घ० । २ श्रुतिषु परिगीयत इति क०

# अथ पञ्चत्रिंशोऽध्यायः।

———ooo(ॐ)ooo———

## जम्बुद्वीपवर्णनं।

सूत उवाच। यत्तद्वै कर्णिकामूलमिति वै संप्रकीर्तितं।
तद्योजनसहस्राणां सप्ततीनामधः स्मृतं ॥ १ ॥
चत्वारिंशत्तथाष्टौ च सहस्राण्यत्र मण्डलं।
शैलराजावृतं रम्यं मेरुमूलमिति श्रुतिः ॥ २ ॥
तेषां गिरिसहस्राणामनेकेषु महोच्छ्रिताः।
दिक्षु सर्वासु पर्य्यन्तैर्मर्य्यादाः पर्वताः स्मृताः ॥ ३ ॥
निकुञ्जकन्दरनदीगुहानिर्झरशोभिताः।
बहुप्रासादकूटकैस्तटैश्च कुसुमोज्ज्वलैः ॥ ४ ॥
नितम्बपुष्पमालीघैः सानुभिर्धातुमण्डितैः।
शिखरैर्हेमकपिलैर्नैकप्रस्रवणावृतैः।
शोभिता गिरयः सर्वे पुष्टैरत्नसमर्पितैः ॥ ५ ॥
विहङ्गशतसंयुष्टैः कुञ्जैरनुपमैरपि।
सिंहशार्दूलशरभैर्नैकैश्चामरवारणैः।
नानावर्णकृतिधरैः सेविता विविधैर्नगैः(१) ॥ ६ ॥
सप्ताभ्रहरिकृष्णाङ्गमेकैकं दशपर्व्वतं(२)।
बाह्यमाभ्यन्तरा ये तु त्रिवाहास्तु समाः स्मृताः ॥ ७ ॥
जठरो देवकूटश्च पूर्वस्यां दिशि पर्वतौ।

१ सेविता विविधैर्नागैस्तथा पक्षिगणैरपीति ख०।

२ श्लोकोऽर्द्धमिदं न समीचीनम्।



तौ दक्षिणोत्तरायामावानीलनिषधायतौ ॥ ८ ॥
कैलासो हिमवांश्चैव दक्षिणोत्तरपर्वतौ।
पूर्वपश्चायतावेतावर्णवान्तव्यवस्थितौ ॥ ९ ॥
योऽसौ मेरुर्द्विजश्रेष्ठाः प्रांशुः कनकपर्वतः।
विष्कम्भं तस्य वक्ष्यामि तन्मे निगदतः शृणु ॥ १० ॥
महापादास्तु चत्वारो मेरोरथ चतुर्दिशं।
यैर्धृतत्त्वात् न चलति सप्तद्वीपवती मही ॥ ११ ॥
दशयोजनसाहस्र आयामस्तेषु पठ्यते।
देवगन्धर्वयक्षाणां नानारत्नोपशोभिताः(१)।
नैकनिर्झरवप्राढ्या रम्यकन्दरनिर्म्मिताः ॥ १२ ॥
नितम्बपुष्पकादम्बैः शोभिताश्चित्रसानवः।
मनःशिलादरीभिश्च हरितालतलैस्तथा ॥ १३ ॥
सुवर्णमणिचित्राभिर्गुहाभिश्च समन्ततः।
शुक्लहिङ्गुलकप्रख्यैः काञ्चनैर्धातुमण्डितैः ॥ १४ ॥
वरकाञ्चनचित्रैश्च प्रवालैः समलङ्कृताः।
रुचिराः शतपर्व्वाणः सिद्धावासा मुदान्विताः।
महाविमानैः श्रीमद्भिः समन्तात्परिदीपिताः ॥ १५ ॥
पूर्वेण मन्दरो नाम दक्षिणे गन्धमादनः।
विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः ॥ १६ ॥
तेषां सहस्रशृङ्गेषु वज्रवैदूर्य्यवेदिकाः।
शाखासहस्रकलिताः सुमूलाः सुप्रतिष्ठिताः ॥ १७ ॥
स्निग्धैर्नीलैर्घनैः पर्णैः सच्छत्रविविधाश्रयाः।

१ देवगन्धर्वचरिता नानारत्नविभूषिता इति घ०, ङ० च।

अनेकप्रजनोत्सेधा महापुष्पफलोपगाः ॥ १८ ॥
यक्षगन्धर्वसेव्याश्च सेविताः सिद्धचारणैः ।
महावृक्षाः समुत्पन्नाश्चत्वारो दीपकेतवः ॥ १९ ॥
मन्दरस्य गिरेः शृङ्गे महावृक्षः स केतुराट् ।
आलम्बशाखाशिखरः कन्दरस्यैव पादपः ॥ २० ॥
महाकुम्भप्रमाणैस्तु पुष्पैर्विकचकेसरैः ।
महागन्धैर्मनोज्ञैश्च शोभितः सर्वकालजैः ॥ २१ ॥
सहस्रमधिकं सोऽथ गन्धेनापूरयद् दिशः ।
योजनानां समन्ताद्वै मन्दमारुतवीजितः ॥ २२ ॥
वरकेतुरेव प्रथितो भद्राश्वो नाम यो द्विजाः ।
यत्र साक्षात् हृषीकेशः सिद्धसङ्घैर्महीयते ॥२३ ॥
तस्य रुद्रकदम्बस्य तदा श्वेतहरो हरिः ।
प्राप्तवानमरश्रेष्ठः स तत्र सहितः पुरा ॥ २४ ॥
तेन चालोकितं सर्वं द्वीपं द्विपदनायकाः ।
यस्य नाम्ना समाख्यातो भद्राश्वो नामनामतः ॥ २५ ॥
दक्षिणस्यापि शैलस्य शिखरे देवसेविता ।
जम्बूः सदा पुष्पफला सदा माल्योपशोभिता ॥ २६ ॥
महामूलैर्महास्कन्धैः स्निग्धवर्णैर्विभूषिता ।
नवैः सदापुष्पफलैः शाखाभिश्चोपशोभिता ॥ २७ ॥
तस्या ह्यतिप्रमाणानि स्वादूनि च मृदूनि च ।
फलान्यमृतकल्पानि पतन्ति गिरिमूर्धनि ॥ २८ ॥
तस्माद्गिरिवरप्रस्थात् पुनः प्रस्यन्दवाहिनी ।
नदी जम्बूनदी नाम प्रवृत्ता मधुवाहिनी ॥ २९ ॥



तत्र जम्बूनदन्नाम सुवर्णं ज्वलनप्रभं ।
देवालङ्कारमतुलं जायते पापनाशनं ॥ ३० ॥
देवदानवगन्धर्वा यक्षराक्षसपन्नगा ।
यत् पिवन्त्यमृतप्रख्यं मधु जाम्बूरसस्रवं ॥ ३१ ॥
स केतुर्दक्षिणे द्वीपे जम्बूर्लोकेषु विश्रुता ।
यस्या नाम्ना स विख्यातो जम्बूद्वीपः सनातनः ॥ ३२ ॥
विपुलस्यापि शैलस्य पश्चिमस्य महात्मनः ।
जातः शृङ्गेऽतिसुमहानश्वत्थस्यैव पादपः ॥ ३३ ॥
विलम्बिवरमालाढ्यः सुवर्णमणिवेदिकः ।
महोच्चस्कन्धविटपो नैकसत्वगुणालयः ॥ ३४ ॥
कुम्भप्रमाणैः सुखदैः फलैः सर्वर्तुकैः शुभैः ।
स केतुः केतुमालानां देवगन्धर्वसेवितः ॥ ३५ ॥
केतुमालेति च यथा तस्या नाम प्रकीर्तितं ।
तन्निबोधत विप्रेन्द्रा निरुक्तं नाम कर्मतः ॥ ३६ ॥
क्षीरोदमथने वृत्ते दैत्यपक्षे पराजिते ।
महासमरसम्मर्दवृत्तक्षोभविमर्दिता ॥ ३७ ॥
सहस्राक्षेण विहिता माला तस्य सुतानिता ।
तस्य स्कन्धे समासक्त्या ह्यश्वत्थस्य वनस्पतेः ॥ ३८ ॥
सा तथैव महागन्धा ह्यम्लाना सर्वकामिकी ।
इज्यते सुमहाभागा विविधैः सिद्धचारणैः ॥ ३९ ॥
तस्य केतोः सदा माला देवदत्ता विराजते ।
पवनेनेरिता दिव्यं वाति गन्धं मनोरमं ॥ ४० ॥
ताभ्यां नामाङ्कितो द्वीपः पश्चिमे बहुविस्तरः ।

केतुमाल इति ख्यातो दिवि चेह च सर्व्वगः(१ ॥ ४१ ॥
स्वपार्श्वयोत्तरे चापि शृङ्गे जातो महाद्रुमः ।
न्यग्रोधो विपुलस्कन्धोऽनेकयोजनमण्डलः ॥ ४२ ॥
माल्यदामकलापैश्च विविधैर्गन्धशालिभिः ।
शाखाविलम्बी शुशुभे सिद्धचारणसेवितः ॥ ४३ ॥
प्रवालकुसुमस्तोमैर्मधुपूर्णैः फलैः सदा ।
स ह्युत्तरकुरूणान्तु केतुवृक्षः प्रकाशते ॥ ४४ ॥
सनत् कुमारा वरजा मानसाः ब्रह्मणः सुताः ।
सप्त तत्र महाभागाः कुरवो नामविश्रुताः ॥ ४५ ॥
तत्र तैरागतज्ञानैः सत्वस्थैः पुण्यकीर्तिभिः ।
अक्षयं क्षेममपरं लोकं प्राप्तं सनातनं ॥ ४६ ॥
तेषां नामाङ्कितो द्वीपः सप्तानां वै महात्मनां ।
दिवि चेह च विख्याता उत्तराः कुरवः सदा ॥ ४७ ॥

इति श्रीमहापुराणे वायुप्रोक्ते जम्बुद्वीपवर्णनं नाम
पञ्चत्रिंशोऽध्यायः ।

---

१ सर्वत इति ख० ॥


LIST OF BOOKS FOR SALE
AT THE LIBRARY OF THE
ASIATIC SOCIETY OF BENGAL
*No. 57, Park Street, Calcutta,*
AND OBTAINABLE FROM
THE SOCIETY'S LONDON AGENTS, MESSRS. TRÜBNER & Co.,
57 AND 59, LUDGATE HILL, LONDON, E. C.

BIBLIOTHECA INDICA.

*Sanskrit Series.*

| | | |
|---|---|---|
| ttara Naishadha, 12 fasci. | Rs. | 7 8 |
| aitanya-chandrodaya, Nátaka, 3 fasci. | | 1 14 |
| rauta Sútra, A'svaláyana, 11 fasci. | | 6 14 |
| Látyáyana, 9 fasci. | | 5 10 |
| ankara Vijaya, 3 fasci. | | 1 14 |
| aisheśika Darsana, 5 fasci. | | 3 2 |
| ása-rúpa, 2 fasci. | | 1 14 |
| aushitaki Bráhmanopanishad, 2 fasci. | | 1 4 |
| ankhya-sára, 1 fasci. | | 0 10 |
| rihat Sañhitá, 7 fasci. | | 4 6 |
| alita-vistara, 6 fasci. | | 3 12 |
| aittiríya Bráhmana, 24 fasci. | | 15 0 |
| aittiríya Sañhitá, 29 fasci. | | 18 2 |
| aittiríya A'ranyaka, 11 fasci. | | 6 14 |
| aitri Upanishad, 3 fasci. | | 1 14 |
| A'svaláyana Grihya Sútra, 4 fasci. | | 2 8 |
| imánsá Darsana, 13 fasci. | | 8 2 |
| aindya Bráhmana, 19 fasci. | | 11 14 |
| opatha Bráhmana, 2 fasci. | | 1 10 |
| Atharvana Upanishads, 5 fasci. | | 3 2 |
| gni Purána, 14 fasci. | | 8 12 |
| áma Veda Sañhitá, 37 fasci. | | 23 2 |
| opála Tápaní, 1 fasci. | | 0 10 |
| risiñha Tápaní, 3 fasci. | | 1 14 |
| aturvarga Chintámani, 33 fasci. | | 20 10 |
| obhiliya Grihya Sútra, 9 fasci. | | 5 10 |
| ingala Chhandah Sútra, 3 fasci. | | 1 14 |
| aittiríya Prátiśákhiya, 3 fasci. | | 1 14 |
| rithiráj Rásu, by Chand Bardai, 3 fasci. | | 1 14 |
| ájatarangini, | | 4 0 |
| ahábhárata, vols. III. and IV., | | 40 0 |
| rána Sangraha, | | 1 0 |
| li Grammar, 2 fasci. | | 1 4 |
| aitreya A'ranyaka of the Rig Veda, 5 fasci. | | 3 2 |
| handogya Upanishad, English, 2 fasci. | | 1 4 |
| aittiríya &c., Upanishads, English, 2 fasci. | | 1 4 |
| ánkhya Aphorisms, English, 2 fasci. | | 1 4 |
| ahitya Darpana, English 4 fasci. | | 2 8 |
| rahma Sútra, English, | | 1 0 |
| Ítantra, 4 fasci. | | 4 0 |
| imandakiya Nítisára, 4 fasci. (Fas. 1, out of stock.) | | 2 8 |
| ámatí, 6 fasci. | | 3 12 |

Rasáyana of Śándalya, English, 1 fasc. ... ... ... Rs. 0
Váyu Puráṇa, 2 fasc. ... ... ... ... ... 1

## ARABIC AND PERSIAN SERIES.

Dictionary of Arabic Technical Terms, 20 fasc., complete, Rs. 25
Hadiyah-i-Shamdiyah, (Appendix to Do. Do. ... ... 1
Tabrid, Text, 4 fasc. ... ... ... ... ... 3
Nuzhat-ul-Fikr, ... ... ... ... ... ... 0
Futúh-ush-Sham, Wáqidí, 9 fasc. ... ... ... 5
Futúh-ul-Sham, Azadí, 4 fasc. ... ... ... ... 2
Maghazí, Wáqidí, 6 fasc. ... ... ... ... 3
Tárikh, 25 fasc., with supplement, ... ... ... ... 20
Tárikh-i-Firúz Sháhí, 7 fasc. ... ... ... ... 4
Tárikh-i-Kámil, complete in 3 fasc. ... ... ... 6
Tárikh-i-Yamíní, vols. I., II. and III., complete in 15 fasc. a 9
Tárikh-i-Tabarí, ... ... ... ... ... ... 3
Tárikh-i-Jahángírí, complete in 4 fasc. ... ... ... 1
Tárikh-i-Mubárak Sháhí, 3 fasc., with index, ... ... ... 8
Tárikh-i-Nizámí, 10 fasc., with index, ... ... ... ... 11
Muntakhabu-l-Lubáb, by Khafí Khán, 19 fasc., with index ... ... 12
Áín-i-Akbarí, Persian text, 4to., 22 fasc. ... ... ... ... 27
Áín-i-Akbarí, English translation by H. Blochmann, M. A., vol. I., ... 12
Tárikh-i-Rashídí, 13 fasc., complete, ... ... ... ... 17
Nizámí's Khiradnámah-i-Iskandarí, 2 fasc., complete, ... ... ... 2
Ahkámu-l-Mahájj, 15 fasc., with Index, ... ... ... ... 15
Muntakhab-i-Alamgírí, by Muhammad Sáqí, complete 6 fasc., with index, 3
Haft Asmá, history of the Persian Masnawí ... ... ... ... 1
Tabaqát-i-Náçirí, English translation by Raverty, 8 fasc. ... ... 8
Tabaqát-i-Náçirí, Persian text, 5 fasc. ... ... ... ... 3

## MISCELLANEOUS.

Journal of the Asiatic Society of Bengal from vols. XII to XVII, 1843-4
vols. XIX to XXI, 1850-52, to Subscribers at Re. 1 per number and
non-subscribers at Re. 1-8 per number; vols. XXVI, XXVII, 1857-
and vols. XXXIII to XLV, 1864-76, to Subscribers at 1-8 per numb
and to non-subscribers at Rs. 2 per number.
Asiatic Researches, vols. VII. to XII. and vols. XVII. to XX. each Rs. 10
Do. do. Index, ... ... ... ... ... 5
Catalogue of Fossil Vertebrata, ... ... ... ... 2
——— of Sanskrit Manuscripts, ... ... ... ... 1
——— of Arabic and Persian Manuscripts, ... ... ... 1
Tabarin Dictionary, ... ... ... ... ... ... 10
——— Grammar, ... ... ... ... ... ... 8
Indices to Sanskrit Manuscripts, 13 fasc. ... ... ... ... 13
Jalálain, Súfiyah. Edited by Dr. A. Sprenger, 8 vo. ... ... ... 1
Jawámi-ul-ilm-ir-riyází, 168 pages with 17 plates, 4 to. ... ... 2
Aborigines of India, by B. H. Hodgson, ... ... ... ... 3
Examination and Analysis of the Mackenzie Manuscripts, by the Rev. W. Taylor, ... ... ... ... ... ... 2 0
Han Koong Tsew, or the Sorrows of Han, by J. Francis Davis, ... 1
Ináyah, a Commentary on the Hidáyah, vols. II. IV., ... ... 26
Analysis of the Sher Chin, by Alexander Csoma de Körös, ... 1
Kimiyá-ul-ilm, ... ... ... ... ... ... 4
Kimiyat-ul-Islám, ... ... ... ... ... ... 4
Mushajjarihín, ... ... ... ... ... ... 3
Raisonné of the Society's Sanskrit MSS. No. I Grammar ... 2

MAY 15 1933

# BIBLIOTHECA INDICA,


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 434.




LIBRARY OF THE UNIVERSITY OF CALIFORNIA

वायुपुराणम् ।

# The Váyu Puráṇa:

A SYSTEM OF HINDU MYTHOLOGY AND TRADITION.

EDITED BY

RAJENDRALÁLA MITRA, LL.D., C.I.E.

FASCICULUS IV.

CALCUTTA.

PRINTED BY K. N. BHATTÁCHÁRYA, AT THE GANEŚA PRESS.

1880.

# अथ षट्त्रिंशोऽध्यायः ।

———ooo———

भुवनविन्यासः ।

सूत उवाच । तेषां चतुर्णां वक्ष्यामि शैलेन्द्राणां यथाक्रमं ।
अनुबन्धानि रम्याणि सर्वकालर्तुकानि च ॥ १ ॥
सारिकाभिर्मयूरैश्च चकोरैश्च मदोत्कटैः ।
शुकैश्च भृङ्गराजैश्च चित्रकैश्च समन्ततः ॥ २ ॥
जीवञ्जीवकनादैश्च हेमकानाञ्च नादितैः ।
मत्तकोकिलनादैश्च वल्गूनाञ्च निनादितैः(१) ॥ ३ ॥
सुग्रीवकाञ्चनरवैः कलविङ्करुतैस्तथा ।
कूजितान्तरशब्दैश्च सुरम्याणि च सर्वशः ॥ ४ ॥
मदोत्कटैर्मधुरैश्च भ्रमरैश्च महास्वनैः(२) ।
उपगीतवनान्तानि किन्नरैश्च क्वचित् क्वचित् ॥ ५ ॥
पुष्पवृष्टिं विमुञ्चन्ति मन्दमारुतकम्पिताः ।
तरवो यत्र दृश्यन्ते चारुपल्लवशोभिताः ॥ ६ ॥
स्तवकैर्मञ्जरीभिश्च ताम्रैः किशलयैस्तथा ।
मन्द्रवातवशाल्लोलैर्दोलयद्भिर्यतानि च ॥ ७ ॥
नानाधातुविचित्रैश्च कान्तरूपैः शिलाशतैः ।
शस्त्रैः क्वचिद् द्विजश्रेष्ठा विन्यस्तैः शोभितानि च ॥ ८ ।
देवदानवगन्धर्वैर्यक्षराक्षसपन्नगैः ।

१ मत्तकोकिलनादैश्चाधस्वनीनाञ्च नादितैरिति ख० ।
२ महास्वनैरिति ख० ।

सिद्धाप्सरोगणैश्चैव सेवितानि ततस्ततः ॥ ९ ॥
मनोहराणि चत्वारि देवाक्रीड़नकान्यथ ।
चतुर्दिशमुदाराणि नाम्ना शृणुत तानि मे ॥ १० ॥
पूर्वञ्चैत्ररथं नाम दक्षिणं नन्दनं वनं ।
वैभ्राजं पश्चिमं विद्यादुत्तरं सवितुर्वनं ॥ ११ ॥
महावनेषु चैतेषु निविष्टानि यथाक्रमं ।
अनुबन्धानि रम्याणि विहङ्गैः कूजितानि च ॥ १२ ॥
वनैर्विस्तीर्णतीर्थानि महापुण्यवनानि च ।
महानागाधिवासानि सेवितानि महात्मभिः ॥ १३ ॥
सुरसामलतोयानि शिवानि सुसुखानि च ।
सिद्धदेवासुरवरैरुपस्पृष्टजलानि च ॥ १४ ॥
कृत्रप्रमाणैर्विकचैर्महागन्धैर्मनोहरैः ।
पुण्डरीकैर्महापद्मैरुत्पलैः शोभितानि च ।
महासरांसि चत्वारि तानि वक्ष्यामि नामतः ॥ १५ ॥
अरुणोदं सरः पूर्वं दक्षिणं मानसं स्मृतं ।
सितोदं पश्चिमसरो महाभद्रन्तथोत्तरं ॥ १६ ॥
अरुणोदञ्च पूर्वेण ये च शैलास्ततः स्मृताः ।
तान् कीर्त्यमानांस्तत्त्वेन शृणुध्वं विस्तरान्मम ॥ १७ ॥
शीतान्तश्च कुमुञ्जश्च सुवीरश्चाचलोत्तमः ।
विकङ्को मणिशैलश्च(१) वृषभश्चाचलोत्तमः ॥ १८ ॥
महानीलोऽथ रुचकः सविन्दुर्मन्दरस्तथा ।

१ मणिशैलश्चेति घ० ।



वेणुमांश्च सुमेधश्च निषधो देवपर्वतः ॥ १९ ॥
इत्येते पर्वतवरा अन्ये च गिरयस्तथा ।
पूर्वेण मन्दरस्यैते सिद्धवासा उदाहृताः ॥ २० ॥
सरसो मानसस्येह दक्षिणा ये महाचलाः ।
ये कीर्त्तिता मया ते वै नामतस्तान्निबोधत ॥ २१ ॥
शैलस्त्रिशिखरश्चापि शिशिरश्चाचलोत्तमः(१) ।
कलिङ्गश्च पतङ्गश्च रुचकश्चैव सानुमान् ॥ २२ ॥
ताम्राभश्च विशाखश्च तथा श्वेतोदरो गिरिः ।
समूलो विषधारश्च रत्नधारश्च पर्वतः ॥ २३ ॥
एकशृङ्गो महामूलो गजशैलः पिशाचकः ।
पञ्चशैलोऽथ कैलासो हिमवांश्चाचलोत्तमः ॥ २४ ॥
इत्येते देवचरिता ह्युत्कृष्टाः पर्वतोत्तमाः ।
दिग्भागे दक्षिणे प्रोक्ता मेरोरमरवर्चसः ॥ २५ ॥
अपरेण सितोदस्य सरसो द्विजसत्तमाः ।
उत्तमा ये महाशैलास्तान् प्रवक्ष्ये यथाक्रमं ॥ २६ ॥
सुवक्त्राः शिखिशैलश्च कालो वैदूर्य्यपर्वतः ।
कपिलः पिङ्गलो रुद्रः(२) सुरसश्च महाचलः ॥ २७ ॥
कुमुदो मधुमांश्चैव अञ्जनो मुकुटस्तथा ।
कृष्णश्च पाण्डरश्चैव महस्रशिखरश्च ह ॥ २८ ॥
पारिपात्रश्च(३) शैलेन्द्रस्त्रिशृङ्गश्चाचलोत्तमः ।

१ शिखरश्चाचलोत्तम इति घ०, ङ० च ।
२ कुञ्जरो रुद्र इति ख० ।
३ पारियात्रश्चेति क० । पारिजातश्चेति घ०, ङ० च ।

इत्येते पर्वतवरा दिग्भागे पश्चिमे स्मृताः ॥ २८ ॥
महाभद्रस्य सरस उत्तरेणापि श्रीमतः ।
ये मया पूर्व्वताः प्रोक्तास्तान्वदिष्ये यथाक्रमं ॥ २० ॥
शङ्खकूटो महाशैलो वृषभो हंसपर्वतः ।
नागश्च कपिलश्चैव इन्द्रशैलश्च सानुमान् ॥ ३१ ॥
नीलः कनकशृङ्गश्च शतशृङ्गश्च पर्वतः ।
पुष्पको मेघशैलश्च विराजश्चाचलोत्तमः ।
जारुधिश्चैव(१) शैलेन्द्र इत्येते उत्तराः स्मृताः ॥ ३२ ॥
एतेषां शैलमुख्यानामन्तरेषु यथाक्रमं ।
स्थाल्योऽह्यन्तरद्रोण्यश्च सरांसि च निबोधत । ३३ ॥

इति श्रीमहापुराणे वायुप्रोक्ते भुवनविन्यासो
नाम षट्त्रिंशोऽध्यायः ।

---

१ जातुधिश्चैवेति ङ० ।

# अथ सप्तत्रिंशोऽध्यायः ।

———ooo———

## भुवनविन्यासः ।

सूत उवाच । शीतान्तस्याचलेन्द्रस्य कुमुञ्जस्यान्तरेण(१) तु ।
द्रोण्यो विहङ्गसंघुष्टा नानासत्वनिषेविताः ॥ १ ॥
त्रियोजनशतायामा विस्तीर्णाः शतयोजनाः ।
सुरसामलपानीयरम्यं तत्र सरोवरं ॥ २ ॥
द्रोण्यायामप्रमाणैस्तु पुण्डरीकैः सुगन्धिभिः ।
सहस्रशतपत्रैर्हि महापद्मैरलङ्कृतं ॥ ३ ॥
महोरगैरध्युषितं महाभोगैर्दुरासदैः ।
देवदानवगन्धर्व्वैरुपस्पृष्टं जलं शुभं ॥ ४ ॥
पुण्यं तच्छीसरो नाम प्रकाशं दिवि चेह च ।
प्रसन्नजलसम्पूर्णं शरण्यं सर्व्वदेहिनां ॥ ५ ॥
तत्र त्वेकं(२) महापद्मं मध्ये पद्मवनस्य ह ।
कोटिपत्रप्रचारन्तत्तरुणादित्यवर्चसं ॥ ६ ॥
नित्यं व्याकोशमजरं चाश्वल्याच्चातिमण्डलं ।
चारुकेशरजालाढ्यं मत्तषट्पदनादितं ॥ ७ ॥
तस्मिन् पद्मे भगवती साक्षाच्छ्रीर्नित्यमेव हि ।
लक्ष्म्याः पद्मं तदावासं मूर्त्तिमत्या न संशयः ॥ ८ ॥
सरसस्तस्य पूर्वस्मिन् तीरे सिद्धनिषेविते ।

---

१ भुजगस्यान्तरेणेति ङ०। कुञ्जरस्यान्तरेणेति ख०। २ तत्र त्वेकं महापद्ममिति ङ०।

सदा पुष्पफलं रम्यं तच्च विल्ववनं महत् ॥ ९ ॥
शतयोजनविस्तीर्णं त्रियोजनशतायतं ।
अर्द्धक्रोशोच्चशिखरैर्महाद्रुमैः सहस्रशः ॥ १० ॥
शाखासहस्रकलितैर्महास्कन्धैः समाकुलं ।
फलैः सुवर्णसङ्काशैर्हरितैः पाण्डुरैस्तथा ॥ ११ ॥
अमृतस्वादुसदृशैर्भैरीमात्रैः सुगन्धिभिः ।
शोभ्यमाणैः पतद्भिश्च कीर्णा भूमिर्निरन्तरा ॥ १२ ॥
नाम्ना तच्छ्रीवनं नाम सर्वलोकेषु विश्रुतं ।
गन्धर्वैः किन्नरैर्यत्तैर्महानागैश्च सेवितं ॥ १३ ॥
सिद्धैश्चैव समाकीर्णं नित्यं विल्वफलाशिभिः ।
विविधैर्भूतसङ्घैश्च नित्यमेव निषेवितं ॥ १४ ॥
तस्मिन् वने भगवती साक्षाच्छ्रीर्नित्यमेव हि ।
देवी सन्निहिता तत्र सिद्धसङ्घैर्नमस्कृता ॥ १५ ॥
विकङ्कस्याचलेन्द्रस्य मणिशैलस्य चान्तरे ।
शतयोजनविस्तीर्णं द्वियोजनशतायतं ॥ १६ ॥
विपुलञ्चम्पकवनं सिद्धचारणसेवितं ।
पुष्पलक्ष्माहृतं भाति ज्वलनमिव नित्यदा ॥ १७ ॥
अर्द्धक्रोशोच्चशिखरैर्महास्कन्धैः पलाशिभिः ।
प्रफुल्लशाखाशिखरैः पिञ्जरभाति तद्वनं ॥ १८ ॥
द्विबाहुपरिणाहैस्तैस्त्रिहस्तायामविस्तरैः ।
मनःशिलाचूर्णनिभैः पाण्डुकेसरशालिभिः ॥ १९ ॥
पुष्पैर्मनोहरैर्व्याप्तं व्याकोशैर्गन्धशालिभिः ।
विराजते वनं सर्वं मत्तभ्रमरनादितं ॥ २० ॥



तद्वनं दानवैर्दैवगन्धर्वैर्यक्षराक्षसैः ।
किन्नरैरप्सरोभिश्च महानागैश्च सेवितं ॥ २१ ॥
तच्चाश्रमं भगवतः कश्यपस्य प्रजापतेः ।
सिध्यसाध्यगणाकीर्णं नानाश्रुतिविभूषितं ।
महानीलकुमुच्चाभ्यामन्तरेण्यचलावथ ॥ २२ ॥
महानद्याः सुखायास्तु तीरे सिद्धनिषेविते ।
पञ्चाशद्योजनायामन्त्रिंशद्योजनविस्तरं ।
रम्यं तालवनं तद्धि अर्द्धक्रोशोच्चमस्तकं ॥ २३ ॥
महामूलैर्महास्कारैः स्थिरैरविरलैः शुभैः ।
कुमुदाञ्जनसंस्थानैः परिवृत्तैर्महाफलैः ।
सृष्टगन्धरसोपेतैरुपेतं सिद्धसेवितं ॥ २४ ॥
माहेन्द्रस्य द्विपेन्द्रस्य तच्च वास उदाहृतः ।
ऐरावतस्य भद्रस्य सर्वलोकेषु विश्रुतः ॥ २५ ॥
वैणुमन्तस्य शैलस्य सुमेधस्योत्तरेण च ।
सहस्रयोजनायामं विस्तीर्णं शतयोजनं ॥ २६ ॥
वृक्षगुल्मलतागुल्मैः सर्ववीरुद्भिरीरितं(१) ।
दूर्वाप्रस्तारमेवाथ सर्वसत्त्वविवर्जितं ॥ २७ ॥
तथा निषधशैलस्य देवशैलस्य चोत्तरे ।
सहस्रयोजनायामा शतयोजनविस्तृता ॥ २८ ॥

---

१ सर्ववीरुद्भिरुर्जितमिति ङ० ।

सर्वा ह्येकशिला भूमिर्न्नवीरुद्विवर्जिता ।
आप्लुता पादमात्रेण ह्युदकेन समन्ततः ॥ २९ ॥
इत्येता ह्यन्तरद्रोण्यो नानाकाराः प्रकीर्त्तिताः ।
मेरोः पूर्वेण विप्रेन्द्रा यथावदनुपूर्वशः ॥ ३० ॥

इति श्रीमहापुराणे वायुप्रोक्ते भुवनविन्यासो नाम
सप्तत्रिंशोऽध्यायः ।

---

# अथाष्टत्रिंशोऽध्यायः ।

———०००ⓓ०००———

## भुवनविन्यासः ।

सूत उवाच । अतः परं प्रवक्ष्यामि दक्षिणान्दिशमाश्रिताः ।
या द्रोण्यः सिद्धचरिताः शृणु ता ह्यनुपूर्वशः ॥ १ ॥
शिशिरस्याचलेन्द्रस्य पतङ्गस्यान्तरेण च ।
श्लक्ष्णभूमिश्रिया युक्तं लतालिङ्गितपादपं ॥ २ ॥
पृथुत्वेपोच्चशिखरैः पादपैरुपगोभितं ।
उदुम्बरवनं रम्यं पश्चिमङ्गनिषेवितं ॥ ३ ॥
पक्वैर्विद्रुमसङ्काशैर्मधुपूर्णैर्मनोरमैः ।
ज्वलितं तद्वनं भाति महाकुम्भोपमैः फलैः ॥ ४ ॥
तत् सिद्धयक्षगन्धर्वाः किन्नरा उरगास्तथा ।
विद्याधराश्च मुदिता उपजीवन्ति नित्यशः ॥ ५ ॥
प्रसन्नस्वादुसलिलास्तत्र नद्यो बह्वदकाः ।
सुरसामलतोयास्ताः सरांसि च समन्ततः ॥ ६ ॥
तत्राश्रमं भगवतः कर्दमस्य प्रजापतेः ।
रम्यं सुरगणाकीर्णं सर्वतश्चित्रकाननं ।
समन्ताद्योजनशतं तद्वनं परिमण्डलं ॥ ७ ॥
ताम्रवर्णस्य शैलस्य पतङ्गस्यान्तरेण तु ।
शतयोजनविस्तीर्णं द्वियोजनशतायतं ॥ ८ ॥
तरुणादित्यसङ्काशैः पुण्डरीकैः समन्ततः ।

सहस्रपत्रैर्विकचैर्महापद्मैरलङ्कृतं ॥ ९ ॥
तथा भ्रमरसंलीनैः शतपत्रैः सुगन्धिभिः ।
प्रफुल्लैः शोभितजलं रक्तनीलैर्महोत्पलैः ॥ १० ॥
सरोवरं महापुण्यं देवदानवसेवितं ।
महोरगैरध्युषितं नीलजालविभूषितं ॥ ११ ॥
तस्य मध्ये जनपदो ह्यायतः शतयोजनः ।
त्रिंशद्योजनविस्तीर्णो रत्नधातुविभूषितः ॥ १२ ॥
तस्योपरि महारथ्या प्रांशुप्राकारतोरणा ।
नरनारीगणाकीर्णा स्फीता विभवविस्तरैः ॥ १३ ॥
वलभीकूटनिर्यूहैर्मणिभक्तिविचित्रितैः ।
रत्नचित्रार्पिततलैः श्लक्ष्णचित्रोत्तरच्छदैः ॥ १४ ॥
महाभवनमालाभिर्महाप्रांशुभिरुत्तमैः ।
विद्याधरपुरं तत्र शोभते भ्राजयच्छुभं ॥ १५ ॥
विद्याधरपतिस्तत्र पुलोमा तत्र विश्रुतः ।
चित्रवेषधरः स्रग्वी माहेन्द्रसदृशद्युतिः ॥ १६ ॥
दीप्तानां चित्रवेषाणां सूर्य्यप्रतिमतेजसां ।
विद्याधरसहस्राणामनेकेषां स राजराट् ॥ १७ ॥
विशाखस्याचलेन्द्रस्य पतङ्गस्यान्तरेण च ।
सरसस्ताम्रवर्णस्य पूर्वे तीरे परिश्रुतं ॥ १८ ॥
पञ्चेषुक्षेपणैर्विद्धं सुशाखं वर्णशोभितं ।
सर्व्वकालफलं तत्र स्फीतञ्चाम्रवनं महत् ॥ १९ ॥
फलैः कनकसङ्काशैर्महास्वादैः सुगन्धिभिः ।
महाकुम्भप्रमाणैश्चातनुशाखैः समन्ततः ॥ २० ॥



गन्धर्वकिन्नरा यत्र नागा विद्याधरास्तथा ।
पिबन्त्याम्ररसं तत्र सुस्वादु ह्यमृतोपमं ॥ २१ ॥
तत्राम्ररसपीतानां मुदितानां महात्मनां ।
श्रूयन्ते हृष्टतुष्टानां नादास्तस्मिन् महावने ॥ २२ ॥
सुमूलस्याचलेन्द्रस्य वसुधारस्य चान्तरे ।
समा सुरभिपूर्णाढ्या विहङ्गैरुपशोभिता ॥ २३ ॥
त्रिंशद्योजनविस्तीर्णा पञ्चाशद्योजनायता ।
तत्र विल्वस्थली विप्राः शुद्धा निम्नफलद्रुमाः ॥ २४ ॥
सुस्वादैर्विद्रुमनिभैः फलैर्विल्वैर्महोपमैः ।
शीर्य्यमाणैर्विशीर्णैश्च प्रक्लिन्नतलमृत्तिकाः ॥ २५ ॥
तां स्थलीमुपजीवन्ति यत्र गन्धर्वकिन्नराः ।
सिद्धा नागाश्च बहुशो नित्यं विल्वफलाशिनः ॥ २६ ॥
अन्तरे वसुधारस्य रत्नधारस्य चान्तरे ।
त्रिंशद्योजनविस्तीर्णमायतं शतयोजनं ॥ २७ ॥
सुगन्धं किंशुकवनं नित्यं पुष्पितपादपं ।
पुष्पलक्ष्मावृतं भाति प्रदीप्तमिव सर्वतः ॥ २८ ॥
यस्य गन्धेन दिव्येन वास्यते परिमण्डलं ।
समग्रं योजनशतं काननानि समन्ततः ॥ २९ ॥
तत् सिद्धचारणगणैरप्सरोभिश्च सेवितं ।
रम्यं तत् किंशुकवनं जलाशयविभूषितं ॥ ३० ॥
तत्रादित्यस्य देवस्य दीप्तमायतनं महत् ।
मासे मासेऽवतरति तत्र सूर्य्यः प्रजापतिः ॥ ३१ ॥
तत्र कालस्य कर्त्तारं सहस्रांशुं सुरोत्तमं ।

सिद्धसङ्घा नमस्यन्ति सर्वलोकनमस्कृतं ॥ ३२ ॥
पञ्चकूटस्य शैलस्य कैलासस्यान्तरेण तु ।
षट्त्रिंशद्योजनायामं विस्तीर्णं शतयोजनं ॥ ३३ ॥
क्षुद्रसत्वैरनाधृष्यं सर्वतो हंसपाण्डुरं ।
दुष्पारं सर्वसत्वानां दुर्गमं लोमहर्षणं ॥ ३४ ॥
इत्येता ह्यन्तरद्रोण्यो दक्षिणे परिकीर्त्तिताः ।
यथानुपूर्वमखिलाः सिद्धसङ्घनिषेविताः ॥ ३५ ॥
पश्चिमायान्दिशि तथा येऽन्तरद्रोणिविस्तराः ।
तान्वर्ण्यमानांस्तत्त्वेन शृणुतेमान् द्विजोत्तमाः ॥ ३६ ॥
अन्तराले गिरौ तस्मिन् सुवर्चःशिखिशैलयोः ।
समन्ताद्योजनशतं एकभूमं शिलातलं ॥ ३७ ॥
नित्यतप्तं महाघोरं दुःस्पर्शं रोमहर्षणं ।
अगम्यं सर्वसत्वानामीश्वराणां सुदारुणं ॥ ३८ ॥
मध्ये तस्यां शिलास्थल्यां त्रिंशद्योजनमण्डलं ।
ज्वालासहस्रकलिलं वह्निस्थानं सुदारुणं ॥ ३९ ॥
अनिन्धनस्तत्र सदा ज्वालामाली विभावसुः ।
ज्वलत्येष सदा देवः शश्वत्तत्र हुताशनः ॥ ४० ॥
अधिदेवश्चते योऽसावग्नेर्भागो विधीयते ।
स तत्र ज्वलते नित्यं लोकसंवर्त्तकोऽनलः ॥ ४१ ॥
अन्तरे शैलवरयोर्देवा वापि तयोः शुभाः ।
मातुलुङ्गस्थली तत्र ह्यायामाद्दशयोजना ॥ ४२ ॥
मधुव्यञ्जनसंस्थानैः सुरसैः कनकप्रभैः ।
फलैः परिणतैः सर्वा शोभिता सा महास्थली ॥ ४३ ॥



तत्राश्रमं महापुण्यं सिद्धसङ्घनिषेवितं ।
ह्लहस्मतेः प्रमुदितं सर्वकामगुणैर्युतं ॥ ४४ ॥
तथैव शैलवरयोः कुमुदाञ्जनयोरपि ।
अन्तरे केसरद्रोणिरनेकायामयोजना ॥ ४५ ॥
द्विबाहुपरिणाहैस्तैस्त्रिहस्तायतविस्तृतैः ।
चन्द्रांशुवर्णैर्व्याकोशैर्मत्तषट्पदनादितैः ॥ ४६ ॥
मधुसर्परजःपृक्तैर्महागन्धैर्मनोहरैः ।
शवलन्तद्दनं(१) भाति कुसुमैः सर्वकालजैः ॥ ४७ ॥
तत्र विष्णोः सुरगुरोर्दीप्तमायतनं महत् ।
प्रकाशन्तिषु लोकेषु सर्वलोकनमस्कृतं ॥ ४८ ॥
अन्तरे शैलवरयोः कृष्णपाण्डुरयोरपि ।
त्रिंशद्योजनविस्तीर्णं नवत्यायतयोजनं ॥ ४९ ॥
श्लक्ष्णमेकशिलं देशं वृक्षवीरुद्विवर्जितं ।
सुखपादप्रचारञ्च निम्नोन्नतविवर्जितं ॥ ५० ॥
मध्ये तु सरसस्तस्य रम्या तु स्थलपद्मिनी ।
सहस्रपत्रैर्व्याकोशैः कृतमालैरलङ्कृता ॥ ५१ ॥
पुण्डरीकैर्महापद्मैरुचिरैर्गन्धशालिभिः ।
शतपत्रैश्च विकचैरुत्पलैर्नीलपत्रकैः ॥ ५२ ॥
मदोत्कटैर्मधुकरैर्भ्रमरैश्च मदोत्कटैः ।
मृदुगद्गदकण्ठानां किन्नराणाञ्च निस्वनैः ॥ ५३ ॥
उपगीतपद्मखण्डाढ्या विस्तीर्णा स्थलपद्मिनी ।

---

१ शवलन्तद्दनमिति क०।

यत्रगन्धर्वचरिता सिद्धचारणसेविता ॥ ५४ ॥
मध्ये तस्याश्च पद्मिन्याः पद्मयोजनमण्डलः ।
न्यग्रोधो विपुलस्कन्धो ह्यनेकारोहमण्डितः ॥ ५५ ॥
तत्र चन्द्रप्रभः श्रीमान् पूर्णचन्द्रनिभाननः ।
सहस्रवदनो देवो नीलवासाः सुरारिहा ॥ ५६ ॥
पद्ममाल्यधरस्थल्यां महाभागोऽपराजितः ।
दृश्यते यत्रगन्धर्वैर्विद्याधरगणैस्तथा ॥ ५७ ॥
तस्मिन्नायतने साक्षादनादिनिधनो हरिः ।
पद्मोपहारैर्विविधैरिज्यते सिद्धचारणैः ॥ ५८ ॥
तदनन्तसदो नाम सर्वलोकेषु विश्रुतं ।
पद्ममालावलम्बाभिर्मालाभिरुपशोभितं ॥ ५९ ॥
तथा सहस्रशिखरकुमुदस्यान्तरेण च ।
पञ्चाशद्योजनायामन्त्रिंशद्योजनविस्तरं ।
दृषच्चेपोच्चशिखरं नानाविहगासेवितं ॥ ६० ॥
महागन्धैर्महास्वादैर्गजदेहनिभैः फलैः ।
मधुस्रवैर्महावृक्षैरुपेतं तत् समन्ततः ॥ ६१ ॥
तत्राश्रमं महापुण्यं देवर्षिगणसेवितं ।
शुक्रस्य प्रथितं तत्र भास्वरं पुण्यकर्मणः ॥ ६२ ॥
शङ्कुकूटस्य शैलस्य वृषभस्यान्तरेण च ।
परूषकस्थली रम्या ह्यनेकायतयोजना ॥ ६३ ॥
विल्वप्रमाणैश्च शुभैर्महास्वादैः सुगन्धिभिः ।
फलैः प्रक्लिद्यते भूमिः प्रस्रवैर्वृन्तविच्युतैः ॥ ६४ ॥
तां स्थलीमुपजीवन्ति किन्नरोरगसाधवः ।



परूषकरसोन्मत्ता मानाढ्यास्तत्र चारणाः ॥ ६५ ॥
कपिञ्जलस्य शैलस्य नागशैलस्य चान्तरे ।
द्वियोजनशतायामा विस्तीर्णा शतयोजना ॥ ६६ ॥
स्थली मनोहरा सा हि नानावनविभूषिता ।
नानापुष्पफलोपेता किन्नरोरगसेविता ॥ ६७ ॥
द्राक्षावनानि रम्याणि तथा नागवनानि च ।
खर्जूरवनखण्डानि नीलाशोकवनानि च ॥ ६८ ॥
दाडिमानाञ्च स्वादूनामचोटकवनानि च ।
अतसीतिलकानाञ्च कदलीनां वनानि च ॥ ६९ ॥
बदरीणाञ्च स्वादूनां वनखण्डानि सर्वशः ।
स्वादुशीताम्बुपूर्णाभिर्नदीभिः शोभितानि च ॥ ७० ॥
तथा पुष्पकशैलस्य महामेघस्य चान्तरे ।
षष्टियोजनविस्तीर्णा सा भूमिः शतमायता ॥ ७१ ॥
समा पाणितलप्रख्या कठिना पाण्डुरा घना ।
वृक्षगुल्मलतागुल्मैस्तृणैश्चापि विवर्जिता ॥ ७२ ॥
वर्जिता विविधैः सत्वैर्नित्यमस्मिन् निराश्रया ।
सा काननस्थली नाम दारुणा रोमहर्षणा ॥ ७३ ॥
महासरांसि च तथा महावृक्षास्तथैव च ।
महावनानि सर्वाणि कान्तनामानि(१) सर्वशः ॥ ७४ ॥
सरसाञ्च वनानाञ्च सा स्थली च प्रजापतेः ।

---

१ सरसानि चेति ख० ।

क्षुद्राणां सरसाञ्चैव संख्या तत्र न विद्यते ॥ ७५ ॥
दश द्वादश सप्ताष्टौ विंशच्चिंशच्च योजनाः।
ख्यो द्रोण्यश्च विख्याताः सरांसि च वनानि च ॥ ७६ ॥
केचित् सन्ति महाघोराः श्यामाः पर्व्वतकुक्षयः।
सूर्य्यांशुजालैरस्पृष्टा नित्यं शीता दुरासदाः ॥ ७७ ॥
तथा ह्यनलतप्तानि सरांसि द्विजसत्तमाः।
शैलकुक्ष्यन्तरस्थानि सहस्राणि शतानि च ॥ ७८ ॥

इति श्रीमहापुराणे वायुप्रोक्ते भुवनविन्यासो नामाऽष्टत्रिंशोऽध्यायः।

---

# अथैकोनचत्वारिंशोऽध्यायः।

---

## भुवनविन्यासः।

सूत उवाच। अतः परं प्रवक्ष्यामि यस्मिन् यस्मिन् गिरौ ह्ये।
ये सन्निविष्टा देवानां विविधानां गृहोत्तमाः ॥ १ ॥
तत्र योऽसौ महाशैलः शीतान्तो नैकविस्तरः।
नैकधातुशतैश्चित्रैर्नैकरत्नाकराकरः ॥ २ ॥
नितम्बैः पुष्पसालम्बैर्नैकसत्त्वगुणालयः।
महार्हमणिचित्राभिर्हेमवंशैरलङ्कृतः ॥ ३ ॥
नितम्बैः षट्पदोद्गीतैः प्रवालैर्हेमचित्रकैः।
तटैः कुसुमसङ्कीर्णैर्मत्तभ्रमरनादितैः ॥ ४ ॥
लतालम्बैश्चित्रवद्भिश्चित्रैर्धातुशतार्चितैः।
सानुभीरत्नचित्रैश्च पुष्पाढ्यैश्च विभूषितः ॥ ५ ॥
विमलस्वादुपानीयैर्नैकप्रस्रवणैर्युतः।
निकुञ्जैः कुसुमोत्कीर्णैरनेकैश्च विभूषितः ॥ ६ ॥
पुष्पोडुपवहाभिश्च स्रवन्तीभिरलङ्कृतः।
किन्नराचरिताभिश्च दरीभिः(१) सर्वतस्ततः ॥ ७ ॥
यक्षगन्धर्वचरितैरनेकैः कन्दरोदरैः।
शोभितश्च सुखासेव्यैश्चित्रैर्गहनसङ्कटैः ॥ ८ ॥
नानासत्त्वगणाकीर्णैः सुपानीयैः सुखाश्रयैः।

---

१ नदीभिरिति ख०।

नानापुष्पफलोपेतैः पादपैः समलङ्कृतः ॥ ९ ॥
तस्मिन् गुहाश्रयाकीर्णे अनेकोदरकन्दरे।
क्रीड़ावनं महेन्द्रस्य सर्वकामगुणैर्युतं ॥ १० ॥
तत्र तद्देवराजस्य पारिजातवनं महत्।
प्रकाशं त्रिषु लोकेषु गीयते श्रुतिनिश्चयात् ॥ ११ ॥
तरुणादित्यसङ्काशैर्महागन्धैर्मनोहरैः।
पुष्पैर्भाति नगश्रेष्ठः सुदीप्त इव सर्वशः ॥ १२ ॥
समग्रं योजनशतं तं गन्धमनिलो ववौ।
पारिजातकपुष्पाणां माहेन्द्रवननिर्गतः ॥ १३ ॥
वैदूर्यनीलैः कमलैः सौवर्णैर्वज्रकेसरैः।
सर्वगन्धबलोपेतैर्मत्तषट्पदनादितैः ॥ १४ ॥
व्याकोशैर्विकचैश्चापि शतपत्रैर्मनोहरैः।
सपङ्कजैर्महापत्रैर्वाप्यस्तत्र विभूषिताः ॥ १५ ॥
विरेजुरन्तरम्बुस्थाः सौवर्णमणिभूषिताः।
परिस्पन्दिक्षणा नित्यं मीनयूथाः सहस्रशः ॥ १६ ॥
कूर्मैश्चानेकसंस्थानैर्हैमरत्नपरिष्कृतैः।
चङ्क्रम्यमाणैः सलिलैर्भाति चित्रं समन्ततः ॥ १७ ॥
नानावर्णैश्च शकुनैर्नानारत्नतनूरुहैः(१)।
सुवर्णपुष्पैश्चानेकैर्मणिशुङ्गैर्द्विजातिभिः ॥ १८ ॥
बल्गुस्वरैः सदोन्मत्तैः सम्पतद्भिः समन्ततः।
शुशुभे तद्वनं रम्यं सहस्राक्षस्य धीमतः ॥ १९ ॥

१ नानारत्नतनुच्छदैरिति क०।



मत्तभ्रमरसङ्घादैर्विहङ्गानाञ्च कूजितैः।
नित्यमानन्दितवनं तस्मात् क्रीड़ावनं महत् ॥ २० ॥
सुवर्णपार्श्वैश्च नगैर्मणिमुक्तापुरस्कृतैः।
मणिशृङ्गकलापत्रैः पतद्भिश्च समन्ततः ॥ २१ ॥
शाखामृगैश्च चित्राङ्गैर्नानारत्नतनूरुहैः।
नानावर्णप्रकारैश्च सत्त्वैरन्यैः समाकुलं ॥ २२ ॥
मुञ्चन्ति पुष्पवर्षञ्च तत्र वाललता द्रुमाः।
पारिजातकपुष्पाणां मन्दमारुतकम्पिताः ॥ २३ ॥
शयनासननिर्य्यूहैः स्तौर्णैरत्नविभूषितैः।
विहारभूमयस्तत्र द्विजाः शक्रवने शुभाः।
न च शीतो न चाप्युष्णो रविस्तत्र समः सदा ॥ २४ ॥
नित्यमुन्मादजननो मधुमाधवसम्भवः।
वाति चाप्यनिलस्तत्र नानापुष्पाधिवासितः।
नित्यं सङ्गसुखाह्लादी श्रमक्लमविनाशनः ॥ २५ ॥
तस्मिन्निन्द्रवने शुभ्रे देवदानवपन्नगाः।
यक्षराक्षसगुह्याश्च गन्धर्वाश्चामितौजसः ॥ २६ ॥
विद्याधराश्च सिद्धाश्च किन्नराश्च मुदायुताः।
तथाप्सरोगणाश्चैव नित्यं क्रीड़ापरायणाः ॥ २७ ॥
तस्य पर्वतराजस्य पूर्वं पार्श्वं महोचितं।
कुमुद्वं(१) शैलराजानं नैकनिर्झरकन्दरं ॥ २८ ॥
तस्य धातुविचित्रेषु कूटेषु बहुविस्तराः।
अष्टौ पुर्य्यो ह्युदीर्णाश्च दानवानां महात्मनां ॥ २९ ॥

१ कुमुदमिति ङ०।

वज्रके पर्वते चापि अनेकशिखरोदरैः ।
उदीर्णा राक्षसावासा नरनारीसमाकुलाः ॥ ३० ॥
नीलका नाम ते घोरा राक्षसाः कामरूपिणः ।
तत्र तेऽभिरता नित्यं महाबलपराक्रमाः ॥ ३१ ॥
महानीलेपि शैलेन्द्रे पुराणि दश पञ्च च ।
हयाननानां विख्याताः(१) किन्नराणां महात्मनां ॥ ३२ ॥
देवसेनो महावाहुर्बलमिन्द्रादयस्तथा ।
तत्र किन्नरराजानो दश पञ्च च गर्विताः ॥ ३३ ॥
सुवर्णपार्श्वाः प्रायेण नानावर्णसमाकुलैः ।
विलप्रवेशैर्नगरैः शैलेन्द्रः सोऽभ्यलङ्कृतः ॥ ३४ ॥
अतिदारुणा दृष्टिविषा ह्यग्निकोपा दुरासदाः ।
महोरगशताश्चत्र सुवर्णवशवर्तिनः ॥ ३५ ॥
सुनागेऽपि महाशैले दैत्यावासाः सहस्रशः ।
हर्म्यप्रासादकलिलाः प्रांशुप्राकारतोरणाः ॥ ३६ ॥
वेणुमत्ते महाशैले विद्याधरपुरत्रयं ।
त्रिंशद्योजनविस्तीर्णं पञ्चाशद्योजनायतं ॥ ३७ ॥
उलूको रोमशश्चैव महानेत्रश्च वीर्य्यवान् ।
विद्याधरवरास्तत्र शक्रतुल्यपराक्रमाः ॥ ३८ ॥
वैकङ्के शैलशिखरे ह्यन्तःकन्दरनिर्झरे ।
महोच्चशृङ्गे रुचिरे रत्नधातुविचित्रिते ॥ ३९ ॥
तत्रास्ते गारुडिर्नित्यं उरगारिर्दुरासदः ।
महावायुजवषण्डः सुग्रीवो नाम वीर्य्यवान् ॥ ४० ॥

१ पाठोऽयं न समीचीनः ।



महाप्रमाणैर्विक्रान्तैर्महाबलपराक्रमैः ।
स शैलो ह्याहृतः सर्वैः पक्षिभिः पन्नगारिभिः ॥ ४१ ॥
करञ्जेऽभिरतो नित्यं साक्षाद्भूतपतिः प्रभुः ।
वृषभाङ्को महादेवः शङ्करो योगिनां प्रभुः ॥ ४२ ॥
नानावेषधरैर्भूतैः प्रमथैश्च दुरासदैः ।
करञ्जे सानवः सर्वे ह्यवकीर्णाः समन्ततः ॥ ४३ ॥
वसुधारे वसुमतां वसुनाममितौजसां ।
अष्टावायतनान्याहुः पूजितानि महात्मनां ॥ ४४ ॥
रत्नधातौ(१) गिरिवरे ऋषीणाञ्च महात्मनां ।
समाश्रमाणि पुण्यानि सिद्धावासयुतानि च ॥ ४५ ॥
महाप्रजापतेः स्थानं हेमशृङ्गे नगोत्तमे ।
चतुर्वक्त्रस्य देवस्य सर्वभूतनमस्कृतं ॥ ४६ ॥
गजशैले भगवतो नानाभूतगणाहृताः ।
रुद्राः प्रमुदिता नित्यं सर्वभूतनमस्कृताः ॥ ४७ ॥
सुमेधे धातुचित्राढ्ये शैलेन्द्रे मेघसन्निभे ।
नैकोदरदरीवप्रनिकुञ्जैश्चोपशोभिते ॥ ४८ ॥
आदित्यानां वसूनाञ्च रुद्राणाञ्चामितौजसां ।
तत्रायतनविन्यासा रम्याश्चैवाश्विनोरपि ॥ ४९ ॥
स्थानानि सिद्धैर्देवानां स्थापितानि नगोत्तमे ।
तत्र पूजापरा नित्यं यक्षगन्धर्वकिन्नराः ॥ ५० ॥
गन्धर्वनगरी स्फीता हेमकक्षे नगोत्तमे ।

१ रत्नधारे इति घ० ।

अशीत्यमरपुर्य्याभा महाप्राकारतोरणा ॥ ५१ ॥
सिद्धा ह्यप्सरसा नाम गन्धर्वा युद्धशालिनः ।
येषामधिपतिर्देवो राजराजः कपिञ्जलः ॥ ५२ ॥
अनले राक्षसावासाः पञ्चकूटेऽपि दानवाः ।
जर्जिता देवरिपवो महाबलपराक्रमाः ॥ ५३ ॥
शतशृङ्गे पुरशतं यक्षाणाममितौजसां ।
ताम्राभे काद्रवेयस्य तक्षकस्य पुरोत्तमं ॥ ५४ ॥
विशाखे पर्वतश्रेष्ठे नैकवप्ररीशुभे ।
गुहानिरतवासस्य गुहस्यायतनं महत् ॥ ५५ ॥
श्वेतोदरे महाशैले महाभवनमण्डिते ।
पुरं गरुडपुत्रस्य सुनाभस्य महात्मनः ॥ ५६ ॥
पिशाचके गिरिवरे हर्म्यं प्रासादमण्डितं ।
यक्षगन्धर्वचरितं कुबेरभवनं महत् ॥ ५७ ॥
हरिकूटे हरिर्देवः सर्वभूतनमस्कृतः ।
प्रभावात्तस्य शैलोऽसौ महानाभः प्रकाशते ॥ ५८ ॥
कुमुदे किन्नरावासा अञ्जने च महोरगाः ।
कृष्णे गन्धर्वनगरा महाभवनशालिनः ॥ ५९ ॥
पाण्डुरे चारुशिखरे महाप्राकारतोरणे ।
विद्याधरपुरन्तत्र महाभवनमालिनं ॥ ६० ॥
सहस्रशिखरे शैले दैत्यानामुग्रकर्म्मणां ।
पुराणि समुदीर्णानां सहस्रं हेममालिनां ॥ ६१ ॥
मुकुटे पन्नगावासा अनेकाः पर्वतोत्तमाः ।
पुष्पके वै मुनिगणा नित्यमेव मुदायुताः ॥ ६२ ॥



वैवस्वतस्य सोमस्य वायोर्नागाधिपस्य च ।
सुपक्षे पर्वतवरे चत्वार्य्यायतनानि च ॥ ६३ ॥
गन्धर्वैः किन्नरैर्यक्षैर्नागैर्विद्याधरोत्तमैः ।
सिद्धैर्हितेषु स्थानेषु नित्यमिष्टः प्रपूज्यते ॥ ६४ ॥

इति श्रीमहापुराणे वायुप्रोक्ते भुवनविन्यासो नामैकोनचत्वारिंशोऽध्यायः ।

---

# अथ चत्वारिंशोऽध्यायः।

—000—

## भुवनविन्यासः।

सूत उवाच। मर्य्यादाः पर्वते शुभ्रे देवकूटे निबोधत।
विस्तीर्णे गिखरे तस्य कूटे गिरिवरस्य ह ॥ १ ॥
समन्ताद्योजनशतं महाभवनमण्डितं।
जन्मक्षेत्रं सुपर्णस्य वैनतेयस्य धीमतः ॥ २ ॥
नैकैर्महापन्नगणैर्गारुडैः शीघ्रविक्रमैः।
सम्पूर्णवीर्यसम्पन्नैर्दमनैरुरगारिभिः ॥ ३ ॥
पन्नगराजस्य भवनं प्रथमं तन्महात्मनः।
महावायुप्रवेगस्य शाल्मलिद्वीपवासिनः ॥ ४ ॥
तस्यैव चारुमूर्द्धस्तु कूटेषु च महर्द्धिषु।
दक्षिणेषु विचित्रेषु सप्तस्वपि तु शोभिनः ॥ ५ ॥
सन्ध्याभ्राभाः समुदिता रक्तप्राकारतोरणाः।
महाभवनमालाभिः शोभिता देवनिर्म्मिताः ॥ ६ ॥
त्रिंशद्योजनविस्तीर्णाश्चत्वारिंशत्तमायताः।
सप्त गन्धर्वनगरा नरनारीसमाकुलाः ॥ ७ ॥
आग्नेया नाम गन्धर्वा महाबलपराक्रमाः।
कुबेरानुचरा दीप्तास्तेषान्ते भवनोत्तमाः ॥ ८ ॥
तस्य चोत्तरकूटेषु भुवनस्य महागिरेः।
हर्म्यप्रासादबद्धश्च उद्यानवनशोभितं ॥ ९ ॥
पुरमाशीविषैः पूर्णं महाप्राकारतोरणं।



वादित्रशतनिर्घोषैरानन्दितवनान्तरं(१) ॥ १० ॥
दुःप्रसह्यममित्राणां त्रिंशद्योजनमण्डलं।
नगरं सैंहिकेयानामुदीर्णं देवविद्विषां।
सिद्धदेवर्षिचरितं देवकूटे निबोधत ॥ ११ ॥
द्वितीये द्विजशार्दूला मर्य्यादापर्वते शुभे।
महाभवनमालाभिर्नानावर्णाभिरावृतं ॥ १२ ॥
सुवर्णमणिचित्राभिरनेकाभिरलङ्कृतं।
विशालरथ्यन्दुर्धर्षं नित्यम्मुदितं गिरिं ॥ १३ ॥
नरनारीगणाकीर्णं प्रांशुप्राकारतोरणं।
षष्टियोजनविस्तीर्णं शतयोजनमायतं ॥ १४ ॥
नगरं कालकेयानाममुराणान्दुरासदं।
देवकूटतटे रम्ये सन्निविष्टं सुदुर्जयं ॥
महाभ्रचयसङ्काशं सुनासत्राम विश्रुतं ॥ १५ ॥
तस्यैव दक्षिणे कूटे त्रिंशद्योजनविस्तरं(२)।
द्विषष्टियोजनायामं हेमप्राकारतोरणं ॥ १६ ॥
हृष्टपुष्टावलिप्तानां(३) आवासाः कामरूपिणां।
औत्कचानां प्रमुदितं राक्षसानां महापुरं ॥ १७ ॥
मध्यमे तु महाकूटे देवकूटस्य वै गिरेः।
सुवर्णमणिपाषाणैश्चित्रैः श्लक्ष्णतरैः शुभैः।
शाखाशतसहस्राद्यैर्नैकारोहसमाकुलं ॥ १८ ॥

---

१ आनन्दितवनोत्तरमिति क०।
२ त्रिंशद्योजनविस्तरमित्यत्र त्रिंशदित्ययं प्रयोग आर्षः।
३ हृष्टपुष्टावलिप्तानामिति घ०।

स्निग्धपर्णमहामूलमनेकस्कन्धवाहनं ।
रम्यं ह्यविरलच्छायं दशयोजनमण्डलं ॥१९॥
तत्र भूतवटो नाम नानाभूतगणालयं ।
महादेवस्य प्रथितं त्र्यम्बकस्य महात्मनः ।
दीप्तमायतनं तत्र सर्वलोकेषु विश्रुतं ॥२०॥
वराहगजसिंहर्क्षगार्दूलकरभाननैः ।
गृध्रोलूकमुखैश्चैव मेषोष्ट्राजमहामुखैः ॥२१॥
कदम्बैर्विकटैः स्थूलैर्लम्बकेशतनूरुहैः ।
नानावर्णाकृतिधरैर्नानासंस्थानसंस्थितैः ॥२२॥
दीप्तैरनेकैरुग्रास्यैर्भूतैरुग्रपराक्रमैः ।
अशून्यमभवन्नित्यं महापारिषदैस्तथा ॥२३॥
तत्र भूतपतेर्भूता नित्यम्पूजां प्रयुञ्जते ।
झर्झरैः शङ्खपटहैर्भेरीडिण्डिमगोमुखैः ॥२४॥
रणितालसितोद्गीतैर्नित्यम्ललितवर्जितैः ।
विस्फूर्जितप्रतैस्तत्र पूजायुक्ता गणेश्वराः ।
प्रीताः पुरारिप्रमथास्तत्र क्रीडापराः सदा ॥२५॥
सिद्धदेवर्षिगन्धर्वयक्षनागेन्द्रपूजितः ।
स्थाने तस्मिन् महादेवः साक्षाल्लोकशिवः शिवः ॥२६॥

इति श्रीमहापुराणे वायुप्रोक्ते भुवनविन्यासो नाम चत्वारिंशोऽध्यायः ।

---

# अथैकचत्वारिंशोऽध्यायः ।

## भुवनविन्यासः ।

सूत उवाच । विविक्तचारुशिखरं पवित्रं शङ्करप्रियं ।
कैलासं देवभक्तानामालयं सुकृतात्मनां ॥ १ ॥
तस्य कूटतटे रम्ये मध्यमे कुन्दसन्निभे ।
योजनानां शतायामे पञ्चाशच्च तथायतं ॥ २ ॥
सुवर्णमणिचित्राभिरनेकाभिरलङ्कृतं ।
महाभवनमालाभिर्भूषितं नैकविस्तरं ॥ ३ ॥
धनाध्यक्षस्य देवस्य कुबेरस्य महात्मनः ।
नगरन्तदनाधृष्यमृद्धियुक्तं मुदायुतं ॥ ४ ॥
तस्य मध्ये सभा रम्या नानाकनकमण्डिता ।
विपुला नाम विख्याता विपुलस्तम्भतोरणा ॥ ५ ॥
तत्र तत्पुष्पकं नाम नानारत्नविभूषितं ।
महाविमानं रुचिरं सर्वकामगुणैर्युतं ॥६॥
मनोजवं कामगमं हेमजालविभूषितं ।
वाहनं यक्षराजस्य कुबेरस्य महात्मनः ॥७॥
तत्रैकपिङ्गलो देवो महादेवसखः स्वयं ।
वसति स्म स यक्षेन्द्रः सर्वभूतनमस्कृतः ॥८॥
तत्राप्सरोगणैर्मुख्यैर्गन्धर्वैः सिद्धचारणैः ।
वसति स्म महात्माऽसौ कुबेरो देवसत्तमः ॥९॥
तत्र पद्ममहापद्मौ तथा मकरकच्छपौ ।

कुमुदः(१) शङ्खनीलश्च नन्दनो निधिसत्तमः ॥१०॥
अष्टावेतेऽत्तया दिव्या धनेशस्य महात्मनः ।
महानिधानास्तिष्ठन्ति सभायां रत्नसञ्चिताः ॥११॥
तथेन्द्राग्नियमादीनां देवानामप्सरोगणैः ।
तेषां कैलास आवासो यत्र यक्षेश्वरः प्रभुः ॥१२॥
त्यक्त्वा पूर्वमुपस्थानं यक्षेन्द्रस्य महात्मनः ।
पश्चाद्गच्छन्ति ये यस्य विहिताः परिचारकाः ॥१३॥
तत्र मन्दाकिनी नाम सुरम्या विपुलोदका ।
सुवर्णमणिसोपाना नानापुष्पोत्कटोत्कटा ॥१४॥
जाम्बूनदमयैः पद्मैर्गन्धस्पर्शगुणान्वितैः ।
नीलवैदूर्यपत्रैश्च गन्धोपेतैर्महोत्पलैः ॥१५॥
तथा कुमुदखण्डैश्च महापद्मैरलङ्कृता ।
यक्षगन्धर्वनारीभिरप्सरोभिश्च शोभिता ॥१६॥
देवदानवगन्धर्वैर्यक्षराक्षसपन्नगैः ।
उपस्पृष्टजला रम्या वापी मन्दाकिनी तथा ॥१७॥
तथा अलकनन्दा च नन्दा च सरितां वरा ।
एतैरेव गुणैर्युक्ता नद्यो देवर्षिसेविताः ॥१८॥
तस्यैव शैलराजस्य पूर्वे कूटे परिश्रुताः ।
सहस्रयोजनायामास्त्रिंशद्योजनविस्तराः ॥१९॥
दश गन्धर्वनगराः समृद्धा परया युताः ।
महाभवनमालाभिरनेकाभिर्विभूषिताः ॥२०॥

१ मुकुन्द इति ब० ।



सुबाहुहरिकेशाद्याश्चित्रसेनजरादयः ।
दश गन्धर्वराजानो दीप्तवक्त्रपराक्रमाः ॥२१॥
तस्यैव पश्चिमे कूटे कुन्देन्दुसदृशप्रभे ।
नानाधातुशतैश्चित्रैः सिद्धदेवर्षिसेविते ॥२२॥
अशीतियोजनायामं चत्वारिंशत्प्रविस्तरं ।
एकैकयक्षभवनं महाभवनमालिनं ॥ २३ ॥
महायक्षालयान्यत्र त्रिंशदाढ्यानि मे शृणु ।
मुदाऽथ परमर्द्धा च संयुक्तानि समन्ततः ॥२४॥
महामालिसुनेत्राद्यास्तथा मणिवरादयः ।
उदीर्णा यक्षराजानस्तत्र त्रिंशत्सदा बभुः ॥२५॥
इत्येते कथिता यक्षा वायुग्निसमतेजसः ।
येषामधिपतिर्देवः श्रीमान् वैश्रवणः प्रभुः ॥२६॥
तस्यैव दक्षिणे पार्श्वे हिमवत्यचलोत्तमे(१) ।
निकुञ्जनिर्झरगुहानेकसानुदरीतटे ॥२७॥
अर्णवादर्णवं यावत् पूर्वपश्चायतेऽचले ।
किन्नराणां पुरशतं निविष्टं वै क्वचित् क्वचित् २८॥
नैकशृङ्गकलापस्य शैलराजस्य कुक्षिषु ।
नरनारीप्रमुदितं हृष्टपुष्टजनाकुलं ॥२९॥
द्रुमसुग्रीवसैन्याद्या भगदत्तपुरःसराः ।
तत्र राजशतं तेषां दीप्तानां बलशालिनां ॥३०॥
विवाहो यत्र रुद्रस्य महादेव्योमया सह ।

१ हिमवत्पर्वतोत्तमे इति ब० ।

तपस्तप्यती चैव यत्र देवी वराङ्गना ॥३१॥
किरातरूपिणा चैव तत्र रुद्रेण क्रीड़ितं ।
यत्र चैव कृतं ताभ्यां जम्बूद्वीपावलोकनं ॥३२॥
यत्र ताः सम्मुदा युक्ता नानाभूतगणैर्युताः ।
चित्रपुष्पफलोपेता रुद्रस्याक्रीडभूमयः ॥३३॥
दृष्टा गिरिदरीवासाः कृशोदर्य्यो मनोरमाः ।
सुन्दर्य्यो यत्र किन्नर्य्यो रमन्ते स्म सुलोचनाः ॥३४॥
विशालाश्चास्तथा यत्ता अन्याश्चाप्सरसाङ्गणाः ।
गन्धर्वाश्चाङ्गशालिन्यो यत्र तत्र मुदा युताः ॥३५॥
तत्रैवोमावनं नाम सर्वलोकेषु विश्रुतं ।
अर्धनारीनरं रूपं धृतवान् यत्र शङ्करः ॥३६॥
तथा शरवनं नाम यत्र जातः षडाननः ॥
यत्र चैव कृतोत्साहः क्रौञ्चशैलवनं प्रति ॥३७॥
ध्वजापताकिनश्चैव किङ्किणीजालमालिनं ।
यत्र सिंहरथं युक्तं कार्त्तिकेयस्य धीमतः ॥३८॥
चित्रपुष्पनिकुञ्जस्य क्रौञ्चस्य च गिरेस्तटे ।
देवारिस्कन्दनः स्कन्दो यत्र शक्तिं विमुक्तवान् ॥३९॥
यत्राभिषिक्तश्च गुहः सेन्द्रोपेन्द्रैः सुरोत्तमैः ।
सेनापत्ये च दैत्यारिर्हादशार्कप्रतापवान् ॥४०॥
भूतसङ्घावकीर्णानि एतान्यन्यानि च द्विजाः ।
तत्र तत्र कुमारस्य स्थानान्यायतनानि च ॥४१॥
तथा पाण्डुशिला नाम ह्याक्रीडा क्रौञ्चघातिनः ।
नानाभूतगणाकीर्णे पृष्ठे हिमवतः शुभे ॥४२॥



तस्य पूर्वे तटे रम्ये सिद्धावासमुदाहृतं ।
कलापग्राममित्येवं नाम्ना ख्यातं मनीषिभिः ॥४३॥
मृकण्डस्य वसिष्ठस्य भरतस्य नलस्य च ।
विश्वामित्रस्य विप्रर्षेस्तथैवोद्दालकस्य च । ४४॥
अन्येषाञ्चोग्रतपसां ऋषीणां भावितात्मनां ।
हिमवत्याश्रमाणाञ्च सहस्राणि शतानि च ॥४५॥
नैकसिद्धगणावासं स्थानायतनमण्डितं ।
यत्तगन्धर्वचरितं नानाश्चेक्षगणैर्युतं ॥४६॥
नानारत्नाकरापूर्णं नानासत्त्वनिषेवितं ।
नानानदीसहस्राणां सम्भवं परपर्वतं(१) ॥४७॥
पश्चिमस्याचलेन्द्रस्य निषधस्य यथार्थवत् ।
कीर्त्यमानमशेषेण विशेषं शृणुत द्विजाः ॥४८॥
विस्तीर्णे मध्यमे कूटे हेमधातुविभूषिते ।
दीप्तमायतनं विष्णोः सिद्धर्षिगणसेवितं ।
यत्राप्सरःसमाकीर्णं गन्धर्वगणसेवितं ॥४९॥
तत्र साक्षान्महादेवः पीताम्बरधरो हरिः ॥
वरदः सेव्यते सिद्धैर्लोककर्त्ता सनातनः ॥५०॥
तस्यैवाभ्यन्तरे कूटे नानाधातुविभूषिते ।
तटे निषधकूटस्य श्लक्ष्णचारुशिलातले ॥५१॥
रुक्मकाञ्चननिर्य्यूहन्तप्तकाञ्चनतोरणं ।
अनेकवलभीकूटप्रतोलीशतसङ्कटं ॥५२॥

१ वरपर्वतमिति क०, ङ० च ।

हर्म्यप्रासादमतुलन्तप्तकाञ्चनभूषितं ।
हर्म्यप्रासादवद्भश्च मुदितश्चातिविस्तरं ॥५३॥
उद्यानमालाकलितं त्रिंशद्योजनमायतं ।
दुःप्रसह्यमभिचैस्तत् पूर्णमाशीविषोपमैः ।
उलङ्कीनां(१) प्रमुदितं रक्षसां राक्षसं पुरं ॥५४॥
तस्यैव दक्षिणे पार्श्वे नैकदैत्यगणालये ।
गुहाप्रवेश्यं नगरं शैलकुक्षौ दुरासदं ॥५५॥
तथैव पश्चिमे कूटे पारिजातशिलोच्चये ।
देवदानवभागानां सप्तशतानि पुराणि तु ॥५६॥
तत्र सोमशिला नाम गिरेस्तस्य महातटे ।
सोमो यत्रावतरति सदा पर्वसु पर्वसु ॥५७॥
उपासतेऽत्र श्रीमन्तं तारापतिमनिन्दितं ।
ऋषिकिन्नरगन्धर्वाः साक्षाद्देवं तमोनुदं ॥५८॥
तत्रैव चोत्तरे कूटे ब्रह्मपार्श्वमिति स्मृतं ।
स्थानं तत्र सुरेशस्य ब्रह्मणः प्रथितन्दिवि ॥५९॥
इज्यापूजानमस्कारैस्तत्र सिद्धाः स्वयम्भुवं ।
उपासते महात्मानं यक्षगन्धर्वदानवाः ॥६०॥
तथैवायतनं वह्नेः सर्वलोकेषु विश्रुतं ।
तत्र विग्रहवान् वह्निः सेव्यते सिद्धचारणैः ॥६१॥
तथैव चोत्तरे रम्ये त्रिशृङ्गे वरपर्वते ।
ऋषिसिद्धानुचरिते नानाभूतगणालये ।
पुरन्तत् त्रिषु लोकेषु हेमचित्रन्तु विश्रुतं ॥६२॥

१ उलङ्गीनामिति ङ०।



त्रयाणां देवमुख्यानां(१) त्रीण्येवायतनानि च ।
नारायणस्यायतनं पूर्वकूटे द्विजोत्तमाः ।
मध्यमे ब्रह्मणः स्थानं शङ्करस्य तु पश्चिमे ॥ ६३ ॥
दैत्यदानवगन्धर्वैर्यक्षराक्षसपन्नगैः ।
इजाना अभिपूज्यन्ते(२) देवदेवा महाबलाः ॥ ६४ ॥
तथा पुराणि रम्याणि देशे चैव क्वचित् क्वचित् ।
यक्षगन्धर्वनागानां त्रिशृङ्गे वरपर्वते ॥ ६५ ॥
तथैव चोत्तरे देशे जातुधौ(३) देवपर्वते ।
अनेकशृङ्गकलिते सिद्धसाधुनिषेविते ॥ ६६ ॥
यक्षाणां किन्नराणाञ्च गन्धर्वाणां सहस्रशः ।
नागानां राक्षसानाञ्च दैत्यानाञ्च महाबले ॥ ६७ ॥
कूटे तु मध्यमे तस्य सिद्धसङ्घनिषेविते ।
रम्ये देवर्षिचरिते रत्नधातुविभूषिते ॥ ६८ ॥
पद्मोत्पलवनैः फुल्लैः सौगन्धिकवनैस्तथा ।
तथा कुमुदखण्डैश्च विकचैरुपशोभिते ॥ ६९ ॥
विहङ्गसङ्घसङ्घुष्टं नानासत्वनिषेवितं ।
हंसकारण्डवाकीर्णं मत्तषट्पदसेवितं ॥ ७० ॥
नानासत्वगणाकीर्णं विहङ्गैरुपशोभितं ।
चारुतीर्थसुसम्बाधं त्रिंशद्योजनमण्डलं ॥ ७१ ॥
सिद्धैरुपस्पृष्टजलं जलदोषविवर्जितं ।

१ देवपुण्यानामिति क०, घ० च।
२ इज्याः स्वयम्भुवः पूज्यन्त इति ङ०।
३ जातुधाविति ख०, ङ० च।

तत्रानन्दजलन्नाम महापुण्यजलं सरः ॥ ७२ ॥
तत्र नागपतिश्चण्डश्चण्डो नाम दुरासदः ।
शतशीर्षो महाभागो विष्णुचक्राङ्कचिह्नितः ।
इत्येवमष्टौ विज्ञेया विचित्रा देवपर्वताः ॥ ७३ ॥
पुरैरायतनैः पुण्यैः पुण्योदैश्च सरोवरैः ।
सुवर्णपर्वतैर्नैकैस्तथा रजतपर्वतैः ॥ ७४ ॥
नानारत्नप्रभासैश्च नैकैश्चमणिपर्वतैः ।
हरितालपर्व्वतैर्नैकैस्तथा हिङ्गुलकाञ्चनैः ॥ ७५ ॥
शुद्धैर्मनःशिलाजालैर्भास्वरैररुणप्रभैः ।
नानाधातुविचित्रैश्च नैकैश्च मणिपर्वतैः ॥ ७६ ॥
पूर्णा वसुमती सर्वा गिरिभिर्नैकविस्तरैः ।
नदीकन्दरशैलाद्यैरनेकैश्चित्रसानुभिः ॥ ७७ ॥
इत्येवमचलैर्युक्तैर्दैत्यराक्षससाधुभिः ।
किन्नरोरगगन्धर्वैर्विचित्रैः(१) सिद्धचारणैः ॥ ७८ ॥
गन्धर्वैरप्सरोभिश्च सेविता नैकविस्तराः ।
पुण्यकुक्षिः(२) समाकीर्णाः केसराकृतयो नगाः ॥ ७९ ॥
गिरिजालन्तु तन्मेरोः सिद्धलोकमिति स्मृतं ।
चित्रं नानाश्रयोपेतं प्रचारं सुकृतात्मनां ॥ ८० ॥
नात्युग्रकर्मसिद्धानां प्रतिमा मध्यमाः स्मृताः ।
स हि स्वर्ग इतिख्यातः क्रमस्त्वेष प्रकीर्तितः ॥ ८१ ॥
चतुर्महाद्वीपवती सेयमुर्वी प्रकीर्त्तिता ।

१ विविधैरिति घ०, ङ० च ।
२ पुण्यवद्भिरिति ख० ।



नानावर्णप्रमाणैर्हि नानावर्णबलैस्तथा ॥ ८२ ॥
नानाभक्ष्यान्नपानैश्च नानाच्छादनभूषणैः ।
प्रजाविकारैर्विविधैश्चिरध्युषितैः सह ॥ ८३ ॥
चत्वारो नैकवर्णाद्या महाद्वीपाः परिश्रुताः ।
भद्राश्च भरताश्चैव केतुमालाश्च पश्चिमाः ।
उत्तराः कुरवश्चैव कृतपुण्यप्रतिश्रयाः ॥ ८४ ॥
सैषा चतुर्महाद्वीपा नानाद्वीपसमाकुला ।
पृथिवी कीर्तिता कृत्स्ना पद्माकारा मया द्विजाः ॥ ८५ ॥
तदेषा सान्तरद्वीपा सशैलवनकानना ।
पद्मेत्यभिहिता कृत्स्ना पृथिवी बहुविस्तरा ॥ ८६ ॥
सब्रह्मसदनं लोकं सदेवासुरमानुषं ।
त्रिलोकमिति विख्यातं यत्सर्वैर्व्यवहार्य्यते ॥ ८७ ॥
चन्द्रादित्यावतप्तं यत्तज्जगत्परिगीयते ।
गन्धवर्णरसोपेतं शब्दस्पर्शगुणान्वितं ॥ ८८ ॥
तं लोकपद्मं श्रुतिभिः पद्ममित्यभिधीयते ।
एष सर्व्वपुराणेषु क्रमः सुपरिनिश्चितः ॥ ८९ ॥

इति श्रीमहापुराणे वायुप्रोक्ते भुवनविन्यासो
नामैकचत्वारिंशोऽध्यायः ।

# अथ द्विचत्वारिंशोऽध्यायः।

———ooo———

## भुवनविन्यासः।

सूत उवाच। सरोवरेभ्यः पुण्योदाः(१) देवनद्यो विनिर्गताः।
महौघतोया नद्यश्च ताः शृणुध्वं यथाक्रमं ॥ १ ॥
आकाशाम्भोनिधेर्योऽसौ सोम इत्यभिधीयते।
आधारः सर्व्वभूतानां देवानाममृताकरः ॥ २ ॥
तस्मात् प्रवृत्ता पुण्योदा नदी ह्याकाशगामिनी।
सप्तमेनानिलपथा प्रयाता विमलोदका। ३ ॥
सा ज्योतिषि निवर्त्तन्ती ज्योतिर्गणनिषेविता।
तारकोटिसहस्राणां नभसश्च समायता ॥ ४ ॥
माहेन्द्रेण गजेन्द्रेण आकाशपथयायिना।
क्रीडिता ह्यन्तरतले या सा विक्षोभितोदका ॥ ५ ॥
नैकैर्विमानसङ्घातैः प्रक्रामद्भिर्नभस्तलं।
सिद्धैरुपस्पृष्टजला महापुण्यजला शिवा ॥ ६ ॥
वायुना प्रेर्य्यमाणा च अनेकाभोगगामिनी।
परिवर्त्तत्यहरहो यथा सूर्य्यस्तथैव सा ॥ ७ ॥
चत्वार्य्यशीति प्रतता योजनानां समन्ततः।
वेगेन कुर्वती मेरुं सा प्रयाता प्रदक्षिणं ॥ ८ ॥

१ पुण्येभ्य इति ख०।



विभिद्यमाना सलिलैस्तेजसेनानिलेन च।
मेरोरुत्तरकूटेषु पतिताथ चतुर्ष्वपि ॥ ९ ॥
मेरुकूटतटान्तेभ्य उत्कृष्टेभ्यो निवर्त्तिता।
विकीर्य्यमाणसलिला चतुर्द्धा संस्रुतोदका(१) ॥ १० ॥
षष्टियोजनसाहस्रं निरालम्बनमम्बरं।
निपपात महाभागा मेरोस्तस्य चतुर्दिशं ॥ ११ ॥
सा चतुर्ष्वभितश्चैव महापादेषु शोभना।
पुण्या मन्दरपूर्वेण पतिता हि महानदी ॥ १२ ॥
पूर्वेणांशेन देवानां सर्वसिद्धगणालयं।
सुवर्णचित्रकटकं नैकनिर्झरकन्दरं ॥ १३ ॥
प्लावयन्ती सशैलेन्द्रं मन्दरञ्चारुकन्दरं।
वप्रप्रतापशमनैरनेकैः स्फाटिकोदकैः(२) ॥ १४ ॥
तथा चैत्ररथं रम्यं प्लावयन्ती प्रदक्षिणं।
प्रविष्टा ह्यम्बरनदी ह्यरुणोदसरोवरं ॥ १५ ॥
अरुणोदान्निवृत्ताऽथ शीतान्ते रम्यनिर्झरे।
शैले सिद्धगणावासे निपपात सुगामिनी(३) ॥ १६ ॥
सीता नाम महापुण्या नदीनां प्रवरा नदी।
सा निकुञ्जनिरुद्धा तु अनेकाभोगगामिनी ॥ १७ ॥
शीतान्तशिखराद्भ्रष्टा सुकुञ्जे वरपर्वते।
निपपात महाभागा तस्मादपि सुमञ्जसं ॥ १८ ॥

१ संस्रुतोदकेति ङ०।
२ स्फुटितोदकैरिति ख०।
३ निपपातानुगामिनीति ङ०॥

तस्मान् माल्यवतं शैलं भावयन्ती वरापगा(१) ।
वैकङ्कं समनुप्राप्ता वैकङ्कान्मणिपर्वतं ।
मणिपर्वतान्महाशैलं ऋषभं नैककन्दरं ॥ १९ ॥
एवं शैलसहस्राणि दारयन्ती महानदी ।
पतिताऽथ महाशैले जठरे सिद्धसेविते ॥ २० ॥
तस्मादपि महाशैलं देवकूटं तरङ्गिणी ।
तस्य कुक्षिसमुद्रान्ता क्रमेण पृथिवीं गता ॥ २१ ॥
सैवं स्थलीसहस्राणि शैलराजशतानि च ।
वनानि च विचित्राणि सरांसि विविधानि च ॥ २२ ॥
स्रावयन्ती महाभागा विस्फारेष्ववलोकदा(२) ।
नदीसहस्रानुगता प्रवृत्ता च महानदी ॥ २३ ॥
भद्राख्यं समहाद्वीपं प्लावयन्ती वरापगा ।
प्रविष्टा ह्यर्णवं पूर्वं पूर्वे द्वीपे महानदी ॥ २४ ॥
दक्षिणेऽपि प्रपन्ना या शैलेन्द्रे गन्धमादने ।
चित्रैः प्रपातैर्विविधैर्नैकविस्फालितोदका ॥ २५ ॥
तद्गन्धमादनवनं नन्दनं देवनन्दनं ।
प्लावयन्ती महाभागा प्रयाता सा प्रदक्षिणं । २६ ॥
नाम्ना ह्यलकनन्देति सर्वलोकेषु विश्रुता ।
प्रविशत्यरसरो मानसं देवमानसं । २७ ॥
मानसाच्छैलराजानं रम्यं त्रिशिखरं गता ।
त्रिकूटाच्छैलशिखरात् कलिङ्गशिखरं गता ॥ २८ ॥

१ परापगेति ङ० ॥
२ विस्फारेषु विलासदेति ख० ॥



कलिङ्गशिखराद्भ्रष्टा रुचके निपपात सा ।
रुचकान्निषधं प्राप्ता ताम्राभं निषधादपि ॥ २९ ॥
ताम्राभशिखराद्भ्रष्टा गता श्वेतोदरं गिरिं ।
तस्मात्सुमूलं शैलेन्द्रं वसुधारञ्च पर्वतं ॥ ३० ॥
हेमकूटं गता तस्माद् देवशृङ्गे ततो गता ।
तस्मादृता महाशैलं ततश्चापि पिशाचकं ॥ ३१ ॥
पिशाचकाच्छैलवरात् पञ्चकूटङ्गता पुनः ।
पञ्चकूटात्तु कैलासं देवावासं शिलोच्चयं ॥ ३२ ॥
तस्य कुक्षिषु विभ्रान्ता नैककन्दरसानुषु ।
हिमवत्युत्तमनदी निपपाताचलोत्तमे ॥ ३३ ॥
सैवं शैलसहस्राणि दारयन्ती(१) महानदी ।
स्थलीशतान्यनेकानि प्लावयन्त्याशुगामिनी ॥ ३४ ॥
वनानाञ्च सहस्राणि कन्दराणां शतानि च ।
स्रावयन्ती महाभागा प्रयाता दक्षिणोदधिं ॥ ३५ ॥
रम्या योजनविस्तीर्णा शैलकुक्षिषु संवृता ।
या धृता देवदेवेन शङ्करेण महात्मना ॥ ३६ ॥
पावनी द्विजशार्दूल घोराणामपि पाप्मनां ।
शङ्करस्याङ्गसंस्पर्शान्महादेवस्य धीमतः ।
द्विगुणं पवित्रसलिला सर्वलोके महानदी ॥ ३७ ॥
अनुशीलं समन्ताच्च निर्गता बहुभिर्मुखैः ।
अथोऽन्येनाभिधानेन(२) ख्याता नद्यः सहस्रशः ॥ ३८ ॥

१ पावयन्नीति ख० ।
२ चान्योन्येनाभिधानेनेति ङ० ॥

तस्माद्धिमवतो गङ्गा गता सा तु महानदी।
एवं गङ्गेति नाम्नादिप्रकाशा सिद्धसेविता॥ ३९॥
धन्यास्ते सत्तमा देशा यत्र गङ्गा महानदी।
रुद्रसाध्यानिलादित्यैर्जुष्टतोया यशस्वती॥ ४०॥
महापादं प्रवक्ष्यामि मेरोरपि हि पश्चिमं।
नानारत्नाकरं पुण्यं पुण्यकृद्भिर्निषेवितं॥ ४१॥
विपुलं शैलराजानं विपुलोदरकन्दरं।
नितम्बकुञ्जकटकैर्विमलैर्मण्डितोदरं॥ ४२॥
अपि या त्र्यम्बकस्यैषा त्रिदशैः सेवितोदका।
वायुवेगा गताभोगा लतेव भ्रामिता पुनः (१)॥ ४३॥
मेरुकूटतटाद्भ्रष्टा प्रहतैः स्वादितोदका।
विस्तीर्यमाणसलिला निर्मलांशुकसन्निभा॥ ४४॥
तस्य कूटेऽम्बरनदी सिद्धचारणसेविता।
प्रदक्षिणमथावृत्य पतिता सा तु गामिनी॥ ४५॥
देवभ्राजं महाभ्राजं सर्वभ्राजं महावनं।
प्लावयन्ती महाभागा नानापुष्पफलोदका॥ ४६॥
प्रदक्षिणं प्रकुर्वाणा नानावनविभूषिता।
प्रविष्टा पश्चिमसरः सितोदं विमलोदकं॥ ४७॥
सा सितोदाद्विनिष्क्रान्ता सुपक्षं पर्वतं गता।
सुपक्षतस्तु पुण्योदात्ततो देवर्षिसेविता॥ ४८॥
सुपक्षकूटतटगा तस्माच्च संश्रितोदका।
निपपात महाभागा रमणं शिखिपर्वतं॥ ४९॥

१ लतेवानिलभ्रामितेति ध०।



शिखेश्च पर्वतात् कङ्कं कङ्कादूर्वैदूर्यपर्वतं।
वदूर्य्यात् कपिलं शैलं तस्माच्च गन्धमादनं॥ ५०॥
तस्माद् गिरिवरात् प्राप्ता पिञ्जरं वरपर्वतं।
पिञ्जरात् सरसं याता तस्माच्च कुमुदाचलं॥ ५१॥
मधुमन्तं जनश्चैव(१) मुकुटश्च शिलोच्चयं।
मुकुटाच्छैलशिखरात् कृष्णं याता महागिरिं॥ ५२॥
कृष्णात् श्वेतं महाशैलं महानगनिषेवितं।
श्वेतात् सहस्रशिखरं शैलेन्द्रं पतिता पुनः॥ ५३॥
अनेकाभिः स्रवन्तीभिराप्यायितजला शिवा।
एवं शैलसहस्राणि सादयन्ती महानदी।
पारिजाते महाशैले निपपाताशुगामिनी॥ ५४॥
अनेकनिर्झरनदी गुहासानुषु राजते।
तस्य कुक्षिष्वनेकासु भ्रान्ततोया तरङ्गिणी॥ ५५॥
व्याहन्यमानसंवेगा गण्डशैलैरनेकशः।
संविद्यमानसलिला गता च धरणीतले॥ ५६॥
केतुमालं महाद्वीपं नानाम्लेच्छगणैर्युतं।
प्लावयन्ती महाभागा प्रयाता पश्चिमार्णवं॥ ५७॥
सुवर्णचित्रपार्श्वं तु सुपार्श्वेऽप्युत्तरे गिरौ।
मेरोश्चित्रमहापादे महासत्वनिषेविते॥ ५८॥
मेरुकूटतटाद् भ्रष्टा पवनेनेरितोदका।

१ मधुमन्नावलश्चैवेति ख०।

अनेकाभोगवक्राङ्गी क्षिप्यमाना नभस्तले ॥ ५८ ॥
षष्टियोजनमाहस्रे निरालम्बेऽम्बरे शुभे ।
विकीर्य्यमाणा मालेव निपपात महानदी ॥ ५० ॥
एवं कूटतटैर्भ्रष्टा नैकैर्देवर्षिसेवितैः ।
विकीर्य्यमाणसलिला नैकपुष्पोडुपोत्कचा ॥ ५१ ॥
नानारत्नवनोद्देशमरण्यं सवितुर्व्वनं ।
महावनं महाभागा प्लावयन्ती प्रदक्षिणं ॥ ५२ ॥
सरोवरं महापुण्यं महाभागनिषेवितं ।
तत्राविवेश कल्याणी महाभद्रं सितोदका ॥ ५३ ॥
भद्रसोमेति नाम्ना हि महापारा महाजवा ।
महानदी महापुण्या महाभद्रा विनिर्गता ॥ ५४ ॥
नैकनिर्झरवप्राढ्या शङ्खकूटतटे तु सा(१) ।
तत्र कूटे गिरितटे निपपाताशुगामिनी ॥ ५५ ॥
शङ्खकूटतटाद्भ्रष्टा पपात वृषपर्व्वतं ।
वृषपर्व्वताद्वस्वौकसारं नागशैलं ततो गता ॥ ५६ ॥
तस्मान्नीलं नगश्रेष्ठं संप्राप्ता वर्षपर्व्वतं ।
नीलात्कपिञ्जलश्चैव इन्द्रनीलश्च निम्नगा ॥ ५७ ॥
ततः परं महानीलं हेमशृङ्गश्च सा ययौ ।
हेमशृङ्गाद्गता श्वेतं श्वेताच्च सुनगं ययौ ॥ ५८ ॥
सुनगात् शतशृङ्गश्च संप्राप्ता सा महानदी ।
शतशृङ्गान्महाशैलं पुष्करं पुष्पमण्डितं ॥ ५९ ॥

१ शुभेति ङ० ।



पुष्कराच्च महाशैलं हिराजं सुमहाबलं ।
वराहपर्व्वतं तस्मान्मयूरश्च शिलोच्चयं ॥ ७० ॥
मयूराच्चैकशिखरं कन्दरोदरमण्डितं ।
जातुधिं(१) शैलशिखरं निपपाताशुगामिनी ॥ ७१ ॥
एवं गिरिसहस्राणि दारयन्ती महानदी ।
त्रिशृङ्गं शृङ्गकलिलं मर्य्यादापर्व्वतं गता ॥ ७२ ॥
त्रिशृङ्गतटविभ्रष्टा महाभागनिषेविता ।
मेरुकूटतटाङ्गष्टा पवनेनेरितोदका ॥ ७३ ॥
विरुजं पर्व्वतवरं पपात विमलोदका ।
प्लावयन्ती महाभागा प्रयाता पश्चिमार्णवं ॥ ७४ ॥
सुवर्णभुवि पार्श्वे तु सुपार्श्वेप्युत्तरे गिरौ ।
मेरोश्चित्रे महापादे महासत्वनिषेविते ॥ ७५ ॥
कन्दरोदरविभ्रष्टा तस्मादपि तरङ्गिणी ।
नैकभोगा पपातोर्वीं चित्रपुष्पोडुपोत्कचा ॥ ७६ ॥
प्लावयन्ती प्रमुदिता उत्तरान् मा कुरून्शिवा ।
महाद्वीपस्य मध्येन प्रयाता सोत्तरार्णवं ॥ ७७ ॥
एवं तास्तु महानद्यश्चतस्रो विमलोदकाः ।
महागिरितटभ्रष्टाः संप्रयाताश्चतुर्दिशं ॥ ७८ ॥
तत्रेयं कथितप्राया पृथिवी बहुविस्तरा ।
मेरुशैलमहाकीर्णाऽविशच्च सर्व्वतो दिशं ॥ ७९ ॥
चतुर्महाद्वीपवती चतुराक्रीडकानना ।

१ जातुधिमिति ङ० ॥

चतुष्केतुमहावृक्षा चतुर्व्वरसरस्वती ॥ ८० ॥
चतुर्महाशैलवती चतुरोरगसंश्रया(१)।
अष्टोत्तरमहाशैला तथाष्टवरपर्वता ॥ ८१ ॥

इति श्रीमहापुराणे वायुप्रोक्ते भुवनविन्यासो नाम
द्विचत्वारिंशोऽध्यायः।

---

१ चतुरामनश०त्रयेति ख०।

## अथ त्रिचत्वारिंशोऽध्यायः।

———000———

### भुवनविन्यासः।

सूत उवाच। गन्धमादनपार्श्वे तु स्फीता चोपरि गण्डिका।
द्वात्रिंशतं (१) सहस्राणि योजनैः पूर्व्वपश्चिमा ॥ १ ॥
अस्यायामश्चतुस्त्रिंशत्सहस्राणि प्रमाणतः।
तत्र ते शुभकर्म्माणः केतुमालाः परिश्रुताः ॥ २ ॥
तत्र काला नराः सर्व्वे महासत्वा महाबलाः।
स्त्रियश्चोत्पलपत्राभाः सर्वास्ताः प्रियदर्शनाः ॥ ३ ॥
तत्र दिव्यो महावृक्षः पनसः षड्रसाश्रयः।
ईश्वरो ब्रह्मणः पुत्रः कामचारी मनोजवः।
तस्य पीत्वा फलरसं जीवन्ति हि समायुतं ॥ ४ ॥
पार्श्वे माल्यवतश्चापि पूर्वे पूर्वा तु गण्डिका।
आयामतोऽथ विस्ताराद्यथैवापरगण्डिका ॥ ५ ॥
भद्राश्वास्तत्र विज्ञेया नित्यं मुदितमानसाः।
भद्रं सालवनं तत्र कालास्त्राश्च महाद्रुमाः ॥ ६ ॥
तत्र ते पुरुषाः श्वेता महासत्वा महाबलाः।
स्त्रियः कुमुदवर्णाभाः सुन्दर्य्यः प्रियदर्शनाः ॥ ७ ॥
चन्द्रप्रभाश्चन्द्रवर्णाः पूर्णचन्द्रनिभाननाः।

---

१ पाठोऽयं न समीचीनः।

चन्द्रशीतलगात्राश्च स्त्रियश्चोत्पलगन्धिकाः ॥ ८ ॥
दशवर्षसहस्राणि तेषामायुर्निरामयं ।
कालाम्बस्य रसं पीत्वा सर्व्वदा स्थिरयौवनाः ॥ ९ ॥

ऋषय ऊचुः । प्रमाणं वर्णमायुश्च याथातथ्येन कीर्तितं ।
चतुर्णामपि द्वीपानां समासन्न तु विस्तरात् ॥ १० ॥

सूत उवाच । भद्राश्वानां यथा चिह्नं कीर्तितं कीर्तिवर्द्धनाः ।
तच्छृणुध्वन्तु कार्त्स्न्येन पूर्वसिद्धैरुदाहृतं ॥ ११ ॥
देवकूटस्य सर्वस्य प्रथितस्येह यत्परं ।
पूर्व्वेण दिक्षु सर्वासु यथावच्च प्रकीर्तितं ॥ १२ ॥
कुलाचलानां पञ्चानां नदीनाञ्च विशेषतः ।
तथा जनपदानाञ्च यथा दृष्टं यथा श्रुतं ॥ १३ ॥
सैवालो वर्णमालाग्रः कोरञ्जश्चाचलोत्तमः ।
श्वेतवर्णश्च नीलश्च पञ्चैते कुलपर्वताः ॥ १४ ॥
तेषां प्रसूतिरन्येपि पर्वता बहुविस्तराः ।
कोटिकोटिः क्षितौ ज्ञेयाः शतशोऽथ सहस्रशः ॥ १५ ॥
तैर्विमिश्रा जनपदैर्नानासत्त्वसमाकुलाः ।
नानाप्रकारजातीयास्त्वनेकनृपपालिताः ॥ १६ ॥
नामधेयैश्च विक्रान्तैः श्रीमद्भिः पुरुषर्षभैः ।
अध्यासिता जनपदाः कीर्तनीयाश्च शोभिताः ॥ १७ ॥
तेषान्तु नामधेयानि राष्ट्राणि विविधानि च ।
गिर्य्यन्तरनिविष्टानि समेषु विषमेषु च ॥ १८ ॥
तथा सुमङ्गलाः शुद्धाश्चन्द्रकान्ताः सुनन्दनाः ।
व्रजका नीलशैलेयाः सौवीरा विजयस्थलाः ॥ १९ ॥



महास्थलाः सुकामाश्च महाकेशाः सुमूर्द्धजाः ।
वातरंहाः सोपसङ्गाः परिवायाः परावकाः ॥ २० ॥
सभ्रवक्त्रा महानेत्राः सैवालास्तनपास्तथा ।
कुमुदाः शाकमुण्डाश्च उरःसङ्कीर्णभौमकाः ॥ २१ ॥
सोदका वल्लकाश्चैका वाराहा हारवामकाः ।
शङ्खाख्या भाविसन्द्राश्च उत्तरा हैमभौमकाः ॥ २२ ॥
कृष्णभौमाः सुभौमाश्च महाभौमाश्च कीर्तिताः ।
एते चान्ये च विख्याता नानाजनपदा मया ॥ २३ ॥
ते पिबन्ति महापुण्यां महागङ्गां महानदीं ।
आदौ त्रैलोक्यविख्याता शीता शीताम्बुवाहिनी ॥ २४ ॥
तथा च हंसवसतिर्महाचक्रा च निम्नगा ।
चक्रा वक्रा च कक्षी च सुरसा चापगोत्तमा ॥ २५ ॥
शाखावती चेन्द्रनदी मेघा मङ्गारवाहिनी ।
कावेरी हरितोया च सोमावर्त्ता शतद्रुदा ॥ २६ ॥
वनमाला वसुमती पम्पा पम्पावती शुभा ।
सुवर्णा पञ्चवर्णा च तथा पुण्या वपुष्मती ॥ २७ ॥
मणिवप्रा सुवप्रा च ब्रह्मभागा शिलाशिनी ।
कृष्णतोया च पुण्योदा तथा नागपदी शुभा ॥ २८ ॥
शैवालिनी मणितटा क्षारोदा चारुणावती ।
तथा विष्णुपदी चैव महापुण्या महानदी ॥ २९ ॥
हिरण्यवाहिनीला च(१) स्कन्दमाला सुरावती ।
वामोदा च पताका च वेताली च महानदी ॥ ३० ॥

१ हिरण्यवाहिनी सा चेति ख० ॥

एता गङ्गा महानद्यो नायिका परिकीर्त्तिताः।
क्षुद्रनद्यस्त्वसंख्याताः शतशोऽथ सहस्रशः॥ ३१॥
पूर्व्वद्वीपस्य वाहिन्यः पुण्यवत्यश्च कीर्त्तिताः।
कीर्त्तनेनापि चैतासां पूतः स्यादिति मे मतिः॥ ३२॥
समृद्धराष्ट्रं स्फीतञ्च नानाजनपदाकुलं।
नानाद्रुद्भवनोद्देशं नानानगसुवेष्टितं (१)॥ ३३॥
नरनारीगणाकीर्णं(२) नित्यं प्रमुदितं शिवं।
बहुधान्यधनोपेतं नानानृपतिपालितं।
उपेतं कीर्तनशतैर्नानारत्नाकराकरं॥ ३४॥
तस्मिन्देशे समाख्याता हेमगङ्गदलप्रभाः।
महाकाया महावीर्य्याः पुरुषाः पुरुषर्षभाः॥ ३५॥
सम्भाषणं दर्शनञ्च समस्थानोपसेवनं।
देवैः सह महाभागाः कुर्व्वते तत्र वै प्रजाः॥ ३६॥
दशवर्षसहस्राणि तेषामायुः प्रकीर्तितं।
धर्माधर्मविशेषश्च न तेष्वस्ति महात्मसु।
अहिंसा सत्यवाक्यञ्च प्रकृत्यैव हि वर्त्तते॥ ३७॥
ते भक्त्या शङ्करं देवं गौरीं परमवैष्णवीं(३)।
इज्यापूजानमस्कारांस्ताभ्यां नित्यं प्रयुञ्जते॥ ३८॥

इति श्रीमहापुराणे वायुप्रोक्ते भुवनविन्यासो नाम त्रिचत्वारिंशोऽध्यायः।

---

१ नानानगरपत्तनमिति ङ०। २ नरनारीसमाकीर्णमिति ङ०।
३ गौरीञ्च प्रभविष्णवीमिति क०, घ०, ङ० च।

# अथ चतुश्चत्वारिंशोऽध्यायः।

—ooo—

## भुवनविन्यासः।

सूत उवाच। निसर्ग एष विख्यातो भद्राश्वानां यथार्थवत्।
शृणुध्वं केतुमालानां विस्तरेण प्रकीर्त्तनं(१)॥ १॥
निषधस्याचलेन्द्रस्य पश्चिमस्य महात्मनः।
पश्चिमेन हि यत्तत्र दिक्षु सर्व्वासु कीर्तितं॥ २॥
कुलाचलानां समानां नदीनाञ्च विशेषतः।
तथा जनपदानाञ्च विस्तरं श्रोतुमर्हथ॥ ३॥
विशालः कम्बलः कृष्णो जयन्तो हरिपर्व्वतः।
अशोको वर्द्धमानश्च सप्तैते कुलपर्व्वताः॥ ४॥
तेषां प्रसूतिरन्येपि पर्व्वता बहुविस्तराः।
कोटिकोटिशता ज्ञेयाः शतशोऽथ सहस्रशः॥ ५॥
तैर्व्विमिश्रा जनपदा नानाजातिसमाकुलाः(२)।
नानाप्रकारविज्ञेयास्त्वनेकनृपपालिताः॥ ६॥
ते नामधेयैर्विक्रान्ता विविधाः प्रथिता भुवि।
अध्यासिता जनपदैः कीर्त्तनैश्च विभूषिताः॥ ७॥
तेषां सनामधेयानि राष्ट्राणि विविधानि च।

---

१ प्रकीर्त्तितमिति ङ०। २ नानाजनसमाकुला इति घ०।

गिर्य्यन्तरनिविष्टानि समेषु विषमेषु च ॥ ८ ॥
यथेह कथिताः पौरा गोमनुष्यकपोतकाः।
तत्सुखा भ्रमरा यूथा माहेयाचलकूटकाः ॥ ९ ॥
सुमौलाः स्तावकाः क्रौञ्चाः कृष्णाङ्गमणिपुञ्जकाः।
कूटकम्बलमीषीयाः समुद्रान्तरकास्तथा ॥ १० ॥
करम्भवाः कुचाः श्वेताः सुवर्णकटकाः शुभाः।
श्वेताङ्गाः कृष्णपादाश्च विहाः(१) कपिलकर्णिकाः ॥ ११ ॥
अत्याकरालगोज्वाला हीनाना वनपातकाः।
महिषाः कुमुदाभाश्च करवाटाः महोत्कचाः ॥ १२ ॥
शुनकासा महानासा वनासगजभूमिकाः।
करञ्जमञ्जमा वाहाः किष्किण्डीपाण्डुभूमिकाः ॥ १३ ॥
कुवेरा धूमजा जङ्घा वङ्गा राजीवकोकिलाः।
वाचाङ्गाश्च महाङ्गाश्च मधौरेयाः(२) सुरेचकाः ॥ १४ ॥
पित्तलाः काचलाश्चैव श्रवणा मत्तकासिकाः।
गोदावा वकुला वाङ्गा वङ्गका मोदकाः कलाः ॥ १५ ॥
ते पिबन्ति महाभागाः प्रथमान्तु महानदीं।
सुवप्रां पुण्यसलिलां महानागनिषेवितां ॥ १६ ॥
कम्बलां तामसीं श्यामां सुमेधां वकुलां नदीं।
विकीर्णां शिखिमालाञ्च तथा दर्भावतीमपि ॥ १७ ॥
भद्रानदीं शुकनदीं पलाशाञ्च महानदीं।

१ किन्दा इति घ०।
२ मेधरेया इति घ०। माधवेया इति क०।



भीमां प्रभञ्जनां काञ्चीं पुण्याञ्चैव कुशावतीं ॥ १८ ॥
दक्षां शाकवतीञ्चैव पुण्योदाञ्च महानदीं।
चन्द्रावतीं सुमूलाञ्च ऋषभाञ्चापगोत्तमां ॥ १९ ॥
नदीं समुद्रमालाञ्च तथा चम्पावतीमपि।
एकाञ्चां पुष्कलां वाहां सुवर्णां नन्दिनीमपि ॥ २० ॥
कालिन्दीञ्चैव पुण्योदां भारतीञ्च महानदीं।
सीतोदाम्पातिकां ब्राह्मीं विशालाञ्च महानदीं ॥ २१ ॥
पीवरीं कुम्भकारीञ्च कृष्णाञ्चैवापगोत्तमां।
महिषीं मानुषीं दण्डां तथा नदनदीं शुभां ॥ २२ ॥
एताश्चान्याश्च पीयन्ते वह्नयो हि सरितोत्तमाः(१)।
देवर्षिसिद्धचरिताः पुण्योदाः पापहाः शुभाः ॥ २३ ॥
नानाजनपदास्फीतं महापगाविभूषितं।
नानारत्नौघसम्पूर्णं नित्यं प्रमुदितं शिवं ॥ २४ ॥
उदीर्णं धनधान्यार्थैर्नरवासैः समन्ततः।
सन्निविष्टं महाद्वीपं पश्चिमं सुकृतात्मनां!
निसर्गः केतुमालानामेष वः परिकीर्त्तितः ॥ २५ ॥

इति श्रीमहापुराणे वायुप्रोक्ते भुवनविन्यासो
नाम चतुश्चत्वारिंशोऽध्यायः।

१ पाठोऽयमार्षः।

# अथ पञ्चचत्वारिंशोऽध्यायः ।

———ooo———

## भुवनविन्यासः ।

शांशपायन उवाच(१)। पूर्वापरौ समाख्यातौ द्वौ देशौ नस्त्वया प्रभो।
उत्तराणाञ्च वर्षाणां दक्षिणानाञ्च सर्वशः ।
आचक्ष्व नो यथातथ्यं ये च पर्व्वतवासिनः ॥ १ ॥
सूत उवाच । दक्षिणेन तु श्वेतस्य नीलस्यैवोत्तरेण तु ।
वर्षं रमणकं नाम जायन्ते तत्र मानवाः ॥ २ ॥
सर्व्वर्तुकामदाः सत्वा जरादुर्गन्धवर्जिताः ।
शुक्लाभिजनसम्पन्नाः सर्वे च प्रियदर्शनाः ॥ ३ ॥
तत्रापि सुमहान् दिव्यो न्यग्रोधो रोहिणी महान् ।
तस्य पीत्वा फलरसं पिबन्तो वर्त्तयन्त्युत ॥ ४ ॥
दशवर्षसहस्राणि शतानि दशपञ्च च ।
जीवन्ति ते महाभागाः सदा हृष्टा नरोत्तमाः ॥ ५ ॥
उत्तरेण तु श्वेतस्य शृङ्गसाह्वस्य दक्षिणे ।
वर्षं हिरण्यतं नाम यत्र हैरण्यती नदी ॥ ६ ॥
महाबलाः सुतेजस्का जायन्ते तत्र मानवाः ।
सर्वर्तुकामदाः सत्वा धनिनः प्रियदर्शनाः ॥ ७ ॥

१ वैशम्पायन उवाचेति घ० ।



एकादश सहस्राणि वर्षाणां तेऽमितौजसः
आयुःप्रमाणं जीवन्ति शतानि दशपञ्च च ॥ ८ ॥
तस्मिन् वर्षे महावृक्षो लकुचः षड्रसाश्रयः ।
तस्य पीत्वा फलरसं तत्र जीवन्ति मानवाः ॥ ९ ॥
त्रीणि शृङ्गवतः शृङ्गाण्युच्छ्रितानि महान्ति च ।
एकं मणिमयं तेषामेकञ्चैव हिरण्मयं ।
सर्व्वरत्नमयञ्चैकं भवनैरुपशोभितं ॥ १० ॥
उत्तरस्य समुद्रस्य समुद्रान्ते च दक्षिणे ।
कुरवस्तत्र तद्वर्षं पुण्यं सिद्धनिषेवितं ॥ ११ ॥
तत्र वृक्षा मधुफला नित्यं पुष्पफलोपगाः ।
वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च ॥ १२ ॥
सर्व्वकामफलास्तत्र क्वचिद् वृक्षा मनोरमाः ।
गन्धवर्णरसोपेतं प्रचरन्ति मधूत्तमं ॥ १३ ॥
अपरे क्षीरिणो नाम वृक्षास्तत्र मनोरमाः ।
ये क्षरन्ति सदा क्षीरं षड्रसं ह्यमृतोपमं ॥ १४ ॥
सर्वा मणिमयी भूमिः सूक्ष्मकाञ्चनवालुका ।
सर्व्वतः सुखसंस्पर्शा निष्पङ्का नीरुजा शुभा ॥ १५ ॥
देवलोकाच्युतास्तत्र जायन्ते मानवाः शुभाः ।
शुक्लाभिजनसम्पन्नाः सर्वे च स्थिरयौवनाः ॥ १६ ॥
मिथुनानि प्रसूयन्ते स्त्रियश्चातिमनोहराः ।
ते च तं क्षीरिणं वृक्षं पिबन्ति ह्यमृतोपमं ॥ १७ ॥
मिथुनं जायते सद्यः समञ्चैव विवर्द्धते ।
समं शीलञ्च रूपञ्च म्रियन्ते चैव ते समं ॥ १८ ॥

अन्योन्यमनुरक्ताश्च चक्रवाकसधर्मिणः ।
अनामया ह्यशोकाश्च नित्यं सुखनिषेविणः ॥ १९ ॥
त्रयोदश सहस्राणि शतानि दशपञ्च च ।
जीवन्ति ते महावीर्य्या न चान्यस्त्रीनिषेविणः ॥ २० ॥
कुरूणामपि चैतेषां शृणुध्वं विस्तरेण तु ।
जारुधेः(१) शैलराजस्याप्युत्तरेणोत्तरस्य हि ।
दिक्षु सर्व्वासु यद् यत्र कीर्त्यमानं विबोधत ॥ २१ ॥
अनेककन्दरदरीगुहानिर्झरमण्डितौ ।
नैककुञ्जवनोपेतौ चित्रधातुविभूषितौ(२) ॥ २२ ॥
अनेकधातुकलिलौ सर्व्वधातुविभूषितौ ।
पुष्पमूलफलोपेतौ सिद्धचारणसेवितौ ॥ २३ ॥
द्वावप्येतौ सुमहतावुच्छ्रितौ कुलपर्वतौ ।
ताभ्यां कूटशतैर्नैकैस्तद्द्वीपमुपसेवितं ॥ २४ ॥
चन्द्रकान्तश्च शैलश्च सूर्य्यकान्तश्च सानुमान् ।
यथोर्मध्येन सा याता भद्रसोमा महानदी ॥ २५ ॥
सहस्रशश्च नद्योऽन्याः प्रसन्नसुरसोदकाः ।
पर्य्याप्तोदाः कुरूणां हि स्नानपानावगाहनैः ॥ २६ ॥
तथाऽन्याः क्षीरवाहिन्यो महानद्यः सहस्रशः ।
मधुमैरेयवाहिन्यो घृतवाहिन्य एव च ॥ २७ ॥
दध्नः शतह्रदाश्चान्यास्ततः स्वादूदपर्वतः ।
अमृतस्वादुकल्पानि फलानि विविधानि च ॥ २८ ॥

१ जातुधेरिति घ० ।
२ चित्रधातुविभूषितावितिङ० ।



गन्धवर्णरसाढ्यानि मूलानि च फलानि च ।
पञ्चयोजनमानानि महागन्धानि सर्वशः ॥ २९ ॥
नानावर्णप्रकाराणि पुष्पाणि च सहस्रशः ।
उपभोगसहस्राणि भद्राणि च महान्ति च ॥ ३० ॥
गन्धवर्णरसाढ्यानि स्पर्शोपेतानि सर्वशः ।
तमालागुरुगन्धानां चन्दनानां वनानि च ॥ ३१ ॥
भ्रमरैरुपगीतानि प्रफुल्लानि सदैव च ।
वृक्षगुल्मलताढ्यानि वनानि सुसुखानि च ॥ ३२ ॥
षट्पदैरुपगीतानि द्विजैश्चान्यैर्द्विजोत्तमाः ।
पद्मोत्पलवनाढ्यानि सरांसि च सहस्रशः ॥ ३३ ॥
भक्ष्यमाल्यसमृद्धाश्च बहुमाल्यानुलेपनाः ।
मनोहरमुखैर्यित्रैः पक्षिसङ्घैर्निकूजिताः ॥ ३४ ॥
शयनासनोपभोगाश्च अनेकगुणविस्तराः ।
विहारभूमयो रम्याः सर्वर्तुषु सुखप्रदाः ॥ ३५ ॥
आक्रीडाः सर्वतः स्फीताः मणिहेमपरिष्कृताः ।
शिलागृहा वृक्षगृहाः वरेण्याः कदलीगृहाः ॥ ३६ ॥
लतागृहसहस्राणि सुसुखानि समन्ततः ।
शुद्धशङ्खदलाभानि भूमिवेश्मगतानि च ॥ ३७ ॥
तपनीयगवाक्षाणि मणिजालान्तराणि च ।
सुवर्णमणिचित्राणि सर्वत्र विपुलानि च ॥ ३८ ॥
महावृक्षसहस्राणि वरेण्यानि(१) च सर्वशः ।
नानाकाराणि वासांसि सूक्ष्माणि सुसुखानि च ॥ ३९ ॥

१ रमण्यानि इति क०, घ० च ।

मृदङ्गवेणुपणववीणाद्या बहुविस्तराः ।
फलन्ति कल्पवृक्षाणां सहस्राणि शतानि च ॥ ४० ॥
सर्वत्रैव तथोद्यानं सर्वत्रैव हि तत्पुरं ।
सर्वद्वीपप्रमुदितं नरनारीसमाकुलं ।
प्रवाति चानिलस्तत्र नानापुष्पाधिवासितः ॥ ४१ ॥
नित्यमङ्गसुखाह्लादस्तस्मिन् द्वीपे श्रमापहे ।
तत्र स्वर्गपरिभ्रष्टा जायन्ते हि नराः सदा ।
भौमं तदपि हि स्वर्गं तत्रापि च गुणोत्तमं ॥ ४२ ॥
चन्द्रकान्ता नरवराः श्यामाङ्गाः पूर्वकूलजाः ।
श्यामावदाताः सुखिनः सूर्य्यकान्ता वराः प्रजाः ॥ ४३ ॥
तस्मिन् देशे नराः श्रेष्ठाः देवसत्वपराक्रमाः ।
सदा विहारिणः सर्वे कामवृत्त्या सुवर्चसः ॥ ४४ ॥
वलयाङ्गदकेयूरहारकुण्डलभूषिताः ।
स्रग्विणश्चित्रमुकुटाश्चित्राच्छादनवाससः । ४५ ॥
अजीर्णयौवनधराः सुप्रियाः प्रियदर्शनाः ।
प्रजा वर्षसहस्राणि जीवन्ति सुबहून्युत ॥ ४६ ॥
न ताः प्रसवधर्मिण्यो न वंशप्रक्षयो विधिः ।
मिथुनं जायते वृक्षादुपक्षममनीदृशं ॥ ४७ ॥
सामान्यविभवाः सर्वे ममत्वपरिवर्जिताः ।
न तत्र विद्यते धर्मो नाधर्मः सम्प्रवर्त्तते ॥ ४८ ॥
न व्याधिर्न जरा तत्र न दुर्मेधा न च क्लमः ।
पूर्णे काले विनश्यन्ति जलबुद्बुदवच्च ते ॥ ४९ ॥
एवमत्यन्तसुखिनः सर्वदुःखविवर्जिताः ।



रक्ता धर्मं न पश्यन्ति दुःखाद्धर्मोऽभिजायते ॥ ५० ॥
उत्तराणां कुरूणान्तु पार्श्वे ज्ञेयन्तु दक्षिणे ।
समुद्रमूर्मिमालाढ्यं नानाखरविभूषितं ॥ ५१ ॥
पञ्चयोजनसाहस्रमतिक्रम्य सुरालयं ।
चन्द्रद्वीपमिति ख्यातं चन्द्रमण्डलसंस्थितं ॥ ५२ ॥
सहस्रयोजनानान्तु सर्व्वतः परिमण्डलं ।
नानापुष्पफलोपेतं समृद्धया परया युतं ।
शतयोजनविस्तीर्णमुच्छ्रितं तावदेव तु ॥ ५३ ॥
तस्य मध्ये गिरिवरः सिद्धचारणसेवितः ।
चन्द्रतुल्यप्रभैः कान्तैश्चन्द्राकारैः सुलक्षणैः ॥ ५४ ॥
श्वेतवैदूर्य्यकुमुदैश्चित्रोऽसौ कुमुदप्रभः ।
अनेकचित्रकोद्यानो नैकनिर्झरकन्दरः ।
महासानुदरीकुञ्जैर्विविधैः समलङ्कृतः ॥ ५५ ॥
तस्माच्छैलान्महापुण्या चन्द्रांशुविमलोदका ।
प्रवहत्युत्तमनदी चन्द्रावर्त्ता तरङ्गिणी ॥ ५६ ॥
तत्र चन्द्रमसः स्थानं नक्षत्राधिपतेर्वरं ।
सदाऽवतरते तत्र चन्द्रमा ग्रहनायकः ॥ ५७ ॥
तत्र चन्द्रमसो नाम्ना शैलः स तु परिश्रुतः ।
चन्द्रद्वीपं महाद्वीपं प्रकाशं दिवि चेह च ॥ ५८ ॥
तत्र चन्द्रप्रतीकाशाः पूर्णचन्द्रनिभाननाः ।
चन्द्रकान्ताः प्रजाः सर्वा विमलाश्चन्द्रदैवताः ॥ ५९ ॥
अत्यन्तधार्मिकाः सौम्याः सत्यसन्धाः सुतेजसः ।
प्रजास्तत्र सदाचाराः दशवर्षशतायुषः ॥ ६० ॥

पश्चिमेन तु द्वीपस्य पश्चिमस्य प्रकीर्त्तितं ।
चतुर्योजनसाहस्रं समतीत्य महोदधिं ॥ ६१ ॥
दशयोजनसाहस्रं समन्तात् परिमण्डलं ।
द्वीपं भद्राकरं नाम नानापुष्पोपशोभितं ॥ ६२ ॥
प्रभूतधनधान्याढ्यमनेकनृपपालितं ।
नित्यं प्रमुदितं स्फीतं महाशैलैश्च शोभितं ॥ ६३ ॥
तत्र भद्रासनं वायोर्नानारत्नैश्च मण्डितं ।
तत्र विग्रहवान् वायुः सदा पर्वसु पूज्यते ॥ ६४ ॥
तपनीयसुवर्णाभास्तपनीयविभूषिताः ।
विराजन्तेऽमरप्रख्यास्तत्र चित्राम्बरस्रजः ॥ ६५ ॥
वीर्य्यवन्तो महाभागाः पञ्चवर्षशतायुषः ।
सत्यसन्धा मुदा युक्ताः प्रजास्ता वायुदैवताः ॥ ६६ ॥

सूत उवाच । एवमेव निसर्गोऽयं वर्षाणां भारते युगे ।
दृष्टः परमतत्त्वज्ञैर्भूयः किं कीर्त्तयामि ते ॥ ६७ ॥
आख्याते त्वेवमृषयः सूतपुत्रेण धीमता ।
उत्तरश्रवणे भूयः पप्रच्छुस्तदनन्तरम् ॥ ६८ ॥

ऋषय ऊचुः । यदिदं भारतं वर्षं यस्मिन् स्वायम्भुवादयः ।
चतुर्दशैते मनवः प्रजासर्गे भवन्त्युत ॥ ६९ ॥
एतद्वेदितुमिच्छामस्त्वं हि निगद सत्तम ।
एतत् श्रुत्वा वचस्तेषामब्रवील्लोमहर्षणः ॥ ७० ॥
पौराणिकस्तदा सूत ऋषीणां भावितात्मनां ।
एतद्विस्तरतो भूयस्तानुवाच समाहितः ॥ ७१ ॥

सूत उवाच । निसर्ग एष विख्यातः कृत्स्नान्तु यथार्थवत् ।



भारतस्य तु वक्ष्यामि निसर्गन्तं निबोधत ॥ ७२ ॥
पुण्यतीर्थं हिमवतो दक्षिणस्याक्षलस्य हि ।
पूर्वपश्चायतस्यास्य दक्षिणेन द्विजोत्तमाः ॥ ७३ ॥
तथा जनपदानाञ्च विस्तरं श्रोतुमर्हथ ।
अत्र वो वर्णयिष्यामि वर्षेऽस्मिन् भारते प्रजाः ॥ ७४ ॥
इदन्तु मध्यमं चित्रं शुभाशुभफलोदयं ।
उत्तरं यत्समुद्रस्य हिमवद्दक्षिणञ्च यत् ॥ ७५ ॥
वर्षं तद्भारतं नाम यत्रेयं भारती प्रजा ।
भरणाच्च प्रजानां वै मनुर्भरत उच्यते ।
निरुक्तवचनाच्चैव वर्षन्तद्भारतं स्मृतं ॥ ७६ ॥
ततः स्वर्गश्च मोक्षश्च मध्यश्चान्तश्च गम्यते ।
न खल्वन्यत्र मर्त्यानां भूमौ कर्म विधीयते ॥ ७७ ॥
भारतस्यास्य वर्षस्य नव भेदाः प्रकीर्त्तिताः ।
समुद्रान्तरिता ज्ञेयास्ते त्वगम्याः परस्परं ॥ ७८ ॥
इन्द्रद्वीपः कसेरुश्च ताम्रवर्णो गभस्तिमान् ।
नागद्वीपस्तथा सौम्यो गन्धर्वस्त्वथ वारुणः ॥ ७९ ॥
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ।
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरं ॥ ८० ॥
आयतो ह्याकुमारिक्यादागङ्गाप्रभवाच्च वै ।
तिर्य्यगुत्तरविस्तीर्णः सहस्राणि नवैव तु ॥ ८१ ॥
द्वीपो ह्युपनिविष्टोऽयं म्लेच्छैरन्तेषु नित्यशः ।
पूर्वे किराता ह्यस्यान्ते पश्चिमे यवनाः स्मृताः ॥ ८२ ॥
ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः ।

इज्यायुद्ववणिज्याभिर्वर्त्तयन्तो व्यवस्थिताः ॥ ८३ ॥
तेषां संव्यवहारोऽयं वर्त्तते तु परस्परं ।
धर्मार्थकामसंयुक्तो वर्णानान्तु स्वकर्मसु ॥ ८४ ॥
सङ्कल्पपच्यमानान्तु आश्रमाणां यथाविधि ।
इह स्वर्गापवर्गार्थं प्रवृत्तिर्येषु मानुषी ॥ ८५ ॥
यस्त्वयं नवमो द्वीपस्तिर्य्यगायत उच्यते ।
कृत्स्नं जयति यो ह्येनं स सम्राडिह कीर्त्यते ॥ ८६ ॥
अयं लोकस्तु वै सम्राडन्तरीक्षो विराट् स्मृतः ।
स्वराड्न्यः स्मृतो लोकः पुनर्वक्ष्यामि विस्तरं ॥ ८७ ॥
सप्त चास्मिन् सुपर्वाणो विश्रुताः कुलपर्वताः ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः ।
विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ॥ ८८ ॥
तेषां सहस्रशश्चान्ये पर्वतास्तु समीपगाः ।
अभिजाताः सर्वगुणा विपुलाश्चित्रमानवः ॥ ८९ ॥
मन्दरः पर्वतश्रेष्ठो वैहारो दर्दुरस्तथा ।
कोलाहलः सुरसः (१) मैनाको वैद्युतस्तथा ॥ ९० ॥
पातन्यमो नाम गिरिस्तथापाण्डुरपर्वतः ।
गन्धप्रस्थः कृष्णगिरिर्गोधनो गिरिरेव च ॥ ९१ ॥
पुष्पगिर्य्युज्जयन्तो च शैलो रैवतकस्तथा ।
श्रीपर्वतश्च कारश्च(२) कूटशैलो गिरिस्तथा ॥ ९२ ॥
अन्ये तेभ्यः परिज्ञाताः क्षुद्राः स्वल्पोपजीविनः ।

१ सुसरस इति क०। २ केतुरिति घ०।



तैर्विमिश्रा जनपदा आर्य्यम्लेच्छाश्च नित्यशः ॥ ९३ ॥
पीयन्ते यैरिमा नद्यो गङ्गा सिन्धुसरस्वती ।
शतद्रुश्चन्द्रभागा च यमुना सरयूस्तथा ॥ ९४ ॥
इरावती वितस्ता च विपाशा देविका कुहूः ।
गोमती धुतपापा च बाहुदा च दृषद्वती ॥ ९५ ॥
कौशिकी च तृतीया तु निश्चीरा गण्डकी तथा ।
इक्षुर्लोहित इत्येता हिमवत्पादनिःसृताः ॥ ९६ ॥
वेदस्मृतिर्वेदवती वृत्रघ्नी सिन्धुरेव च ।
वर्णाशा चन्दना चैव सतीरा महती तथा (१) ॥ ९७ ॥
परा चर्म्मण्वती चैव विदिशा वेत्रवत्यपि ।
शिप्रा ह्यवन्ती च तथा पारियात्राश्रयाः स्मृताः ॥ ९८ ॥
शोणो महानदश्चैव नर्म्मदा सुमहाद्रुमा (२) ।
मन्दाकिनी दशार्णा च चित्रकूटा तथैव च ॥ ९९ ॥
तमसा पिप्पला श्रोणी करतोया पिशाचिका ।
नीलोत्पला विपाशा च जम्बुला(३) बालुवाहिनी ॥ १०० ॥
सितेरजा शुक्तिमती मक्रुणा(४) त्रिदिवा क्रमात् ।
ऋक्षपादात् प्रसूतास्ता नद्यो मणिनिभोदकाः ॥ १०१ ॥
तापी पयोष्णी निर्व्वन्ध्या मद्रा च निषधा नदी ।
वेन्वा वैतरणी चैव शितिवाहुः कुमुद्वती ॥ १०२ ॥
तोया चैव महागौरी दुर्गा चान्तशिला तथा ।
विन्ध्यपादप्रसूताश्च नद्यः पुण्यजलाः शुभाः ॥ १०३ ॥

१ सदानीरा मही तथेति घ०, ङ० च। २ सुरद्रा द्रुमेति घ०, ङ० च।
३ वक्रुलेति ङ०। ४ मक्षणेति क०।

गोदावरी भीमरथी कृष्णा वैण्यथ वञ्जुला।
तुङ्गभद्रा सुप्रयोगा[1] कावेरी च तथापगा।
दक्षिणापथनद्यस्तु सह्यपादाद्विनिःसृताः॥ १०४॥
कृतमाला ताम्रवर्णा पुष्पजात्युत्पलावती।
मलयाभिजातास्ता नद्यः सर्वाः शीतजलाः शुभाः॥ १०५॥
त्रिसामा ऋतुकूल्या च इक्षुला त्रिदिवा च या।
लाङ्गूलिनी वंशधरा महेन्द्रतनयाः स्मृताः॥ १०६॥
ऋषीका सुकुमारी च मन्दगा मन्दवाहिनी।
कूपा पलाशिनी चैव शुक्तिमत्प्रभवाः स्मृताः॥ १०७॥
सर्वाः पुण्याः सरस्वत्याः सर्वा गङ्गाः समुद्रगाः (१)।
विश्वस्य मातरः सर्वा जगत्यापहराः स्मृताः॥ १०८॥
तासां नद्युपनद्योऽपि शतशोऽथ सहस्रशः।
तास्विमे कुरुपाञ्चालाः शाल्वाश्चैव सजाङ्गलाः॥ १०९॥
शूरसेना भद्रकारा बोधाः शतपथैश्वरैः।
वत्साः किमर्णाः(२)कुल्याश्च कुन्तलाः काशिकोशलाः॥ ११०॥
अथ पार्श्वे तिलङ्गाश्च मगधाश्च तुकैः सह।
मध्यदेशा जनपदाः प्रायशोऽमी प्रकीर्त्तिताः॥ १११॥
सह्यस्य चोत्तरार्द्धे तु यत्र गोदावरी नदी।
पृथिव्यामिह कृत्स्नायां स प्रदेशो मनोरमः॥ ११२॥
तत्र गोवर्द्धनो नाम सुरराजेन निर्मितः।
रामप्रियार्थं स्वर्गोऽयं दत्त्वा ओषधयस्तथा॥ ११३॥
भरद्वाजेन मुनिना तत्प्रियार्थेऽवतारिताः।

१ सर्व्वा नद्यः समुद्रगा इति क०। २ किसष्टा इति ङ०। किसया इति घ०।



अन्तःपुरवनोद्देशस्तेन(१) जज्ञे मनोरमः॥ ११४॥
वाह्लीका वाटधानाश्च आभीराः कालतोयकाः।
अपरीताश्च शूद्राश्च पल्लवाश्चर्मखण्डिकाः॥ ११५॥
गान्धारा यवनाश्चैव सिन्धुसौवीरभद्रकाः।
शका ऋदाः कुलिन्दाश्च परिता हारपूरिकाः॥ ११६॥
रमटा रट्टकटका कैकया दशमानिकाः।
क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च॥ ११७॥
काम्बोजा दरदाश्चैव बर्बराः प्रियलौकिकाः।
पौनाश्चैव तुषाराश्च पल्लवा वाह्यतोदराः(२)॥ ११८॥
आत्रेयाश्च भरद्वाजाः प्रस्थलाश्च कसेरुकाः।
लम्पाका स्तनपाश्चैव पौडिका जुहुडैः सह॥ ११९॥
अपगाश्चालिमद्राश्च किरातानाञ्च जातयः।
तोमरा हंसमार्गाश्च काश्मीरास्तङ्गणास्तथा॥ १२०॥
चूलिकाश्चाहुकाश्चैव पूर्णदर्वास्तथैव च।
एते देशा ह्युदीच्याश्च प्राच्यान् देशान्निबोधत॥ १२१॥
अम्बष्ठाकाः सुजरका अन्तर्गिरिबहिर्गिराः।
तथा प्रवङ्गवङ्गेया मालदा मालवर्त्तिनः॥ १२२॥
ब्रह्मोत्तराः प्रविजया भार्गवा गेयमर्थकाः (३)।
प्राग्ज्योतिषाश्च मुण्डाश्च विदेहास्ताम्रलिप्तकाः।
माला मगधगोविन्दाः प्राच्यां जनपदाः स्मृताः॥ १२३॥
अथापरे जनपदा दक्षिणापथवासिनः।

१ तचेति घ०। २ रतूधाराः चतोदरा इति ङ०।
३ पाठोऽयं न समीचीनः।

पाण्ड्राश्च केरलाश्चैव चौल्याः कुल्यास्तथैव च ॥ १२४ ॥
सेतुका मूषिकाश्चैव कुमना वनवासिकाः।
महाराष्ट्रा माहिषकाः कलिङ्गाश्च व सर्वशः ॥ १२५ ॥
अभीराः सहचैषीका आटव्याश्च वराश्च ये।
पुलिन्द्रा विन्ध्यमूलीका वैदर्भा दण्डकैः सह ॥ १२६ ॥
पौनिका मौनिकाश्चैव अस्मका भोगवर्द्धनाः।
नैर्णिकाः कुन्तला अम्बा उद्भिदा नलकालिकाः ॥१२७॥
दाक्षिणात्याश्च वै देशा अपरांस्तान्निबोधत।
सूर्पाकाराः कोलवना दुर्गाः कालीतकैः सह ॥ १२८ ॥
पुलेयाश्च सुरालाश्च रूपसास्तापसैः सह।
तथा तुरसिताश्चैव सर्वे चैव परत्तराः ॥ १२९ ॥
नासिक्याद्याश्च ये चान्ये ये चैवान्तरनर्मदाः।
भानुकच्छाः समा हेयाः सहसा शाखतैरपि ॥ १३० ॥
कच्छीयाश्च सुराष्ट्राश्च अनर्त्ताश्चार्बुदैः सह।
इत्येते सम्परीताश्च शृणुध्वं विन्ध्यवासिनः ॥ १३१ ॥
मालवाश्च करूषाश्च मेकलाश्चोत्कलैः सह।
उत्तमर्णा दशार्णाश्च भोजाः किष्किन्धकैः सह ॥ १३२ ॥
तोसलाः कोसलाश्चैव त्रैपुरा वैदिकास्तथा।
तुमुरास्तुम्बुराश्चैव षट्सुरा निषधैः सह ॥ १३३ ॥
अनुपास्तुण्डिकेराश्च वीतिहोत्रा ह्यवन्तयः।
एते जनपदाः सर्वे विन्ध्यपृष्ठनिवासिनः ॥ १३४ ॥
अतो देशान् प्रवक्ष्यामि पर्व्वताश्रयिणश्च ये।
निगर्हरा हंसमार्गाः क्षुपणास्तङ्गणाः खसाः ॥ १३५ ॥



कुशप्रावरणाश्चैव हूणा दर्वाः सह्रदकाः।
त्रिगर्त्ता मालवाश्चैव किरातास्तामसैः सह ॥ १३६ ॥
चत्वारि भारते वर्षे युगानि कवयो विदुः।
कृतं त्रेता द्वापरञ्च कलिश्चेति चतुष्टयं।
तेषां निसर्गं वक्ष्यामि उपरिष्टान्निबोधत ॥ १३७ ॥

इति श्रीमहापुराणे वायुप्रोक्ते भुवनविन्यासो नाम
पञ्चचत्वारिंशोऽध्यायः।

---

# अथ षट्चत्वारिंशोऽध्यायः ।

———ooo———

## भुवनविन्यासः ।

सूत उवाच । एतच्छ्रुत्वा तु ऋषय उत्तरं पुनरेव ते ।
शुश्रूषवो मुदा युक्ताः पप्रच्छुर्लोमहर्षणं ॥ १ ॥
ऋषय ऊचुः । यच्च किं पुरुषं वर्षं हरिवर्षं तथैव च ।
आचक्ष्व नो यथातत्त्वं कीर्त्तितं भारतं त्वया ॥ २ ॥
पृष्टस्त्विदं यथा विप्रैर्यथा प्रश्नं विशेषतः ।
उवाच मुनिनिर्दिष्टं पुराणं विहितं यथा ॥ ३ ॥
सूत उवाच । शुश्रुषा यत्र वो विप्रास्तत्शृणुध्वं मुदा युताः ।
प्लक्षखण्डः किं पुरुषे सुमहान्नन्दनोपमः ॥ ४ ॥
दशवर्षसहस्राणि स्थितिः किं पुरुषे स्मृता ।
सुवर्णवर्णाश्च नरा स्त्रियश्चाप्सरसोपमाः ॥ ५ ॥
अनामया ह्यशोकाश्च सर्वे ते शुद्धमानसाः ।
जायन्ते मानवास्तत्र निस्तप्तकनकप्रभाः ॥ ६ ॥
वर्षे किंपुरुषे पुण्ये प्लक्षो मधुवहः शुभः ।
तस्य किंपुरुषाः सर्वे पिबन्ति रसमुत्तमं ॥ ७ ॥
अतःपरं किंपुरुषाद्धरिवर्षः प्रचक्ष्यते ।
महारजतसङ्काशा जायन्ते तत्र मानवाः ॥ ८ ॥
देवलोकाच्च्युताः सर्वे देवरूपाश्च सर्वशः ।
हरिवर्षे नराः सर्वे पिबन्त्योजुरसं शुभं ॥ ९ ॥



एकादश सहस्राणि वर्षाणान्तु मुदा युताः ।
हरिवर्षे तु जीवन्ति सर्वे मुदितमानसाः ।
न जरा बाधते तत्र जीर्य्यन्ति न च ते नराः ॥ १० ॥
मध्यमं यन्मया प्रोक्तं नाम्ना वर्षमिलावृतं ।
न तत्र सूर्य्यस्तपति न च जीर्य्यन्ति मानवाः ॥ ११ ॥
चन्द्रसूर्य्यौ सनक्षत्रावप्रकाशाविलावृते ।
पद्मवर्णाः पद्मप्रभाः पद्मपत्रनिभेक्षणाः ।
पद्मपत्रसुगन्धाश्च जायन्ते तत्र मानवाः ॥ १२ ॥
जम्बूरसफलाहारा ह्यनिष्यन्दाः सुगन्धिनः ।
मनस्विनो भुक्तभोगाः सत्कर्म्मफलभोगिनः ॥ १३ ॥
देवलोकाच्च्युताः सर्वे जायन्ते ह्यजरामराः ।
त्रयोदश सहस्राणि वर्षाणान्ते नरोत्तमाः ॥ १४ ॥
आयुःप्रमाणं जीवन्ति ते तु वर्षे त्विलावृते ।
मेरोः प्रतिदिशं ते तु नवसाहस्रविस्तृते ॥ १५ ॥
योजनानां सहस्राणि षड्विंशस्तस्य विस्तरः ।
चतुरस्रः समन्ताच्च शरावाकारसंस्थितः ॥ १६ ॥
मेरोस्तु पश्चिमे भागे नवसाहस्रसम्मिते ।
चतुस्त्रिंशत्सहस्राणि गन्धमादनपर्व्वतः ॥ १७ ॥
उदग्दक्षिणतश्चैव आनीलनिषधायतः ।
चत्वारिंशत्सहस्राणि परिवृत्तो महीतलात् ।
सहस्रमवगाढ़स्तु तावदेव तु धिष्ठितः ॥ १८ ॥
पूर्वेण माल्यवान् शैलस्तत्प्रमाणः प्रकीर्त्तितः ।
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ॥ १९ ॥

तेषां मध्ये महामेरुः सुप्रमाणः प्रकीर्त्तितः ।
सर्वेषामेव शैलानामवगाढो यथा भवेत् ॥ २० ॥
विस्तरस्तत्प्रमाणः स्यादायामे नियुतः स्मृतः ।
वृत्तभावात् समुद्रस्य महीमण्डलभावनः ॥ २१ ॥
आयामाः परिहीयन्ते चतुरस्राः समन्ततः ।
अनावृत्ताश्चतुष्केण भिद्यन्ते मध्यमागताः ॥ २२ ॥
प्रभिन्नाञ्जनसङ्काशा जम्बूरसवती नदी ।
मेरोस्तु दक्षिणे पार्श्वे निषधस्योत्तरेण तु ॥ २३ ॥
सुदर्शनो नाम महाजम्बूवृक्षः सनातनः ।
नित्यपुष्पफलोपेतः सिद्धचारणसेवितः ॥ २४ ॥
तस्य नाम्ना समाख्यातो जम्बूद्वीपे वनस्पतिः ।
योजनानां सहस्रन्तु शतञ्चान्यमहाद्रुमः ।
उत्सेधो वृक्षराजस्य दिवं स्पृशति सर्व्वशः ॥ २५ ॥
अरत्नीनां शतान्यष्टौ एकषष्ट्यधिकानि तु ।
फलप्रमाणं संख्यातमृषिभिस्तत्त्वदर्शिभिः ॥ २६ ॥
पतमानानि तान्युर्व्यां कुर्वन्ति विपुलं स्वनं ।
तस्या जम्बूः फलरसो नदीभूय प्रसर्पति ॥ २७ ॥
मेरुं प्रदक्षिणीकृत्य जम्बूवृक्षं विशत्यधः ।
ते पिबन्ति सदा हृष्टा जम्बूरसफलाशिताः ॥ २८ ॥
जम्बूरसफलं पीत्वा न जरां प्राप्नुवन्ति ते ।
न च ध्रुवं (१) न रोगन्तु न च मृत्युं तथाविधं ॥ २९ ॥
तत्र जाम्बूनदं नाम कनकं देवभूषणं ।

१ क्रुधमिति घ० ।



इन्द्रगोपकसङ्काशं जायते भास्वरन्तु तत् ॥ ३० ॥
सर्वेषां वर्षवृक्षाणां शुभः फलरसस्तु सः ।
स्वल्पं भवति तच्छुक्लं कनकं देवभूषणं ॥ ३१ ॥
तेषां मूत्रं पुरीषञ्च दिक्षु सर्वासु भागशः ।
ईश्वरानुग्रहाद्भूमिर्भक्षतांश्च ग्रसते तु तान् ॥ ३२ ॥
रक्षःपिशाचा यक्षाश्च सर्वे हैमवताः स्मृताः ।
हेमकूटे तु गन्धर्वा विज्ञेयाः साप्सरोगणाः ॥ ३३ ॥
सर्वे नागास्तु निषधे शेषवासुकितक्षकाः ।
महामेरौ त्रयस्त्रिंशद्गमन्ते यात्रिकाः सुराः ।
नीले तु वैडूर्य्यमये सिद्धब्रह्मर्षयो मताः ॥ ३४ ॥
दैत्यानां दानवानाञ्च श्वेतपर्व्वत उच्यते ।
शृङ्गवान्पर्व्वतः श्रेष्ठः पितॄणां प्रतिसञ्चरः ॥ ३५ ॥
नवस्वेतेषु वर्षेषु यथाभागस्थितेषु वै ।
भूतान्यूपनिविष्टानि गतिमन्ति ध्रुवाणि च ॥ ३६ ॥
तेषां विवृद्धिर्बहुला दृश्यते देवमानुषी ।
न शक्या परिसंख्यातुं अद्धेयाऽनुबुभूषता ॥ ३७ ॥

इति श्रीमहापुराणे वायुप्रोक्ते भुवनविन्यासो
नाम षट्चत्वारिंशोऽध्यायः ।

# अथ सप्तचत्वारिंशोऽध्यायः ।

———ooo———

## भुवनविन्यासः ।

सूत उवाच । सव्ये हिमवतः पार्श्वे कैलासो नाम पर्व्वतः ।
तस्मिन्निवसति श्रीमान् कुवेरः सह राक्षसैः ।
अप्सरोगणसंयुक्तो मोदते ह्यलकाधिपः ॥ १ ॥
कैलासपादात् सम्भूतं पुण्यं शीतजलं शुभं ।
मन्दं नाम्ना कुमुदज्वं शरदभ्रसन्निभं ॥ २ ॥
तस्मादुदिव्या प्रभवति नदी मन्दाकिनी शुभा ।
दिव्यञ्च नन्दनं तत्र तस्यास्तीरे महद्वनं ॥ ३ ॥
प्रागुत्तरेण कैलासाद्दिव्यसत्वौषधं गिरिं ।
सुरधातुमयं चित्रं सुवर्णं पर्वतं प्रति ॥ ४ ॥
चन्द्रप्रभो नाम गिरिः स शुभ्रो रत्नसन्निभः ।
तस्य पादे महद्दिव्यमच्छोदं नाम तत्सरः ॥ ५ ॥
तस्माद्दिव्या प्रभवति ह्यच्छोदा नाम निम्नगा ।
तस्यास्तीरे महादिव्यं वनं चैत्ररथं स्मृतं ॥ ६ ॥
तस्मिन् गिरौ निवसति मणिभद्रः सहानुगः ।
यक्षसेनापतिः क्रूरगुह्यकैः परिवारितः ॥ ७ ॥
पुण्या मन्दाकिनी चैव निम्नगाच्छोदिका तथा ।
महीमण्डलमध्येन प्रविष्टे ते महोदधिं ॥ ८ ॥



कैलासाद्दक्षिणप्राच्यां शिवसत्वौषधिं गुरुम् ।
मनःशिलामयं दिव्यं पिशङ्गं पर्वतं प्रति ॥ ९ ॥
लोहितो हेमशृङ्गस्तु गिरिः सूर्य्यप्रभो महान् ।
तस्य पादे महद्दिव्यं लोहितं नाम तत्सरः ॥ १० ॥
तस्मात् पुण्यः प्रभवति लौहित्यः सदनो महान् ।
देवारण्यं विशोकञ्च तस्य तीरे महावनं ॥ ११ ॥
तस्मिन् गिरौ निवसति यक्षो मणिवरो वशी ।
सौम्यैः सुधार्मिकैश्चैव गुह्यकैः परिवारितः ॥ १२ ॥
कैलासाद्दक्षिणे पार्श्वे क्रूरसत्वौषधं गिरिं ।
हतकायात् किलोत्पन्नमञ्जनं चिक्कुम्मति ॥ १३ ॥
सर्व्वधातुमयस्तत्र सुमहान् वेद्युतो गिरिः ।
तस्य पादे सरः पुण्यं मानसं सिद्धसेवितं ॥ १४ ॥
तस्मात् प्रभवते पुण्या सरयूर्लोकभावनी ।
तस्यास्तीरे वनं दिव्यं वैभ्राजं नाम विश्रुतं ॥ १५ ॥
कुवेरानुचरस्तत्र प्रहेतितनयो वशी ।
ब्रह्मपातो निवसति राक्षसोऽनन्तविक्रमः ।
अन्तरीक्षचरैर्घोरैर्यातुधानशतैर्वृतः ॥ १६ ॥
अपरेण तु कैलासान्मुख्यसत्वौषधिं गिरिं ।
अरुणं पर्वतश्रेष्ठं रुक्मधातुमयं प्रति ॥ १७ ॥
भवस्य दयितः श्रीमान् पर्वतो मेघसन्निभः ।
शातकुम्भमयैः शुभ्रैः शिलाजालैः समावृतः ॥ १८ ॥
शतसंख्यैस्तापनीयैः शृङ्गैर्दिवमिवोल्लिखन् ।
मुञ्जवान् स महादिव्यो दुर्गशैलो हिमार्चितः ॥ १९ ॥

तस्मिन् गिरौ निवसति गिरिशो धूम्रलोहितः ।
तस्य पादात् प्रभवति शैलोदं नाम तत्सरः ॥ २० ॥
तस्मात् प्रभवते दिव्या शैलोदा नाम निम्नगा ।
सा चक्षुःशीतयोर्मध्ये प्रविष्टा लवणोदधिं ॥ २१ ॥
तस्यास्तीरे वनं दिव्यं विश्रुतं सुरभीति वै ।
अस्युत्तरेण कैलासाच्छिवसत्वौषधी गिरिः ॥ २२ ॥
गौरो नाम गिरिस्तत्र हरितालमयः शुभः ।
हिरण्यशृङ्गः सुमहान् दिव्यो मणिमयो गिरिः ॥ २३ ॥
तस्य पादे महद्दिव्यं शुभं काञ्चनवालुकं ।
रम्यं विन्दुसरो नाम यत्र यातो भगीरथः ॥ २४ ॥
गङ्गानिमित्तं राजर्षिरुवास बहुलाः समाः ।
दिवं यास्यन्ति मे पूर्वं गङ्गातोयपरिप्लुताः ॥ २५ ॥
तत्र त्रिपथगा देवी प्रथमन्तु प्रतिष्ठिता ।
सोमपादप्रसूता सा सप्तधा प्रतिपद्यते ॥ २६ ॥
यूपा मणिमयास्तत्र चितयश्च हिरण्मयाः ।
तत्रेष्ट्वा तु गतः शर्वं शक्रः सर्वैः सुरैः सह ॥ २७ ॥
दिविच्छायापथो यस्तु अनुनक्षत्रमण्डलं ।
दृश्यते भास्वरो रात्रौ देवी त्रिपथगा तु सा ॥ २८ ॥
अन्तरीक्षं दिवञ्चैव भावयन्ती भुवङ्गता ।
भवोत्तमाङ्गे पतिता संरुद्धा योगमायया ॥ २९ ॥
तस्या ये विन्दवः केचित् क्रुद्धायाः पतिताः क्षितौ ।
कृतं विन्दुसरस्तत्र ततो विन्दुसरः स्मृतं ॥ ३० ॥
ततो निरुद्धा देवी सा भवेन सयता किल ।



चिन्तयामास मनसा शङ्करक्षेपणं प्रति ॥ ३१ ॥
भित्त्वा विशामि पातालं स्रोतसा गृह्य शङ्करं ।
ज्ञात्वा तस्या अभिप्रायं क्रूरं देव्या चिकीर्षितं ॥ ३२ ॥
तिरोभावयितुं बुद्धिरासीदङ्गेषु तां नदीं ।
तस्यावलेपं तं बुद्ध्वा नद्याः क्रुद्धस्तु शङ्करः ।
निरुध्य तु शिरस्येनां वेगेन पतितां भुवि ॥ ३३ ॥
एतस्मिन्नेव काले तु दृष्ट्वा राजानमग्रतः ।
धमनीसन्ततं क्षीणं क्षुधापरिगतेन्द्रियं ॥ ३४ ॥
अनेन तोषितश्चाहं नद्यर्थं पूर्वमेव हि ।
बुद्ध्वास्य वरदानन्तु कोपं नियतवांस्तु सः ॥ ३५ ॥
ब्रह्मणो हि वचः श्रुत्वा प्रतिज्ञाधारणं प्रति ।
ततो विसर्जयामास संरुद्धां स्वेन तेजसा ।
नदीं भगीरथस्यार्थे तपसोग्रेण तोषितः ॥ ३६ ॥
ततो विसर्ज्यमानायाः स्रोतस्तत्सप्तताङ्कितं ।
त्रयः प्राचीमभिमुखं प्रतीचीं त्रय एव तु ॥ ३७ ॥
नद्याः स्रोतस्तु गङ्गायाः प्रत्यपद्यत सप्तधा ।
नलिनी ह्लादिनी चैव पावनी चैव प्राग्गता ॥ ३८ ॥
सीता चक्षुश्च सिन्धुश्च प्रतीचीं दिशमाश्रिताः ।
सप्तमी त्वनुगा तासां दक्षिणेन भगीरथी ॥ ३९ ॥
तस्माद्भागीरथी या सा प्रविष्टा लवणोदधिं ।
सप्तैता भावयन्तीह हिमाह्वं वर्षमेव तु ॥ ४० ॥
प्रसूताः सप्त नद्यस्ताः शुभा विन्दुसरोद्भवाः ।
नानादेशान् भावयन्त्यो म्लेच्छप्रायांश्च सर्वगः ॥ ४१ ॥

उपगच्छन्ति ताः सर्वा यतो वर्षति वासवः ।
सिरिम्भान् कुन्तलांश्चीनान् वर्वरान्यवसान् द्रुहान् ॥४२॥
रुषाणांश्च कुणिन्दांश्च अङ्गलोकवरांश्च ये ।
कृत्वा द्विधा सिन्धुमरुं सीताऽगात्पश्चिमोदधिं ॥ ४३ ॥
अथ चीनमरूंश्चैव नङ्गणान् सर्वमूलिकान् ।
साधूंस्तुषारांस्तम्माकान् पङ्गवान् दरदान् शकान् ।
एतान् जनपदान् चक्षुः स्रावयन्ती(१)गतोदधिं ॥ ४४ ॥
दरदांश्च सकाश्मीरान् गान्धारान् वरपान् ऋदान् ।
शिवपौरानिन्द्रहासान् वदातींश्च विसर्जयान् ॥ ४५ ॥
सैन्धवान् रम्भकरकान् भ्रमराभीररोहकान् ।
शुनामुखांश्चोर्ङ्मनून् सिद्धचारणसेवितान् ॥ ४६ ॥
गन्धर्व्वान् किन्नरान् यक्षान् रक्षोविद्याधरोरगान् ।
कलापग्रामकांश्चैव पारदान् सीगणान् खसान् ॥ ४७ ॥
किरातांश्च पुलिन्दांश्च कुरून् सभरतानपि ।
पञ्चालकाशिमाल्यांश्च मगधाङ्गांस्तथैव च ॥ ४८ ॥
ब्रह्मोत्तरांश्च वङ्गांश्च तामलिप्तांस्तथैव च ।
एतान् जनपदानार्य्यान् गङ्गा भावयते शुभान् ॥ ४९ ॥
ततः प्रतिहता विन्ध्ये प्रविष्टा दक्षिणोदधिं ।
ततश्चाह्लादिनी पुण्या प्राचीनाभिमुखी ययौ ॥ ५० ॥
प्लावयन्त्युपभोगांश्च निषादानाञ्च जातयः ।
घोरान्नृषिकांश्चैव तथा नीलमुखानपि ॥ ५१ ॥
केरलानुष्ट्रकर्णांश्च किरातानपि चैव हि ।

१ प्लावयन्तीति घ०, ङ० च ।



कालोदरान् विवर्णांश्च कुमारान् स्वर्णभूषितान् ॥ ५२॥
सा मण्डले समुद्रस्य तिरोभूताऽनुपूर्वतः ।
ततस्तु पावनी चैव प्राचीमेव दिशङ्गता ॥ ५३ ॥
अपथान् भावयन्तीह इन्द्रद्युम्नसरोपि च ।
तथा खरपथांश्चैव इन्द्रशङ्कुपथानपि ॥ ५४ ॥
मध्येनोद्यानमस्कारान् कुथप्रावरणान् ययौ ।
इन्द्रद्वीपसमुद्रे तु प्रविष्टा लवणोदधिं ॥ ५५ ॥
ततश्च नलिनी चागात् प्राचीमाशां जवेन तु ।
तोमरान् भावयन्तीह हंसमार्गान्सह्लहुकान् (१) ॥ ५६॥
पूर्वान् देशांश्च सेवन्ती भित्त्वा सा बहुधा गिरीन् ।
कर्णप्रावरणांश्चैव प्राप्य चाश्वमुखानपि ॥ ५७ ॥
सिकतापर्वतमरून् गत्वा विद्याधरान् ययौ ।
नेमिमण्डलकोष्ठे तु प्रविष्टा सा महोदधिं ॥ ५८ ॥
तासां नद्युपनद्यश्च शतशोऽथ सहस्रशः ।
उपगच्छन्ति ताः सर्वा यतो वर्षति वासवः ॥ ५९ ॥
वस्रोकसायास्तीरे तु वारिसुरभिविश्रुते ।
हरिशृङ्गे तु वसति विद्वान् कौवेरको वशी ॥ ६० ॥
यज्ञोपेतः स सुमहानमितौजाः सुविक्रमः ।
तत्रागस्त्यैः परिवृतो विद्वद्भिर्ब्रह्मराक्षसैः ।
कुवेरानुचरा ह्येते चत्वारस्तत्समाः स्मृताः ॥ ६१ ॥
एवमेव तु विज्ञेया ऋद्धिः पर्वतवासिनां ।
परस्परेण हि गुणा धर्म्मतः कामतोऽर्थतः ॥ ६२ ॥

१ बह्वृदकानिति ङ० ।

हेमकूटस्य पृष्ठे तु सायनं नाम तत्सरः।
मनस्विनी प्रभवति तस्माज्ज्योतिष्मती च सा ॥ ६३ ॥
अवगाह्य ह्युभयतः समुद्रौ पूर्व्वपश्चिमौ।
सरो विष्णुपदं नाम निषधे पर्व्वतोत्तमे ॥ ६४ ॥
तस्माद्धयं प्रभवति गान्धर्वी नन्दनी च या।
मेरोः पश्चात् प्रभवति ह्रदश्चन्द्रप्रभो महान् ॥ ६५ ॥
तत्र जाम्बूनदी पुण्या यस्यां जाम्बूनदं शुभं।
पयोदन्तु सरो नीले सुशुभ्रं पुण्डरीकवत् ॥ ६६ ॥
पुण्डरीका पयोदा च तस्मान्नद्यौ विनिर्गते।
श्वेतात् प्रभवते पुण्यं सरस्तूत्तरमानसं ॥ ६७ ॥
ज्योत्स्ना च मृगकान्ता च तस्माद्वै संबभूवतुः।
मधुमत्सरः पुण्यश्च पद्ममीनद्विजाकुलं ॥ ६८ ॥
कल्पद्रुसमाकीर्णं मधुवत्सर्वतः सुखं।
रुद्रकान्तमिति ख्यातं निर्मितं तद्भवेन तु ॥ ६९ ॥
अन्ये चाप्यत्र विख्याताः पद्ममीनद्विजाकुलाः।
नाम्ना रुद्रा जया नाम (१) ह्रादशोदधिसन्निभाः ॥ ७० ॥
तेभ्यः शान्ता च माध्वी च द्वे नद्यौ सम्बभूवतुः।
यानि किंपुरुषाद्यानि तेषु देवो न वर्षति ॥ ७१ ॥
उद्भिज्जान्युदकान्यत्र प्रवहन्ति सरिद्वराः।
ऋषभो दुन्दुभिश्चैव धूम्रश्चैव महागिरिः ॥ ७२ ॥
पूर्वायता महाभागा निम्नगा लवणाम्भसि।
चन्द्रकङ्कस्तथा प्राणो महानग्निः शिलोच्चयः।

१ नाम्ना ह्रदा जया नामेति ख०।



उदग्यातो उदीच्यान्तो अवगाढ़ा महोदधिं ॥ ७३ ॥
सोमकश्च वराहश्च नारदश्च महीधरः।
प्रतीचीमायतास्ते वै प्रविष्टा लवणोदधिं ॥ ७४ ॥
चक्रो बलाहकश्चैव मैनाकश्चैव पर्वतः।
आयतास्ते महाशैलाः समुद्रं दक्षिणं प्रति।
चन्द्रमैनाकयोर्मध्ये विदिशं दक्षिणां प्रति ॥ ७५ ॥
तत्र संवर्त्तको नाम सोऽग्निः पिबति तज्जलं।
नाम्ना समुद्रपः श्रीमानौर्वः स वडवामुखः ॥ ७६ ॥
द्वादशैते प्रविष्टा हि पर्वता लवणोदधिं।
महेन्द्रभयवित्रस्ताः पक्षच्छेदभयात्तदा।
यदेतद्दृश्यते चन्द्रे श्वेते कृष्णगवाकृतिः ॥ ७७ ॥
भारतस्य तु वर्षस्य भेदास्ते नव कीर्त्तिताः।
इन्द्रादितस्य दृश्यन्ते तथाऽन्येऽन्यत्र नोदिते ॥ ७८ ॥
उत्तरोत्तरमेतेषां वर्षमुद्दिश्यते गुणैः।
आरोग्यायुःप्रमाणाभ्यां धर्म्मतः कामतोऽर्थतः ॥ ७९ ॥
समन्वितानि भूतानि गुणैरेतैस्तु भागतः।
वसन्ति नानाजातीनि तेषु वर्षेषु तानि वै।
इत्येषाऽधारयत् सर्वं पृथ्वी विश्वं जगत्स्थिता ॥ ८० ॥

इति श्रीमहापुराणे वायुप्रोक्ते भुवनविन्यासो नाम सप्तचत्वारिंशोऽध्यायः।

# अथाष्टचत्वारिंशोऽध्यायः ।

———oooOooo———

## भुवनविन्यासः ।

सूत उवाच । दक्षिणेनापि वर्षस्य भारतस्य निबोधत ।
दशयोजनसाहस्रं समतीत्य महार्णवं ॥ १ ॥
त्रीण्येव तु सहस्राणि योजनानां समायतं ।
अतस्त्रिभागविस्तीर्णं नानापुष्पफलोदयं ॥ २ ॥
विद्युत्वन्तं महाशैलं तत्रैकं कुलपर्वतं ।
येन कूटतटैर्नंकैस्तद्वीपं समलङ्कृतं ॥ ३ ॥
प्रसन्नस्वादुसलिलास्तत्र नद्यः सहस्रशः ।
वाप्यस्तस्य तु द्वीपस्य प्रवृत्ता विमलोदकाः ॥ ४ ॥
तस्य शैलस्य छिद्रेषु विस्तीर्णेष्वायतेषु च ।
अनेकेषु समृद्धानि नानाकाराणि सर्व्वशः ॥ ५ ॥
नरनारीसमाढ्यानि मुदितानि महान्ति च ।
तेषां तलप्रवेशानि सहस्राणि शतानि च ॥ ६ ॥
पुराणि सन्निविष्टानि पर्वतान्तर्गतानि च ।
सुसम्बद्धानि तान्योन्यमेकहाराणि तान्यथ ॥ ७ ॥
दीर्घश्मश्रुधरात्मानो नीला मेघसमप्रभाः ।
जातमात्राः प्रजास्तत्र अशीतिपरमायुषः ॥ ८ ॥
शाखामृगसधर्म्माणः फलमूलाशिनस्तथा ।



गोधर्म्माणो ह्यनिर्दिष्टा शौचाचारविवर्जिताः ॥ ९ ॥
तद्वीपं तादृशैः पूर्णं मनुजैः क्षुद्रमानुषैः ।
एवमेतेऽन्तरद्वीपा व्याख्याता आनुपूर्वशः ॥ १० ॥
विंशत्रिंशच्च पञ्चाशत् षष्ट्यशीतिः शतं तथा ।
सहस्रमपि चाप्युक्तं योजनानां समन्ततः ॥ ११ ॥
विस्तीर्णाश्चायताश्चैव नानासत्वसमाकुलाः ।
वर्हिणद्वीपपर्वाणि क्षुद्रद्वीपाः सहस्रशः ॥ १२ ॥
जम्बुद्वीपप्रदेशास्तु षडन्ये विविधाश्रयाः ।
अत्र द्वीपाः समाख्याता नानारत्नाकराः क्षितौ ॥ १३ ॥
अङ्गद्वीपं यमद्वीपं मलयद्वीपमेव च ।
शङ्खद्वीपं कुशद्वीपं वराहद्वीपमेव च ॥ १४ ॥
अङ्गद्वीपं निबोध त्वं नानासङ्घसमाकुलं ।
नानाम्लेच्छगणाकीर्णं तद् द्वीपं बहुविस्तरं ॥ १५ ॥
हेमविद्रुमपूर्णानां रत्नानामाकरं क्षितौ ।
नदीशैलवनैश्चित्रं सन्निभं लवणाम्भसा ॥ १६ ॥
तत्र चक्रगिरिर्नाम नैकनिर्झरकन्दरः ।
तत्र सा तु दरी चास्य नानासत्वसमाश्रया ॥ १७ ॥
स मध्ये नागदेशस्य नैकदेशो महागिरिः ।
कोटिभ्यां नागनिलयं प्राप्तो नदनदीपतिं ॥ १८ ॥
यमद्वीपमिति प्रोक्तं नानारत्नाकराचितं ।
तत्रापि द्युतिमान्नाम पर्वतो धातुमण्डितः ।
समुद्रगानां प्रभवः प्रभवः काञ्चनस्य तु ॥ १९ ॥
तथैव मलयद्वीपमेवमेव सुसंवृतं ।

मणिरत्नाकरं स्फीतमाकरं कनकस्य च ॥ २० ॥
आकरं चन्दनानाञ्च समुद्राणां तथाकरं ।
नानाम्लेच्छगणाकीर्णं नदीपर्वतमण्डितं । २१ ॥
तत्र श्रीमांस्तु मलयः पर्वतो रजताकरः ।
महामलय इत्येवं विख्यातो वरपर्वतः ॥ २२ ॥
द्वितीयं मन्दरं नाम प्रथितञ्च सदा क्षितौ ।
अगस्त्यभवनं तत्र देवासुरनमस्कृतं ॥ २३ ॥
तथा काञ्चनपादस्य मलयस्यापरस्य हि ।
निकुञ्जैस्तृणसोमाङ्गैराश्रमं पुण्यसेवितं ॥ २४ ॥
नानापुष्पफलोपेतं स्वर्गादपि विशिष्यते ।
तत्रावतरते स्वर्गः सदा पर्वसु पर्वसु ॥ २५ ॥
तथा त्रिकूटनिलये नानाधातुविभूषिते ।
अनेकयोजनोत्सेधे चित्रसानुदरीगृहे ॥ २६ ॥
तस्य कूटतटे रम्ये हेमप्राकारतोरणा ।
निर्यूहवलभी चित्रा हर्म्यप्रासादमालिनी ॥ २७ ॥
शतयोजनविस्तीर्णा त्रिंशदायामयोजना ।
नित्यप्रमुदिता स्फीता लङ्का नाम महापुरी ॥ २८ ॥
सा कामरूपिणां स्थानं राक्षसानां महात्मनां ।
आवासो बलदृप्तानां तद्विद्यादेवविद्विषां ।
मानुषाणामसम्बाधा ह्यगम्या सा महापुरी ॥ २९ ॥
तस्य द्वीपस्य वै पूर्वे तीरे नदनदीपतेः ।
गोकर्णनामधेयस्य शङ्करस्यालयं महत् ॥ ३० ॥
तथैकराज्यं विज्ञेयं शङ्खद्वीपसमास्थितं ।



शतयोजनविस्तीर्णं नानाम्लेच्छगणालयं ॥ ३१ ॥
तत्र शङ्खगिरिर्नाम धौतशङ्खदलप्रभः ।
नानारत्नाकरः पुण्यः पुण्यकृद्भिर्निषेवितः ॥ ३२ ॥
शङ्खनागा महापुण्या यस्मात् प्रभवते नदी ।
यत्र शङ्खमुखो नाम नागराजः कृतालयः ॥ ३३ ॥
तथैव कुमुद्द्वीपं नानापुण्योपशोभितं ।
नानाग्रामसमाकीर्णं नानारत्नकरं शिवं ॥ ३४ ॥
कुमुदा नाम महाभागा दुष्टचित्तनिवर्हणी ।
महादेवस्य भगिनी प्रभाभिस्ताभिरिज्यते ॥ ३५ ॥
तथा वराहद्वीपे च नानाम्लेच्छगणाकुले ।
नानाजातिसमाकीर्णे नानाधिष्ठानपत्तने ॥ ३६ ॥
धनधान्ययुते स्फीते धर्मिष्ठजनसंकुले ।
नदीशैलवनैश्चित्रैर्बहुपुष्पफलोपगैः ॥ ३७ ॥
वराहपर्वतो नाम तत्र रम्यः शिलोच्चयः ।
अनेककन्दरदरीगुहानिर्झरशोभितः ॥ ३८ ॥
तस्मात्सुरसपानीया पुण्यतीर्थतरङ्गिणी ।
वाराही नाम वरदा प्रवृत्तास्य महानदी ॥ ३९ ॥
वाराहरूपिणे तत्र विष्णवे प्रभविष्णवे ।
अनन्यदेवतास्तस्मै नमस्कुर्वन्ति विप्रजाः ॥ ४० ॥
एवं षडेते कथिता अनुद्वीपाः समन्ततः ।
भारतद्वीपदेशो वै दक्षिणे बहुविस्तरः ॥ ४१ ॥
एवमेकमिदं वर्षं बहुद्वीपमिहोच्यते ।
समुद्रजलसम्भिन्नं खण्डं खण्डीकृतं स्मृतं ॥ ४२ ॥

एवञ्चतुर्गुणद्वीपः सान्तरद्वीपमण्डितः ।
सानुद्वीपः समाख्यातो जम्बूद्वीपस्य विस्तरः ॥ ४१ ॥

इति श्रीमहापुराणे वायुप्रोक्ते भुवनविन्यासो नामाष्टचत्वारिंशोऽध्यायः ।

---

# अथैकोनपञ्चाशोऽध्यायः ।

———ooo———

## भुवनविन्यासः ।

सूत उवाच । प्लक्षद्वीपं प्रवक्ष्यामि यथावदिह संग्रहात् ।
शृणुतेमं यथातत्त्वं ब्रुवतो मे द्विजोत्तमाः ॥ १ ॥
जम्बूद्वीपस्य विस्ताराद्द्विगुणस्तस्य विस्तरः ।
विस्तारात्त्रिगुणश्चास्य परिणाहः समन्ततः ।
तेनावृतः समुद्रोऽयं द्वीपेन लवणोदकः ॥ २ ॥
तत्र पुण्या जनपदाश्चिराच्च म्रियते प्रजा ।
कुत एव हि दुर्भिक्षं जराव्याधिभयं कुतः ॥ ३ ॥
तत्रापि पर्वताः शुभ्राः सप्तैव मणिभूषणाः ।
रत्नाकरास्तथा नद्यस्तासान्नामानि वक्ष्यते ॥ ४ ॥
प्लक्षद्वीपादिषु तेषु सप्त सप्तसु सप्तसु ।
ऋज्वायताः प्रतिदिशं निविष्टाः पर्व्वताः सदा ॥ ५ ॥
प्लक्षद्वीपे तु वक्ष्यामि सप्तद्वीपान्महाचलान् ।
गोमेदकोऽत्र प्रथमः पर्व्वतो मेघसन्निभः ।
ख्यायते तस्य नाम्ना वै वर्षं गोमेदकन्तु तत् ॥ ६ ॥
द्वितीयः पर्व्वतश्चन्द्रः सर्व्वौषधिसमन्वितः ।
अश्विभ्याममृतस्यार्थे ओषध्यस्तत्र संस्थिताः ॥ ७ ॥
तृतीयो नारदो नाम दुर्गशैलो महोच्छ्रयः ।
तत्राचले समुत्पन्नौ पूर्व्वं नारदपर्व्वतौ ॥ ८ ॥

चतुर्थस्तत्र वै शैलो दुन्दुभिर्नाम नामतः ।
शब्दमृत्युः पुरा तस्मिन् दुन्दुभिस्ताड़ितः सुरैः ।
रज्जुदारो रज्जुमयः शाल्मलश्चासुरान्तकृत् ॥ ९ ॥
पञ्चमः सोमको नाम देवैर्यत्रामृतं पुरा ।
सम्भृतञ्च हृतञ्चैव मातुरर्थे गरुत्मता ॥ १० ॥
षष्ठस्तु सुमना नाम स एवर्षभ उच्यते ।
हिरण्याक्षो वराहेण तस्मिन् शैले निषूदितः ॥ ११ ॥
वैभ्राजः सप्तमस्तत्र भ्राजिष्णुः स्फाटिको महान् ।
यस्माद्विभ्राजतेऽर्चिर्भिर्वैभ्राजस्तेन स स्मृतः ॥ १२ ॥
तेषां वर्षाणि वक्ष्यामि नामतस्तु यथा क्रमं ।
गोमेदं प्रथमं वर्षं नाम्ना शान्तभयं स्मृतं ॥ १३ ॥
चन्द्रस्य शिखरं नाम नारदस्य सुखोदयं ।
आनन्दं दुन्दुभेर्वर्षं सोमकस्य शिवं स्मृतं ।
क्षेमकं ऋषभस्यापि वैभ्राजस्य ध्रुवं तथा ॥ १४ ॥
एतेषु देवगन्धर्वाः सिद्धाश्च सह चारणैः ।
विहरन्ति रमन्ते च दृश्यमानास्तु तैः सह ॥ १५ ॥
तेषां नद्यश्च सप्तैव प्रतिवर्षं समुद्रगाः ।
नामतस्ताः प्रवक्ष्यामि सप्तगङ्गा महानदीः ॥ १६ ॥
अभिगच्छन्ति ता नद्यस्ताभ्यश्चान्याः सहस्रशः ।
बहुदकाश्चौघवत्यो यतो वर्षति वासवः ॥ १७ ॥
ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते ।
शुभाः शान्तवहाश्चैव प्रमोदा ये च ते शिवाः ॥ १८ ॥
आनन्दाश्च ध्रुवाश्चैव क्षेमकाश्च शिवैः सह ।



वर्णाश्रमाचारयुक्ताः प्रजास्तेष्वथ सर्वगः ॥ १९ ॥
सर्वेष्वरोगाः सुबलाः प्रजास्त्वामयवर्जिताः ।
अधःसर्पिणी न तेष्वस्ति तथैवोत्सर्पिणी न च ॥ २० ॥
न तत्रास्ति युगावस्था चतुर्युगकृता क्वचित् ।
त्रेतायुगसमः कालः सर्वदा तत्र वर्त्तते ॥ २१ ॥
प्लक्षद्वीपादिषु ज्ञेयः पञ्चस्वेतेषु सर्वगः ।
देशस्यानुविधानेन कालस्यानुविधाः स्मृताः ॥ २२ ॥
पञ्चवर्षसहस्राणि तेषु जीवन्ति मानवाः ।
सुरूपाश्च सुवेषाश्च अरोगा बलिनस्तथा ॥ २३ ॥
सुखमायुर्बलं रूपमारोग्यं धर्म्म एव च ।
प्लक्षद्वीपादिषु ज्ञेयं शाकद्वीपान्तकेषु च ॥ २४ ॥
प्लक्षद्वीपः पृथुः श्रीमान् सर्वतो धनधान्यवान् ।
दिव्यौषधिफलोपेतः सर्वौषधिवनस्पतिः ॥ २५ ॥
आवृतः पशुभिः सर्व्वैः ग्रामारण्यैः सहस्रशः ।
जम्बूवृक्षेण संख्यातस्तस्य मध्ये द्विजोत्तमाः ।
प्लक्षो नाम्ना महावृक्षस्तस्य नाम्ना स उच्यते ॥ २६ ॥
स तत्र पूज्यते स्थाणुर्मध्येजनपदस्य हि ।
स चापीक्षुरसोदेशः प्लक्षद्वीपसमावृतः ॥ २७ ॥
प्लक्षद्वीपस्य चैवेह वैपुल्याद्विस्तरेण तु ।
इत्येष सन्निवेशो वः प्लक्षद्वीपस्य कीर्त्तितः ।
आनुपूर्व्या समासेन शाल्मलन्तन्निबोधत ॥ २८ ॥
ततस्तृतीयं द्वीपानां शाल्मलं द्वीपमुत्तमं ।
शाल्मलेन समुद्रस्तु द्वीपेनेक्षुरसोदकः ।

प्लक्षद्वीपस्य विस्तारात् द्विगुणेन समावृतः ॥ २९ ॥
तत्रापि पर्वताः सप्त विज्ञेया रत्नयोनयः ।
रत्नाकरास्तथा नद्यस्तेषु वर्षेषु सप्तसु ॥ ३० ॥
प्रथमः सूर्य्यसङ्काशः कुमुदो नाम पर्वतः ।
सर्व्वधातुमयैः शृङ्गैः शिलाजालसमुद्गतैः ॥ ३१ ॥
द्वितीयः पर्वतस्तस्य उन्नतो नाम विश्रुतः ।
हरितालमयैः शृङ्गैर्दिवमावृत्य तिष्ठति ॥ ३२ ॥
तृतीयः पर्वतस्तस्य बलाहक इति श्रुतः ।
जात्यञ्जनमयैः शृङ्गैर्दिवमावृत्य तिष्ठति ॥ ३३ ॥
चतुर्थः पर्वतो द्रोणो यत्रौषध्यो महाबलाः ।
विशल्यकरणी चैव मृतसञ्जीवनी तथा । ३४ ॥
कङ्कस्तु पञ्चमस्तत्र पर्वतः सुमहोदयः ।
दिव्यपुष्पफलोपेतो वृक्षवीरुत्समावृतः ॥ ३५ ॥
षष्ठस्तु पर्वतस्तत्र महिषो मेघसन्निभः ।
यस्मिन् सोऽग्निर्निवसति महिषो नाम वारिजः ॥ ३६ ॥
सप्तमः पर्वतस्तत्र ककुद्मान्नाम भाष्यते ।
तत्र रत्नान्यनेकानि स्वयं वर्षति वासवः ।
प्रजापतिमुपादाय प्राजापत्ये विधिस्वयं ॥ ३७ ॥
इत्येते पर्वताः सप्त शाल्मले मणिभूषिताः ।
तेषां वर्षाणि वक्ष्यामि सप्तैव तु शुभानि वै ।
कुमुदात् प्रथमं श्वेतमुन्नतस्य तु लोहितं ॥ ३८ ॥
बलाहकस्य जीमूतं द्रोणस्य हरितं स्मृतं ।
कङ्कस्य वैद्युतं नाम महिषस्य तु मानसं ॥ ३९ ॥



ककुदः सुप्रभं नाम सप्तैतानि तु सप्तधा ।
वर्षाणि पर्वतांश्चैव नदीस्तेषु निबोधत ॥ ४० ॥
पानितोया विवृणा च चन्द्रा शुक्रा विमोचनी ।
निवृत्तिः सप्तमी तासां प्रतिवर्षन्तु ताः स्मृताः ॥ ४१ ॥
तासां समीपगाश्चान्याः शतशोऽथ सहस्रशः ।
अशक्याः परिसंख्यातुं श्रद्धेयास्तु बुभूषता ॥ ४२ ॥
इत्येष सन्निवेशो वः शाल्मलस्यापि कीर्त्तितः ।
प्लक्षवृक्षेण संख्यातस्तस्य मध्ये महाद्रुमः ॥ ४३ ॥
शाल्मलिर्विपुलस्कन्धस्तस्य नाम्ना स उच्यते ।
शाल्मलिस्तु समुद्रेण सुरोदेन समन्ततः ।
विस्तारात्शाल्मलस्यैव समेन तु समन्ततः ॥ ४४ ॥
उत्तरेषु तु धर्म्मज्ञा द्वीपेषु शृणुत प्रजाः ।
यथाश्रुतं यथान्यायं ब्रुवतो मे निबोधत ॥ ४५ ॥
कुशद्वीपं प्रवक्ष्यामि चतुर्थं तं समासतः ।
सुरोदकः परिवृतः कुशद्वीपेन सर्वतः ॥ ४६ ॥
सप्तैव गिरयस्तत्र वर्ष्यमाणान्निबोधत ।
शाल्मलस्य तु विस्तारात्द्विगुणेन समन्ततः ॥ ४७ ॥
कुशद्वीपे तु विज्ञेयः पर्वतो विद्रुमोच्चयः ।
द्वीपस्य प्रथमस्तस्य द्वितीयो हेमपर्वतः ॥ ४८ ॥
तृतीयो द्युतिमान्नाम जीमूतसदृशो गिरिः ।
चतुर्थः पुष्पवान्नाम पञ्चमस्तु कुशेशयः ॥ ४९ ॥
षष्ठो हरिगिरिर्नाम सप्तमो मन्दरः स्मृतः ।
मन्दा इति ह्यपां नाम मन्दरो दारणादपां ॥ ५० ॥

तेषामन्तरविष्कम्भो द्विगुणः परिवारितः ।
उद्भिदं प्रथमं वर्षं द्वितीयं वेणुमण्डलं ॥ ५१ ॥
तृतीयं स्वैरथाकारं चतुर्थं लवणं स्मृतं ।
पञ्चमं धृतिमद्वर्षं षष्ठं वर्षं प्रभाकरं ।
सप्तमं कपिलं नाम सप्तैते वर्षपर्व्वताः ॥ ५२ ॥
एतेषु देवगन्धर्व्वाः प्रभासु जगदीश्वराः ।
विहरन्ति रमन्ते च दृश्यमानास्तु वर्षगः ॥ ५३ ॥
न तेषु दस्यवः सन्ति म्लेच्छजात्यस्तथैव च ।
गौरप्रायो जनः सर्व्वः क्रमाच्च म्रियते तथा ॥ ५४ ॥
तत्रापि नद्यः सप्तैव धुतपापाः शिवास्तथा ।
पवित्रा सन्ततिश्चैव द्युतिगर्भा मही तथा ॥ ५५ ॥
अन्यास्ताभ्यः परिज्ञाताः शतशोऽथ सहस्रशः ।
अभिगच्छन्ति ताः सर्व्वा यतो वर्षति वासवः ॥ ५६ ॥
घृतोदेन कुशद्वीपो वाह्यतः परिवारितः ।
विज्ञेयः स तु विस्तारात् कुशद्वीपसमेन तु ॥ ५७ ॥
इत्येष सन्निवेशो वः कुशद्वीपस्य वर्णितः ।
क्रौञ्चद्वीपस्य विस्तारं वक्ष्याम्यहमतः परं ॥ ५८ ॥
कुशद्वीपस्य विस्तारात् द्विगुणः स तु वै स्मृतः ।
घृतोदकसमुद्रो वै क्रौञ्चद्वीपेन संवृतः ॥ ५९ ॥
तस्मिन् द्वीपे नगश्रेष्ठः क्रौञ्चस्यः प्रथमो गिरिः ।
क्रौञ्चात्परो वामनको वामनादन्धकारकः ॥ ६० ॥
अन्धकारात्परश्चापि दिवावृन्नाम पर्व्वतः ।
दिवावृतः परश्चापि दिविन्दो गिरि रुच्यते ॥ ६१ ॥



दिविन्दात्परतश्चापि पुण्डरीको महागिरिः ।
पुण्डरीकात्परश्चापि प्रोच्यते दुन्दुभिस्वनः ॥ ६२ ॥
एते रत्नमयाः सप्त क्रौञ्चद्वीपस्य पर्व्वताः ।
बहुवृक्षफलोपेता नानावृक्षलतावृताः ॥ ६३ ॥
परस्परेण द्विगुणा विष्कम्भाद्वर्षपर्व्वताः ।
वर्षाणि तत्र वक्ष्यामि नामतस्तु निबोधत ॥ ६४ ॥
क्रौञ्चस्य कुशलो देशो वामनस्य मनोनुगः ।
मनोनुगात्परश्चोष्णस्तृतीयो देश उच्यते ॥ ६५ ॥
उष्णात्परः प्रावरकः प्रावरादन्धकारकः ।
अन्धकारकदेशात्तु मुनिदेशः परः स्मृतः ॥ ६६ ॥
मुनिदेशात्परश्चैव प्रोच्यते दुन्दुभिस्वनः ।
सिद्धचारणसङ्कीर्णो गौरप्रायो जनः स्मृतः ॥ ६७ ॥
तत्रापि नद्यः सप्तैव प्रतिवर्षं स्मृताः शुभाः ।
गौरी कुमुद्वती चैव सन्ध्यारात्रिर्मनोजवा ।
ख्यातिश्च पुण्डरीका च गङ्गा सप्तविधा स्मृता ॥ ६८ ॥
तासां समुद्रगाश्चान्या नद्यो यास्तु समीपगाः (१) ।
अनुगच्छन्ति ताः सर्व्वा विपुलाः सुवृद्धदकाः ॥ ६९ ॥
क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन तु ।
आवृतः सर्व्वतः श्रीमान् क्रौञ्चद्वीपसमेन तु ॥ ७० ॥
प्लक्षद्वीपादयो ह्येते समासेन प्रकीर्त्तिताः ।
तेषां निसर्गो द्वीपानां आनुपूर्व्वेण सर्व्वशः ॥ ७१ ॥
न शक्यं विस्तराद्वक्तुमपि वर्षशतैरपि ।

१ तासां सप्तायगाश्चान्या नद्यो यास्तु समुद्रगा इति ख० ।

निसर्गोऽयं प्रजानान्तु संहारो यश्च तासु वै । ७२ ॥
अत ऊर्द्धं प्रवक्ष्यामि शाकद्वीपस्य यो विधिः ।
शाकद्वीपस्य कृत्स्नस्य यथावदिह निश्चयात् ।
शृणुध्वं वै यथातत्त्वं ब्रुवतो मे यथार्थवत् ॥ ७३ ॥
क्रौञ्चद्वीपस्य विस्तारात् द्विगुणस्तस्य विस्तरः ।
परिवार्य्य समुद्रं स दधिमण्डोदकं स्थितः ॥ ७४ ॥
तत्र पुण्या जनपदाश्चिराच्च म्रियते जनः ।
कुत एव तु दुर्भिक्षज्वराव्याधिभयं कुतः ॥ ७५ ॥
तत्रापि पर्व्वताः शुभ्राः सप्तैव मणिभूषिताः ।
रत्नाकरास्तथा नद्यस्तासां नामानि मे शृणु ॥ ७६ ॥
देवर्षिगन्धर्व्वयुतः प्रथमो मेरुरुच्यते ।
प्रागायतः ससौवर्ण उदयो नाम पर्व्वतः ॥ ७७ ॥
तत्र मेघास्तु दृश्यर्थं प्रभवन्ति च यान्ति च ।
तस्यापरेण सुमहान् जलधारो महागिरिः ॥ ७८ ॥
तस्मान्नित्यमुपादत्ते वासवः परमं जलं ।
ततो वर्षं प्रभवति वर्षाकाले प्रजास्विह ॥ ७९ ॥
तस्यापरे रैवतको यत्र नित्यं प्रतिष्ठिता ।
रेवती दिवि नक्षत्रं पितामहकृतो गिरिः ॥ ८० ॥
तस्यापरेण सुमहान् श्यामो नाम महागिरिः ।
तत्रात्श्यामत्वमापन्नाः प्रजाः पूर्व्वमिमाः किल ॥ ८१ ॥
तस्यापरेण रजतो महानस्तो गिरिः स्मृतः ।
तस्यापरेणाम्बिकेयो दुर्गः शैलो हिमाचितः ॥ ८२ ॥
आम्बिकेयात्परो रम्यः सर्व्वौषधिसमन्वितः ।



स चैव केशरीत्युक्तो यतो वायुः प्रवायति ॥ ८३ ॥
शृणुध्वं नामतस्तानि यथावदनुपूर्व्वशः ।
उदयस्योदयं वर्षं जलदं नाम विश्रुतं ॥ ८४ ॥
द्वितीयं जलधारस्य सुकुमारमिति स्मृतं ।
रैवतस्य तु कौमारं श्यामस्य तु मणीचकं ॥ ८५ ॥
अस्तस्यापि शुभं वर्षं विज्ञेयं कुसुमोत्तरं ।
आम्बिकेयस्य मोदाकं केसरेषु महाद्रुमं ॥ ८६ ॥
द्वीपस्य परिमाणञ्च ह्रस्वदीर्घत्वमेव च ।
शाकद्वीपेन विख्यातस्तस्य मध्ये वनस्पतिः ।
शाको नाम महावृक्षस्तस्य पूजां प्रयुञ्जते ॥ ८७ ॥
एतेन देवगन्धर्व्वाः सिद्धाश्च सह चारणैः ।
विहरन्ति रमन्ते च दृश्यमानाश्च तैः सह ॥ ८८ ॥
तत्र पुण्या जनपदाश्चातुर्व्वर्णसमन्विताः ।
तेषु नद्यश्च सप्तैव प्रतिवर्षं समुद्गताः ।
विद्धि नाम्नश्च ताः सर्वा गङ्गास्ताः सप्तधा स्मृताः ॥ ८९ ॥
प्रथमा सुकुमारीति गङ्गा शिवजला तथा ।
अमृतप्रभा च नाम्नैव नदी सम्परिकीर्त्तिता ॥ ९० ॥
कुमारी नामतः सिद्धा द्वितीया सा पुनः सती ।
नन्दा च पार्व्वती चैव तृतीया परिकीर्त्तिता ॥ ९१ ॥
शिवेतिका (१) चतुर्थी स्यात् त्रिदिवा च पुनः स्मृता ।
इक्षुश्च पञ्चमी ज्ञेया तथैव च पुनः क्रतुः ॥ ९२ ॥
धेनुका च मृता चैव षष्ठी संपरिकीर्त्तिता ।

१ शेविनीकेति ङ० । शिरेतिकेति ख० ।

एताः सप्त महागङ्गाः प्रतिवर्षं शिवोदकाः।
भावयन्ति जनं सर्व्वं शाकद्वीपनिवासिनं ॥ ९३ ॥
अनुगच्छन्ति तास्वन्या नदीर्नद्यः सहस्रशः।
बह्वदकपरिस्रावा (१) यतो वर्षति वासवः॥ ९४ ॥
तासान्तु नामधेयानि परिमाणं तथैव च।
न शक्यं परिसंख्यातुं पुण्यास्ताः सरिदुत्तमाः।
ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते ॥ ९५ ॥
शंशपायन विस्तीर्णो द्वीपोऽसौ चक्रसंस्थितः।
नदीजलैः प्रतिच्छन्नः पर्व्वतैश्चाभ्रसन्निभैः ॥ ९६ ॥
सर्व्वधातुविचित्रैश्च मणिविद्रुमभूषितैः।
पुरैश्च विविधाकारैः स्फीतैर्जनपदैरपि ॥ ९७ ॥
वृक्षैः पुष्पफलोपेतैः समन्ताद्बनधान्यवान्।
क्षीरोदेन समुद्रेण सर्व्वतः परिवारितः।
शाकद्वीपस्तु विस्तारात् समेन तु समन्ततः ॥ ९८ ॥
तस्मिन् जनपदाः पुण्याः पर्व्वतान्तरिते शुभाः।
वर्णाश्रमसमाकीर्णा देशास्ते सप्त वै स्मृताः ॥ ९९ ॥
न सङ्करश्च तेष्वस्ति वर्णाश्रमकृतः क्वचित्।
धर्म्मस्य चाव्यभीचारादेकान्तसुखिताः प्रजाः ॥ १०० ॥
न तेषु लोभो माया वा ईर्ष्या सूयाऽधृतिः कुतः।
विपर्य्ययो न तेष्वस्ति एतत् स्वाभाविकं स्मृतं ॥ १०१ ॥
करोत्पत्तिर्न तेष्वस्ति न दण्डो न च दण्डकाः।

(१) बह्वदका महानद्य इति क०।



स्वधर्मेणैव धर्म्मज्ञास्ते रक्षन्ति परस्परं ॥ १०२ ॥
एतावदेव शक्यं वै तस्मिन् द्वीपे निवासिनां।
पुष्करं सप्तमं द्वीपं प्रवक्ष्यामि निबोधत ॥ १०३ ॥
पुष्करेण तु द्वीपेन वृतः क्षीरोदको बहिः।
शाकद्वीपस्य विस्तारात् द्विगुणेन समन्ततः ॥ १०४ ॥
पुष्करे पर्व्वतः श्रीमान् एक एव महाशिलः।
चित्रैर्मणिमयैः शीलैः शिखरैस्तु समुच्छ्रितैः ॥ १०५ ॥
द्वीपस्य तस्य पूर्व्वार्द्धे चित्रसानुः स्थितो महान्।
परिमण्डलसहस्राणि विस्तीर्णः पञ्चविंशतिः ॥ १०६ ॥
ऊर्द्ध्वश्चैव चतुस्त्रिंशत्सहस्राणि समाचितः।
द्वीपार्द्धस्य परिस्तोमः पर्व्वतो मानसोत्तमः ॥ १०७ ॥
स्थितो वेलासमीपे तु नवचन्द्र इवोदितः।
योजनानां सहस्राणि ऊर्द्धं पञ्चाशदुच्छ्रितः ॥ १०८ ॥
तावदेव स विस्तीर्णः सर्व्वतः परिमण्डलः।
स एवं द्वीपपञ्चार्द्धं मानसः पृथिवीधरः ॥ १०९ ॥
एक एव महामेरुः सन्निवेशाद् द्विधा कृतः।
स्वादूदकेनोदधिना सर्व्वतः परिवारितः ॥ ११० ॥
पुष्करद्वीपविस्तारादिस्तीर्णोऽसौ समन्ततः।
तस्मिन् द्वीपे स्मृतौ द्वौ तु पुण्यौ जनपदौ शुभौ।
अभितो मानसस्याथ पर्व्वतस्यानुमण्डलौ ॥ १११ ॥
महावीतन्तु यद्वर्षं बाह्यतो मानसस्य तत्।
तस्यैवाभ्यन्तरे यत्तु धातकीखण्डमुच्यते ॥ ११२ ॥
दशवर्षसहस्राणि तत्र जीवन्ति मानवाः।

आरोग्यसुखभूयिष्ठा मानसीं सिद्धिमास्थिताः ॥ ११३ ॥
सममायुश्च रूपञ्च तस्मिन् वर्षद्वये स्थितं ।
अधमोत्तमौ न तेष्वास्तां तुल्यास्ते रूपशीलतः ॥ ११४ ॥
न तत्र वञ्चको नेर्ष्या न स्तेया न भयं तथा ।
निग्रहो न च दण्डोऽस्ति न लोभो न परिग्रहः ॥ ११५ ॥
सत्यानृतं न तत्रास्ति धर्माधर्मौ तथैव च ।
वर्णाश्रमाणां वार्त्ता वा पाशुपाल्यं वणिक्क्रिया ॥ ११६ ॥
त्रयी विद्या दण्डनीतिः शुश्रूषा शल्यमेव च ।
वर्षद्वये सर्वमेतत् पुष्करस्य न विद्यते ॥ ११७ ॥
न तत्र नद्यो वर्षञ्च शीतोष्णं वा न विद्यते ।
उद्विज्जानूदकान्यत्र गिरिप्रस्रवणानि च ॥ ११८ ॥
उत्तराणां कुरूणाञ्च तुल्यकालो जनः सदा ।
सर्वञ्च सुसुखम्तत्र जरालक्ष्मविवर्जितः ॥ ११९ ॥
इत्येष धातकीखण्डो महावीते तथैव च ।
आनुपूर्व्यादिधिः कृत्स्नः पुष्करस्य प्रकीर्त्तितः ॥ १२० ॥
स्वादूदकेनोदधिना पुष्करः परिवारितः ।
विस्तरान्मण्डलाच्चैव पुष्करस्य तथैव च ॥ १२१ ॥
एवं द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः ।
द्वीपस्यानन्तरो यस्तु समुद्रस्तु समन्ततः ॥ १२२ ॥
एवं द्वीपसमुद्राणां वृद्धिर्ज्ञेया परस्परात् ।
अपाञ्चैव समुद्रैकात् समुद्रा इति संज्ञिताः ॥ १२३ ॥
ऋषयो निवसन्त्यस्मिन् प्रजा यस्माच्चतुर्विधाः ।
तस्मादृषभमिति प्रोक्तं प्रजानां सुखदन्तु तत् ॥ १२४ ॥



ऋष इत्येव ऋषयः (१) वृषः शक्तिप्रबन्धने ।
इतिप्रबन्धनात् (२) सिद्धं वर्षत्वं तेन तेषु तत् ॥ १२५ ॥
शुक्लपक्षे चन्द्रवृद्धौ समुद्रः पूर्य्यते तदा ।
प्रक्षीयमाणे बहुले क्षीयतेऽस्तमिते खगे ॥ १२६ ॥
आपूर्य्यमाणे उदधिः स्वत एवाभिपूर्य्यते ।
ततोऽपक्षीयमाणेऽपि स्वात्मनैवापकृष्यते ॥ १२७ ॥
उखास्थमग्निसंयोगात् जलमुद्रिच्यते यथा ।
तथा महोदधिगतं तोयमुद्रिच्यते ततः ॥ १२८ ॥
अन्यूना ह्यतिरिक्ताश्च वर्द्धन्त्यापो ह्रसन्ति च ।
उदयास्तमितेष्वेन्दोः पक्षयोः शुक्लकृष्णयोः ।
क्षयवृद्धिरेवमुदधेः सोमवृद्धिक्षयात्पुनः ॥ १२९ ॥
दशोत्तराणि पञ्चैव अङ्गुलीनां शतानि तु ।
अपां वृद्धिः क्षयो दृष्टः समुद्राणान्तु पर्वसु ॥ १३० ॥
स्थिरापत्वात् स्मृता द्वीपाः सर्वतश्चोदकावृताः ।
उदकस्याधानं यस्माच्च तस्मादुदधिरुच्यते ॥ १३१ ॥
अपर्वाणस्तु गिरयः पर्वभिः पर्वताः स्मृताः ।
प्लक्षद्वीपे तु गोमेदः पर्वतस्तेन चोच्यते ॥ १३२ ॥
शाल्मलिः शाल्मलद्वीपे पूज्यते च महाद्रुमः ।
कुशद्वीपे कुशस्तम्बस्तस्य नाम्ना स उच्यते ॥ १३३ ॥
क्रौञ्चद्वीपे गिरिः क्रौञ्चो मध्ये जनपदस्य ह ।
शाकद्वीपे द्रुमः शाकस्तस्य नाम्ना स उच्यते ॥ १३४ ॥
न्यग्रोधः पुष्करद्वीपे तत्र तैः स नमस्कृतः ।

१ पाठोऽयं न सङ्गतः । २ वृतिप्रबन्धनादिति ङ० ।

महादेवः पुष्करे तु ब्रह्मा त्रिभुवनेश्वरः ॥ १३५ ॥
तस्मिन्निवसति ब्रह्मा साध्यैः सार्द्धं प्रजापतिः ।
उपासते तत्र देवास्त्रयस्त्रिंशन्महर्षिभिः ।
स तत्र पूज्यते चैव देवैर्देवोत्तमोत्तमः ॥ १३६ ॥
जम्बूद्वीपात्प्रवर्त्तन्ते रत्नानि विविधानि च ।
द्वीपेषु तेषु सर्व्वेषु प्रजानां हि क्रमास्त्विह ॥ १३७ ॥
सर्व्वशो ब्रह्मचर्य्येण सत्येन च दमेन च ।
आरोग्यायुःप्रमाणाद्धि द्विगुणञ्च समन्ततः ॥ १३८ ॥
एतस्मिन् पुष्करद्वीपे यदुक्तं वर्षकद्वयं ।
गोपायति प्रजास्तत्र स्वयं सज्जनमण्डिताः ॥ १३९ ॥
ईश्वरो दण्डमुद्यम्य ब्रह्मा त्रिभुवनेश्वरः ।
सविष्णुः सशिवो देवः सपिता सपितामहः ॥ १४० ॥
भोजनञ्चाप्रयत्नेन तत्र स्वयमुपस्थितं ।
षड्रसं सुमहावीर्य्यं भुञ्जते च प्रजाः सदा ॥ १४१ ॥
परेण पुष्करस्याथ आवृत्या यः स्थितो महान् ।
स्वादूदकः समुद्रस्तु समन्तात्परिवेष्टितः ॥ १४२ ॥
परेण तस्य महती दृश्यते लोकसंस्थितिः ।
काञ्चनी द्विगुणा भूमिः सर्व्वा चैकशिलोपमा ॥ १४३ ॥
तस्मात्परेण शैलस्तु मर्य्यादान्ते तु मण्डलं ।
प्रकाशाप्रकाशश्च लोकालोकः स उच्यते ॥ १४४ ॥
आलोकस्तस्य चार्वाक्तु निरालोकस्ततः परं ।
योजनानां सहस्राणि दश तस्योच्छ्रयः स्मृतः ॥ १४५ ॥
तावांश्च विस्तरस्तस्य पृथिव्यां कामगश्च सः ।


LIST OF BOOKS FOR SALE
AT THE LIBRARY OF THE
# ASIATIC SOCIETY OF BENGAL,
*No. 57, Park Street, Calcutta,*
AND OBTAINABLE FROM
THE SOCIETY'S LONDON AGENTS, MESSRS. TRUBNER & Co.,
57 AND 59, LUDGATE HILL, LONDON, E. C.

BIBLIOTHECA INDICA.

*Sanskrit Series.*

| | | |
|---|---|---|
| Chaitanya-chandrodaya, Nátaka, 3 fasci. | Rs. | 1 14 |
| Śrauta Sútra, A'śvaláyana, 11 fasci. | | 6 14 |
| ——— Látyáyana, 9 fasci. | | 5 10 |
| Sankara Vijaya, 3 fasci. | | 1 14 |
| Daśa-rúpa, 3 fasci. | | 1 14 |
| Kaushitaki Bráhmanopanishad, 2 fasci. | | 1 4 |
| Sánkhya-sára, 1 fasci. | | 0 10 |
| Lalita-vistara, 6 fasci. | | 3 12 |
| Taittiríya Bráhmana, 24 fasci. | | 15 0 |
| Taittiríya Saṅhitá, 31 fasci. | | 19 6 |
| Taittiríya A'ranyaka, 11 fasci. | | 6 14 |
| Maitri Upanishad, 3 fasci. | | 1 14 |
| Aśvaláyana Grihya Sútra, 4 fasci. | | 2 8 |
| Mímáñsá Darsana, 14 fasci. | | 8 12 |
| Táṇḍya Bráhmana, 19 fasci. | | 11 14 |
| Gopatha Bráhmana, 2 fasci. | | 1 4 |
| A'tharvana Upanishads, 5 fasci. | | 3 2 |
| Agni Puráṇa, 14 fasci. | | 8 12 |
| Sáma Veda Saṅhitá, 37 fasci. | | 23 2 |
| Gopála Tápaní, 1 fasci. | | 0 10 |
| Nrisiñha Tápaní, 3 fasci. | | 1 14 |
| Chaturvarga Chintámaṇi, 35 fasci. | | 21 14 |
| Gobhiliya Grihya Sútra, 10 fasci. | | 6 4 |
| Pingala Chhandah Sútra, 3 fasci. | | 1 14 |
| Taittiríya Prátiśákhiya, 3 fasci. | | 1 14 |
| Prithiráj Rásu, by Chand Bardai, 4 fasci. | | 2 8 |
| Rájatarangini, | | 4 4 |
| Mahábhárata, vols. III. and IV., | | 40 0 |
| Puráṇa Sangraha | | 1 0 |
| Páli Grammar, 2 fasci. | | 1 4 |
| Aitareya A'ranyaka of the Rig Veda, 5 fasci. | | 3 2 |
| Chhándogya Upanishad, English, 2 fasci. | | 1 4 |
| Sáṅkhya Aphorisms, English, 2 fasci. | | 1 4 |
| Sáhitya Darpaṇa, English, 4 fasci. | | 2 8 |
| Brahma Sútra, English, | | 1 0 |
| Kátantra, 6 fasci. | | 6 0 |
| Kámandakiya Nítisára, 4 fasci. (Fasc. 1, out of stock.) | | 2 8 |
| Bhámatí, 7 fasci. | | 4 6 |
| Aphorisms of Śandalya, English, 1 fasci. | | 0 10 |
| Váyu Puráṇa, 4 fasci. | | 2 8 |

## ARABIC AND PERSIAN SERIES.

| | | |
|---|---|---|
| Dictionary of Arabic Technical Terms, 20 fasci., complete, | Rs. | 25 0 |
| Risálah-i-Shamsiyah, (Appendix to Do. Do.) .. .. | | 1 4 |
| Fihrist Túsí, 4 fasci. .. ... ... ... ... | | 3 0 |
| Nukhbat-ul-Fikr, .. ... ... ... ... ... | | 0 10 |
| Futúh-ul-Shám. Wáqidí, 9 fasci. .. ... ... ... | | 5 10 |
| Futúh-ul-Shám, Azadí, 4 fasci. .. .. ... ... | | 2 8 |
| Maghází of Wáqidí, 6 fasci.... ... ... ... ... | | 3 2 |
| Isábah, 28 fasci., with supplement, ... .. ... ... | | 20 14 |
| Tárikh-i-Fírúz Sháhí, 7 fasci. ... ... ... ... | | 4 6 |
| Táríkh-i-Baihaqí, complete in 9 fasci. ... ... ... | | 5 10 |
| Muntakhab-ut-Tawáríkh, vols. I. II. and III., complete in 15 fasci. | | 8 5 |
| Wís o Rámín, 5 fasci. .. .. ... ... ... | | 2 3 |
| Iqbálnámah-i-Jahángírí, complete in 3 fasci. ... ... ... | | 1 10 |
| 'Alamgírnámah, 13 fasci., with index,... .. ... ... | | 8 2 |
| Pádsháhnámah, 19 fasci., with index,.. ... ... ... | | 11 4 |
| Muntakhab-ul-Lubáb, by Kháfí Khán, 19 fasci., with index, ... | | 12 12 |
| Aín-i-Akbarí, Persian text, 4to., 22 fasci. .. ... ... | | 27 6 |
| Ain-i-Akbarí, English translation by H. Blochmann, M. A., vol. I. ... | | 12 4 |
| Farhang-Rashídí, 14 fasci., complete, ... ... ... | | 17 8 |
| Nizámí's Khiradnámah-i-Iskandarí, 2 fasci, complete, ... ... | | 2 2 |
| Akbarnámah, 17 fasci. with Index, ... ... ... ... | | 20 0 |
| Maásir-i-'Alamgírí, by Muhammad Sáqí, complete 6 fasci, with index, | | 3 12 |
| Haft Asmán, history of Persian Masnawís ... ... .. | | 1 4 |
| Tabaqát-i-Nácirí, English translation by Raverty, 10 fasci. ... ... | | 10 0 |
| Tabaqát-i-Nácirí, Persian text, 5 fasci. ... ... ... | | 3 8 |

## MISCELLANEOUS.

| | | |
|---|---|---|
| Journal of the Asiatic Society of Bengal from vols. XII to XVII, 1843-48, vols. XIX to XXI, 1850-52, to Subscribers at Re. 1 per number and non-subscribers at Re. 1-8 per number; vols. XXVI, XXVII, 1857-58, and vols. XXXIII to XLVII, 1864-78, to Subscribers at 1-8 per number and to non-subscribers at Rs. 2 per number. | | |
| Asiatic Researches, vols. VII. to XI. and vols. XVII. to XX. each Rs. | 10 | 0 |
| Do. do. Index, ... ... .. ... ... | | 8 0 |
| Catalogue of Fossil Vertebrata, ... ... ... | | 2 0 |
| ——— of Arabic and Persian Manuscripts, ... .. ... | | 4 0 |
| Tibetan Dictionary, ... ... ... ... ... | 10 | 0 |
| ——— Grammar,... ... ... ... ... | | 3 0 |
| Notices of Sanskrit Manuscripts, 14 fasci. .. ... ... | 15 | 0 |
| Istiláhát-i-Súfiyah. Edited by Dr. A. Sprenger, 8vo. ... ... | | 3 0 |
| Jawámi' ul-'ilm ir-riyází, 168 pages with 17 plates, 4to. ... ... | | 2 0 |
| Aborigines of India, by B. H. Hodgson, .. ... ... | | 2 0 |
| Examination and Analysis of the Mackenzie Manuscripts, by the Rev. W. Taylor, .. ... .. ... | | 3 0 |
| Han Koong Tsew, or the Sorrows of Han, by J. Francis Davis, ... | | 1 4 |
| 'Ináyah, a Commentary on the Hidáyah, vols. II. IV., ... ... | | 2 0 |
| Analysis of the Sher Chin, by Alexander Csoma de Körös, ... ... | | 1 0 |
| Khazánat-ul-'ilm, .. ... ... ... ... | | 1 0 |
| Sharáyat-ul-Islám, ... ... ... ... ... | | 4 0 |
| Anís-ul-Musharrihín, .. ... ... ... ... | | 2 0 |
| Catalogue Raisonné of the Society's Sanskrit MSS. No. 1 (Grammar), ... | | 2 0 |

MAY 15 1933

# BIBLIOTHECA INDICA,


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 437.




LIBRARY OF THE UNIVERSITY OF CALIFORNIA

वायुपुराणम् ।

# The Váyu Puráṇa:

A SYSTEM OF HINDU MYTHOLOGY AND TRADITION.

EDITED BY

RÁJENDRALÁLA MITRA, LL.D., C.I.E.

FASCICULUS V.

**CALCUTTA.**

PRINTED BY K. N. BHATTÁCHÁRYA, AT THE GANEŚA PRESS.

1880.

आलोके लोकशब्दस्तु निरालोके सलोकता ।
लोकार्थं सम्मतो लोको निरालोकस्तु वाह्यतः ॥ १४६ ॥
लोकविस्तारमात्रन्तु आलोकः सर्व्वतो वहिः ।
परिच्छिन्नः समन्ताच्च उदकेनावृतश्च सः ।
निरालोकात्परश्चापि अण्डमावृत्य तिष्ठति ॥ १४७ ॥
अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी ।
भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महस्तथा ॥ १४८ ॥
जनस्तपस्तथा सत्य एतावान् लोकसंग्रहः ।
एतावानेव विज्ञेयो लोकान्तश्चैव तत्परः ॥ १४९ ॥
कुम्भस्थायी भवेद्यादृक् प्रतीच्यान्दिशि चन्द्रमाः ।
आदितः शुक्लपक्षस्य वपुरण्डस्य तद्विधं ॥ १५० ॥
अण्डानामीदृशानान्तु कोटयो ज्ञेयाः सहस्रशः ।
तिर्य्यगूर्ध्वमधस्ताच्च कारणस्याव्ययात्मनः ।
कारणैः प्राकृतैस्तत्र ह्यावृतं प्रतिसप्तभिः ॥ १५१ ॥
दशाधिक्येन चान्योन्यं धारयन्ति परस्परं ।
परस्परावृताः सर्व्वे उत्पन्नाश्च परस्परात् ॥ १५२ ॥
अण्डस्यास्य समन्तात्तु सन्निविष्टो घनोदधिः ।
समन्तादृयेन तोयेन धार्य्यमाणः स तिष्ठति ॥ १५३ ॥
वाह्यतो घनतोयस्य तिर्य्यगूर्द्धानुमण्डलं ।
धार्य्यमाणं समन्तात्तु तिष्ठते घनतेजसा ॥ १५४ ॥
अयोगुडनिभो वह्निः समन्तान्मण्डलाकृतिः ।
समन्ताद्घनवातेन धार्य्यमाणः स तिष्ठति ।
घनवातस्तथाकाशन्धारयानस्तु तिष्ठति ॥ १५५ ॥

भूतादिश्च तथाकाशं भूताद्यश्चाप्यसौ महान् ।
महान्व्याप्तो ह्यनन्तेन अव्यक्तेन तु धार्य्यते ॥ १५६ ॥
अनन्तमपरिव्यक्तन्दग्धा सूक्ष्म एव च ।
अनन्तमकृतात्मानमनादिनिधनञ्च तत् ॥ १५७ ॥
अतीत्य परतो घोरमनालम्बमनामयं ।
नैकयोजनसाहस्रं विप्रकृष्टं तमोहतं ॥ १५८ ॥
तम एव निरालोकममर्य्यादमदेशिकं ।
देवानामप्यविदितं व्यवहारविवर्ज्जितं ॥ १५९ ॥
तमसोऽन्ते च विख्यातमाकाशान्ते च भास्वरं ।
मर्य्यादायामतस्तस्य शिवस्यायतनं महत् ॥ १६० ॥
चिद्ज्ञानामगम्यन्तु स्थानं दिव्यमिति श्रुतिः ।
महतो देवदेवस्य मर्य्यादायां व्यवस्थितं ॥ १६१ ॥
चन्द्रादित्यावतमास्तु ये लोकाः प्रथिता बुधैः ।
ते लोका इत्यभिहिता जगतश्च न संशयः ॥ १६२ ॥
रसातलतलात् सप्त सप्तैवोर्द्धतलाः क्षितौ ।
सप्तस्कन्धास्तथा वायोः सप्तब्रह्मसदना द्विजाः ॥ १६३ ॥
आपातालाद्दिवं यावदत्र पञ्चविधा गतिः ।
प्रमाणमेतज् जगत एष संसारसागरः ॥ १६४ ॥
अनाद्यन्ता प्रयात्येवं नैकजातिसमुद्भवा ।
विचित्रा जगतः सा वै प्रवृत्तिरनवस्थिता ॥ १६५ ॥
यथैतद्भौतिकं नाम निसर्गबहुविस्तरं ।
अतीन्द्रियैर्महाभागैः सिद्धैरपि न लक्ष्यते ॥ १६६ ॥
पृथिव्याश्चाग्निवायूनां महतस्तमसस्तथा ।



ईश्वरस्य तु देवस्य अनन्तस्य द्विजोत्तमाः ॥ १६७ ॥
क्षयो वा परिमाणं वा अन्तो वापि न विद्यते ।
अनन्त एष सर्व्वत्र सर्व्वस्थानेषु पठ्यते ।
तस्य चोक्तं मया पूर्व्वं तस्मिन्नामानुकीर्त्तने ॥ १६८ ॥
य एष शिवनाम्ना हि तद्दः कात्स्न्र्येन कीर्तितं ।
स एष सर्व्वत्र गतः सर्व्वस्थानेषु पूज्यते ॥ १६९ ॥
भूमौ रसातले चैव आकाशे पवनेऽनले ।
अर्णवेषु च सर्वेषु दिवि चैव न संशयः ॥ १७० ॥
तथा तपसि विज्ञेय एष एव महाद्युतिः ।
अनेकधा विभक्ताङ्गो महायोगी महेश्वरः ।
सर्वलोकेषु लोकेश इज्यते बहुधा प्रभुः ॥ १७१ ॥
एवं परस्परोत्पन्ना धार्य्यन्ते च परस्परान् ।
आधाराधेयभावेन विकारास्ते विकारिणः ॥ १७२ ॥
पृथ्व्यादयो विकारास्ते परिच्छिन्नाः परस्परं ।
परस्पराधिकाश्चैव प्रविष्टाश्च परस्परं ॥ १७३ ॥
यस्माद्विष्टाश्च तेऽन्योन्यं तस्मात् स्थैर्य्यमुपागताः (१) ।
प्रागासन् ह्यविशेषास्तु विशेषान्योन्यवेशनात् (२) ।
पृथिव्याद्याश्च वायुन्ताः परिच्छिन्नास्त्वयस्तु ते ॥ १७४ ॥
गुणापचयसारेण परिच्छेदो विशेषतः ।
शेषाणान्तु परिच्छेदः सौक्ष्म्यान्नेह विभाव्यते ॥ १७५ ॥

---

१ स्थैर्य्यं गुणमुपागता इति ख० ।
२ विशेषान्योन्यदर्शिन इति ख० ।

भूतेभ्यः परतस्तेभ्यो ह्यालोकः परतः स्मृतः।
भूतान्यालोक आकाशे परिच्छिन्नानि सर्व्वशः ॥ १७६ ॥
पात्रे महति पात्राणि यथैवान्तर्गतानि तु।
भवन्त्यन्योन्यहीनानि परस्परसमाश्रयात्।
तथा ह्यालोक आकाशे भेदास्त्वन्तर्गता मताः ॥ १७७ ॥
क्षत्स्नान्येतानि चत्वारि अन्योन्यस्याधिकानि तु।
यावदेतानि भूतानि तावदुत्पत्तिरुच्यते ॥ १७८ ॥
जन्तूनामिह संस्कारो भूतेष्वन्तर्गतो मतः।
प्रत्याख्याय च भूतानि कार्य्योत्पत्तिर्न विद्यते ॥ १७९ ॥
तस्मात्परिमिता भेदाः स्मृताः कार्य्यात्मकास्तु ते।
करणात्मकास्त्वथैव स्युर्भेदा ये महदादयः ॥ १८० ॥
इत्येष सन्निवेशो वो मया प्रोक्तो विभागशः।
सप्तद्वीपसमुद्राया याथातथ्येन वै द्विजाः ॥ १८१ ॥
विस्तारान्मण्डलाच्चैव प्रसंख्यानेन चैव हि।
वैश्वरूपं प्रधानस्य परिमाणैकदेशिकं ॥ १८२ ॥
अधिष्ठानं भगवतो यस्य सर्व्वमिदं जगत्।
एवं भूतगणाः सप्त सन्निविष्टाः परस्परं ॥ १८३ ॥
एतावान् सन्निवेशस्तु मया शक्यः प्रभाषितुं।
एतावदेव श्रोतव्यं सन्निवेशे तु पार्थिव ॥ १८४ ॥
सप्त प्रकृतयस्त्वेता धारयन्ति परस्परं।
तासल्पपरिमाणेन प्रसंख्यातुमिहोच्यते।
असंख्येयाः प्रकृतयस्तिर्य्यगूर्द्ध्वमधश्च याः ॥ १८५ ॥
तारकासन्निवेशश्च यावद्दिव्यन्तु मण्डलं।



मर्य्यादासन्निवेशस्तु भूमेस्तदनुमण्डलं।
अतः परं प्रवक्ष्यामि पृथिव्यां वै द्विजोत्तमाः ॥ १८६ ॥

इति श्रीमहापुराणे वायुप्रोक्ते भुवनविन्यासो नामैकोनपञ्चाशोऽध्यायः।

# अथ पञ्चाशोऽध्यायः।

———ooo———

## ज्योतिःप्रचारः।

सूत उवाच। अधःप्रमाणमूर्द्धञ्च वर्णमानं निबोधत।
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमं।
अनन्तधातवो ह्येते व्यापकास्तु प्रकीर्त्तिताः॥ १॥
जननी सर्व्वभूतानां सर्व्वभूतधरा धरा।
नानाजनपदाकीर्णा नानाधिष्ठानपत्तना॥ २॥
नानानदनदीशैला नैकजातिसमाकुला।
अनन्ता गीयते देवी पृथिवी बहुविस्तरा॥ ३॥
नदीनदसमुद्रास्त्वास्तथा क्षुद्राश्रयाः स्थिताः।
पर्व्वताकाशसंस्थाश्च अन्तर्भूमिगताश्च याः॥ ४॥
आपोऽनन्ताश्च विज्ञेयास्तथाग्निः सर्व्वलौकिकः।
अनन्तः पठ्यते चैव (१) व्यापकः सर्व्वसम्भवः॥ ५॥
तथाकाशमनालम्बं रम्यं नानाश्रयं स्मृतं।
अनन्तं ग्रथितं सर्व्वं वायुश्चाकाशसम्भवः॥ ६॥
आपः पृथिव्यामुदके पृथिवी चोपरि स्थिता।
आकाशञ्चापरमधः पुनर्भूमिः पुनर्ज्जलं॥ ७॥
एवमन्तमनन्तस्य भौतिकस्य न विद्यते।
पुरा सुरैरभिहितं निश्चितन्तु निबोधत॥ ८॥

१ अतः संपठ्यते चैवेति ग०।



भूमिर्जलमथाकाशमिति ज्ञेया परम्परा।
स्थितिरेषा तु विज्ञेया सप्तमेऽस्मिन् रसातले॥ ९॥
दशयोजनसाहस्रमेकभौमं रसातलं।
साधुभिः परिविख्यातमेकैकं बहुविस्तरं॥ १०॥
प्रथममतलञ्चैव (१) सुतलन्तु ततः परं।
ततः परतरं विद्याद्वितलं बहुविस्तरं॥ ११॥
ततो गभस्तलं नाम परतश्च महातलं।
शीतलञ्च ततः प्राहुः पातालं सप्तमं स्मृतं॥ १२॥
कृष्णभौमञ्च प्रथमं भूमिभागञ्च कीर्त्तितं।
पाण्डुभौमं द्वितीयन्तु तृतीयं रक्तमृत्तिकं॥ १३॥
पीतभौमञ्चतुर्थन्तु पञ्चमं शर्करातलं।
षष्ठं शिलामयञ्चैव सौवर्णं सप्तमन्तलं॥ १४॥
प्रथमे तु तले ख्यातमसुरेन्द्रस्य मन्दिरं।
नमुचेरिन्द्रशत्रोर्हि महानादस्य चालयं॥ १५॥
पुरञ्च शङ्कुकर्णस्य कबन्धस्य च मन्दिरं।
निष्कुलादस्य च पुरं प्रहृष्टजनसङ्कुलं॥ १६॥
राक्षसस्य च भौमस्य शूलदन्तस्य चालयं।
लोहिताक्षकलिङ्गानां (२) नगरं श्वापदस्य तु॥ १७॥
धनञ्जयस्य च पुरं माहेन्द्रस्य महात्मनः।
कालियस्य च नागस्य नगरं कलसस्य च॥ १८॥
एवं पुरसहस्राणि नागदानवरक्षसां।

२ प्रथमं रसातलं नामेति ख०।

३ लोहिताक्षकलिङ्गाभ्यामिति क०, ख०, घ० च।

तले ज्ञेयानि प्रथमे कृष्णभौमे न संशयः॥ १९॥
द्वितीयेऽपि तले विप्रा दैत्येन्द्रस्य सुरत्नमः।
महाजम्भस्य च तथा नगरं प्रमथस्य तु॥ २०॥
हयग्रीवस्य कृष्णस्य निकुम्भस्य च मन्दिरं।
शङ्खाख्येयस्य च पुरं नगरं गोमुखस्य च॥ २१॥
राक्षसस्य च नीलस्य मेघस्य क्रथनस्य च।
पुरञ्च कुरुपादस्य महीष्णीषस्य चालयं॥ २२॥
कम्बलस्य च नागस्य पुरमश्वतरस्य च।
कद्रुपुत्रस्य च पुरं तक्षकस्य महात्मनः॥ २३॥
एवं पुरसहस्राणि नागदानवरक्षसां।
द्वितीयेऽस्मिन् तले विप्राः पाण्डुभौमे न संशयः॥ २४॥
तृतीये तु तले ख्यातं प्रह्लादस्य महात्मनः।
अनुह्लादस्य च पुरं दैत्येन्द्रस्य महात्मनः॥ २५॥
तारकाख्यस्य च पुरं पुरन्ध्रिशिरसस्तथा।
शिशुमारस्य च पुरं हृष्टपुष्टजनाकुलं॥ २६॥
च्यवनस्य च विज्ञेयं राक्षसस्य च मन्दिरं।
राक्षसेन्द्रस्य च पुरं कुम्भिलस्य खरस्य च॥ २७॥
विराधस्य (१) च क्रूरस्य पुरमुल्कामुखस्य च।
हेमकस्य च नागस्य तथा पाण्डुरकस्य च॥ २८॥
मणिमन्तस्य च पुरं कपिलस्य च मन्दिरं।
नन्दस्य चोरगपतेर्विशालस्य च मन्दिरं॥ २९॥

१ विराव्स्येति घ०।



एवं पुरसहस्राणि नागदानवरक्षसां।
तृतीयेऽस्मिंस्तले विप्राः पीतभौमे न संशयः॥ ३०॥
चतुर्थे दैत्यसिंहस्य कालनेमेर्महात्मनः।
गजकर्णस्य च पुरं नगरं कुञ्जरस्य च॥ ३१॥
राक्षसेन्द्रस्य च पुरं सुमालेर्बहुविस्तरं।
मुञ्जस्य लोकनाथस्य वृकवक्त्रस्य चालयं॥ ३२॥
बहुयोजनसाहस्रं बहुपक्षिसमाकुलं।
नगरं वैनतेयस्य चतुर्थेऽस्मिन् रसातले॥ ३३॥
पञ्चमे शर्कराभौमे बहुयोजनविस्तृते।
विरोचनस्य नगरं दैत्यसिंहस्य धीमतः॥ ३४॥
वैदूर्य्यस्याग्निजिह्वस्य हिरण्याक्षस्य चालयं।
पुरञ्च विद्युज्जिह्वस्य राक्षसस्य च धीमतः॥ ३५॥
महामेघस्य च पुरं राक्षसेन्द्रस्य शालिनः।
कर्म्मारस्य च नागस्य स्वस्तिकस्य जयस्य च॥ ३६॥
एवं पुरसहस्राणि नागदानवरक्षसां।
पञ्चमेपि तथा ज्ञेयं शर्करानिलये सदा॥ ३७॥
षष्ठे तले दैत्यपतेः केसरेर्नगरोत्तमं।
सुपर्व्वणः सुलोम्नश्च नगरं महिषस्य च।
राक्षसेन्द्रस्य च पुरमुत्क्रोशस्य महात्मनः॥ ३८॥
तत्रास्ते सुरसापुत्रः शतशीर्षो मुदा युतः।
कश्यपस्य सुतः श्रीमान् वासुकिर्नाम नागराट्॥ ३९॥
एवं पुरसहस्राणि नागदानवरक्षसां।
षष्ठे तलेऽस्मिन् विख्याते शिलाभौमे रसातले॥ ४०॥

सप्तमे तु तले श्रेयं पाताले सर्व्वपश्चिमे ।
पुरं वले: प्रमुदितं नरनारीसमाकुलं ॥ ४१ ॥
असुराशीविषै: पूर्णसुकृतैर्दैवयत्नभि: ।
सुचुकुन्दस्य दैत्यस्य तत्र वै नगरं महत् ॥ ४२ ॥
अनेकैर्दितिपुत्राणां समुदीर्णैर्महापुरै: ।
तथैव नागनगरैर्क्रीडिमद्भि: सहस्रश: ॥ ४३ ॥
दैत्यानां दानवानाञ्च समुदीर्णैर्महापुरै: ।
उदीर्णैराक्षसावासैरनेकैश्च समाकुलं ॥ ४४ ॥
पातालान्ते च विप्रेन्द्रा विस्तीर्णे वहुयोजने ।
आस्ते रक्तारविन्दाक्षो महात्मा ह्यजरामर: ॥ ४५ ॥
धौतशङ्खोदरवपुर्नीलवासा महाभुज: ।
विशालभोगो द्युतिमांश्चित्रमालाधरो बली ॥ ४६ ॥
रुक्मशृङ्गावदातेन दीप्तास्येन विराजता ।
प्रभुर्मुखसहस्रेण शोभते वै स कुण्डली ॥ ४७ ॥
स जिह्वामालया देवो लोलज्वालानलार्चिषा ।
ज्वालामालापरिक्षिप्त: कैलास इव लक्ष्यते ॥ ४८ ॥
स तु नेत्रसहस्रेण द्विगुणेन विराजता ।
बालसूर्य्याभिताम्रेण शोभते स्निग्धमण्डल: ॥ ४९ ॥
तस्य कुन्देन्दुवर्णस्य अक्षमाला विराजते ।
तरुणादित्यमालेव श्वेतपर्व्वतमूर्द्धनि ॥ ५० ॥
जटाकरालो द्युतिमान् लक्ष्यते शयनासने ।
विस्तीर्ण इव मेदिन्यां सहस्रशिखरो गिरि: ॥ ५१ ॥
महाभोगैर्महाभागैर्म्महानागैर्महाबलै: ।



उपास्यते महातेजा महानागपति: स्वयं ॥ ५२ ॥
स राजा सर्व्वनागानां शेषो नाम महाद्युति: ।
सा वैष्णवी ह्यहितनुर्म्मर्य्यादायां व्यवस्थिता ॥ ५३ ॥
सप्तैवमेते कथिता व्यवहार्य्या रसातला: ।
देवासुरमहानागराक्षसाध्युषिता: सदा ॥ ५४ ॥
अत:परमनालोक्यमगम्यं सिद्धसाधुभि: ।
देवानामप्यविदितं व्यवहारविवर्जितं ॥ ५५ ॥
पृथिव्यग्न्यम्बुवायूनां नभसश्च द्विजोत्तमा: ।
महत्त्वमेवमृषिभिर्वर्ण्यते नात्र संशय: ॥ ५६ ॥
अत ऊर्द्धं प्रवक्ष्यामि सूर्य्याचन्द्रमसोर्गतिं ।
सूर्य्याचन्द्रमसावेतौ भ्रमन्तौ यावदेव तु ।
प्रकाशत: स्वभाभिस्तौ मण्डलाभ्यां समास्थितौ ॥ ५७ ॥
समानाच्च समुद्राणां द्वीपानान्तु स विस्तर: ।
विस्तरार्द्धं पृथिव्यास्तु भवेदन्यत्र वाह्यत: ॥ ५८ ॥
पर्य्यासपरिमाण्यन्तु चन्द्रादित्यौ प्रकाशत: ।
पर्य्यासपरिमाणेन भूमेस्तुल्यं दिवं स्मृतं ॥ ५९ ॥
अवति त्रीनिमान् लोकान् यस्मात् सूर्य्य: परिभ्रमन् ।
अवधातु: प्रकाशाख्यो ह्यवनात्स रवि: स्मृत: ॥ ६० ॥
अत:परं प्रवक्ष्यामि प्रमाणं चन्द्रसूर्य्ययो: ।
महित्वान्महीशब्दो ह्यस्मिन् वर्षे निपात्यते ॥ ६१ ॥
अस्य भारतवर्षस्य विष्कम्भन्तु सुविस्तरं ।
मण्डलं भास्करस्याथ योजनानां निबोधत ॥ ६२ ॥
नवयोजनसाहस्रो विस्तारो भास्करस्य तु ।

विस्तारात्त्रिगुणश्चास्य परिणाहोऽथ मण्डलं।
विष्कम्भो मण्डलस्यैव भास्कराद्द्विगुणः प्रभो ॥ ६३ ॥
अतः पृथिव्यां वक्ष्यामि प्रमाणं योजनैः सह।
सप्तद्वीपसमुद्राया विस्तारो मण्डलञ्च यत् ॥ ६४ ॥
इत्येतदिह संख्यातं पुराणं परिमाणतः।
तद्वक्ष्यामि प्रसंख्याय साम्प्रतैरभिमानिभिः ॥ ६५ ॥
अभिमानिव्यतीता ये तुल्यास्ते साम्प्रतैरिह।
देवा ये वै ह्यतीतास्ते रूपैर्नामभिरेव च ॥ ६६ ॥
तस्मात्तु साम्प्रतैर्दैवैर्वक्ष्यामि वसुधातलं।
दिवस्तु सन्निवेशो वै साम्प्रतैरेव कृत्स्नशः ॥ ६७ ॥
शतार्द्धकोटिविस्तारा पृथिवी कृत्स्नतः स्मृता।
तस्या वाधप्रमाणेन मेरोर्वै चातुरन्तरं ॥ ६८ ॥
पृथिव्या वाधविस्तारो योजनाग्रात्प्रकीर्त्तितः।
मेरुमध्यात् प्रतिदिशं कोटिरेकादश स्मृताः ॥ ६९ ॥
तथा शतसहस्राणि एकोननवतिः पुनः।
पञ्चाशच्च सहस्राणि पृथिव्या वाधविस्तरः ॥ ७० ॥
पृथिव्या विस्तरं कृत्स्नं योजनैस्तन्निबोधत।
तिस्रःकोट्यस्तु विस्तारः संख्यातः स चतुर्हिशं ॥ ७१ ॥
तथा शतसहस्राणामेकोनाशीतिरुच्यते।
सप्तद्वीपसमुद्रायाः पृथिव्यास्त्वेष विस्तरः ॥ ७२ ॥
विस्तारात्त्रिगुणश्चैव पृथिव्यन्तस्य मण्डलं।
गणितं योजनाग्रन्तु कोट्यस्त्वेकादश स्मृताः ॥ ७३ ॥
तथा शतसहस्रन्तु सप्तत्रिंशाधिकानि तु।



इत्येतद्वै प्रसंख्यातं पृथिव्यन्तस्य मण्डलं ॥ ७४ ॥
तारकासन्निवेशस्य दिवि यावद्वि मण्डलं।
पर्य्यासः सन्निवेशस्य भूमेस्तावत्तु मण्डलं ॥ ७५ ॥
पर्य्यासपरिमाणेन भूमेस्तुल्यं दिवं स्मृतं।
सप्तानामपि लोकानामेतन्मानं प्रकीर्त्तितं ॥ ७६ ॥
पर्य्यासपरिमाणेन मण्डलानुगतेन च।
उपर्युपरि लोकानां छत्रवत्परिमण्डलं ॥ ७७ ॥
संस्थितिर्विहिता सर्व्वा येषु तिष्ठन्ति जन्तवः।
एतदण्डकटाहस्य प्रमाणं परिकीर्त्तितं ॥ ७८ ॥
अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी।
भूर्लोकश्च भुवश्चैव तृतीयः स्वरिति स्मृतः।
महर्लोको जनश्चैव तपः सत्यञ्च सप्तमः ॥ ७९ ॥
एते सप्त कृता लोकाश्छत्राकारा व्यवस्थिताः।
स्वकैरावरणैः सूर्च्छैर्धार्य्यमाणाः पृथक् पृथक् ॥ ८० ॥
दशभागाधिकाभिश्च ताभिः प्रकृतिभिर्वृताः।
धार्य्यमाणा विशेषैश्च समुत्पन्नैः परस्परं ॥ ८१ ॥
अस्याण्डस्य समन्ताच्च सन्निविष्टो घनोदधिः।
पृथिवीमण्डलं कृत्स्नं घनतोयेन धार्य्यते ॥ ८२ ॥
घनोदधिपरेणाथ धार्य्यते घनतेजसा।
वाह्यतो घनतेजस्तु तिर्य्यगूर्द्धन्तु मण्डलं ॥ ८३ ॥
समन्ताद्घनवातेन धार्य्यमाणं प्रतिष्ठितं।
घनवातात्तथाकाशमाकाशञ्च महात्मना ॥ ८४ ॥
भूतादिना वृतं सर्व्वं भूतादिर्महता वृतः।

हृतो महाननन्तेन प्रधानेनाव्ययात्मना ॥ ८५ ॥
पुराणि लोकपालानां प्रवक्ष्यामि यथाक्रमं ।
ज्योतिर्गणप्रचारस्य प्रमाणं परिवक्ष्यते ॥ ८६ ॥
मेरोः प्राच्यां दिशि तथा मानसस्यैव मूर्द्धनि ।
वस्त्रोकसारा माहेन्द्री पुरी हेमपरिष्कृता ॥ ८७ ॥
दक्षिणेन पुनर्मेरोर्मानसस्यैव मूर्द्धनि ।
वैवस्वतो निवसति यमः संयमने पुरे ॥ ८८ ॥
प्रतीच्यान्तु पुनर्मेरोर्मानसस्यैव मूर्द्धनि ।
सुखा नाम पुरी रम्या वरुणस्याथ धीमतः ॥ ८९ ॥
दिश्युत्तरस्यां मेरोस्तु मानसस्यैव मूर्द्धनि ।
तुल्या माहेन्द्रपुर्य्या तु सोमस्यापि विभावरी ॥ ९० ॥
सानसोत्तरपृष्ठे तु लोकपालाश्चतुर्दिशं ।
स्थिता धर्म्मव्यवस्थायै लोकसंरक्षणाय च ॥ ९१ ॥
लोकपालोपरिष्टात्तु सर्व्वतो दक्षिणायने ।
काष्ठागतस्य सूर्य्यस्य गतिर्यां तां निबोधत ॥ ९२ ॥
दक्षिणे प्रक्रमे सूर्य्यः क्षिप्तेषुरिव सर्पति ।
ज्योतिषाञ्चक्रमादाय सततं परिगच्छति ॥ ९३ ॥
मध्यगश्चामरावत्यां यदा भवति भास्करः ।
वैवस्वते संयमने उदयस्तत्र उच्यते ॥ ९४ ॥
सुखायामर्द्धरात्रश्च मध्यगः स्याद्यदा रविः ।
सुखायामथ वारुण्यामुत्तिष्ठन् स तु दृश्यते ॥ ९५ ॥
विभायामर्द्धरात्रं स्यान् माहेन्द्र्यामस्तमेति च ।
तदा दक्षिणपूर्व्वेषामपराह्णोविधीयते ॥ ९६ ॥



दक्षिणापरदेश्यानां पूर्व्वाह्णः परिकीर्त्यते ।
तेषामपररात्रश्च ये जना उत्तरापथे ॥ ९७ ॥
देशा उत्तरपूर्व्वा ये पूर्व्वरात्रन्तु तान् प्रति ।
एवमेवोत्तरेष्वर्को भवनेषु विराजते ॥ ९८ ॥
सुखायामथ वारुण्यां मध्याह्ने चार्य्यमा यदा ।
विभावर्य्यां सोमपुर्य्यामुत्तिष्ठति विभावसुः ॥ ९९ ॥
रात्रार्द्धं चामरावत्यामस्तमेति यमस्य च ।
सोमपुर्य्यां विभायान्तु मध्याह्ने स्याद्दिवाकरः ॥ १०० ॥
महेन्द्रस्यामरावत्यामुत्तिष्ठति यदा रविः ।
अर्द्धरात्रं संयमने वारुण्यामस्तमेति च ॥ १०१ ॥
स शीघ्रमेति पर्य्येति भास्करोऽलातचक्रवत् ।
भ्रमन् वै भ्रममाणानि ऋक्षाणि गगने रविः ॥ १०२ ॥
एवञ्चतुर्षु द्वीपेषु दक्षिणान्तेन सर्पति ।
उदयास्तमनेनासावुत्तिष्ठति पुनः पुनः ॥ १०३ ॥
पूर्व्वाह्णे चापराह्णे तु द्वौ द्वौ देवालयौ तु सः ।
तपत्येकन्तु मध्याह्ने तैरेव तु सरश्मिभिः ॥ १०४ ॥
उदितो वर्द्धमानाभिरमध्याह्नं तपन् रविः ।
अतः परं क्षसन्तीभिर्गोभिरस्तं स गच्छति ॥ १०५ ॥
उदयास्तमयाभ्यां हि स्मृते पूर्व्वापरे दिशौ ।
यावत्पुरस्तात्तपति तावत् पृष्ठे तु पार्श्वयोः ॥ १०६ ॥
यश्चोद्यन् दृश्यते सूर्य्यस्तेषां स उदयः स्मृतः ।
यत्र प्रणाशमायाति तेषामस्तः स उच्यते ॥ १०७ ॥
सर्व्वेषामुत्तरे मेरुर्लोकालोकस्तु दक्षिणे ।

विदूरभावादर्कस्य भूमेर्लेखावृतस्य च।
क्षियन्ते रश्मयो यस्मात्तेन रात्रौ न दृश्यते ॥ १०८ ॥
ग्रहनक्षत्रतारागां दर्शनं भास्करस्य च।
उच्छ्रयस्य प्रमाणेन ज्ञेयमस्तमनोदयं ॥ १०९ ॥
शुक्लच्छायोऽग्निरापश्च कृष्णच्छाया च मेदिनी।
विदूरभावादर्कस्य उद्यतस्य विरश्मिता।
रक्ताभावो विरश्मित्वाद्रक्तत्वाच्चाप्यनुष्णता॥ ११० ॥
लेखयावस्थितः सूर्यो यत्र यत्र तु दृश्यते।
ऊर्द्धं गतः सहस्रन्तु योजनानां स दृश्यते॥ १११ ॥
प्रभा हि सौरी पादेन अस्तङ्गच्छति भास्करे।
अग्निमाविशते रात्रौ तस्मादूरात् प्रकाशते ॥ ११२ ॥
उदितस्तु पुनः सूर्यः अस्तमाग्नेयमाविशत्।
संयुक्तो वह्निना सूर्यस्ततः स तपते दिवा॥ ११३ ॥
प्राकाश्यञ्च तथौष्ण्यञ्च सूर्याग्नेयौ च तेजसी।
परस्परानुप्रवेशादाप्यायेते दिवानिशं॥ ११४॥
उत्तरे चैव भूम्यर्द्धे तथा तस्मिंश्च दक्षिणे।
उत्तिष्ठति तथा सूर्ये रात्रिराविशते क्षपः।
तस्मात्तास्रा भवन्त्यापो दिवारात्रिप्रवेशनात् ॥ ११५ ॥
अस्तं याति पुनः सूर्ये दिनं वै प्रविशत्यपः।
तस्माच्छुक्ला भवन्त्यापो नक्तमङ्गः प्रवेशनात् ॥ ११६ ॥
एतेन क्रमयोगेन भूम्यर्द्धे दक्षिणोत्तरे।
उदयास्तमनेऽर्कस्य (१) अहोरात्रं विशत्यपः॥ ११७ ॥

१ उदयास्तमये नित्यमिति ध०।



दिनं सूर्यप्रकाशाख्यं तामसी रात्रिरुच्यते।
तस्मादवस्थिता रात्रिः सूर्यावेक्ष्यमहः स्मृतं ॥ ११८ ॥
एवं पुष्करमध्येन यदा सर्पति भास्करः।
त्रिंशांशकन्तु (१) मेदिन्या मुहूर्त्तेनैव गच्छति ॥ ११९॥
योजनाग्रान्मुहूर्त्तस्य इमां संख्यां निबोधत।
पूर्णं शतसहस्राणामेकत्रिंशत्तु सा स्मृता॥ १२० ॥
पञ्चाशत्तु तथान्यानि सहस्राण्यधिकानि तु।
मौहूर्त्तिकी गतिर्ह्येषा सूर्यस्य तु विधीयते ॥ १२१ ॥
एतेन गतियोगेन यदा काष्ठान्तु दक्षिणां।
पर्य्यागच्छेत्तदादित्यो माघे काष्ठान्तमेव हि॥ १२२॥
सर्पते दक्षिणायान्तु काष्ठायां तन्निबोधत।
नवकोट्यः प्रसंख्याता योजनैः परिमण्डलं ॥ १२३ ॥
तथा शतसहस्राणि चत्वारिंशच्च पञ्च च।
अहोरात्रात्मतङ्गस्य गतिरेषा विधीयते ॥ १२४ ॥
दक्षिणाद्दिनिष्ठक्तोऽसौ विषुवस्थो यदा रविः।
क्षीरोदस्य समुद्रस्य उत्तरान्ता दिशश्चरन् । १२५ ॥
मण्डलं विषुवद्यापि योजनैस्तन्निबोधत।
तिस्रः कोट्यस्तु विस्तीर्णा विषुवद्दयापि सा स्मृता॥१२६॥
तथा शतसहस्राणामशीत्येकाधिका पुनः।
श्रवणे चोत्तरां काष्ठाच्चित्रभानुर्यदा भवेत्।
शाकद्वीपस्य षष्ठस्य उत्तरान्ता दिशश्चरन् ॥ १२७ ॥
उत्तरायाञ्च काष्ठायां प्रमाणं मण्डलस्य च।

१ त्रिंशांशकन्त्विति क०। त्रिंशद्भागन्त्विति घ०।

योजनाग्रात्प्रसंख्याता कोटिरेका तु सा द्विजैः ॥ १२८ ॥
अशीतिर्नियुतानीह योजनानां तथैव च ।
अष्टपञ्चाशतश्चैव योजनान्यधिकानि तु ॥ १२९ ॥
नागवीथ्युत्तरावीथी अजवीथी च दक्षिणा ।
मूलश्चैव तथाषाढे ह्यजवीथ्युदयास्तयः ।
अभिजित्पूर्वतः स्वातिर्नागवीथ्युदयास्तयः ॥ १३० ॥
काष्ठयोरन्तरं यच्च तद्वक्ष्ये योजनैः पुनः ।
एतच्छतसहस्राणामेकत्रिंशोत्तरं शतं ॥ १३१ ॥
त्रयस्त्रिंशाधिकाश्चान्ये त्रयस्त्रिंशच्च योजनैः ।
काष्ठयोरन्तरं ह्येतद् योजनाग्रात् प्रतिष्ठितं ॥ १३२ ॥
काष्ठयोर्लेखयोश्चैव अन्तरे दक्षिणोत्तरे ।
ते तु वक्ष्यामि संख्याय योजनैस्त्रिबोधत ॥ १३३ ॥
एकैकमन्तरन्तस्या नियुतान्येकसप्ततिः ।
सहस्राण्यतिरिक्ताश्च ततोऽन्या पञ्चसप्ततिः ॥ १३४ ॥
लेखयोः काष्ठयोश्चैव बाह्याभ्यन्तरयोः स्मृतं ।
अभ्यन्तरन्तु पर्य्येति मण्डलान्युत्तरायणे ॥ १३५ ॥
बाह्यतो दक्षिणे चैव सततन्तु यथाक्रमं ।
मण्डलानां शतं पूर्णमशीत्यधिकमुत्तरं ॥ १३६ ॥
चरते दक्षिणे चापि तावदेव विभावसुः ।
प्रमाणं मण्डलस्याथ योजनाग्रान्निबोधत ॥ १३७ ॥
एकविंशद् योजनानां सहस्राणि समासतः ।
शते द्वे पुनरप्यन्ये योजनानां प्रकीर्त्तिते ॥ १३८ ॥
एकविंशतिभिश्चैव योजनैरधिकैर्हि ते ।



एतत्प्रमाणमाख्यातं योजनैर्मण्डलं हि तत् ॥ १३९ ॥
विष्कम्भो मण्डलस्यैष तिर्यक् स तु विधीयते ।
प्रत्यहञ्चरते तानि सूर्य्यो वै मण्डलक्रमं ॥ १४० ॥
कुलालचक्रपर्य्यन्तो यथा शीघ्रं निवर्त्तते ।
दक्षिणे प्रक्रमे सूर्य्यस्तथा शीघ्रं निवर्त्तते ॥ १४१ ॥
तस्मात् प्रकृष्टां भूमिञ्च कालेनाल्पेन गच्छति ।
सूर्य्यो द्वादशभिः शीघ्रं मुहूर्त्तैर्दक्षिणोत्तरे ॥ १४२ ॥
त्रयोदशार्द्धमृक्षाणामह्नानुचरते रविः ।
मुहूर्त्तैस्तावद्भिश्च नक्तमष्टादशैश्वरन् ॥ १४३ ॥
कुलालचक्रमध्यस्तु यथा मन्दं प्रसर्पति ।
तथोदगयने सूर्य्यः सर्पते मन्दविक्रमः ॥ १४४ ॥
त्रयोदशार्द्धसर्क्षेण ऋक्षाणां चरते रविः ।
तस्मादीर्घेण कालेन भूमिमल्पां निगच्छति ॥ १४५ ॥
अष्टादशमुहूर्त्तैस्तु उत्तरायणपश्चिमं ।
अहर्भवति तच्चापि चरते मन्दविक्रमः ॥ १४६ ॥
त्रयोदशार्द्धमर्क्षेण ऋक्षाणाञ्चरते रविः ।
मुहूर्त्तैस्तावद्भिश्च नक्तमष्टादशैश्वरन् ॥ १४७ ॥
ततो मन्दतरं ताभ्याञ्चक्रं भ्रमति वै यथा ।
मृत्पिण्ड इव मध्यस्थो ध्रुवो भ्रमति वै तथा ॥ १४८ ॥
त्रिंशन्मुहूर्त्तानेवाहुरहोरात्रं ध्रुवो भ्रमन् ।
उभयोः काष्ठयोर्मध्ये भ्रमते मण्डलानि सः ॥ १४९ ॥
कुलालचक्रनाभिस्तु यथा तत्रैव वर्त्तते ।
ध्रुवस्तथा हि विज्ञेयस्तत्रैव परिवर्त्तते ॥ १५० ॥

उभयोः काष्ठयोर्मध्ये भ्रमतो मण्डलानि तु।
दिवा नक्तञ्च सूर्य्यस्य मन्दा शीघ्रा च वै गतिः ॥ १५१ ॥
उत्तरे प्रक्रमे त्विन्दोर्दिवा मन्दा गतिः स्मृता।
तथैव च पुनर्नक्तं शीघ्रा सूर्य्यस्य वै गतिः ॥ १५२ ॥
दक्षिणे प्रक्रमे चैव दिवा शीघ्रं विधीयते।
गतिः सूर्य्यस्य नक्तं वै मन्दा चापि तथा स्मृता ॥ १५३ ॥
एवं गतिविशेषेण विभजन् रात्र्यहानि तु।
तथा विचरते मार्गं समेन विषमेण च ॥ १५४ ॥
लोकालोके स्थिता ये ते लोकपालाश्चदुर्दिशं।
अगस्त्यश्चरते तेषामुपरिष्टाज्जवेन तु।
भजन्नसावहोरात्रमेवङ्गतिविशेषणैः (१) ॥ १५५ ॥
दक्षिणे नागवीथ्यायां लोकालोकस्य चोत्तरं।
लोकसन्तारको ह्येष वैश्वानरपथाद्बहिः ॥ १५६ ॥
पृष्ठे यावत्प्रभा सौरी पुरस्तात् सम्प्रकाशते।
पार्श्वयोः पृष्ठतस्तावल्लोकालोकस्य सर्व्वतः ॥ १५७ ॥
योजनानां सहस्राणि दशोर्द्धन्तूच्छ्रितो गिरिः।
प्रकाश्यश्चाप्रकाश्यश्च सर्व्वतः परिमण्डलः ॥ १५८ ॥
नक्षत्रचन्द्रसूर्य्याश्च ग्रहास्तारागणैः सह।
अभ्यन्तरं प्रकाशन्ते लोकालोकस्य वै गिरेः ॥ १५९ ॥
एतावानेव लोकस्तु निरालोकस्ततः परं।
लोकालोक एकधा तु निरालोकस्त्वनेकधा ॥ १६० ॥

१ गतिविचरणैः इति ङ०।



लोकालोकन्तु सन्धत्ते यस्मात् सूर्य्यः परिग्रहं।
तस्मात्सन्ध्येति तामाहुरृषाध्युष्टोर्य्यदुत्तरं।
उषा रात्रिः स्मृता विप्रैर्व्युष्टिश्चापि त्वहः स्मृतं ॥ १६१ ॥
सूर्य्यं हि ग्रसमानानां सन्ध्याकाले हि रक्षसां।
प्रजापतिनियोगेन शापस्तेषां दुरात्मनां।
क्षयत्वञ्च देहस्य प्रापिता मरणं तथा ॥ १६२ ॥
तिस्रः कोट्यस्तु विख्याता मन्देहा नाम राक्षसाः।
प्रार्थयन्ति सहस्रांशुमुदयन्ति दिने दिने।
तापयन्तो दुरात्मानः सूर्य्यमिच्छन्ति खादितुं ॥ १६३ ॥
अथ सूर्य्यस्य तेषाञ्च युद्धमासीत् सुदारुणं।
ततो ब्रह्मा च देवाश्च ब्राह्मणाश्चैव सत्तमाः।
सन्ध्येति समुपासन्तः क्षेपयन्ति महाजलं ॥ १६४ ॥
ओंकारब्रह्मसंपुक्तं गायत्र्या चाभिमन्त्रितं।
तेन दह्यन्ति ते दैत्या वज्रभूतेन वारिणा ॥ १६५ ॥
ततः पुनर्महातेजा महाद्युतिपराक्रमः।
योजनानां सहस्राणि ऊर्द्धमुतिष्ठते शतं ॥ १६६ ॥
ततः प्रयाति भगवान् ब्राह्मणैः परिवारितः।
बालखिल्यैश्च मुनिभिः कृतार्थैः समरोचिभिः ॥ १६७ ॥

काष्ठा निमेषा दश पञ्च चैव
त्रिंशच्च काष्ठा गणयेत् कलान्तं।
त्रिंशत् कलाश्चैव भवेन्मुहूर्त्त-
स्तैस्त्रिंशता रात्र्यहनी समेते ॥ १६८ ॥

क्रमशस्त्वी त्वहर्भागैर्दिवसानां यथाक्रमं।

सन्ध्या मुहूर्त्तमानन्तु क्षासे हृद्धौ समा स्मृता ॥ १६९ ॥
लेखाप्रभृत्यथादित्ये त्रिमुहूर्त्तागते तु वै।
प्रातस्तनः स्मृतः कालो भागस्त्वङ्गः स पञ्चमः ॥ १७० ॥
तस्मात् प्रातस्तनात्कालात् त्रिमुहूर्त्तस्तु सङ्गवः।
मध्याह्नस्त्रिमुहूर्त्तस्तु तस्मात्कालाच्च सङ्गवात् ॥ १७१ ॥
तस्मान्मध्यन्दिनात् कालादपराह्न इति स्मृतः।
त्रय एव मुहूर्त्तास्तु तस्मात् कालाच्च मध्यमात् (१)॥ १७२ ॥
अपराह्णे व्यतीपाते कालः सायाह्न उच्यते।
दशपञ्चमुहूर्त्ताहे मुहूर्त्तास्त्रय एव च ॥ १७३ ॥
दशपञ्चमुहूर्त्तं वै अहर्विषुवति स्मृतं।
दशपञ्चमुहूर्त्ताहे रात्रिन्दिवमिति स्मृतं ॥ १७४ ॥
वर्द्धते क्षसते चैव अयने दक्षिणोत्तरे।
अहस्तु ग्रसते रात्रिं रात्रिस्तुग्रसते त्वहः ॥ १७५ ॥
ग्रहसन्त्योर्मध्ये विषुवन्तहिभाव्यते।
अहोरात्रं कलाश्चैव सप्त सोमः समश्नुते ॥ १७६ ॥
तथा पञ्चदशाहानि पक्ष इत्यभिधीयते।
द्वौ पक्षौ च भवेन्मासो द्वौ मासावन्तराहृतुः।
ऋतुत्रयमयनं स्याद्द्वयने वर्षमुच्यते ॥ १७७ ॥
निमेषादिकृतः कालः काष्ठाया दश पञ्च च।
कलायास्त्रिंशतः काष्ठा मात्राशीतिहयात्मिका ॥ १७८ ॥
शतघ्नैकोनकास्त्रिंशन्मात्रात्रिंशत् षडुत्तरा।
द्विषष्टिभाक्त्रयोविंशन्मात्रायाश्च चला भवेत् ॥ १७९ ॥

१ पाठोऽयं पुनरुक्त एव प्रतिभाति।



चत्वारिंशत् सहस्राणि शतान्यष्टौ च विद्युतिः।
सप्ततिश्चापि तत्रैव नवतिं विद्धि निश्चये ॥ १८० ॥
चत्वार्य्येव शतान्याहुर्विद्युतो वैधसंयुगे।
चरांशो ह्येष विज्ञेयो नालिका चात्र कारणं ॥ १८१ ॥
संवत्सरादयः पञ्च चतुर्मानविकल्पिताः।
निश्चयः सर्व्वकालस्य युग इत्यभिधीयते ॥ १८२ ॥
संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः।
इदत्सरस्तृतीयस्तु चतुर्थश्चानुवत्सरः।
पञ्चमो वत्सरस्तेषां कालस्तु परिसंज्ञितः ॥ १८३ ॥
त्रिंशच्छतं (१) भवेत्पूर्णं पर्व्वणान्तु रवेर्युगं।
एतान्यष्टादशस्त्रिंशदुदयो भास्करस्य च ॥ १८४ ॥
ऋतवस्त्रिंशतः सौरा अयनानि दशैव तु।
पञ्चत्रिंशत् शतञ्चापि षष्टिर्मासाश्च भास्करः ॥ १८५ ॥
त्रिंशदेव त्वहोरात्रं स तु मासश्च भास्करः।
एकषष्टिस्त्वहोरात्रा दनुरेको विभाव्यते ॥ १८६ ॥
अङ्कान्तु त्वधिकाशीतिः शतञ्चाप्यधिकं भवेत्।
मानन्तच्चित्रभानोस्तु विज्ञेयं भुवनस्य तु ॥ १८७ ॥
सौरसौम्यन्तु विज्ञेयं नक्षत्रं सावनन्तथा।
नामान्येतानि चत्वारि यैः पुराणं विभाव्यते ॥ १८८ ॥
खेतस्योत्तरतश्चैव शृङ्गवान्नाम पर्व्वतः।
त्रीणि तस्य तु शृङ्गाणि स्पृशन्तीव नभस्तलं ॥ १८९ ॥

१ त्रिंशच्छतमिति ध०।

तैश्चापि शृङ्गवान्नाम सर्व्वतश्चैव विश्रुतः (१)।
एकमार्गश्च विस्तारो विष्कम्भश्चापि कीर्त्तितः ॥ १९० ॥
तस्य वै सर्व्वतः शृङ्गं मध्यमन्तर्द्विरण्मयं।
दक्षिणं राजतञ्चैव शृङ्गन्तु स्फटिकप्रभं ॥ १९१ ॥
सर्व्वरत्नमयञ्चैकं शृङ्गमुत्तरमुत्तमं।
एवं कूटैस्त्रिभिः शैलैः शृङ्गवानिति विश्रुतः ॥ १९२ ॥
यत्तद्विषुवतं शृङ्गन्तदर्कः प्रतिपद्यते।
अरहस्सन्ध्ययोर्मध्ये मध्यमां गतिमाश्रितः।
अहस्तुल्यामथो रात्रिं करोति तिमिरापहः ॥ १९३ ॥
हरिताश्च हया दिव्यास्ते नियुक्ता महारथे।
अनुलिप्ता इवाभान्ति पद्मरत्नैर्गभस्तिभिः ॥ १९४ ॥
मेषान्ते च तुलान्ते च भास्करोदयतः स्मृताः।
मुहूर्त्ता दश पञ्चैव अहोरात्रिश्च तावती ॥ १९५ ॥
कृत्तिकानां यदा सूर्य्यः प्रथमांशगतो भवेत्।
विशाखानां तथा ज्ञेयश्चतुर्थांशे निशाकरः ॥ १९६ ॥
विशाखायां यदा सूर्य्यश्चरतेंऽशं तृतीयकं।
तदा चन्द्रं विजानीयात् कृतिकाग्निरसि स्थितं ॥ १९७ ॥
विषुवन्तं तदा विद्यादेवमाहुर्महर्षयः।
सूर्य्येण विषुवं विद्यात्कालं सोमेन लक्षयेत् ॥ १९८ ॥
समा रात्रिरहश्चैव यदा तद्विषुवद्भवेत्।
तदा दानानि देयानि पितृभ्यो विषुवत्यपि।
ब्राह्मणेभ्यो विशेषेण मुखमेतत्तु तु दैवतं ॥ १९९ ॥

१ तैश्चापि शृङ्गैः स नगः शृङ्गवान्नाम विश्रुत इति घ०।



ऋतवश्चाधिमासौ च कलाकाष्ठामुहूर्त्तकाः।
पौर्णमासी तथा ज्ञेया अमावास्या तथैव च।
सिनीवाली कुहूश्चैव राका चानुमतिस्तथा ॥ २०० ॥
तपस्तपस्यौ मधुमाधवौ च
शुक्रः शुचिश्चायनमुत्तरं स्यात्।
नभो नभस्योऽथ इषुः सहोर्जः
सहःसहस्यावितिं दक्षिणं स्यात् ॥ २०१ ॥
संवत्सरास्ततो ज्ञेयाः पञ्चाब्दाः ब्रह्मणः सुताः (१)।
तस्मात्तु ऋतवो ज्ञेया ऋतवो ह्यन्तराः स्मृताः ॥ २०२ ॥
तस्मादनुमुखा ज्ञेया अमावास्यास्य पर्व्वणः।
तस्मात्तु विषुवं ज्ञेयं पितृदैवहितं सदा ॥ २०३ ॥
एवं ज्ञात्वा न मुह्येत दैवे पित्र्ये च मानवः।
तस्मात् स्मृतं प्रजानां वै विषुवत्सर्व्वगं सदा ॥ २०४ ॥
आलोकान्तः स्मृतो लोको लोकान्तो लोक उच्यते।
लोकपालाः स्थितास्तत्र लोकालोकस्य मध्यतः ॥ २०५ ॥
चत्वारस्ते महात्मानस्तिष्ठन्त्याभूतसंप्लवात्।
सुधामा चैव वैराजः कर्द्दमः शङ्खपस्तथा।
हिरण्यलोमा पर्জ्जन्यः केतुमान् जातनिश्रयः ॥ २०६ ॥
निर्द्वन्द्वा निरभीमाना निस्तन्द्रा निष्परिग्रहाः।
लोकपालाः स्थिता ह्येते लोकालोके चतुर्दिशं ॥ २०७ ॥
उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणं।
पितृयानः स वै पन्था वैश्वानरपथाद्बहिः ॥ २०८ ॥

१ पञ्चाशद्ब्रह्मणः सुता इति ङ०।

तत्रासते प्रजावन्तो मुनयो ह्यग्निहोत्रिणः ।
लोकस्य सन्तानकराः पितृयाने पथि स्थिताः ॥ २०९ ॥
भूतारम्भकृतं कर्म्म आग्निषा ऋत्विगुच्यते ।
प्रारभन्ते लोककामास्तेषां पन्थाः सदक्षिणः ॥ २१० ॥
चलितन्ते पुनर्द्धर्म्मं स्थापयन्ति युगे युगे ।
सन्तत्या तपसा चैव मर्य्यादाभिः श्रुतेन च ॥ २११ ॥
जायमानास्तु पूर्व्वे वै पश्चिमानां गृहेषु च ।
पश्चिमाश्चैव जायन्ते पूर्व्वेषां निधनेष्वपि ।
एवमावर्त्तमानास्ते तिष्ठन्त्यामूतसंप्लवात् ॥ २१२ ॥
अष्टाशीतिसहस्राणि मुनीनां गृहमेधिनां ।
सवितुर्दक्षिणं मार्गं श्रिता ह्याचन्द्रतारकं ।
क्रियावतां प्रसंख्येया ये श्मशानानि भेजिरे ॥ २१३ ॥
लोकसंव्यवहारेण भूतारम्भकृतेन च ।
इच्छाद्वेषप्रकृत्या च मैथुनोपगमेन च ॥ २१४ ॥
तथा कायकृतेनेह सेवनाद्विषयस्य च ।
एतैस्तैः कारणैः सिद्धाः श्मशानानि हि भेजिरे ।
प्रजैषिणस्ते मुनयो ह्यपरेष्विह जज्ञिरे ॥ २१५ ॥
नागवीथ्युत्तरे यच्च सप्तर्षिभ्यश्च दक्षिणं ।
उत्तरः सवितुः पन्था देवयानस्तु स स्मृतः ॥ २१६ ॥
यत्र ते वासिनः सिद्धा विमला ब्रह्मचारिणः ।
सतन्ते जुगुप्सन्ते तस्मान्मृत्युर्जितस्तु तैः ॥ २१७ ॥
अष्टाशीतिसहस्राणि तेषामप्यूर्द्ध्वरेतसां ।
उदक्पन्थानमर्य्यम्नः श्रिता ह्याभूतसंप्लवात् ॥ २१८ ॥



इत्येतैः कारणैः शुद्धैस्तेऽमृतत्वं हि भेजिरे ।
आभूतसंप्लवस्थानाममृतत्वं विभाव्यते ॥ २१९ ॥
त्रैलोक्यस्थितिकालोऽयमपुनर्मार्गगामिनः ।
ब्रह्महत्याश्वमेधाभ्यां पुण्यपापकृतोऽपरः ।
आभूतसंप्लवान्ते तु क्षीयन्ते ह्यूर्द्ध्वरेतसः ॥ २२० ॥
ऊर्द्ध्वोत्तरमृषिभ्यस्तु ध्रुवो यत्रास्ति वै स्मृतः ।
एतद्विष्णुपदं दिव्यं त्रितोयं व्योम्नि भास्वरं ॥ २२१ ॥
तत्र गत्वा न शोचन्ति तद्विष्णोः परमं पदं ।
धर्म्मध्रुवाद्यास्तिष्ठन्ति यत्र ते लोकसाधकाः ॥ २२२ ॥

इति श्रीमहापुराणे वायुप्रोक्ते ज्योतिःप्रचारो
नाम पञ्चाशोऽध्यायः ।

# अथैकपञ्चाशोऽध्यायः।

———ooo@ooo———

## ज्योतिःप्रचारः।

सूत उवाच। स्वायम्भुवे निसर्गे तु व्याख्यातान्युत्तराणि तु।
भविष्याणि च सर्व्वाणि तेषां वक्ष्याम्यनुक्रमं॥ १॥
एतच्छ्रुत्वा तु मुनयः पप्रच्छुर्लोमहर्षणं।
सूर्य्याचन्द्रमसोश्चारं ग्रहाणाञ्चैव सर्व्वशः॥ २॥
ऋषय ऊचुः। भ्रमन्ते कथमेतानि ज्योतींषि दिवि मण्डलं।
तिर्य्यग्व्यूहेन सर्व्वाणि तथैवासङ्करेण च।
कश्च भ्रामयते तानि भ्रमन्ति यदि वा स्वयं॥ ३॥
एतद्वेदितुमिच्छामस्तन्नो निगद सत्तम।
भूतसम्मोहनञ्चैतच्छ्रोतुमिच्छा प्रवर्त्तते॥ ४॥
सूत उवाच। भूतसम्मोहनं ह्येतद्ब्रुवतो मे निबोधत।
प्रत्यक्षमपि दृश्यं यत्तत् संमोहयते प्रजाः॥ ५॥
योऽसौ चतुर्दिशं पुच्छे शिशुमारे व्यवस्थितः।
उत्तानपादपुत्रोऽसौ मेधीभूतो ध्रुवो दिवि॥ ६॥
स हि भ्रमन् भ्रामयते चन्द्रादित्यौ ग्रहैः सह।
भ्रमन्तमनुगच्छन्ति नक्षत्राणि च चक्रवत्॥ ७॥
ध्रुवस्य मनसा चासौ सर्पते भगणः स्वयं (१)।

१ ज्योतिषां गण इति घ०, ङ० च।



सूर्य्याचन्द्रमसौ तारा नक्षत्राणि ग्रहैः सह॥ ८॥
वातानीकमयैर्बन्धैर्ध्रुवे बद्धानि तानि वै।
तेषां योगस्य भेदाश्च कालचारस्तथैव च॥ ९॥
अस्तोदयौ तथोत्पाता अयने दक्षिणोत्तरे।
विषुवद्ग्रहवर्णाश्च ध्रुवात्सर्व्वं प्रवर्त्तते॥ १०॥
वर्षा घर्मो हिमं रात्रिः सन्ध्या चैव दिनं तथा।
शुभाशुभं प्रजानाञ्च ध्रुवात्सर्व्वं प्रवर्त्तते॥ ११॥
ध्रुवेणाधिष्ठितांश्चैव सूर्य्योऽपाहृत्य तिष्ठति।
तदेष दीप्तकिरणः स कालाग्निर्दिवाकरः॥ १२॥
परिवर्त्तक्रमादिप्रा भाभिरालोकयन् दिशः।
सूर्य्यः किरणजालेन वायुयुक्तेन सर्व्वशः।
जगतो जलमादत्ते कृत्स्नस्य द्विजसत्तमाः (१)॥ १३॥
आदित्यपीतं सूर्य्याग्नेः सोमं संक्रमते जलं।
नाड़ीभिर्वायुयुक्ताभिर्लोकाधानं प्रवर्त्तते॥ १४॥
यत् सोमात् स्रवते सूर्य्यस्तदग्नेष्ववतिष्ठते।
मेघा वायुनिघातेन विसृजन्ति जलम्भुवि॥ १५॥
एवमुत्क्षिप्यते चैव पतते च पुनर्ज्जलं (२)।
नानाप्रकारमुदकन्तदेव परिवर्त्तते॥ १६॥
सम्भारणार्थं भूतानां मायैषा विश्वनिर्म्मिता।
अनया मायया व्याप्तं त्रैलोक्यं सचराचरं॥ १७॥
विश्वेशो लोककृद्देवः सहस्रांशुः प्रजापतिः।
धाता कृत्स्नस्य लोकस्य प्रभुर्विष्णुर्दिवाकरः॥ १८॥

१ कृत्स्नस्यास्य द्विजोत्तमा इति ग०। २ पतते चामृतञ्जलं इति ट०।

सर्व्वलौकिकमम्भो वै यत्सोमान्नभसः च्युतं (१)।
सोमाधारं (२) जगत्सर्व्वमेतत्तथ्यं प्रकीर्त्तितं॥ १९॥
सूर्य्यादुष्णं निस्रवते सोमाच्छीतं प्रवर्त्तते।
शीतोष्णवीर्य्यौ द्वावेतौ युक्तौ धारयतो जगत्॥ २०॥
सोमाधारा नदी गङ्गा पवित्रा विमलोदका।
सोमपुत्रपुरोगाश्च महानद्यो द्विजोत्तमाः॥ २१॥
सर्व्वभूतशरीरेषु आपो ह्यनुगताश्च याः।
तेषु सन्दह्यमानेषु जङ्गमस्थावरेषु च।
धूमभूतास्तु ता आपो निष्क्रामन्तीह सर्व्वशः॥ २२॥
तेन चाभ्राणि जायन्ते स्थानमत्राभ्रसां स्मृतं।
आर्कस्तेजो हि भूतेभ्यो ह्यादत्ते रश्मिभिर्जलं॥ २३॥
समुद्राद्वायुसंयोगाद्वहन्त्यापो गभस्तयः।
यतस्त्वृतुवशात् काले परिवर्त्तौ दिवाकरः।
यच्छत्यपो हि मेघेभ्यः शुक्लाः शुक्लगभस्तिभिः॥ २४॥
अभ्रस्थाः प्रपतन्त्यापो वायुना समुदीरिताः।
सर्व्वभूतहितार्थाय वायुभिश्च समन्ततः॥ २५॥
ततो वर्षति षण्मासान् सर्व्वभूतविवृद्धये।
वायव्यं स्तनितञ्चैव वैद्युतञ्चाग्निसम्भवं॥ २६॥
मेहनाच्च मिहेर्द्धातोर्मेघत्वं व्यञ्जयन्ति च।
न भ्रश्यन्ति यतस्त्वापस्तदभ्रं कवयो विदुः॥ २७॥
मेघानां पुनरुत्पत्तिस्त्रिविधा योनिरुच्यते।
आग्नेया ब्रह्मजाश्चैव पार्थिवाश्च पृथग्विधाः।

१ च्युतं इति ङ०। २ साधारणमिति ख०।



त्रिधा घनाः समाख्यातास्तेषां वक्ष्यामि सम्भवं॥ २८॥
आग्नेयास्त्वर्णजाः प्रोक्तास्तेषां तस्मात् प्रवर्त्तनं।
शीतदुर्दिनवाता ये स्वगुणास्ते व्यवस्थिताः॥ २९॥
महिषाश्च वराहाश्च मत्तमातङ्गगामिनः।
भूत्वा धरणिमभ्येत्य विचरन्ति रमन्ति च॥ ३०॥
जीमूता नाम ते मेघा एतेभ्यो जीवसम्भवाः।
विद्युद्गुणविहीनाश्च जलधाराविलम्बिनः॥ ३१॥
मूका घना महाकाया प्रवाहस्य वशानुगाः।
क्रोशमात्राच्च वर्षन्ति क्रोशार्द्धादपि वा पुनः॥ ३२॥
पर्व्वतायतनित्येषु वर्षन्ति च रमन्ति च।
बलाकागर्भदाश्चैव बलाकागर्भधारिणः॥ ३३॥
ब्रह्मजा नाम ते मेघा ब्रह्मनिश्वाससम्भवाः।
ते हि विद्युद्गुणोपेताः स्तनयन्ति स्वनप्रियाः॥ ३४॥
तेषां शब्दप्रणादेन भूमिः स्वाङ्गरुहोद्गमा।
राज्ञो राज्ञाभिषिक्तेव पुनर्यौवनमश्नुते।
तेष्वियं प्रीतिमासक्ता भूतानां जीवितोद्भवा॥ ३५॥
जीमूता नाम ते मेघा तेभ्यो जीवस्य सम्भवाः।
द्वितीयं प्रवहं वायुं मेघास्ते तु समाश्रिताः॥ ३६॥
एते योजनमात्राच्च सार्द्धार्द्धान्निष्कृतादपि।
वृष्टिसर्गस्तथा तेषां धारासाराः प्रकीर्त्तिताः।
पुष्करावर्त्तका नाम ये मेघाः पद्मसम्भवाः॥ ३७॥
शक्रेण पद्माश्छिन्ना ये पर्व्वतानां महौजसां।
कामगानां प्रवृद्धानां भूतानां शिवमिच्छतां॥ ३८॥

पुष्करा नाम ते मेघा बृहल्लस्तोयमत्सराः।
पुष्करावर्त्तकास्तेन कारणेनेह शब्दिताः॥ ३९॥
नानारूपधराश्चैव महाघोरतराश्च ते।
कल्पान्तवृष्टेः स्रष्टारः सम्वर्त्ताग्नेर्नियामकाः॥ ४०॥
वर्षन्त्येते युगान्तेषु तृतीयास्ते प्रकीर्त्तिताः।
अनेकरूपसंस्थानाः पूरयन्तो महीतलं।
वायुं परं वहन्तः स्युराश्रिताः कल्पसाधकाः॥ ४१॥
यान्यस्याण्डकपालस्य प्राक्तनस्याभवंस्तदा।
तस्माद्ब्रह्मा समुत्पन्नश्चतुर्व्वक्त्रः स्वयम्भुवः।
तान्येवाण्डकपालस्य सर्व्वे मेघाः प्रकीर्त्तिताः॥ ४२॥
तेषामाप्यायनं धूमः सर्व्वेषामविशेषतः।
तेषां श्रेष्ठस्तु पर्जन्यश्चत्वारश्चैव दिग्गजाः॥ ४३॥
गजानां पर्व्वतानाञ्च मेघानां भोगिभिः सह।
कुलमेकं पृथग्भूतं योनिरेका जलं स्मृतं॥ ४४॥
पर्जन्यो दिग्गजाश्चैव हेमन्ते शीतसम्भवाः।
तुषारवृष्टिं वर्षन्ति सर्व्वसस्यविवृद्धये॥ ४५॥
श्रेष्ठः परिवहो नाम तेषां वायुरपाश्रयः।
येऽसौ विभर्त्ति भगवान् गङ्गामाकाशगोचरां।
दिव्यामतिजलां पुण्यां विद्यां स्वर्गपथि स्थितां॥ ४६॥
तस्याविष्यन्दजन्तोयं दिग्गजाः पृथुभिः करैः।
शीकरं संप्रमुञ्चन्ति नीहार इति स स्मृतः॥ ४७॥
दक्षिणेन गिरिर्योऽसौ हेमकूट इति स्मृतः।
उदग्हिमवतः शैलादुत्तरस्य च दक्षिणे।



पुण्ड्रं नाम समाख्यातं नगरं तत्र वै स्मृतं॥ ४८॥
तस्मिन्निपतितं वर्षं यत्तुषारसमुद्भवं।
ततस्तदावहो वायुर्हिमशैलात् समुद्वहन्।
आनयत्यात्मयोगेन सिच्यमानो महागिरिं॥ ४९॥
हिमवन्तमतिक्रम्य वृष्टिशेषं ततः परं।
बृहाभ्येति ततः पश्चादपरान्तविवृद्धये॥ ५०॥
मेघावाप्यायनञ्चैव सर्व्वमेतत् प्रकीर्त्तितं।
सूर्य्य एव तु वृष्टीनां स्रष्टा समुपदिश्यते॥ ५१॥
ध्रुवेणावेष्टितः सूर्य्यस्ताभ्यां वृष्टिः प्रवर्त्तते।
ध्रुवेणावेष्टितो वायुर्वृष्टिं संहरते पुनः॥ ५२॥
यद्दक्षिणस्थः सूर्य्यात्तु कृत्स्नं नक्षत्रमण्डलं।
द्वारस्यान्ते विशत्यर्कं ध्रुवेण परिवेष्टितं॥ ५३॥
अतः सूर्य्यरथस्याथ सन्निवेशं निबोधत।
संस्थितेनैकचक्रेण पञ्चारेण त्रिनाभिना॥ ५४॥
हिरण्मयेन भगवान् पर्वणा तु महौजसा।
नष्टवर्त्मान्धकारेण षट्प्रकारैकनेमिना।
चक्रेण भास्वता सूर्य्यः स्यन्दनेन प्रसर्पति॥ ५५॥
दशयोजनसाहस्रो विस्तारायामतः स्मृतः।
द्विगुणोऽस्य रथोपस्थादीषादण्डप्रमाणतः॥ ५६॥
स तस्य ब्रह्मणा सृष्टो रथो ह्यर्थवशेन तु।
असङ्गः काञ्चनो दिव्यो युक्तः परमवैहयैः॥ ५७॥
छन्दोभिर्वाजिरूपैस्तु यतः शुक्रस्ततः स्थितः।
वरुणस्यन्दनस्येह लक्षणैः सदृशस्तु सः।

तेनाऽसौ सर्पति व्योम्नि भास्वता तु दिवाकरः ॥ ५८ ॥
अथेमानि तु सूर्यस्य प्रत्यङ्गानि रथस्य तु ।
संवत्सरस्यावयवैः कल्पितानि यथाक्रमं ॥ ५९ ॥
अहस्तु नाभिः सूर्यस्य एकचक्रः स वै स्मृतः ।
आराः पञ्चदशैवास्य नेमिः षड्ऋतवः स्मृताः ॥ ६० ॥
रथनीडः स्मृतो ह्यब्दस्त्वयने कूबराबुभौ ।
मुहूर्ता बन्धुरास्तस्य गम्या तस्य कलाः स्मृता ॥ ६१ ॥
तस्य काष्ठाः स्मृता घोणा ईषादण्डः क्षणास्तु वै ।
निमेषाश्चानुकर्षोऽस्य ईषा चास्य लवाः स्मृताः ॥ ६२ ॥
रात्रिर्वरूथो धर्मोऽस्य ध्वज ऊर्ध्वसमुच्छ्रितः ।
युगाक्षकोटी ते तस्य अर्थकामावुभौ स्मृतौ ॥ ६३ ॥
सप्ताश्वरूपाच्छन्दांसि वहन्ते वामतो धुरां ।
गायत्री चैव त्रिष्टुप्च अनुष्टुप्जगती तथा ॥ ६४ ॥
पङ्क्तिश्च बृहती चैव उष्णिक्चैव तु सप्तमं ।
अक्षे चक्रं निबद्धन्तु ध्रुवे त्वक्षः समर्पितः ॥ ६५ ॥
सहचक्रो भ्रमत्यक्षः सहाक्षो भ्रमति ध्रुवः ।
अक्षः सहैव चक्रेण भ्रमतेऽसौ ध्रुवेरितः ॥ ६६ ॥
एवमर्थवशात्तस्य सन्निवेशो रथस्य तु ।
तथा संयोगभागेन संसिद्धो भास्करो रथः ॥ ६७ ॥
तेनाऽसौ तरणिर्दैवस्तरसा सर्पते दिवि ।
युगाक्षकोटिसम्बद्धौ रश्मी द्वौ स्यन्दनस्य हि ॥ ६८ ॥
ध्रुवेण भ्रमतो रश्मी विचक्रयुगयोस्तु वै ।
भ्रमतो मण्डलानि स्युः खेचरस्य रथस्य तु ॥ ६९ ॥



युगाक्षकोटी ते तस्य दक्षिणे स्यन्दनस्य तु ।
ध्रुवेण संगृहीते वै द्विचक्रक्षेतरज्जुवत् ॥ ७० ॥
भ्रमन्तमनुगच्छेतां ध्रुवं रश्मी तु तावुभौ ।
युगाक्षकोटी ते तस्य वातोर्मी स्यन्दनस्य तु ॥ ७१ ॥
कीलासक्तो यथा रज्जुर्भ्रमते सर्वतो दिशं ।
क्रमतस्तस्य रश्मी तौ मण्डलेषूत्तरायणे ॥ ७२ ॥
वर्धेते दक्षिणे चैव भ्रमतो मण्डलानि तु ।
ध्रुवेण संगृहीतौ तु रश्मी वै नयतो रविं ॥ ७३ ॥
आकृष्येते यदा तौ वै ध्रुवेण समधिष्ठितौ ।
तदा सोऽभ्यन्तरं सूर्यो भ्रमते मण्डलानि तु ॥ ७४ ॥
अशीतिमण्डलशतं काष्ठयोरुभयोश्चरन् ।
ध्रुवेण सृज्यमानाभ्यां रश्मिभ्यां पुनरेव तु ॥ ७५ ॥
तथैव वाह्यतः सूर्यो भ्रमते मण्डलानि तु ।
उद्वेष्टयन् स वेगेन मण्डलानि तु गच्छति ॥ ७६ ॥

इति श्रीमहापुराणे वायुप्रोक्ते ज्योतिःप्रचारो नामैकपञ्चाशोऽध्यायः ।

# अथ द्विपञ्चाशोऽध्यायः ।

———000———

## ज्योतिःप्रचारः ।

सूत उवाच । स रथोऽधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा ।
गन्धर्व्वैरप्सरोभिश्च ग्रामणीसर्परात्तसैः ॥ १ ॥
एते वसन्ति वै सूर्य्ये द्वौ द्वौ मासौ क्रमेण तु ।
धातार्य्यमा पुलस्त्यश्च पुलहश्च प्रजापतिः ॥ २ ॥
उरगो वासुकिश्चैव सङ्कीर्णारश्च तावुभौ ।
तुम्बुरुर्नारदश्चैव गन्धर्व्वौ गायतां वरौ ॥ ३ ॥
क्रतुस्थल्यप्सराश्चैव तथा वै पुञ्जिकस्थली ।
ग्रामणी रथकृच्छ्रश्च तपोर्य्यश्चैव तावुभौ ॥ ४ ॥
रक्षो हेतिः प्रहेतिश्च यातुधानावुदाहृतौ ।
मधुमाधवयोरेष गणो वसति भास्करे ॥ ५ ॥
वासन्तौ ग्रैष्मिकौ मासौ मित्रश्च वरुणश्च ह ।
ऋषिरत्रिर्वशिष्ठश्च तक्षको रम्भ एव च ॥ ६ ॥
मेनका सहजन्या च गन्धर्व्वौ च हहा हुहूः ।
रथस्वनश्च ग्रामण्यो रथचित्रश्च तावुभौ ॥ ७ ॥
पौरुषेयो धवश्चैव यातुधानावुदाहृतौ ।
एते वसन्ति वै सूर्य्य मासयोः शुचिशुक्रयोः ॥ ८ ॥
ततः सूर्य्ये पुनस्त्वन्या निवसन्तीह देवताः ।



इन्द्रश्चैव विश्वसांश्च अङ्गिरा भृगुरेव च ॥ ९ ॥
एलापर्णस्तथा सर्पः शङ्खपालश्च तावुभौ ।
विश्वावसूग्रसेनौ च प्रातश्चैवारुणश्च ह ॥ १० ॥
प्रम्लोचेति च विख्याता निम्लोचेति च ते उभे ।
यातुधानस्तथा सर्पौ व्याघ्रः श्वेतश्च तावुभौ ।
नभोनभस्ययोरेष गणो वसति भास्करे ॥ ११ ॥
शरद्धृतौ पुनः शुभ्रा वसन्ति मुनिदेवताः ।
पर्य्यन्यश्चाथ पूषा च भरद्वाजः सगोतमः ॥ १२ ॥
विश्वावसुश्च गन्धर्व्वस्तथैव सुरभिश्च यः ।
विश्वाची च घृताची च उभे ते शुभलक्षणे ॥ १३ ॥
नाग ऐरावतश्चैव विद्युतश्च धनञ्जयः ।
सेनजिच्च सुषेणश्च सेनानीर्ग्रामणीश्च तौ ॥ १४ ॥
आपो वातश्च तावेतौ यातुधानावुभौ स्मृतौ ।
वसन्त्येते तु वै सूर्य्ये मासयोश्च इषोर्जयोः ॥ १५ ॥
हैमन्तिकौ तु द्वौ मासौ वसन्ति तु दिवाकरे ।
अंशो भगश्च द्वावेतौ कश्यपश्च ऋतुश्च ह ॥ १६ ॥
भुजङ्गश्च महापद्मः सर्पः कर्कोटकस्तथा ।
चित्रसेनश्च गन्धर्व ऊर्णायुश्चैव तावुभौ ॥ १७ ॥
उर्व्वशी विप्रचित्तिश्च तथैवाप्सरसौ शुभे ।
तार्क्ष्यश्चारिष्टनेमिश्च सेनानीर्ग्रामणीश्च तौ ॥ १८ ॥
विद्युत्स्फुर्ज्जश्च तावुग्रौ यातुधानावुदाहृतौ ।
सहे चैव सहस्ये च वसन्त्येते दिवाकरे ॥ १९ ॥
ततः शैशिरयोश्चापि मासयोर्निवसन्ति वै ।

त्वष्टा विष्णुर्जमदग्निर्विश्वामित्रस्तथैव च ॥ २० ॥
कादृवेयौ तथा नागौ कम्बलाश्वतरावुभौ ।
गन्धर्वौ धृतराष्ट्रश्च सूर्यवर्चास्तथैव च ॥ २१ ॥
तिलोत्तमाप्सराश्चैव देवी रम्भा मनोरमा ।
ऋतजिच्च सत्यजिच्चैव ग्रामण्यौ लोकविश्रुतौ ॥ २२ ॥
ब्रह्मोपेतस्तथा दक्षो यज्ञोपेतश्च स स्मृतः ।
एते देवा वसन्त्यर्कं द्वौ मासौ तु क्रमेण तु ॥ २३ ॥
स्थानाभिमानिनो ह्येते गणा द्वादश सप्तकाः ।
सूर्यमाप्याययन्त्येते तेजसा तेज उत्तमं ॥ २४ ॥
ग्रथितैस्तैर्वचोभिस्तु स्तुवन्ति मुनयो रविं ।
गन्धर्वाप्सरसश्चैव गीतनृत्यैरुपासते ॥ २५ ॥
ग्रामणीयज्ञभूतास्तु कुर्वन्ते भीमसंग्रहं (१) ।
सर्पा वहन्ति सूर्यास्य यातुधानानुयान्ति च (२) ।
बालखिल्या नयन्त्यस्तं परिचार्योदयाद्रविं ॥ २६ ॥
एतेषामेव देवानां यथावीर्यं यथातपः ।
यथायोगं यथासत्यं यथाधर्म्मं यथाबलं ॥ २७ ॥
यथा तपत्यसौ सूर्यस्तेषां सिद्धस्तु तेजसा ।
इत्येते वै वसन्त्योह द्वौ द्वौ मासौ दिवाकरे ॥ २८ ॥
ऋषयो देवगन्धर्वाः पन्नगाप्सरसाङ्गणाः ।
ग्रामण्यश्च तथा यज्ञा यातुधानाश्च भूयशः ॥ २९ ॥
एते तपन्ति वर्षन्ति भान्ति वान्ति सृजन्ति च ।
भूतानामशुभङ्कर्म्म व्यपोहन्तीह कीर्तिताः ॥ ३० ॥

१ भीमसंग्रहमिति ख० । २ यातुधानास्तुवन्ति चेति ख० ।



मानवानां शुभं ह्येते हरन्ति दुरितात्मनां ।
दुरितं हि प्रचाराणां व्यपोहन्ति क्वचित् क्वचित् ॥ ३१ ॥
विमानेऽवस्थिता दिव्ये कामगा वातरंहसः ।
एते सहैव सूर्येण भ्रमन्ति दिवसानुगाः ॥ ३२ ॥
वर्षन्तश्च तपन्तश्च ह्लादयन्तश्च वै प्रजाः ।
गोपायन्ति तु भूतानि सर्व्वानीहामनुव्रयात् ॥ ३३ ॥
स्थानाभिमानिनामेतत् स्थानं मन्वन्तरेषु वै ।
अतीतानागतानां वै वर्त्तन्ते साम्प्रतन्तु ये ॥ ३४ ॥
एवं वसन्ति वै सूर्य्यं सप्तकास्ते चतुर्दिशं ।
चतुर्दशसु सर्गेषु गणा मन्वन्तरेषु च ॥ ३५ ॥
ग्रीष्मे हिमे च वर्षासु सुव्रमानो
घर्मं हिमञ्च वर्षञ्च दिनं निशाञ्च ।
कालेन गच्छत्यृतुवशात् परिवृत्तरश्मि-
र्देवान् पितॄंश्च मनुजांश्च तर्पयन् वै ॥ ३६ ॥
प्रीणाति देवानमृतेन सूर्य्यः
सोमं सुषुम्नेन विवर्द्धयित्वा ।
शुक्ले तु पूर्णं दिवसक्रमेण
तं कृष्णपक्षे विबुधाः पिबन्ति ॥ ३७ ॥
पीतन्तु सोमं हिकलावशिष्टं
कृष्णक्षये रश्मिभिस्तं चरन्तं ।
सुधामृतं तत्पितरः पिबन्ति
देवाश्च सौम्याश्च तथैव कव्यं ॥ ३८ ॥
सूर्येण गोभिस्तु समुद्धृताभि-

रश्मिः पुनश्चैव समुद्गताभिः ।
हृष्टातिहृद्याभिरथौषधीभि-
र्मर्त्याः क्षुधन्नन्नपानैर्जयन्ति ॥ ३९ ॥
अमृतेन तृप्तिस्त्वहमासं सुराणां (१)
मासार्धतृप्तिः स्वधया पितॄणां ।
अन्नेन शश्वत्तु दधाति मर्त्यान्
सूर्यः स्वयं तच्च बिभर्ति गोभिः ॥ ४० ॥
अयं हरिस्तैर्हरिभिस्तुरङ्गमै-
रयन् हि चापो हरतीति रश्मिभिः ।
विसर्गकाले विसृजंश्च ताः पुनः
बिभर्ति शश्वत् सविता चराचरं ॥ ४१ ॥
हरिर्हरिद्भिर्ह्रियते तुरङ्गमैः
पिबत्यथापो हरिभिः सहस्रधा ।
ता[1]ः प्रमुञ्चत्यपि तास्त्वसौ हरिः
स मुच्यमानो हरिभिस्तुरङ्गमैः ॥ ४२ ॥
इत्येष एकचक्रेण सूर्यस्तूर्णं रथेन तु ।
भद्रैस्तैरच्यतैरश्वैः सर्पतेऽसौ दिवि त्रये ॥ ४३ ॥
अहोरात्राद्रथेनाऽसौ एकचक्रेण तु भ्रमन् ।
सप्तद्वीपसमुद्रान्तं सप्तभिः सप्तभिर्हयैः ॥ ४४ ॥
छन्दोभिरश्वरूपैस्तैर्यतश्चक्रान्ततः स्थितैः ।
कामरूपैः सक्तयुतैरमितैस्तैर्मनोजवैः ॥ ४५ ॥
हरितैरव्ययैः पिङ्गैरीश्वरैर्ब्रह्मवादिभिः ।

१ एतत्पाद्यादर्शानुमतो मुद्रितः पाठस्तु न समीचीनः ।



अशीतिमण्डलशतं भ्रमत्यब्देन ते हयाः ॥ ४६ ॥
बाह्यमभ्यन्तरश्चैव मण्डलं दिवसक्रमात् ।
कृत्वादौ सप्तयुक्ताश्ते वहन्तोऽभूतसंक्षयात् ।
आवृता मासभिन्नैस्ते भ्रमन्ते राशयोऽपि तु ॥ ४७ ॥
ग्रथितैर्वचोभिरग्र्यैः स्तूयमानो महर्षिभिः ।
सेव्यते गीतनृत्यैश्च गन्धर्वैरप्सरोगणैः ।
पतङ्गः पतगैरश्वैर्भ्रममाणो दिवस्पतिः ॥ ४८ ॥
वीथ्याश्रयाणि चरति नक्षत्राणि तथा ग्रहाः ।
क्रमशश्चो तथैवास्य रश्मीनां सूर्यवत् स्मृते ॥ ४९ ॥
त्रिचक्रोभयपार्श्वस्थो विज्ञेयः शशिनो रथः ।
अपाङ्क्तभंसमुत्पन्नो रथः साश्वः ससारथिः ।
शतारैश्च त्रिभिश्चक्रैर्युक्तः शुक्लैर्हयोत्तमैः ॥ ५० ॥
दशभिस्तु शतैर्दिव्यैरसङ्गैस्तैर्मनोजवैः ।
सक्तयुतो रथे तस्मिन् वहन्ते चायुगक्षयात् ॥ ५१ ॥
संग्रहीते रथे तस्मिन् श्वेतश्चक्षुःश्रवास्तु वै ।
अश्वास्तमेकवर्णास्ते वहन्ते शुक्लवर्चसं ॥ ५२ ॥
ययुश्च त्रिमनाश्चैव हंसो व्योमो मृगस्तथा ॥ ५३ ॥
अश्वो यामस्तुरण्यश्च हंसो व्योमो मृगस्तथा ॥ ५३ ॥
इत्येते नामभिः सर्वे दश चन्द्रमसो हयाः ।
एते चन्द्रमसश्चैवं वहन्ति दिवसक्षयात् ॥ ५४ ॥
देवैः परिवृतः सोमः पितृभिश्चैव गच्छति ।
सोमस्य शुक्लपक्षादौ भास्करे पुरतः स्थिते ।
आपूर्यते पुरस्यान्तः सततं दिवसक्रमात् ॥ ५५ ॥

देवैः पीतं क्षये सोममाप्याययति नित्यदा।
पीतं पञ्चदशाहन्तु रश्मिनैकेन भास्करः॥ ५६॥
आपूरयन् सुषुम्नेन भागं भागमहःक्रमात्।
सुषुम्नाप्यायमानस्य शुक्ला वर्द्धन्ति वै कलाः॥ ५७॥
तस्माद्वसन्ति वै कृष्णे शुक्ल आप्याययन्ति च।
इत्येवं सूर्य्यवीर्येण चन्द्रस्याप्यायिता तनुः॥ ५८॥
पौर्णमास्यां स दृश्येत शुक्लः सम्पूर्णमण्डलः।
एवमाप्यायितः सोमः शुक्लपक्षे दिनक्रमात्॥ ५९॥
ततो द्वितीयाप्रभृति बहुलस्य चतुर्दशी।
अपां सारमयस्येन्दोरसमाचात्मकस्य च।
पिबन्त्यब्बुमयं देवा मधु सोम्यं सुधामयं॥ ६०॥
सम्भृतञ्चार्द्धमासेन अमृतं सूर्य्यतेजसा।
भक्षार्थममृतं सोम्यं पौर्णमास्यामुपासते॥ ६१॥
एकरात्रं सुरैः सर्व्वैः पितृभिश्च महर्षिभिः।
सोमस्य कृष्णपक्षादौ भास्कराभिमुखस्य च॥ ६२॥
प्रक्षीयते पुरस्यान्तः पीयमानाः कलाः क्रमात्।
क्षीयन्ते तस्मात् कृष्णे याः शुक्ले ह्याप्याययन्ति ताः॥ ६३॥
एवं दिनक्रमातीते विबुधास्तु निशाकरं।
पीत्वार्द्धमासङ्गच्छन्ति अमावास्यां सुरोत्तमाः।
पितरश्चोपतिष्ठन्ति अमावास्यां निशाकरं॥ ६४॥
ततः पञ्चदशे भागे किञ्चिच्छिष्टे कलात्मके।
अपराह्णे पितृगणैर्जघन्यः पर्य्युपास्यते॥ ६५॥
पिबन्ति दिकलाकालं शिष्टा तस्य तु या कला



निःसृतं तदमावास्याङ्गभस्तिभ्यः स्वधामृतं।
तां स्वधां मासतस्ते तु पीत्वा गच्छन्ति तेऽमृतं॥ ६६॥
सोम्या वर्हिषदश्चैव अग्निष्वात्तास्तथैव च।
काव्याश्चैव (१) तु ये प्रोक्ताः पितरः सर्व्व एव ते॥ ६७॥
संवत्सरास्तु वै काव्याः (२) पञ्चाब्दा ये द्विजैः स्मृताः।
सोम्यास्तु ऋतवो ज्ञेया मासा वर्हिषदः स्मृताः।
अग्निष्वात्तार्त्तवश्चैव पितृसर्गा हि वै द्विजाः॥ ६८॥
पितृभिः पीयमानस्य पञ्चदश्यां कला तु वै।
यावन्न क्षीयते तस्य भागः पञ्चदशस्तु सः॥ ६९॥
अमावास्यान्तदा तस्य अन्तमापूर्य्यते परं।
द्वावृक्षयौ वै पक्षादौ षोडश्यां शशिनः स्मृतौ॥ ७०॥
एवं सूर्य्यनिमित्तैषा क्षयवृद्धिर्निशाकरे।
ताराग्रहाणां वक्ष्यामि स्वर्भानोश्च रथं पुनः॥ ७१॥
तोयतेजोमयः शुभ्रः सोमपुत्रस्य वै रथः।
युक्तो हयैः पिशङ्गैस्तु अष्टाभिर्वातरंहसैः (३)॥ ७२॥
सवरूथः सानुकर्षः सूतो दिव्यो रथे महान्।
सोपासङ्गपताकस्तु मध्वजो मेघसन्निभः (४)॥ ७३॥
भार्गवस्य रथः श्रीमान् तेजसा सूर्य्यसन्निभः।
पृथिवीसम्भवैर्युक्तो नानावर्णैर्हयोत्तमैः॥ ७४॥
श्वेतः पिशङ्गः सारङ्गो नीलः पीतो विलोहितः।
कृष्णश्च हरितश्चैव पृषतः पृथिरेव च।

१ काव्याश्चैवेति घ०। २ काव्या इति घ०।
३ अष्टाभिरतिरंहसैरिति ट०। ४ हेमसन्निभ इति ख०।

दशभिस्तैर्महाभागैरक्तग्रैर्वातवेगितैः ॥ ७५ ॥
अष्टाश्वः काञ्चनः श्रीमान् सोमस्यापि रथोऽभवत् ।
असङ्ख्यैर्लोहितैरश्वैः सर्व्वगैरग्निसम्भवैः ।
सर्पतेऽसौ कुमारो वै ऋजुवक्रानुवक्रगः ॥ ७६ ॥
तत्रस्थाङ्गिरसो विद्वान् देवाचार्य्यो बृहस्पतिः ।
शोणैरश्वैः काञ्चनेन स्यन्दनेन प्रसर्पति ॥ ७७ ॥
युक्तस्तु वाजिभिर्दिव्यैरष्टाभिर्वातरंहसैः ।
मघत्रेऽब्दनिवसति सर्वगस्तेन गच्छति ॥ ७८ ॥
ततः शनैश्चरोऽप्यश्वैः शबलैर्व्योमसम्भवैः ।
कार्ष्णायसं समारुह्य स्यन्दनं याति वै शनैः ॥ ७९ ॥
सुभीनोस्तु तथैवाश्वाः कृष्णा ह्यष्टौ मनोजवाः ।
रथन्तमोमयन्तस्य सङ्क्रमुक्ता वहन्त्युत ॥ ८० ॥
आदित्यात्रिःसुतो राहुः सोमं गच्छति पर्व्वसु ।
आदित्यमेति सोमाच्च पुनः सौरेषु पर्वसु ॥ ८१ ॥
अथ केतुरथस्याश्वा अष्टाष्टौ वातरंहसः ।
पलालधूमसङ्काशाः शबला रासभारुणाः ॥ ८२ ॥
एते वाहा ग्रहाणां वै मया प्रोक्ताः (१) रथैः सह ।
सर्व्वे ध्रुवनिबद्धास्ते प्रबद्धा वातरश्मिभिः ॥ ८३ ॥
एते वै भ्राम्यमाणास्तु यथायोगं भ्रमन्ति वै ।
वायव्याभिरदृश्याभिः प्रबद्धा वातरश्मिभिः ॥ ८४ ॥
परिभ्रमन्ति तद्बद्धाश्चन्द्रसूर्य्यग्रहा दिवि ।
भ्रमन्तमनुगच्छन्ति ध्रुवन्ते ज्योतिषां गणाः ॥ ८५ ॥

१ क्रान्ता इति घ०।



यथा नद्युदके नौस्तु सलिलेन महोह्यते ।
तथा देवालया ह्येते उह्यन्ते वातरश्मिभिः।
तस्मात्सर्व्वेण दृश्यन्ते व्योम्नि देवगणास्तु ते ॥ ८६ ॥
यावत्यश्चैव तारास्तु तावन्तो वातरश्मयः ।
सर्व्वा ध्रुवनिबद्धास्ता भ्रमन्त्यो भ्रामयन्ति तं ॥ ८७ ॥
तैलपीड़ाकरं चक्रं भ्रमद्भ्रामयते यथा ।
तथा भ्रमन्ति ज्योतींषि वातबद्धानि सर्व्वशः ॥ ८८ ॥
अलातचक्रवद्यान्ति वातचक्रेरितानि तु ।
यस्माज्ज्योतींषि वहते प्रवहस्तेन स स्मृतः ॥ ८९ ॥
एवं ध्रुवनिबद्धोऽसौ सर्पते ज्योतिषां गणः ।
सैष तारामयो ज्ञेयः शिशुमारो ध्रुवो दिवि ।
यदङ्गा कुरुते पापं दृष्ट्वा तं निधिं मुच्यते ॥ ९० ॥
यावत्यश्चैव तारास्ताः शिशुमाराश्रिता दिवि ।
तावन्त्येव तु वर्षाणि जीवन्त्यभ्यधिकानि(१)तु ॥ ९१ ॥
शाश्वतः शिशुमारोऽसौ विज्ञेयः प्रविभागशः ।
उत्तानपादस्तस्याथ विज्ञेयो ह्युत्तरो हनुः ॥ ९२ ॥
यज्ञोऽधरस्तु विज्ञेयो धर्म्मो मूर्द्धानमाश्रितः ।
हृदि नारायणः साध्यः अश्विनौ पूर्व्वपादयोः ॥ ९३ ॥
वरुणश्चार्य्यमा चैव पश्चिमे तस्य शक्थिनि ।
शिश्नः संवत्सरस्तस्य मित्रोऽपाने समाश्रितः ॥ ९४ ॥
पुच्छेऽग्निश्च महेन्द्रश्च मरीचिः कश्यपो ध्रुवः ।
तारकाः शिशुमारस्य नाम्नामेति चतुष्टयं ॥ ९५ ॥

१ ते जीवन्त्यधिकानीति ङ०। जीवन्त्येव तु सर्व्वदेति ख०।

नक्षत्रचन्द्रसूर्याश्च ग्रहास्तारागणैः सह:।
उन्मुखाभिमुखाः सर्वे चक्रीभूताश्रिता दिवि ॥ ९६ ॥
ध्रुवेणाधिष्ठिताः सर्वे ध्रुवमेव प्रदक्षिणं।
प्रयान्तीह वरं श्रेष्ठमेधीभूतं ध्रुवन्दिवि ॥ ९७ ॥
ध्रुवाग्निकश्यपानान्तु वरश्चासौ ध्रुवः स्मृतः।
एक एव भ्रमत्येष मेरुपर्वतमूर्द्धनि ॥ ९८ ॥
ज्योतिषाञ्चक्रमेतद्धि सदा कर्षत्यवाङ्मुखः।
मेरुमालोकयत्येष प्रयातीह प्रदक्षिणं ॥ ९९ ॥

इति श्रीमहापुराणे वायुप्रोक्ते ध्रुवचर्या नाम
द्विपञ्चाशोऽध्यायः।

---

# अथ त्रिपञ्चाशोऽध्यायः।

———ooo———

## ज्योतिःसन्निवेशः।

शांशपायन उवाच। एतत् श्रुत्वा तु मुनयः पुनस्ते संशयान्विताः।
पप्रच्छुरुत्तरं भूयस्तदा ते लोमहर्षणं ॥ १ ॥
ऋषयऊचुः। यदेतदुक्तभवता ग्रहाणेतानि विश्रुतं।
कथं देवग्रहाणि स्युः कथं ज्योतींषि वर्णय ॥ २ ॥
एतत्सर्वं समाचक्ष्व ज्योतिषाञ्चैव निश्चयं।
श्रुत्वा तु वचनं तेषां तदा सूतः समाहितः ॥ ३ ॥
अस्मिन्नर्थे महाप्राज्ञैर्यदुक्तं ज्ञानबुद्धिभिः।
तद्दोऽहं सम्प्रवक्ष्यामि सूर्याचन्द्रमसोर्भवं।
यथा देवग्रहाणीह सूर्याचन्द्रमसोर्ग्रहं ॥ ४ ॥
अतःपरं त्रिविधाग्नेर्वक्ष्येहन्तु समुद्भवं।
दिव्यस्य भौतिकस्याग्नेरथाग्नेः पार्थिवस्य च ॥ ५ ॥
व्युष्टायान्तु रजन्यां वै ब्रह्मणोऽव्यक्तजन्मनः।
अव्याकृतमिदन्त्वासीन्नैशेन तमसावृतं ॥ ६ ॥
चतुर्भूतावशिष्टेऽस्मिन् पार्थिवः सोऽग्निरुच्यते।
यस्मादौ तपते सूर्यो शुचिरग्निस्तु स स्मृतः ॥ ७ ॥
वैद्युताख्यस्तु विज्ञेयस्तेषां वक्ष्येऽथ लक्षणं।

वैद्युतो जाठरः सौरो ह्यपाङ्गर्भास्त्रयोऽग्नयः।
तस्मादपः पिबन्सूर्य्यो गोभिर्दीप्यत्यसौ दिवि ॥ ८ ॥
वैद्युतेन समाविष्टो वार्क्षो नाड्डिः प्रशाम्यति।
मानवानाञ्च कुक्षिस्थो नाड्डिः शाम्यति पावकः ॥ ९ ॥
अर्च्चिष्मान् परमः सोऽग्निः प्रभवो जाठरः स्मृतः।
यस्यायं मण्डली शुक्लो निरूष्मा संप्रकाशते ॥ १० ॥
प्रभा हि सौरी पादेन ह्यस्तं याति दिवाकरे।
अग्निमाविशते रात्रौ तस्माद्दूरात् प्रकाशते ॥ ११ ॥
उद्यन्तञ्च पुनः सूर्य्यमौष्ण्यमाग्नेयमाविशत्।
पादेन पार्थिवस्याग्नेस्तस्मादग्निस्तपत्यसौ ॥ १२ ॥
प्रकाशश्च तथोष्णञ्च सौराग्नेये तु तेजसी।
परस्परानुप्रवेशादाप्यायेते दिवानिशं ॥ १३ ॥
उत्तरे चैव भूम्यर्द्धे तस्मादग्निश्च दक्षिणे।
उत्तिष्ठति पुनः सूर्य्ये राविराविशते तपः।
तस्मात्तास्त्रा भवन्त्यापो दिवारात्रिप्रवेशनात् ॥ १४ ॥
अस्तं याति पुनः सूर्य्ये अहर्भूमे प्रविशत्यपः।
तस्मात्रक्तं पुनः शुक्ला आपो विशन्ति (१)भास्करे ॥ १५ ॥
एतेन क्रमयोगेन भूम्यर्द्धे दक्षिणोत्तरे।
उदयास्तमये नित्यमहोरात्रं विशत्यपः ॥ १६ ॥
यस्मात्सौ तपते सूर्य्ये पिबन्नम्भो गभस्तिभिः।
पार्थिवी हि विमिश्रोऽसौ दिव्यः शुचिरिति स्मृतः ॥ १७ ॥
सहस्रपादः सोऽग्निस्तु वृत्तः कुम्भनिभः शुचिः।

१ पाठोऽयं न समीचीनः।



आदत्ते तत्तु रश्मीनां (१) सहस्रेण समन्ततः ॥ १८ ॥
नादेयीश्चैव सामुद्रीः कौप्याश्चैव सधान्वनीः।
स्थावरा जङ्गमाश्चैव यस्य सूर्य्यो हिरण्मयः।
तस्य रश्मिसहस्रन्तु वर्षत्यौतोष्णनिस्रवं ॥ १९ ॥
तासाञ्चतुःशता नाड्यो वर्षन्ति चित्रमूर्त्तयः।
वन्दनाश्चैव वन्द्याश्च ऋतना नूतनास्तथा।
अमृता नामतः सर्व्वा रश्मयो वृष्टिसर्जनाः ॥ २० ॥
हिमवाहाश्च ताभ्योऽन्या रश्मयस्त्रिशतास्तु पुनः।
दृश्या मेध्याश्च वाह्याश्च ह्लादिन्यो हिमसर्जनाः ॥ २१ ॥
चन्द्रास्ता नामतः सर्व्वाः पीताभास्तु गभस्तयः।
शुक्लाश्च ककुभश्चैव गावो विश्वभृतस्तथा ॥ २२ ॥
शुक्लास्ता नामतः सर्व्वास्त्रिशतास्तु घर्म्मसर्जनाः।
समं बिभर्ति ताभिस्तु मनुष्यपितृदेवताः ॥ २३ ॥
मनुष्यानौषधेनेह स्वधया च पितॄनपि।
अमृतेन सुरान् सर्व्वांस्त्रीँस्त्रिभिस्तर्पयत्यसौ ॥ २४ ॥
वसन्ते चैव ग्रीष्मे च सप्तभिः सप्तपते त्रिभिः।
वर्षास्वथो शरदि च चतुर्भिः सम्प्रकर्षति ॥ २५ ॥
हेमन्ते शिशिरे चैव हिमं स सृजते त्रिभिः।
ओषधीषु बलन्यस्ते स्वधया च पितॄनपि।
सूर्य्योऽमरत्वममृतत्रयन्त्रिषु नियच्छति ॥ २६ ॥
एवं रश्मिसहस्रन्तत् सौरं लोकार्थसाधकं।
भिद्यते ऋतुमासाद्य जलगौतोष्णनिस्रवं ॥ २७ ॥

१ नाडीनामिति घ०, ढ० च।

इतेतन्मण्डलं शुक्लं भास्वरं सूर्य्यसंज्ञितं ।
नक्षत्रग्रहसोमानां प्रतिष्ठायोनिरेव च ।
ऋक्षचन्द्रग्रहाः सर्वे विज्ञेयाः सूर्य्यसम्भवाः ॥ २८ ॥
नक्षत्राधिपतिः सोमो ग्रहराजो दिवाकरः ।
शेषाः पञ्चग्रहा ज्ञेयाः ईश्वराः कामरूपिणः ॥ २९ ॥
पठ्यते चाग्निरादित्य औदकश्चन्द्रमाः स्मृतः ।
शेषाणां प्रकृतिं सम्यग्वर्ण्यमानां निबोधत ॥ ३० ॥
सुरसेनापतिः स्कन्दः पठ्यतेऽङ्गारको ग्रहः ।
नारायणं बुधं प्राहुर्दैवं ज्ञानविदो विदुः (१) ॥ ३१ ॥
रुद्रो वैवस्वतः साक्षाद्धर्मो लोके प्रभुः स्वयं ।
महाग्रहो द्विजश्रेष्ठो मन्दगामी शनैश्चरः ॥ ३२ ॥
देवासुरगुरू द्वौ तु भानुमन्तौ महाग्रहौ ।
प्रजापतिसुतावेतावुभौ शुक्रबृहस्पती ।
दैत्यो महेन्द्रश्च तयोराधिपत्ये विनिर्मितौ ॥ ३३ ॥
आदित्यमूलमखिलं त्रिलोकं नात्र संशयः ।
भवत्यस्य जगत् कृत्स्नं सदेवासुरमानुषं ॥ ३४ ॥
रुद्रेन्द्रोपेन्द्रचन्द्राणां विप्रेन्द्राग्निदिवौकसां ।
द्युतिर्द्युतिमतां कृत्स्ना यत्तेजः सार्वलौकिकं ॥ ३५ ॥
सर्वात्मा सर्वलोकेशो मूलं परमदैवतं ।
ततः संजायते सर्वं तत्र चैव प्रलीयते ॥ ३६ ॥
भावाभावौ हि लोकानामादित्यान्निःसृतौ पुरा ।
जगज्ज्ञेयो ग्रहो विप्रा दीप्तिमान् सुग्रहो रविः ॥ ३७ ॥

१ ज्ञानविदो बुधा इति ख०, ट० च ।



यत्र गच्छन्ति निधनं जायन्ते च पुनः पुनः ।
क्षणा मुहूर्त्ता दिवसा निशाः पक्षाश्च कृत्स्नशः ।
मासाः संवत्सराश्चैव ऋतवोऽब्दयुगानि च ॥ ३८ ॥
तदादित्यादृते तेषां (१) कालसङ्ख्या न विद्यते ।
कालादृते न निगमो न दीक्षा नाक्रिकक्रमः ॥ ३९ ॥
ऋतूनामविभागश्च पुष्पमूलफलं कुतः ।
कुतः शस्याभिनिष्पत्तिर्गुणौषधिगणादि वा ॥ ४० ॥
अभावो व्यवहाराणां देवानां दिवि चेह च ।
जगत्प्रतापनमृते भास्करं वारितस्करं ॥ ४१ ॥
स एव कालश्चाग्निश्च द्वादशात्मा प्रजापतिः ।
तपत्येष द्विजश्रेष्ठास्त्रैलोक्यं सचराचरं ॥ ४२ ॥
स एष तेजसां राशिः समस्तः सार्वलौकिकः ।
उत्तमं मार्गमास्थाय वायोर्भाभिरिदञ्जगत् ।
पार्श्वमूर्ध्वमधश्चैव तापयत्येष सर्वशः (२) ॥ ४३ ॥
रवेरश्मिसहस्रं यत् प्राङ्मया समुदाहृतं ।
तेषां श्रेष्ठाः पुनः सप्त रश्मयो ग्रहयोनयः ॥ ४४ ॥
सुषुम्नो हरिकेशश्च विश्वकर्म्मा तथैव च ।
विश्वश्रवाः पुनश्चान्यः सम्पद्वसुरतः परं ।
अर्व्वावसुः (३) पुनश्चान्यो मया चात्र प्रकीर्त्तितः ॥ ४५ ॥
सुषुम्नः सूर्य्यरश्मिस्तु चौष्णं शशिनमेधयन् ।
तिर्य्यगूर्द्धप्रभावोऽसौ सुषुम्नः परिकीर्त्त्यते ॥ ४६ ॥

१ शेषामिति ट० । २ तापयत्येष वै जगदिति ख० ।
३ खर्भावसुरिति ख० ।

हरिकेशः पुरस्त्वाद्या ऋक्षयोनिः प्रकीर्त्तयते ।
दक्षिणे विश्वकर्म्मा तु रश्मिर्वर्द्धयते बुधं ॥ ४७ ॥
विश्वश्रवास्तु यः पश्चात् शुक्रयोनिः स्मृता बुधैः ।
सम्महसश्च यो रश्मिः सा योनिर्लोहितस्य च ॥ ४८ ॥
षष्ठस्त्वर्व्वावसूरश्मिर्योनिस्तु स बृहस्पतेः ।
शनैश्चरं पुनश्चापि रश्मिराप्यायते स्वराट् ॥ ४९ ॥
एवं सूर्य्यप्रभावेण ग्रहनक्षत्रतारकाः ।
वर्द्धन्ते विदिताः सर्व्वा विश्वक्षेत्रं पुनर्जगत् ।
न क्षीयन्ते पुनस्तानि तस्मान्नक्षत्रता स्मृता ॥ ५० ॥
क्षेत्राख्येतानि वै पूर्व्वमापतन्ति गभस्तिभिः ।
तेषां क्षेत्राण्यथादत्ते सूर्य्यो नक्षत्रताङ्गतः ॥ ५१ ॥
तीर्णानां सुकृतेनेह सुकृतान्ते ग्रहाश्रयात् ।
ताराणां तारका ख्याताः शुक्लत्वाच्चैव तारकाः ॥ ५२ ॥
दिव्यानां पार्थिवानाञ्च नैशानाञ्चैव सर्वशः ।
आदानान्नित्यमादित्यस्तमसां तेजसां महान् ॥ ५३ ॥
सुवति स्यन्दनार्थे च धातुरेष विभाव्यते ।
सवनात्तेजसोऽपाञ्च तेनासौ सविता मतः ॥ ५४ ॥
वह्नर्थश्चन्द्र इत्येष ह्लादने धातुरिष्यते ।
शुक्लत्वे चामृतत्वे च शीतत्वे च विभाव्यते ॥ ५५ ॥
सूर्य्याचन्द्रमसोर्दिव्ये मण्डले भास्वरे खगे ।
ज्वलत्तेजोमये शुक्ले वृत्तकुम्भनिभे शुभे ॥ ५६ ॥
घनतोयात्मकं तत्र मण्डलं शशिनः स्मृतं ।
घनतेजोमयं शुक्लं मण्डलं भास्करस्य तु ॥ ५७ ॥



विशन्ति सर्वदेवास्तु स्थानान्येतानि सर्वशः ।
मन्वन्तरेषु सर्व्वेषु ऋक्षसूर्य्यग्रहाश्रयाः ॥ ५८ ॥
तानि देवगृहाण्येव तदाख्यास्ते भवन्ति च ।
सौरं सूर्य्यो विशत्स्थानं सौम्यं सोमस्तथैव च ॥ ५९ ॥
शौक्रं शुक्रो विशत्स्थानं षोड़शार्चिः प्रतापवान् ।
बृहद्बृहस्पतिश्चैव लोहितश्चैव लोहितः ।
शानैश्चरं तथा स्थानं देवश्चैव शनैश्चरः ॥ ६० ॥
आदित्यरश्मिसंयोगात् संप्रकाशात्मिकाः स्मृताः ।
नवयोजनसाहस्रो विष्कम्भः सवितुः स्मृतः ॥ ६१ ॥
त्रिगुणस्तस्य विस्तारो मण्डलञ्च प्रमाणतः ।
द्विगुणः सूर्य्यविस्तारात् विस्तारः शशिनः स्मृतः ॥ ६२ ॥
तुल्यस्तयोस्तु स्वर्भानुर्भूत्वाधस्तात् प्रसर्पति ।
उद्धृत्य पार्थिवच्छायां निर्म्मितो मण्डलाकृतिः ॥ ६३ ॥
स्वर्भानोस्तु बृहत् स्थानन्निर्म्मितं यत्तमोमयं ।
आदित्यात्तच्च निष्क्रम्य सोमङ्गच्छति पर्व्वसु ॥ ६४ ॥
आदित्यमेति सोमाच्च पुनः सोमञ्च पर्व्वसु ।
स्वर्भासा नुदते यस्मात्ततः स्वर्भानुरुच्यते ॥ ६५ ॥
चन्द्रस्य षोड़शो भागो भार्गवस्य विधीयते ।
विष्कम्भान्मण्डलाच्चैव योजनाद्यात् प्रमाणतः ॥ ६६ ॥
भार्गवात्पादहीनस्तु विज्ञेयो वै बृहस्पतिः ।
बृहस्पतेः पादहीनौ कुजसौरावुभौ स्मृतौ ।
विस्तारान्मण्डलाच्चैव पादहीनस्तयोर्बुधः ॥ ६७ ॥
तारानक्षत्ररूपाणि वपुष्मन्तीह यानि वै ।

बुधेन समतुल्यानि विस्तारान्मण्डलादथ ॥ ६८ ॥
प्रायशश्चन्द्रयोगानि विद्याद्दृच्चाणि तत्त्ववित् ।
तारानक्षत्ररूपाणि हीनानि तु परस्परं ॥ ६९ ॥
शतानि पञ्च चत्वारि त्रीणि द्वे चैव योजने ।
पूर्व्वापरनिकृष्टानि तारकामण्डलानि तु ।
योजनान्यर्द्धमात्राणि तेभ्यो ह्रस्वं न विद्यते ॥ ७० ॥
उपरिष्टात्त्रयस्तेषां ग्रहा ये दूरसर्पिणः ।
सौरोऽङ्गिराश्च वक्रश्च (१) ज्ञेया मन्दविचारिणः ॥ ७१ ॥
तेभ्योऽधस्तात्तु चत्वारः पुनरन्ये महाग्रहाः ।
सूर्य्यः सोमो बुधश्चैव भार्गवश्चैव शीघ्रगाः ॥ ७२ ॥
यावन्त्यस्तारकाः कोटास्तावद्दृच्चाणि सर्व्वगः ।
वीथीनां नियमाच्चैवमृक्षमार्गो व्यवस्थितः ॥ ७३ ॥
गतिस्तास्त्वेव सूर्य्यस्य नीचोच्चत्वेऽयनक्रमात् ।
उत्तरायणमार्गस्थो यदा पर्व्वसु चन्द्रमाः ।
बौधं बौधोऽथ स्वर्भानुः स्वर्भानोः स्थानमाश्रितः ॥ ७४ ॥
नक्षत्राणि च सर्व्वाणि नक्षत्राणि विशन्त्युत ।
गृहाण्येतानि सर्व्वाणि ज्योतींषि सुकृतात्मनां ॥ ७५ ॥
कल्पादौ संप्रवृत्तानि निर्म्मितानि स्वयम्भुवा ।
स्थानान्येतानि तिष्ठन्ति यावदाभूतसंप्लवं ॥ ७६ ॥
मन्वन्तरेषु सर्व्वेषु देवतायतनानि वै ।
अभिमानिनोऽवतिष्ठन्ति यावदाभूतसंप्लवं ॥ ७७ ॥
अतीतैस्तु सहातीता भाव्या भाव्यैः सुरासुरैः ।

१ भौमोऽङ्गिरा अर्कजश्चेति ख०।



वर्त्तन्ते वर्त्तमानैश्च स्थानानि स्वैः सुरैः सह ॥ ७८ ॥
अस्मिन् मन्वन्तरे चैव ग्रहा वैमानिकाः स्मृताः ।
विवस्वानदितेः पुत्रः सूर्य्यो वैवस्वतेऽन्तरे ॥ ७९ ॥
त्विषिमान् धर्म्मपुत्रस्तु सोमदेवो वसुः स्मृतः ।
शुक्रो देवस्तु विज्ञेयो भार्गवोऽसुरराजकः ॥ ८० ॥
बृहत्तेजाः स्मृतो देवो देवाचार्य्योऽङ्गिरःसुतः ।
बुधो मनोहरश्चैव त्विषिपुत्रस्तु (१) सः स्मृतः ॥ ८१ ॥
अग्निर्विकल्पात् संजज्ञे युवाऽसौ लोहिताधिपः ।
नक्षत्रवृत्तगामिन्यो दाक्षायण्यः स्मृतास्तु ताः ॥ ८२ ॥
स्वर्भानुः सिंहिकापुत्रो भूतसन्तापनोऽसुरः ।
सोमर्क्षग्रहमूर्य्यं तु कीर्तितास्त्वभिमानिनः ॥ ८३ ॥
स्थानान्येतान्यथोक्तानि स्थानिन्यश्चैव देवताः ।
शुक्रमग्निमयं स्थानं सहस्रांशोर्विवस्वतः ॥ ८४ ॥
सहस्रांशोस्त्विषः स्थानमग्नेयं शुक्रमेव च ।
अथ श्यामं मनोज्ञस्य पञ्चरश्मेर्गृहं स्मृतं ॥ ८५ ॥
शुक्रस्याप्यमयं स्थानं सप्त षोड्शरश्मिवत् ।
नवरश्मेस्तु यूनो हि लोहितस्थानमग्नेयं । ८६ ॥
हरिद्वाप्यं बृहच्चापि द्वादशांशोर्बृहस्पतेः ।
अष्टरश्मेर्गृहं प्रोक्तं कृष्णं बुधस्य आग्नेयं ॥ ८७ ॥
स्वर्भानोस्तामसं स्थानं भूतसन्तापनालयं ।
विज्ञेयास्तारकाः सर्व्वास्त्वग्नेयास्त्वेकरश्मयः ॥ ८८ ॥
आश्रयाः पुण्यकीर्त्तीनां सुशुक्लाश्चैव वर्णतः ।

१ विधिपुत्रस्त्विति ख०।

घनतोयात्मिका ज्ञेयाः कल्पादौ वेदनिर्म्मिताः ॥ ८८ ॥
उच्चत्वादृश्यते शीघ्रमभिव्यक्तैर्गभस्तिभिः ।
तथा दक्षिणमार्गस्थो नीवीवीथीसमाश्रितः ॥ ८० ॥
भूमिलेखान्वितः सूर्य्यः पूर्णमासावास्ययोस्तथा ।
न दृश्यते यथाकालं शीघ्रतोऽस्तमुपैति च ॥ ८१ ॥
तस्मादुत्तरमार्गस्थो ह्यमावास्यां निशाकरः ।
दृश्यते दक्षिणे मार्गे नियमाद् दृश्यते न च ॥ ८२ ॥
ज्योतिषां गतियोगेन सूर्य्याचन्द्रमसावुभौ ।
समानकालास्तमयौ विषुवत्सु समोदयौ ॥ ८३ ॥
उत्तरासु च वीथीषु व्यन्तरास्तमयोदयौ ।
पौर्णमासावास्ययोर्ज्ञेयौ ज्योतिश्चक्रानुवर्त्तिनौ ॥ ८४ ॥
दक्षिणायनमार्गस्थो यदा भवति रश्मिवान् ।
तदा सर्व्वग्रहाणां स सूर्य्योऽधस्तात् प्रसर्पति ॥ ८५ ॥
विस्तीर्णं मण्डलं कृत्वा तस्योर्द्ध्वश्चरते शशी ।
नक्षत्रमण्डलं कृत्स्नं सोमादूर्द्ध्वं प्रसर्पति ॥ ८६ ॥
नक्षत्रेभ्यो बुधश्चोर्द्ध्वं बुधादूर्द्ध्वं बृहस्पतिः ।
तस्माच्छनैश्चरश्चोर्द्ध्वस्तस्मात्सप्तर्षिमण्डलं ।
ऋषीणाञ्चैव सप्तानां ध्रुव ऊर्द्ध्वं व्यवस्थितः ॥ ८७ ॥
द्विगुणेषु सहस्रेषु योजनानां शतेषु च ।
ताराग्रहान्तराणि स्युरुपरिष्टाद्यथाक्रमं ॥ ८८ ॥
ग्रहाश्च चन्द्रसूर्य्यौ तु दिवि दिव्येन तेजसा ।
नित्यसृष्टेषु युज्यन्ते गच्छन्ति नियमक्रमात् ॥ ८९ ॥
ग्रहनक्षत्रसूर्य्यास्तु नीचोच्चसृष्टवस्थिताः ।



समागमे च भेदे च पश्यन्ति युगपत् प्रजाः ॥ १०० ॥
परस्परस्थिता ह्येते युज्यन्ते च परस्परं ।
असङ्करेण विज्ञेयस्तेषां योगस्तु वै बुधैः ॥ १०१ ॥
इत्येष सन्निवेशो वः पृथिव्यां ज्योतिषस्य च ।
ह्रदोपानामुदधीनाञ्च पर्व्वतानां तथैव च ॥ १०२ ॥
वर्षाणाञ्च नदीनाञ्च येषु तेषु वसन्ति वै ।
एते चैव ग्रहाः पूर्व्वं नक्षत्रेषु समुत्थिताः ॥ १०३ ॥
विवस्वानदितेः पुत्रः सूर्य्यो वै चक्षुषेऽन्तरे ।
विशाखासु समुत्पन्नो ग्रहाणां प्रथमो ग्रहः ॥ १०४ ॥
त्विषिमान् धर्म्मपुत्रस्तु सोमो विश्वावसुस्तथा ।
शीतरश्मिः समुत्पन्नः कृत्तिकासु निशाकरः ॥ १०५ ॥
षोड़शार्चिर्भृगोः पुत्रः शुक्रः सूर्य्यादनन्तरं ।
ताराग्रहाणां प्रवरः (१) तिष्यनक्षत्रे समुत्थितः(२) ॥ १०६ ॥
ग्रहश्चाङ्गिरसः पुत्रो द्वादशार्चिर्बृहस्पतिः ।
फाल्गुनीषु समुत्पन्नः सर्व्वासु च जगद्गुरुः ॥ १०७ ॥
नवार्चिर्लोहिताङ्गस्तु प्रजापतिसुतो ग्रहः ।
आषाढ़ासिंह पूर्व्वासु समुत्पन्न इति श्रुतिः ॥ १०८ ॥
रेवतीष्वेव सप्तार्चिस्तथा सौरश्चनैश्चरः ।
रोहिणीषु समुत्पन्नौ ग्रहौ चन्द्रार्कमर्द्दनौ ॥ १०९ ॥
एते ताराग्रहाश्चैव बोद्धव्या भार्गवादयः ।
जन्मनक्षत्रपीड़ासु यान्ति वैगुण्यतां यतः ।
सृजन्ते तेन दोषेण ततस्ता ग्रहभक्तिषु ॥ ११० ॥

१ परम इति ख०। २ ग्रहश्चैव समुद्भव इति ख०।

सर्वग्रहाणामेतेषामादिरादित्य उच्यते।
ताराग्रहाणां शुक्रस्तु केतूनाञ्चैव धूमवान् ॥ १११ ॥
ध्रुवः कालो ग्रहाणान्तु विभक्तानाञ्चतुर्दिशं।
नक्षत्राणां अविष्ठा स्यादयनानां तथोत्तरं ॥ ११२ ॥
वर्षाणाञ्चापि पञ्चानामाद्यः संवत्सरः स्मृतः।
ऋतूणां शिशिरश्चापि मासानां माघ एव च ॥ ११३ ॥
पक्षाणां शुक्लपक्षस्तु तिथीनां प्रतिपत्तथा।
अहोरात्रविभागानामहश्चापि प्रकीर्तितं ॥ ११४ ॥
मुहूर्त्तानां तथैवादिर्मुहूर्त्तो रुद्रदैवतः।
अक्ष्णोश्चापि दिमेषादिः कालः कालविदो मतः ॥ ११५ ॥
अवनान्तं अविष्ठादि युगं स्यात् पञ्चवार्षिकं।
भानोर्गतिविशेषेण चक्रवत् परिवर्त्तते ॥ ११६ ॥
दिवाकरः स्मृतस्तस्मात् कालस्तं विद्धि चेश्वरं।
चतुर्विधानां भूतानां प्रवर्त्तकनिवर्त्तकः ॥ ११७ ॥
इत्येष ज्योतिषामेव सन्निवेशोऽर्थनिश्चयात्।
लोकसंव्यवहारार्थमीश्वरेण विनिर्म्मितः ॥ ११८ ॥
उत्पन्नः अवणेनासौ (१) संक्षिप्तश्च ध्रुवे तथा।
सर्व्वतोऽन्तेषु विस्तीर्णो हृत्ताकार इतिस्थितिः ॥ ११९ ॥
बुद्धिपूर्व्वमगवता कल्पादौ संप्रकीर्तितः।
साश्रयः सोऽभिमानी च सर्वस्य ज्योतिषात्मकः।
विश्वरूपः प्रधानस्य परिणामोऽयमद्भुतः ॥ १२० ॥
नैव शक्यं प्रसंख्यातुं याथातथ्येन केनचित्।

१ पाठोऽयं न समीचीनः।



गतागतं मनुष्येषु ज्योतिषां मांसचक्षुषा ॥ १२१ ॥
आगमादनुमानाच्च प्रत्यक्षादुपपत्तितः।
परीक्ष्य निपुणं भक्त्या श्रद्धातव्यं विपश्चिता ॥ १२२ ॥
चक्षुः शास्त्रं जलं लेख्यं गणितं बुद्धिसत्तमाः।
पञ्चैते हेतवो ज्ञेयाः ज्योतिर्गणविचिन्तने ॥ १२३ ॥

इति श्रीमहापुराणे वायुप्रोक्ते ज्योतिःसन्निवेशो नाम त्रिपञ्चाशोऽध्यायः।

# अथ चतुःपञ्चाशोऽध्यायः।

———ooo———

## नीलकण्ठस्तवः।

ऋषय ऊचुः। कस्मिन् देशे महापुण्यमेतदाख्यानमुत्तमं।
वृत्तं ब्रह्मपुरोगाणां कस्मिन् काले महाद्युते।
एतदाख्याहि नः सम्यग् यथा वृत्तं तपोधन ॥ १ ॥

सूत उवाच। यथा श्रुतं मया पूर्व्वं वायुना जगदायुना (१)।
कथ्यमानं द्विजश्रेष्ठाः सत्रे वर्षसहस्रके ॥ २ ॥
नीलता येन कण्ठस्य देवदेवस्य शूलिनः।
तदहं कीर्त्तयिष्यामि शृणुध्वं शंसितव्रताः ॥ ३ ॥
उत्तरे शैलराजस्य सरांसि सरितो ह्रदाः।
पुण्योद्यानेषु तीर्थेषु देवतायतनेषु च।
गिरिशृङ्गेषु तुङ्गेषु गह्वरोपवनेषु च ॥ ४ ॥
देवभक्ता महात्मानो मुनयः शंसितव्रताः।
स्तुवन्ति च महादेवं यत्र यत्र यथाविधि ॥ ५ ॥
ऋग्यजुःसामवेदैश्च नृत्यगीतार्च्चनादिभिः।
ओंकारेण नमस्कारैरर्च्चयन्ति सदा शिवं ॥ ६ ॥
प्रवृत्ते ज्योतिषां चक्रे मध्यव्यासे दिवाकरे।
देवता नियतात्मानः सर्वे तिष्ठन्ति तां कथां।

१ पाठोऽयं आदर्शसम्मतो मुद्रितः परन्तु जगदायुषा इत्ययं पाठः समीचीनः।



अथ नियमप्रवृत्ताश्च प्राणशेषव्यवस्थिताः ॥ ७ ॥
नमस्ते नीलकण्ठाय इत्युवाच सदागतिः।
तच्छ्रुत्वा भावितात्मानो मुनयः शंसितव्रताः।
वालखिल्येतिविख्याताः पतङ्गसहचारिणः ॥ ८ ॥
अष्टाशीतिसहस्राणि मुनीनामूर्द्ध्वरेतसां।
तस्मात् पृच्छन्ति वै वायुं वायुपर्णाम्बुभोजनाः ॥ ९ ॥

ऋषय ऊचुः। नीलकण्ठेतियत् प्रोक्तं त्वया पवनसत्तम।
एतद्गुह्यं पवित्राणां पुण्यं पुण्यकृतां वराः ॥ १० ॥
तदयं श्रोतुमिच्छामस्त्वत्प्रसादात् प्रभञ्जन।
नीलता येन कण्ठस्य कारणेनाम्बिकापतेः ॥ ११ ॥
श्रोतुमिच्छामहे सम्यक्तव वक्त्राद्विशेषतः।
यावद्वाचः प्रवर्त्तन्ते सार्थास्तावत्य त्वयेरिताः ॥ १२ ॥
वर्णस्थानगते वायौ वाग्विधिः संप्रवर्त्तते।
ज्ञानं पूर्व्वमथोत्साहस्त्वत्तो वायो प्रवर्तते ॥ १३ ॥
त्वयि निष्पन्दमाने तु शेषा वर्णप्रवृत्तयः।
यत्र वाचो निवर्तन्ते देहबन्धाश्च दुर्लभाः ॥ १४ ॥
तत्रापि तेऽस्ति सद्भावः सर्व्वगस्त्वं सदानिल।
नान्यः सर्व्वगतो देवस्त्वदृतेऽस्ति समीरण ॥ १५ ॥
एष वै जीवलोकस्ते प्रत्यक्षः सर्व्वतोऽनिल।
वेत्थ वाचस्पतिं देवं मनोनायकमीश्वरं ॥ १६ ॥
ब्रूहि तत् कण्ठदेशस्य किंकृता रूपविक्रिया।
श्रुत्वा वाक्यन्ततस्तेषामृषीणां भावितात्मनां।
प्रत्युवाच महातेजा वायुर्लोकनमस्कृतः ॥ १७ ॥

वायुरुवाच। पुरा कृतयुगे विप्रो वेदनिर्णयतत्परः।
वसिष्ठो नाम धर्म्मात्मा मानसो वै प्रजापतेः॥ १८॥
पप्रच्छ कार्त्तिकेयं वै मयूरवरवाहनं।
महिषासुरनारीनां नयनाञ्जनतस्करं॥ १९॥
महासेनं महात्मानं मेघस्तनितनिस्वनं।
उमामनःप्रहर्षेण बालकं क्षुद्ररूपिणं॥ २०॥
क्रौञ्चजीवितहर्त्तारं पार्वतीहृदि नन्दनं।
वसिष्ठः पृच्छते भक्त्या कार्त्तिकेयं महाबलं॥ २१॥
वसिष्ठ उवाच। नमस्ते हरनन्दाय उमागर्भ नमोऽस्तु ते।
नमस्ते अग्निगर्भाय गङ्गागर्भ नमोऽस्तु ते॥ २२॥
नमस्ते शरगर्भाय नमस्ते कृत्तिकासुत।
नमो द्वादशनेत्राय षण्मुखाय तमोऽस्तु ते॥ २३॥
नमस्ते शक्तिहस्ताय दिव्यघण्टापताकिने।
एवं स्तुत्वा महासेनं पप्रच्छ शिखिवाहनं॥ २४॥
यदेतद् दृश्यते वर्णं शुभं शुभ्राञ्जनप्रभं।
तत्किमर्थं समुत्पन्नं कण्ठे कुन्देन्दुसंप्रभे॥ २५॥
एतदाख्याय भक्ताय दान्ताय ब्रूहि पृच्छते (१)।
कथां मङ्गलसंयुक्तां पवित्रां पापनाशिनीं।
मत्प्रियार्थं महाभाग वक्तुमर्हस्यशेषतः॥ २६॥
श्रुत्वा वाक्यं ततस्तस्य वसिष्ठस्य महात्मनः।
प्रत्युवाच महातेजाः सुरारिबलसूदनः॥ २७॥
शृणुष्व वदतां श्रेष्ठ कथ्यमानं वचो मम।

१ ब्रूहि तं परिपृच्छते इति ख०।



उमोत्सङ्गनिविष्टेन मया पूर्वं यथा श्रुतं॥ २८॥
पार्वत्या सह संवादः सर्वस्य च महात्मनः।
तदहङ्कीर्त्तयिष्यामि त्वत्प्रियार्थं महामुने॥ २९॥
कैलासशिखरे रम्ये नानाधातुविचित्रिते।
नानाद्रुमलताकीर्णे चक्रवाकोपशोभिते॥ ३०॥
षट्पदोद्गीतबहुले धारासम्पातनादिते।
मत्तक्रौञ्चमयूराणां नादैरुद्घुष्टकन्दरे (१)॥ ३१॥
अप्सरोगणसङ्कीर्णे किन्नरैश्चोपशोभिते।
जीवञ्जीवकजातीनां वीरुद्भिरुपशोभिते॥ ३२॥
कोकिलारावमधुरे सिद्धचारणसेविते।
सौरभेयीनिनादाढ्ये अघस्तनितनिस्वने॥ ३३॥
विनायकभयोद्विग्ने कुञ्जरैर्युक्तकन्दरे।
वीणावादित्रनिर्घोषैः श्रोत्रेन्द्रियमनोरमैः॥ ३४॥
दोलालम्बितसम्पाते वनितासङ्घसेविते।
ध्वजैर्लम्बितदोलानां घण्टानां निनदाकुले॥ ३५॥
मुखमर्दलवादित्रैर्बलिनां स्फोटितैस्तथा।
क्रीड़ारवविचाराणां निर्घोषैः पूर्णमन्दिरे (२)॥ ३६॥
हासैः सन्त्रासजननैर्विकरालमुखैस्तथा।
देहगन्धैर्विचित्रैश्च प्रक्रीड़ितगणेश्वरैः॥ ३७॥
वज्रस्फटिकसोपानचित्रपट्टिशिलातलैः।
व्याघ्रसिंहमुखैश्चान्यैर्गजवाजिमुखैस्तथा॥ ३८॥
विड़ालवदनैश्चोग्रैः क्रोष्टुकाकारमूर्त्तिभिः।

१ नादैरङ्गुतकन्दरे इति ट०। २ पूर्णकन्दरे इति ट०।

ह्रस्वैर्दीर्घैः क्रशैः स्थूलैर्लम्बोदरमहोदरैः ॥ ३९ ॥
ह्रस्वजङ्घैश्च लम्बोष्ठैस्तालजङ्घैस्तथापरैः।
गोकर्णैरेककर्णैश्च महाकर्णैरकर्णकैः ॥ ४० ॥
बहुपादैर्महापादैरेकपादैरपादकैः।
बहुगोर्षैर्महागोर्षैरेकगोर्षैरगोर्षकैः ॥ ४१ ॥
बहुनेत्रैर्महानेत्रैरेकनेत्रैरनेत्रकैः।
एवंविधैर्महायोगिभूतैर्भूतपतिर्वृतः ॥ ४२ ॥

विशुद्धमुक्तामणिरत्नभूषिते
शिलातले हेममये मनोरमे।
सुखोपविष्टं मदनाङ्गनाशनं
प्रोवाच वाक्यं गिरिराजपुत्री ॥ ४३ ॥

देव्युवाच। भगवन् भूतभव्येश गोवृषाङ्कित शासन।
तव कण्ठे महादेव भ्राजतेऽम्बुदसन्निभं ॥ ४४ ॥
नात्युल्बणं नातिशुभ्रं नीलाञ्जनचयोपमं।
किमिदन्दीप्यते देव कण्ठे कामाङ्गनाशन ॥ ४५ ॥
को हेतुः कारणं किञ्च कण्ठे नीलत्वमीश्वर।
एतत्सर्वं यथान्यायं ब्रूहि कौतूहलं हि मे ॥ ४६ ॥
श्रुत्वा वाक्यं ततस्तस्याः पार्वत्याः पार्वतीप्रियः।
कथां मङ्गलसंयुक्तां कथयामास शङ्करः ॥ ४७ ॥
मथ्यमानेऽमृते पूर्वं क्षीरोदे सुरदानवैः।
अग्रे समुत्थितं तस्मिन् विषङ्कालानलप्रभं ॥ ४८ ॥
तं दृष्ट्वा सुरसङ्घाश्च दैत्याश्चैव वरानने।
विपन्नवदनाः सर्वे गतास्ते ब्रह्मणोऽन्तिकं ॥ ४९ ॥



दृष्ट्वा सुरगणान् भीतान् ब्रह्मोवाच महाद्युतिः।
किमर्थं भो महाभागा भीता उद्विग्नचेतसः ॥ ५० ॥
मयाष्टगुणमैश्वर्यं भवतां सम्प्रकल्पितं।
केन व्यावर्त्तितैश्वर्या यूयं वै सुरसत्तमाः ॥ ५१ ॥
त्रैलोक्यस्येश्वरा यूयं सर्वे वै विगतज्वराः।
प्रजासर्गे न सोऽस्तीह आत्मा यो मे निवर्त्तयेत् ॥ ५२ ॥
विमानगामिनः सर्वे सर्वे स्वच्छन्दगामिनः।
अध्यात्मे चाधिभूते च अधिदेवे च नित्यशः।
प्रजाः कर्म्मविपाकेन शक्ता यूयं प्रवर्त्तितुं ॥ ५३ ॥
तत् किमर्थं भयोद्विग्ना मृगाः सिंहार्दिता इव।
किं दुःखं केन सन्तापः कुतो वा भयमागतं।
एतत्सर्वं यथान्यायं शीघ्रमाख्यातुमर्हथ ॥ ५४ ॥
श्रुत्वा वाक्यं ततस्तस्य ब्रह्मणो वै महात्मनः।
ऊचुस्ते ऋषिभिः सार्द्धं सुरदैत्येन्द्रदानवाः ॥ ५५ ॥
सुरासुरैर्मथ्यमाने पाथोधौ च महात्मभिः।
भुजङ्गभृङ्गसङ्काशं नीलजीमूतसन्निभं।
प्रादुर्भूतं विषं घोरं सम्वर्ताग्निसमप्रभं ॥ ५६ ॥
कालमृत्युरिवोद्भूतं युगान्तादित्यवर्चसं।
त्रैलोक्योत्सादि सूर्य्याभं प्रस्फुरन्तं (१) समन्ततः ॥ ५७ ॥
विषेणोत्सिष्टमानेन कालानलसमत्विषा।
निर्दग्धो रक्तगौराङ्गः कृतकृष्णो जनार्दनः ॥ ५८ ॥
दृष्ट्वा तं रक्तगौराङ्गं कृतकृष्णं जनार्दनं।

१ पाठोऽयं न समीचीनः।

भीताः सर्वे वयं देवास्त्वामेव शरणङ्गताः॥ ५९॥
सुराणामसुराणाञ्च श्रुत्वा वाक्यं पितामहः।
प्रत्युवाच महातेजा लोकानां हितकाम्यया॥ ६०॥
शृणुध्वं दैवताः सर्वे ऋषयश्च तपोधनाः।
यत्तदग्रे समुत्पन्नं मथ्यमाने महोदधौ॥ ६१॥
विषं कालानलप्रख्यं कालकूटेतिविश्रुतं।
येन प्रोद्भूतमात्रेण क्षतक्षणो जनार्दनः॥ ६२॥
तस्य विष्णुरहञ्चापि सर्वे ते सुरपुङ्गवाः।
न शक्नुवन्ति वै सोढुं वेगमन्ये तु शङ्करात्॥ ६३॥
इत्युक्ता पद्मगर्भाभः पद्मयोनिरयोनिजः।
ततस्तोतुं समारब्धो ब्रह्मा लोकपितामहः॥ ६४॥
नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे।
नमः पिनाकहस्ताय वज्रहस्ताय वै नमः॥ ६५॥
नमस्त्रैलोक्यनाथाय भूतानाम्पतये नमः।
नमः सुरारिसंहर्त्रे तापसाय त्रिचक्षुषे (१)॥ ६६॥
ब्रह्मणे चैव रुद्राय विष्णवे चैव ते नमः।
साङ्ख्याय चैव योगाय भूतग्रामाय वै नमः॥ ६७॥
मन्मथाङ्गविनाशाय कालकालाय वै नमः।
रुद्राय च सुरेशाय देवदेवाय ते नमः (२)॥ ६८॥
कपर्दिने करालाय शङ्कराय कपालिने (३)।
विरूपायैकरूपाय शिवाय वरदाय च॥ ६९॥

१ सोममूर्य्याग्निचक्षुष इति ट०। २ देवाय वायुरंहसे इति ख०।
२ हराय चेति ट०।



त्रिपुरघ्नाय वन्द्याय (१) मातृणाम्पतये नमः।
बुद्धाय चैव शुद्धाय मुक्ताय केवलाय च॥ ७०॥
नमः कमलहस्ताय दिग्वासाय शिखण्डिने।
लोकत्रयविधात्रे च चन्द्राय (२) वरुणाय च॥ ७१॥
अग्राय चैव चोग्राय विप्रायानेकचक्षुषे।
रजसे चैव सत्त्वाय तमसेऽव्यक्तयोमये॥ ७२॥
नित्यायानित्यरूपाय नित्यानित्याय वै नमः।
व्यक्ताय चैवाव्यक्ताय व्यक्ताव्यक्ताय वै नमः॥ ७३॥
चिन्त्याय चैवाचिन्त्याय चिन्त्याचिन्त्याय वै नमः।
भक्तानामार्त्तिनाशाय नरनारायणाय च (३)॥ ७४॥
उमाप्रियाय शर्वाय नन्दिचक्राङ्किताय च (४)।
पक्षमासार्द्धमासाय नमः संवत्सराय च॥ ७५॥
बहुरूपाय मुण्डाय दण्डिनेऽथ वरूथिने।
नमः कपालहस्ताय दिग्वासाय शिखण्डिने॥ ७६॥
ध्वजिने रथिने चैव यमिने ब्रह्मचारिणे।
ऋग्यजुःसामवेदाय पुरुषायेश्वराय च।
इत्येवमादिचरितैस्तुभ्यं देव नमोऽस्तु ते॥ ७७॥
श्रीमहादेव उवाच। एवं स्तुतस्ततो देवैः प्रणिपत्य वरानने (५)॥ ७८॥
ज्ञात्वा तु भक्तिं मम देवदेवो
गङ्गाजलाप्लावितकेशदेशः।

१ त्रिपुरघ्नमखघ्नायेति ट०। २ इन्द्रायेति ट०।
३ प्रियनारायणाय चेति ख०। ४ नन्दिनन्दपराय चेति ख०।
५ अयं श्लोकार्द्धं प्रतितं प्रतिभाति।

सूक्ष्मोऽतियोगातिशयादचिन्त्यो
न हि प्लुतो व्यक्तमुपैति चन्द्रः ॥ ७९ ॥
एवं भगवता पूर्व्वं ब्रह्मणा लोककर्त्तृणा।
स्तुतोऽहं विविधैस्तोत्रैर्वेदवेदाङ्गसम्भवैः ॥ ८० ॥
ततः प्रीतोऽब्रवन्मां वै ब्रह्मणे सुमहात्मने।
ततोऽहं सूक्ष्मया वाचा पितामहमथाब्रुवं ॥ ८१ ॥
भगवन् भूतभव्येश लोकनाथ जगत्पते।
किं कार्य्यं ते मया ब्रह्मन् कर्त्तव्यं वद सुव्रत ॥ ८२ ॥
श्रुत्वा वाक्यं ततो ब्रह्मा प्रत्युवाचाम्बुजेक्षणः।
भूतभव्यभवन्नाथ श्रूयतां कारणेश्वर ॥ ८३ ॥
सुरासुरैर्मथ्यमाने पयोधावम्बुजेक्षण।
भगवन्मेघसङ्काशं नीलजीमूतसन्निभं ॥ ८४ ॥
प्रादुर्भूतं विषघोरं सम्वर्त्ताग्निसमप्रभं।
कालमृत्युरिवोद्भूतं युगान्तादित्यवर्चसं ॥ ८५ ॥
त्रैलोक्योत्सादि सूर्य्याभं विस्फुरन्तं समन्ततः।
अग्रे समुत्थितं तस्मिन् विषङ्कालानलप्रभम् ॥ ८६ ॥
तं दृष्ट्वा तु वयं सर्व्वे भीताः सम्भ्रान्तचेतसः।
तत् पिबस्व महादेव लोकानां हितकाम्यया।
भवानग्रास्य भोक्ता वै भवांश्चैव वरः प्रभुः ॥ ८७ ॥
त्वामृतेऽन्यो महादेव विषं सोढुं न विद्यते।
नास्ति कश्चित् पुमान् यक्षस्त्रैलोक्येषु च गीयते ॥ ८८ ॥
एवं तस्य वचः श्रुत्वा ब्रह्मणः परमेष्ठिनः।
तादृमित्येव तद्वाक्यं प्रतिगृह्य वरानने ॥ ८९ ॥



ततोऽहं पातुमारब्धो विषमन्तकसन्निभं।
पिबतो मे महाघोरं विषं सुरभयङ्करं।
कण्ठः समभवत्तूर्णं क्षणो मे वरवर्णिनि ॥ ९० ॥
तं दृष्ट्वोत्पलपत्राभं कण्ठे सक्तमिवोरगं।
तच्चकं नागराजानं लेलिह्यानमिवस्थितं ॥ ९१ ॥
अथोवाच महातेजा ब्रह्मा लोकपितामहः।
शोभसे त्वं महादेव कण्ठेनानेन सुव्रत ॥ ९२ ॥
ततस्तस्य वचः श्रुत्वा मया गिरिवरात्मजे।
पश्यतां देवसङ्घानां दैत्यानाञ्च वरानने ॥ ९३ ॥
यक्षगन्धर्व्वभूतानां पिशाचोरगरक्षसां।
धृतं कण्ठे विषं घोरं नीलकण्ठस्ततोऽब्रुवं ॥ ९४ ॥
तत् कालकूटं विषभुग्यतेजः
कण्ठे मया पर्व्वतराजपुत्रि।
निवेश्यमानं सुरदैत्यसङ्घो
दृष्ट्वा परं विस्मयमाजगाम ॥ ९५ ॥
ततः सुरगणाः सर्व्वे सदैत्योरगराक्षसाः।
ऊचुः प्राञ्जलयो भूत्वा मत्तमातङ्गगामिनि ॥ ९६ ॥
अहो बलं वीर्य्यपराक्रमस्ते
अहो पुनर्योगबलं तवैव।
अहो प्रभुत्वं तव देवदेव
गङ्गाजलास्फालितमुक्तकेश ॥ ९७ ॥
त्वमेव विष्णुश्चतुराननस्त्वं
त्वमेव मृत्युर्वरदस्त्वमेव।

त्वमेव सूर्य्यो रजनीकरश्च
त्वमेव भूमिः सलिलं त्वमेव ॥ ९८ ॥
त्वमेव यज्ञो नियमस्त्वमेव
त्वमेव भूतं भविता त्वमेव ।
त्वमेव चादिर्निधनं त्वमेव
स्थुलश्च सूक्ष्मः (१) पुरुषस्त्वमेव ॥ ९९ ॥
त्वमेव सूक्ष्मस्य परस्य सूक्ष्मः
त्वमेव वह्निः पवनस्त्वमेव ।
त्वमेव सर्व्वस्य चराचरस्य
लोकस्य कर्त्ता प्रलये च गोप्ता ॥ १०० ॥
इतीदमुक्त्वा वचनं सुरेन्द्राः
प्रगृह्य सोमं प्रणिपत्य मूर्द्ध्ना ।
गता विमानैरनिगृह्य वेगै-
र्महात्मनो मेरुमुपेत्य सर्व्वे ॥ १०१ ॥
इत्येतत्परमं गुह्यं पुण्यात्पुण्यमहत्तरम् (२) ।
नीलकण्ठेति यत्प्रोक्तं विख्यातं लोकविश्रुतं (३) ॥ १०२ ॥
स्वयं स्वयम्भुवा प्रोक्तां पुण्यां पापप्रणाशनीं ।
यस्तु धारयते नित्यमेनां ब्रह्मोद्भवां कथां ।
तस्याहं संप्रवक्ष्यामि फलं वै विपुलं महत् ॥ १०३ ॥
विषं तस्य वरारोहे स्थावरं जङ्गमन्तथा ।
गात्रं प्राप्य च सुस्रोणि क्षिप्रं तत्प्रतिहन्यते ॥ १०४ ॥

१ त्वमेव सूक्ष्म इति ट० । २ पुण्यतरं महदिति ख० ।
३ विष्णुलोकेषु विश्रुतमिति ट० ।



शमयत्यशुभं घोरं दुःस्वप्नञ्चापकर्षति ।
स्त्रीषु वल्लभतां याति सभायां पार्थिवस्य च ॥ १०५ ॥
विवादे जयमाप्नोति युद्धे शूरत्वमेव च ।
गच्छतः क्षेममध्वानं गृहे च नित्यसम्मदः ॥ १०६ ॥
शरीरभेदे वक्ष्यामि गतिं तस्य वरानने ।
नीलकण्ठो हरित्श्मश्रुः शशाङ्काङ्कितमूर्द्धजः ॥ १०७ ॥
त्रिनेत्रस्त्रिशूलपाणिश्च वृषयानः पिनाकधृक् ।
नन्दितुल्यबलः श्रीमान् नन्दितुल्यपराक्रमः ॥ १०८ ॥
विचरत्यचिरात् सर्व्वान् सर्व्वलोकान्ममाज्ञया ।
न हन्यते गतिस्तस्य अनिलस्य यथाऽम्बरे ।
मम तुल्यबलो भूत्वा तिष्ठत्याभूतसंप्लवं ॥ १०९ ॥
मम भक्ता वरारोहे ये च शृण्वन्ति मानवाः ।
तेषां गतिं प्रवक्ष्यामि इह लोके परत्र च ॥ ११० ॥
ब्राह्मणो वेदमाप्नोति क्षत्रियो जयते महीं ।
वैश्यस्तु लभते लाभं शूद्रः सुखमवाप्नुयात् ॥ १११ ॥
व्याधितो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।
गुर्विणी लभते पुत्रं कन्या विन्दति सत्पतिं ।
नष्टञ्च लभते सर्व्वं इह लोके परत्र च ॥ ११२ ॥
गवां शतसहस्रस्य सम्यग्दत्तस्य यत्फलं ।
तत्फलं भवति श्रुत्वा विभोर्दिव्यामिमां कथां ॥ ११३ ॥
पादं वा यदि वाप्यर्द्धं श्लोकं श्लोकार्द्धमेव वा ।
यस्तु धारयते नित्यं रुद्रलोकं स गच्छति ॥ ११४ ॥
कथामिमां पुण्यफलादियुक्तां

निवेद्य देव्याः शशिबद्धमूर्द्धजः।
हृषस्य पृष्ठेन सहोमया प्रभु-
र्जगाम किष्किन्धगुहां गुहप्रियः॥ ११५॥
क्रान्तं मया पापहरं महापदं
निवेद्य तेभ्यः प्रददौ प्रभञ्जनः।
अधीत्य सर्व्वन्त्वखिलं सुलक्षणं
जगाम आदित्यपथं द्विजोत्तमः॥ ११६॥

इति श्रीमहापुराणे वायुप्रोक्ते नीलकण्ठस्तवो
नाम चतुःपञ्चाशोऽध्यायः।

---

# अथ पञ्चपञ्चाशोऽध्यायः।

———ooo@ooo———

## लिङ्गोद्भवस्तवः।

ऋषयऊचुः। गुणकर्म्मप्रभावैश्च कोऽधिको वदतां वरः।
श्रोतुमिच्छामहे सम्यगाश्चर्य्यं गुणविस्तरं॥ १॥
सूत उवाच। अत्राप्युदाहरन्तीममितिहासं पुरातनं।
महादेवस्य माहात्म्यं विभुत्वञ्च महात्मनः॥ २॥
पूर्व्वं त्रैलोक्यविजये विष्णुना समुदाहृतं।
बलिं बद्ध्वा महौजास्तु (१) त्रैलोक्याधिपतिः पुरा॥ ३॥
प्रनष्टेषु च दैत्येषु प्रहृष्टे च शचीपतौ।
अथाजग्मुः प्रभुन्द्रष्टुं सर्व्वे देवाः सवासवाः॥ ४॥
यत्रास्ते विश्वरूपात्मा क्षीरोदस्य समीपतः।
सिद्धब्रह्मर्षयो यत्रा गन्धर्व्वाप्सरसाङ्गणाः॥ ५॥
नागा देवर्षयश्चैव नद्यः सर्व्वे च पर्व्वताः।
अभिगम्य महात्मानं स्तुवन्ति पुरुषं हरिं॥ ६॥
त्वं धाता त्वञ्च कर्त्ताऽस्य त्वं लोकान् सृजसि प्रभो।
त्वत्प्रसादाच्च कल्याणं प्राप्तं त्रैलोक्यमव्ययं।
असुराश्च जिताः सर्व्वे बलिर्बद्धश्च वै त्वया॥ ७॥

---

१ महातेजा इति ट०।

एवमुक्तः सुरैर्विष्णुः सिद्धैश्च परमर्षिभिः।
प्रत्युवाच ततो देवान् सर्व्वांस्तान् पुरुषोत्तमः ॥ ८ ॥
श्रूयतामभिधास्यामि कारणं सुरसत्तमाः।
यः स्रष्टा सर्व्वभूतानां कालः कालकरः (१) प्रभुः ॥ ९ ॥
येन हि ब्रह्मणा सार्द्धं सृष्टा लोकाश्च मायया।
तस्यैव च प्रसादेन आदौ सिद्धत्वमागतं ॥ १० ॥
पुरा तमसि चाव्यक्ते (२) त्रैलोक्ये ग्रासिते मया।
उदरस्थेषु भूतेषु लोकेऽहं शयितस्तदा ॥ ११ ॥
सहस्रशीर्षा भूत्वा सहस्राक्षः सहस्रपात्।
शङ्खचक्रगदापाणिः शयितो विमलेऽम्भसि ॥ १२ ॥
एतस्मिन्नन्तरे दूरात् पश्यामि ह्यमितप्रभं।
शतसूर्य्यप्रतीकाशं ज्वलन्तं स्वेन तेजसा ॥ १३ ॥
चतुर्वक्त्रं महायोगं पुरुषं काञ्चनप्रभं।
कृष्णाजिनधरं देवं कमण्डलुविभूषितं।
निमेषान्तरमात्रेण प्राप्तोऽसौ पुरुषोत्तमः ॥ १४ ॥
ततो मामब्रवीद् ब्रह्मा सर्व्वलोकनमस्कृतः।
कस्त्वं कुतो वा किञ्चेह तिष्ठसे वद मे विभो ॥ १५ ॥
अहं कर्त्ताऽस्मि लोकानां स्वयम्भूर्विश्वतोमुखः।
एवमुक्तस्तदा तेन ब्रह्मणाहमुवाच तं ॥ १६ ॥
अहं कर्त्ता च लोकानां संहर्त्ता च पुनः पुनः।
एवं सम्भाषमाणाभ्यां परस्परजयैषिणां।
उत्तरां दिशमास्थाय ज्वाला दृष्टाप्यधिष्ठिता ॥ १७ ॥

१ कालवर इति ट०। २ चाशक्त इति ट०।



ज्वालान्ततस्तामालोक्य विस्मितौ च तदानयोः।
तेजसा चैव तेनाथ सर्व्वं ज्योतिः कृतञ्जलं ॥ १८ ॥
वर्द्धमाने तदा वह्नावत्यन्तपरमाद्भुते।
अतिदुद्राव तां ज्वालां ब्रह्मा चाहञ्च सत्वरः १९ ॥
दिवं भूमिञ्च विष्ठभ्य तिष्ठन्तं (१) ज्वालमण्डलं।
तस्य ज्वालस्य मध्ये तु पश्यावो विपुलप्रभं ॥ २० ॥
प्रादेशमात्रमव्यक्तं लिङ्गं परमदीपितं।
न च तत्काञ्चनं मध्ये न शैलं न च राजतं ॥ २१ ॥
अनिर्देश्यमचिन्त्यञ्च लक्ष्यालक्ष्यं पुनः पुनः।
महौजसं महावीरं वर्द्धमानं भृशं तदा।
ज्वालामालायतं न्यस्तं सर्व्वभूतभयङ्करं ॥ २२ ॥
अस्य लिङ्गस्य योऽन्तं वै गच्छते मन्त्रकारणं।
घोररूपिणमत्यर्थं भिदन्तमिव रोदसी ॥ २३ ॥
ततो मामब्रवीद् ब्रह्मा अधो गच्छत्वतन्द्रितः।
अन्तमस्य विजानीमो लिङ्गस्य तु महात्मनः ॥ २४ ॥
अहमूर्द्धं गमिष्यामि यावदन्तोऽस्य दृश्यते।
तदा तौ समयं कृत्वा गतावूर्द्ध्वमधश्च ह ॥ २५ ॥
ततो वर्षसहस्रन्तु अहं पुनरधो गतः।
न च पश्यामि तस्यान्तं भीतश्चाहं न संशयः ॥ २६ ॥
तथा ब्रह्मा च आन्तश्च न चान्तन्तस्य पश्यति।
समागतो मया सार्द्धं तत्रैव च महाम्भसि ॥ २७ ॥
ततो विस्मयमापन्नावुभौ (२) तस्य महात्मनः।

१ पाठोऽयं न समीचीनः। २ विस्मयमापन्नौ भीताविति ट०।

मायया मोहितौ तेन नष्टसंज्ञौ व्यवस्थितौ ॥ २८ ॥
ततो ध्यानगतस्तत्र ईश्वरं सर्व्वतोमुखं।
प्रभवं निधनञ्चैव लोकानां प्रभुमव्ययं ॥ २९ ॥
ब्रह्माञ्जलिपुटो भूत्वा तस्मै शर्वाय शूलिने।
महाभैरवनादाय भीमरूपाय दंष्ट्रिणे।
अव्यक्ताय महान्ताय नमस्कारं प्रकुर्म्महे ॥ ३० ॥

नमोऽस्तु ते लोकसुरेश देव
नमोऽस्तु ते भूतपते महान्त।
नमोऽस्तु ते शाश्वत सिद्धयोने
नमोऽस्तु ते सर्व्वजगत्प्रतिष्ठ ॥ ३१ ॥

परमेष्ठी परं ब्रह्म अक्षरं परमं पदं।
श्रेष्ठस्त्वं वामदेवश्च रुद्रः स्कन्दः शिवः प्रभुः ॥ ३२ ॥
त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारः परं पदं।
स्वाहाकारो नमस्कारः संस्कारः सर्व्वकर्म्मणां ॥ ३३ ॥
स्वधाकारश्च जाप्यश्च (१) व्रतानि नियमास्तथा।
वेदा लोकाश्च देवाश्च भगवानेव सर्व्वगः ॥ ३४ ॥
आकाशस्य च शब्दस्त्वं भूतानां प्रभवाव्ययं।
भूमेर्गन्धो रसश्चापां तेजोरूपं महेश्वर ॥ ३५ ॥
वायोः स्पर्शश्च देवश्च वपुश्चन्द्रसमस्तथा।
बुधो ज्ञानञ्च देवेश प्रकृतौ बीजमेव च ॥ ३६ ॥
त्वं कर्त्ता सर्व्वभूतानां कालो मृत्युर्यमोऽन्तकः।
त्वन्धारयसि लोकांस्त्वोस्त्वमेव सृजसि प्रभो ॥ ३७ ॥

१ नाथश्चेति ट०।



पूर्व्वेण वदनेन त्वमिन्द्रत्वञ्च प्रकाशसे।
दक्षिणेन च वक्त्रेण लोकान् संक्षिपसे प्रभो(१) ॥ ३८ ॥
पश्चिमेन तु वक्त्रेण वरुणत्वं करोषि वै।
उत्तरेण तु वक्त्रेण सौम्यत्वञ्च व्यवस्थितं ॥ ३९ ॥
राजसे (२) बहुधा देव लोकानां प्रभवाव्ययः।
आदित्या वसवो रुद्रा मरुतश्चाश्विनौसुतौ ॥ ४० ॥
साध्या विद्याधरा नागाश्चारणाश्च तपोधनाः।
वालखिल्या महात्मानस्तपःसिद्धाश्च सुव्रताः ॥ ४१ ॥
त्वत्तः प्रसूता देवेश ये चान्ये नियतव्रताः।
उमा सीता सिनीवाली कुहूर्गायत्रिरेव च ॥ ४२ ॥
लक्ष्मीः कीर्त्तिर्धृतिर्मेधा लज्जा चान्तिर्वपुः स्वधा।
तुष्टिः पुष्टिः क्रिया चैव वाचां देवी (३) सरस्वती।
त्वत्तः प्रसूता देवेश सन्ध्या रात्रिस्तथैव च ॥ ४३ ॥

सूर्य्यायुतानामयुतप्रभा च
नमोऽस्तु ते चन्द्रसहस्रगोचर।
नमोऽस्तु ते पर्व्वतरूपधारिणे
नमोऽस्तु ते सर्व्वगुणाकराय ॥ ४४ ॥
नमोऽस्तु ते पट्टिशरूपधारिणे
नमोऽस्तु ते चर्म्मविभूतिधारिणे।
नमोऽस्तु ते रुद्रपिनाकपाणये
नमोऽस्तु ते शायकचक्रधारिणे (४) ॥ ४५ ॥

१ लोकान सर्व्वान् प्रकाशस इतिख०। २ रमस इति ख०, ङ०, ट० च।
३ या च देवीति ट०। ४ शायकचक्रपाणय इति ट०।

नमोऽस्तु ते भस्मविभूषिताङ्ग
नमोऽस्तु ते कामशरीरनाशन।
नमोऽस्तु ते देव हिरण्यवाससे
नमोऽस्तु ते देव हिरण्यवाहवे॥ ४६॥
नमोऽस्तु ते देवहिरण्यरूप
नमोऽस्तु ते देव हिरण्यनाभ।
नमोऽस्तु ते नेत्रसहस्रचित्र
नमोऽस्तु ते देव हिरण्यरेतः॥ ४७॥
नमोऽस्तु ते देव हिरण्यवर्ण
नमोऽस्तु ते देवहिरण्यगर्भ।
नमोऽस्तु ते देव हिरण्यचीर
नमोऽस्तु ते देव हिरण्यदायिने॥ ४८॥
नमोऽस्तु ते देव हिरण्यमालिने
नमोऽस्तु ते देव हिरण्यवाहिने।
नमोऽस्तु ते देव हिरण्यवर्म्मने
नमोऽस्तु ते भैरवनादनादिने॥ ४९॥
नमोऽस्तु ते भैरववेगवेग
नमोऽस्तु ते शङ्कर नीलकण्ठ।
नमोऽस्तु ते दिव्यसहस्रबाहो
नमोऽस्तु ते नर्त्तनवादनप्रिय॥ ५०॥
एवं संस्तूयमानस्तु व्यक्तो भूत्वा महामतिः।
भाति देवो गहायोगी सूर्य्यकोटिसमप्रभः॥ ५१॥
अभिभाष्यस्तदा हृष्टो महादेवो गहेश्वरः।



वक्त्रकोटिसहस्रेण ग्रसमान इवापरं॥ ५२॥
एकग्रीवस्त्वेकजटो नानाभूषणभूषितः।
नानाचित्रविचित्राङ्गः (१) नानामाल्यानुलेपनः॥ ५३॥
पिनाकपाणिर्भगवान् वृषभासनशूलधृक् (२)।
दण्डकृष्णाजिनधरः कपाली घोररूपधृक्॥ ५४॥
व्यालयज्ञोपवीती च सुरानामभयङ्करः।
दुन्दुभिस्वननिर्घोषपर्जन्यनिनदोपमः।
मुक्तो हासस्तदा तेन नभः सर्व्वमपूरयत्॥ ५५॥
तेन शब्देन महता वयं भीता महात्मनः।
तदोवाच महायोगी प्रीतोऽहं सुरसत्तमौ॥ ५६॥
पश्येताञ्च महामायां भयं सर्व्वं प्रमुच्यतां।
युवां प्रसूतौ गात्रेषु मम पूर्व्वमनातनौ॥ ५७॥
अयं मे दक्षिणो बाहुर्ब्रह्मा लोकपितामहः।
वामो बाहुश्च मे विष्णुर्नित्यं युद्धेषु तिष्ठति।
प्रीतोऽहं युवयोः सम्यग्वरं दद्मि यथेप्सितं॥ ५८॥
ततः प्रहृष्टमनसौ प्रणतौ पादयोः पुनः।
ऊचतुश्च महात्मानौ पुनरेव तदानघौ॥ ५९॥
यदि प्रीतिः समुत्पन्ना यदि देयो वरश्च नौ।
भक्तिर्भवतु नौ नित्यं त्वयि देव सुरेश्वर॥ ६०॥
भगवानुवाच। एवमस्तु महाभागौ सृजतां विविधाः प्रजाः।
एवमुक्त्वा स भगवांस्तत्रैवान्तरधीयत॥ ६१॥
एवमेष मयोक्तो वः प्रभावस्तस्य योगिनः।

---

१ नानारत्नविचित्राङ्ग इति ट०। २ पट्टिशासनशूलधृगिति ट०।

तेन सर्व्वमिदं सृष्टं हेतुमात्रा वयन्त्विह॥ ६२ ॥
एतद्वि रूपमज्ञातमव्यक्तं शिवसंज्ञितं।
अचिन्त्यं तददृश्यञ्च पश्यन्ति ज्ञानचक्षुषः॥ ६३ ॥
तस्मै देवाधिपत्याय (१) नमस्कारं प्रयुङ्क्त च।
येन सूक्ष्ममचिन्त्यञ्च पश्यन्ति ज्ञानचक्षुषः॥ ६४ ॥
महादेव नमस्तेऽस्तु, महेश्वर नमोऽस्तु ते।
सुरासुरवर श्रेष्ठ मनोहंस नमोऽस्तु ते॥ ६५ ॥
सूत उवाच। एतच्छ्रुत्वा गताः सर्व्वे सुराः स्वं स्वं निवेशनं।
नमस्कारं प्रयुञ्जानाः शङ्कराय महात्मने॥ ६६ ॥
इमं स्तवं पठेद्यस्तु ईश्वरस्य महात्मनः।
कामांश्च लभते सर्व्वान् पापेभ्यस्तु विमुच्यते॥ ६७ ॥
एतत्सर्व्वं सदा तेन विष्णुना प्रभविष्णुना।
महादेवप्रसादेन उक्तं ब्रह्म सनातनं।
एतद्वः सर्व्वमाख्यातं मया माहेश्वरं बलं॥ ६८ ॥

इति श्रीमहापुराणे वायुप्रोक्ते लिङ्गोद्भवस्तवो नाम
पञ्चपञ्चाशोऽध्यायः।

१ देवाधिदेवायेति ख०॥

# अथ षट्पञ्चाशोऽध्यायः।

———000———

## पितृवर्णनं।

शांशपायन उवाच। अगात्कथममावास्यां मासि मासि दिवं नृपः।
ऐड़ः पुरूरवाः सूत कथं वाऽतर्पयत् पितॄन्॥ १ ॥
सूत उवाच। तस्य चाहं प्रवक्ष्यामि प्रभावं शांशपायन।
ऐड़स्यादित्यसंयोगं सोमस्य च महात्मनः॥ २ ॥
अपांसारमयस्येन्दोः पक्षयोः शुक्लकृष्णयोः।
ह्रासवृद्धी पितृमतः पक्षस्य च विनिर्णयः॥ ३ ॥
सोमाच्चैवामृतप्राप्तिः पितॄणान्तर्पणं तथा।
कव्याग्नेश्चात्तसोमानां पितॄणाञ्चैव दर्शनं॥ ४ ॥
यथा पुरूरवाश्चैड़स्तर्पयामास वै पितॄन्।
एतत्सर्व्वं प्रवक्ष्यामि पर्व्वाणि च यथा क्रमं॥ ५ ॥
यदा तु चन्द्रसूर्य्यौ तौ नक्षत्रेण समागतौ।
अमावास्यान्निवसत एकरात्रैकमण्डले॥ ६ ॥
स गच्छति तदा द्रष्टुं दिवाकरनिशाकरौ।
अमावस्याममावास्यां मातामहपितामहौ।
अभिवाद्य तदा तत्र कालापेक्षः (१) प्रतीक्ष्यते॥ ७ ॥

१ कालावेक्षः इति ख०।

प्रसीदमानात् सोमाच्च पित्र्यं तत्परिस्रवात्।
ऐलः पुरूरवा विद्वान् मासि मासि प्रयत्नतः (१)।
उपास्ते पितृमन्तं तं ससोमं स दिवास्थितः॥ ८॥
द्विलवं कुडुमात्रन्तु ते उभे तु विचार्य्य सः।
सिनीवालीप्रमाणेन सिनीवालीमुपासकः॥ ९॥
कुडुमार्द्धां कलार्द्धेव ज्ञात्वोपास्ते कुहुं पुनः।
स तदा भानुमत्येककालावेत्ती प्रपश्यति॥ १०॥
सुधामृतं कुतः सोमात् प्रस्रवेन्मासतत्त्वये।
दशभिः पञ्चभिश्चैव सुधामृतपरिस्रवैः॥ ११॥
कृष्णपक्षे तदा पीत्वा दुह्यमानं तथांशुभिः।
सद्यः प्रचरता तेन सौम्येन मधुना च सः॥ १२॥
निर्व्वापणार्थं दत्तेन पित्रेण विधिना नृपः।
सुधामृतेन राजेन्द्रस्तर्पयामास वै पितॄन्।
सौम्या वर्हिषदः काव्या अग्निष्वात्तास्तथैव च॥ १३॥
ऋतुरग्निस्तु यः प्रोक्तः स तु संवत्सरो मतः।
जज्ञिरे ह्यृतवस्तस्माद्दृतुभ्यश्चार्त्तवाश्च ये॥ १४॥
आर्त्तवा ह्यर्द्धमासाख्याः पितरो ह्यब्दसूनवः।
ऋतुः पितामहा मासा ऋतुभ्यश्चैवाब्दसूनवः॥ १५॥
प्रपितामहास्तु वै देवाः पञ्चाब्दाः ब्रह्मणः सुताः।
सौम्यास्तु सौम्यजा ज्ञेयाः काव्याः ज्ञेया कवेः सुताः॥ १६॥
उपह्वताः (२) स्मृता देवाः सोमजाः सोमपास्तथा।
आज्यपास्तु स्मृताः काव्यास्तृप्यन्ति पितृजातयः॥ १७॥

१ ततस्तु वै इति ख०। २ उपाह्वना इति ट०।



काव्या वर्हिषदश्चैव अग्निष्वात्ताश्च ते त्रिधा।
गृहस्था ये च यज्वाना ऋतुर्व्वर्हिषदो ध्रुवं॥ १८॥
गृहस्थाश्चापि यज्वाना अग्निष्वात्तास्तथार्त्तवाः।
अष्टकापतयः काव्याः पञ्चाब्दास्तान्निबोधत॥ १९॥
एषां संवत्सरो ह्यग्निः सूर्य्यस्तु परिवत्सरः।
सोम इद्वत्सरः प्रोक्तो वायुश्चैवानुवत्सरः॥ २०॥
रुद्रस्तु वत्सरस्तेषां पञ्चाब्दा ये युगात्मकाः।
लेखाश्चैवोष्मपाश्चैव दिवाकीर्त्याश्च ते स्मृताः॥ २१॥
एते पिबन्त्यमावास्यां मासि मासि सुधां दिवि।
तांस्तेन तर्पयामास यावदासीत् पुरूरवाः॥ २२॥
यस्मात् प्रस्रवते सोमान्मासि मासि निबोधत।
तस्मात् सुधामृतं तद्वै पितॄणां सोमपायिनां॥ २३॥
एवं तदमृतं सौम्यं सुधा च मधु चैव ह।
कृष्णपक्षे यथा चेन्दोः कलाः पञ्चदश क्रमात्॥ २४॥
पिबन्त्यम्बुमयीर्देवास्तयस्त्रिंशत्तु छन्दजाः।
पीत्वा च मासं गच्छन्ति चतुर्दश्यां सुधामृतं॥ २५॥
इत्येवं पीयमानस्तु दैवतैश्च निशाकरः।
समागच्छदमावास्यां भागे पञ्चदशे स्थितः॥ २६॥
सुषुम्नाप्यायितश्चैव अमावास्यां यथाक्रमं।
पिबन्ति दिकलं कालं पितरस्ते सुधामृतं॥ २७॥
ततः पीतक्षये सोमे सूर्य्योऽसावेकरश्मिना।
आप्याययत्सुषुम्नेन पितॄणां सोमपायिनां॥ २८॥
निःशेषायां कलायान्तु सोममाप्याययत् पुनः।

सुषुम्णाप्यायमानस्य भागं भागमहःक्रमात्।
कलाः क्षीयन्ति ताः कृष्णाः शुक्लाश्चाप्याययन्ति च ॥२८॥
एवं सूर्य्यस्य वीर्य्येण चन्द्रस्याप्यायिता तनुः।
दृश्यते पौर्णमास्यां वै शुक्लः सम्पूर्णमण्डलः।
संसिद्धिरेवं सोमस्य पक्षयोः शुक्लकृष्णयोः॥ ३०॥
इत्येषः पितृमान् सोमः स्मृत इडाक्षरः क्रमात्।
क्रान्तः पञ्चदशैः सार्द्धं सुधामृतपरिस्रवैः॥ ३१॥
अतः पर्व्वाणि वक्ष्यामि पर्व्वणां सन्धयस्तथा।
ग्रन्थिमन्ति यथा पर्व्वाण्योषधीर्वेणवो भवन्त्युत॥ ३२॥
तथार्द्धमासपर्व्वाणि शुक्लकृष्णानि वै विदुः।
पूर्णमावास्ययोर्भेदैर्ग्रन्थिर्या सन्धयश्च वै (१)।
अर्द्धमासास्तु पर्वाणि तृतीयाप्रभृतीनि तु॥ ३३॥
अग्नाधानक्रिया यस्मात् क्रियते पर्व्वसन्धिषु।
सायाह्ने प्रतिपच्चैव स कालः पौर्णमासिकः॥ ३४॥
व्यतीपाते स्थिते सूर्य्ये लेखोर्द्धन्तु युगान्तरे।
युगान्तरोदिते चैव लेखोर्द्धं शशिनः क्रमात्॥ ३५॥
पौर्णमासे व्यतीपाते यदीक्षेते परस्परम्।
यस्मिन् काले स सीमान्ते स व्यतीपात एव तु॥ ३६॥
कालं सूर्य्यस्य निर्द्देशं दृष्ट्वा संख्या तु सर्पति।
स वै पथं क्रियाकालः कालात्सद्यो विधीयते॥ ३७॥
पूर्णेन्दोः पूर्णपक्षे तु रात्रिसन्धिषु पूर्णिमा।
यस्मात्तामनुपश्यन्ति पितरो दैवतैः सह।

१ पौर्णमास्यामावास्यां भिदैर्या ग्रन्थिसन्धय इति ख०।



तस्मादनुमतिर्नाम पूर्णिमा प्रथमा स्मृता॥ ३८॥
अत्यर्थं भ्राजते यस्मात् पौर्णमास्यान्निशाकरः।
रश्मिनाचैव चन्द्रस्य राकेति कवयो विदुः॥ ३९॥
अमा वसेतामृक्षे तु यदा चन्द्रदिवाकरौ।
एकां पञ्चदशीं रात्रिममावास्या ततःस्मृता॥ ४०॥
ततोऽपरस्य तैर्व्यक्तः पौर्णमास्यां निशाकरः।
यदीक्षते व्यतीपाते दिवा पूर्णं परस्परं।
चन्द्रार्कावपराह्णे तु पूर्णात्मानौ तु पूर्णिमा॥ ४१॥
विच्छिन्नां तामावास्यां पश्यतश्च समागतौ।
अन्योन्यं चन्द्रसूर्य्यौ तौ यदा तदर्श उच्यते॥ ४२॥
द्वौ द्वौ लवावमावास्यां यः कालः पर्व्वसन्धिषु।
द्व्यक्षरं कुडुमात्रन्तु एवं कालस्तु स स्मृतः।
नष्टचन्द्राप्यमावास्या मध्यसूर्य्येण सङ्गता (१)॥ ४३॥
दिवसार्द्धेन रात्र्यर्द्धं सूर्य्यं प्राप्य तु चन्द्रमाः।
सूर्य्येण सहसा मुक्तिं गत्वा प्रातस्तनोत्सवौ (२)।
द्वौ कालौ सङ्गमश्चैव मध्याह्ने निष्पतेद्रविः॥ ४४॥
प्रतिपक्कुक्लपक्षस्य चन्द्रमाः सूर्य्यमण्डलात्।
निर्मुच्यमानयोर्मध्ये तयोर्मण्डलयोस्तु वै॥ ४५॥
स तदा ह्याहुतेः कालो दर्शस्य च वषट्क्रिया।
एतद्दृतुमुखं ज्ञेयममावास्यास्य पर्व्वणः॥ ४६॥
दिवा पर्व्वण्यमावास्यां क्षीणेन्दौ बहुले तु वै।

१ मध्याह्नात् संप्रवर्त्तत इति ख०।
२ पाठोऽयं चादर्शपुस्तको मुद्रितः परन्त्वस्मिन् पाठे न पूर्व्वपाठसङ्गतिरिति।

तस्माद्दिवा ह्यमावास्यां गृह्यतेऽसौ दिवाकरः।
गृह्यते वै दिवा ह्यस्मादमावास्यां दिविज्ञयैः॥ ४७॥
कलानामपि वै तासां बहुमान्याजड़ात्मकैः।
तिथीनां नामधेयानि विद्वद्भिः संज्ञितानि वै॥ ४८॥
दर्शयेतामथान्योन्यं सूर्य्याचन्द्रमसावुभौ।
निष्क्रामत्यथ तेनैव क्रमशः सूर्य्यमण्डलात्॥ ४९॥
दिलवेन ह्यहोरात्रं भास्करं स्पृशते शशी।
स तदा ह्याहुतेः कालो दर्शस्य च वषट्क्रिया॥ ५०॥
कुहेति कोकिलेनोक्तो यः कालः परिचिह्नितः।
तत्कालसंज्ञिता यस्मादमावास्या कुहुः स्मृता॥ ५१॥
सिनीवालीप्रमाणेन क्षीणशेषो निशाकरः।
अमावास्यां विशत्यर्कं सिनीवाली ततः स्मृता॥ ५२॥
पर्व्वणः पर्व्वकालस्तु तुल्यो वै तु वषट्क्रिया।
चन्द्रसूर्य्यव्यतीपाते उभे ते पूर्णिमे स्मृते॥ ५३॥
प्रतिपत्पञ्चदश्योश्च पर्व्वकालो द्विमात्रकः।
कालः कुहुसिनीवाल्योः समुद्रो दिलवः स्मृतः॥ ५४॥
अर्काग्निमण्डले सोमे पर्व्वकालः कलाश्रयः।
एवं स शुक्लपक्षो वै रजन्याः पर्व्वसन्धिषु॥ ५५॥
संपूर्णमण्डलः श्रीमान् चन्द्रमा उपरज्यते (१)।
यस्मादाप्यायते सोमः पञ्चदश्यान्तु पूर्णिमा॥ ५६॥
दशभिः पञ्चभिश्चैव कलाभिर्दिवसक्रमात्।
तस्मात्कला पञ्चदशी सोमे नास्ति तु षोड़शी।

१ उपपाद्यत इति ख०।



तस्मात्सोमस्य भवति पञ्चदश्यां महाक्षयः॥ ५७॥
इज्येते पितरो देवाः सोमपाः सोमवर्द्धनाः।
आर्त्तवा ऋतवो यस्मात्ते देवा भावयन्ति च॥ ५८॥
अतः पितॄन् प्रवक्ष्यामि मासश्राद्धभुजस्तु ये।
तेषां गतिञ्च सत्त्वञ्च गतिं श्राद्धस्य चैव हि॥ ५९॥
न मृतानाङ्गतिः शक्या विज्ञातुं पुनरागतिः।
तपसापि प्रसिद्धेन किं पुनर्मांसचक्षुषा॥ ६०॥
श्राद्धदेवान् पितॄनेतान् पितरो लौकिकाः स्मृताः।
देवाः सोम्याश्च जज्ञानः सर्वे चैव ह्ययोनिजाः॥ ६१॥
देवास्ते पितरः सर्व्वे देवास्तान् भावयन्त्युत।
मनुष्याः पितरश्चैव तेभ्योन्ये लौकिकाः स्मृताः॥ ६२॥
पिता पितामहश्चैव तथैव प्रपितामहः।
यज्वानो ये तु सोमेन सोमवन्तस्तु ते स्मृताः॥ ६३॥
ये यज्ञानः स्मृतास्तेषां ते वै बर्हिषदः स्मृताः।
कर्म्मस्ते तेषु युक्तास्ते तृप्यन्त्यादेहसम्भवात्॥ ६४॥
अग्निष्वात्ताः स्मृतास्तेषां होमिनो याज्ययाजिनः।
ये वाप्याश्रमधर्म्मेण प्रस्थानेषु व्यवस्थिताः॥ ६५॥
अन्ते च नैव सीदन्ति श्रद्धायुक्तेन कर्म्मणा।
ब्रह्मचर्य्येण तपसा यज्ञेन प्रजया च वै॥ ६६॥
श्रद्धया विद्यया चैव प्रदानेन च सप्तधा।
कर्म्मस्वेतेषु ये युक्ता भवन्त्यादेहपातनात्॥ ६७॥
देवैस्तैः पितृभिः सार्द्धं सूक्ष्मकैः सोमपायकैः।
स्वर्गता दिवि मोदन्ते पितृमन्तमुपासते॥ ६८॥

प्रजावतां प्रशंसैव स्मृता सिद्धा क्रियावतां।
तेषां निवापदत्तान्नं तत्कुलीनैश्च बान्धवैः ॥ ६९ ॥
मासं श्राद्धभुजस्तृप्तिं लभन्ते सोमलौकिकाः।
एते मनुष्याः पितरो मासि श्राद्धभुजस्तु ते ॥ ७० ॥
तेभ्योऽपरे तु ये चान्ये सङ्कीर्णाः कर्म्मयोनिषु।
भ्रष्टाश्चाश्रमधर्म्मेभ्यः स्वधास्वाहाविवर्जिताः ॥ ७१ ॥
भिन्नदेहा दुरात्मानः प्रेतभूता यमक्षये।
स्वकर्म्माण्येव शोचन्ति यातनास्थानमागताः ॥ ७२ ॥
दीर्घायुषोऽतिशुष्काश्च विवर्णाश्च (१) विवाससः।
क्षुत्पिपासापरीताश्च विद्रवन्ति इतस्ततः ॥ ७३ ॥
सरित्सरस्तडागानि वापीश्चैव जलेशयाः।
परान्नानि च लिप्सन्ते क्रम्यमानास्ततस्ततः ॥ ७४ ॥
स्थानेषु पाच्यमानाश्च यातायातेषु तेषु वै।
शाल्मली वैतरण्याञ्च कुम्भीपाकेषु तेषु च ॥ ७५ ॥
करम्भवालुकायाञ्च असिपत्रवने तथा।
शिलासम्पेषणे चैव पात्यमानाः स्वकर्म्मभिः ॥ ७६ ॥
तत्र स्थानानि तेषां वै दुःखानामप्यनाकवत्।
तेषां लोकान्तरस्थानां विविधैर्नामगोत्रतः ॥ ७७ ॥
भूम्यापसव्यदर्भेषु दत्त्वा पिण्डत्रयन्तु वै।
पतितांस्तर्पयन्ते च प्रेतस्थानेष्वधिष्ठिताः ॥ ७८ ॥
अप्राप्ता यातनास्थानं सृष्टा ये भुवि पञ्चधा।
पञ्चादिस्थावरान्तेषु भूतानां तेषु कर्म्मसु ॥ ७९ ॥

१ श्मश्रुलाश्चेति ख०।



नानारूपासु जातीषु (१) तिर्य्यग्योनिषु जातिषु।
यदाहारा भवन्त्येते तासु तास्विह योनिषु।
तस्मिंस्तस्मिंस्तदाहारं श्राद्धदत्तोपतिष्ठति (२) ॥ ८० ॥
काले न्यायागतं पात्रं विधिना प्रतिपादितं।
प्राप्नोत्यन्नं यथादत्तं बन्धुर्यत्रावतिष्ठते ॥ ८१ ॥
यथा गोषु प्रनष्टासु वत्सो विन्दति मातरं।
तथा श्राद्धे तदिष्टानां मन्त्रः प्रापयते पितॄन् ॥ ८२ ॥
एवं ह्यविकलं श्राद्धं श्राद्धदत्तन्तु मन्त्रतः।
सनत्कुमारः प्रोवाच पश्यन् दिव्येन चक्षुषा।
गतागतिज्ञः प्रेतानां प्राप्तश्राद्धस्य चैव हि ॥ ८३ ॥
वह्नीकाश्मोषपाश्चैव दिवाकीर्त्याश्च ते स्मृताः।
कृष्णपक्षस्वहस्तेषां शुक्लः स्नप्राय शर्व्वरी ॥ ८४ ॥
इत्येते पितरो देवा देवाश्च पितरश्च वै।
ऋतार्त्तवा अनेके तु अन्योन्यपितरः स्मृताः ॥ ८५ ॥
एते तु पितरो देवा मानुषाः पितरश्च ये।
प्रीतेषु तेषु प्रीयन्ते श्राद्धयुक्तेन कर्म्मणा ॥ ८६ ॥
इत्येवं पितरः प्रोक्ताः पितॄणां सोमपायिनां।
एतत्पितृमतत्वं हि पुराणे निश्चयो मतः ॥ ८७ ॥
इत्यर्कपितृसोमानां ऐलस्य च समागमः।
सुधामृतस्य चावाप्तिः पितॄणाञ्चैव तर्पणं ॥ ८८ ॥
पूर्णिमावास्ययोः कालः पितॄणां स्थानमेव च।
समामात्कीर्त्तितस्त्वभ्यमेष सर्गः सनातनः ॥ ८९ ॥

१ दीर्घईकारान्तपाठ आर्षः। २ पाठोऽयं न समीचीनत्वेन प्रतिभाति।

वैश्वरूप्यन्तु सर्व्वस्य कथितञ्चैकदेशिकं ।
न शक्यं परिसंख्यातुं अद्वेयं भूतिमिच्छता ॥ ८० ॥
स्वायम्भुवस्य ह्येष (१) सर्गः क्रान्तो मयाच वै ।
विस्तरेणानुपूर्व्या च भूयः किं वर्णयाम्यहं ॥ ८१ ॥

इति श्रीमहापुराणे वायुप्रोक्ते पितृवर्णनं नाम
षट्पञ्चाशोऽध्यायः ।

---

१ स्वायम्भुवेऽन्तरे पूर्व्वं इति ख०।

# अथ सप्तपञ्चाशोऽध्यायः ।

———000———

## यज्ञवर्णनं ।

ऋषय ऊचुः । चतुर्युगानि यान्यासन् पूर्व्वं स्वायम्भुवेऽन्तरे ।
तेषां निसर्गं तत्त्वञ्च श्रोतुमिच्छामि विस्तरात् ॥ १ ॥
सूत उवाच । पृथिव्यादिप्रसङ्गेन यन्मया प्रागुदाहृतं ।
तेषाञ्चतुर्युगं ह्येतत् प्रवक्ष्यामि निबोधत ॥ २ ॥
संख्यायेह प्रसंख्याय विस्ताराच्चैव सर्व्वशः ।
युगञ्च युगभेदञ्च युगधर्म्मान्तथैवच ॥ ३ ॥
युगसन्ध्यांशकञ्चैव युगसन्धानमेव च ।
षट्प्रकारयुगाख्यानां प्रवक्ष्यामीह तत्त्वतः ॥ ४ ॥
लौकिकेन प्रमाणेन विबुद्धोऽब्दस्तु मानुषः ।
तेनाब्देन प्रसंख्याय वक्ष्यामीह चतुर्युगं ॥ ५ ॥
निमेषकालः काष्ठा च कलाप्यपि मुहूर्त्तकाः ।
निमेषकालतुल्यं हि विद्याल्लघुत्वरञ्च यत् ॥ ६ ॥
काष्ठा निमेषा दश पञ्च चैव
त्रिंशच्च काष्ठा गणयेत् कलास्ताः ।
त्रिंशत् कलाश्चैव भवेन्मुहूर्त्ता-
स्तत्त्रिंशता रात्र्यहनी समेते ॥ ७ ॥
अहोरात्रे विभजते सूर्य्यो मानुषदैविके ।

तत्राहः कर्म्मचेष्टायां रात्रिः स्वप्नाय कल्पते ॥ ८ ॥
पित्र्ये रात्र्यहनी मासः प्रविभागस्तयोः पुनः।
कृष्णपक्षस्त्वहस्तेषां शुक्लः स्वप्नाय शर्व्वरी ॥ ९ ॥
त्रिंशच्च मानुषा मासाः पित्र्यो मासश्च स स्मृतः।
शतानि त्रीणि मासानां षष्टिश्चाप्यधिकानि वै।
पित्र्यः संवत्सरो ह्येष मानुषेण विभाव्यते ॥ १० ॥
मानुषेणैव मानेन वर्षाणां यच्छतं भवेत्।
पितॄणां त्रीणि वर्षाणि संख्यातानीह तानि वै।
चत्वारश्चाधिका मासाः पित्र्ये चैवेह कीर्त्तिताः ॥ ११ ॥
लौकिकेनैव मानेन अब्दो यो मानुषः स्मृतः।
एतद्दिव्यमहोरात्रं शास्त्रेऽस्मिन् निश्चयो मतः ॥ १२ ॥
दिव्ये रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः।
अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनं ॥ १३ ॥
ये ते रात्र्यहनी दिव्ये प्रसंख्याते तयोः पुनः।
त्रिंशच्च तानि वर्षाणि दिव्यो मासस्तु स स्मृतः ॥ १४ ॥
मानुषश्च शतं विद्धि दिव्यमासास्त्रयस्तु ते।
दश चैव तथाहानि दिव्यो ह्येष विधिः स्मृतः ॥ १५ ॥
त्रीणि वर्षशतान्येव षष्टिवर्षाणि यानि च।
दिव्यः संवत्सरो ह्येष मानुषेण प्रकीर्त्तितः ॥ १६ ॥
त्रीणि वर्षसहस्राणि मानुषेण प्रमाणतः।
त्रिंशद्यानि तु वर्षाणि मतः सप्तर्षिवत्सरः ॥ १७ ॥
नव यानि सहस्राणि वर्षाणां मानुषाणि तु।
अन्यानि नवतिश्चैव त्रीच्चः संवत्सरः स्मृतः ॥ १८ ॥



षट्त्रिंशत्तु सहस्राणि वर्षाणां मानुषाणि तु।
वर्षाणान्तु शतं ज्ञेयं दिव्यो ह्येष विधिः स्मृतः ॥ १९ ॥
त्रीण्येव नियुतान्येव वर्षाणां मानुषाणि च।
षष्टिश्चैव सहस्राणि संख्यातानि तु संख्यया।
दिव्यवर्षसहस्रन्तु प्राहुः संख्याविदो जनाः ॥ २० ॥
इत्येवमृषिभिर्गीतं दिव्यया संख्ययान्वितं।
दिव्येनैव प्रमाणेन युगसंख्याप्रकल्पनं ॥ २१ ॥
चत्वारि भारते वर्षे युगानि कवयो विदुः।
पूर्व्वं कृतयुगं नाम ततस्त्रेता विधीयते।
द्वापरञ्च कलिश्चैव युगान्येतानि कल्पयेत् ॥ २२ ॥
चत्वार्याहुः सहस्राणि वर्षाणान्तु कृतं युगं।
तच्च तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥ २३ ॥
इतरासु च सन्ध्यासु सन्ध्यांशेषु च वै त्रिषु।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च ॥ २४ ॥
त्रेता त्रीणि सहस्राणि संख्यैव परिकीर्त्यते।
तस्यास्तु त्रिशती सन्ध्या सन्ध्यांशश्च तथाविधः ॥ २५ ॥
द्वापरं द्वे सहस्रे तु युगमाहुर्मनीषिणः।
तस्यापि द्विशती सन्ध्या सन्ध्यांशः सन्ध्यया समः ॥ २६ ॥
कलिं वर्षसहस्रन्तु युगमाहुर्मनीषिणः।
तस्याप्येकशती सन्ध्या सन्ध्यांशः सन्ध्यया समः ॥ २७ ॥
एषा द्वादशसाहस्री युगाख्या परिकीर्त्तिता।
कृतत्रेता द्वापरश्च कलिश्चैव चतुष्टयं ॥ २८ ॥
अत्र संवत्सराः सृष्टा मानुषेण प्रमाणतः।

कृतस्य तावद्वक्ष्यामि वर्षाणां तत्प्रमाणतः ॥ २९ ॥
सहस्राणां शतान्यत्र चतुर्दश तु संख्यया ।
चत्वारिंशत् सहस्राणि कलिकालयुगस्य तु ॥ ३० ॥
एवं संख्यातकालस्य कालेष्विह विशेषतः ।
एवं चतुर्युगः कालो विना सन्ध्यांशकैः स्मृतः ॥ ३१ ॥
चत्वारिंशत्त्रीणि चैव नियुतानि च संख्यया ।
विंशतिश्च सहस्राणि ससन्ध्यांशश्चतुर्युगः ॥ ३२ ॥
एवं चतुर्युगाख्या तु साधिका ह्येकसप्ततिः ।
कृतत्रेतादियुक्ता सा मनोरन्तरमुच्यते ॥ ३३ ॥
मन्वन्तरस्य संख्या तु वर्षाग्रेण निबोधत ।
त्रिंशत्कोट्यस्तु वर्षाणां मानुषेण प्रकीर्तिताः ॥ ३४ ॥
सप्तषष्टिस्तथान्यानि नियुतान्यधिकानि तु ।
विंशतिश्च सहस्राणि कालोऽयं साधिकां विना ॥ ३५ ॥
मन्वन्तरस्य संख्यैषा संख्याविद्भिर्द्विजैः स्मृता ।
मन्वन्तरस्य कालोऽयं युगैः सार्द्धं प्रकीर्तितः ॥ ३६ ॥
चतुःसहस्रयुक्तं वै प्रथमन्तत् कृतं युगं ।
त्रेतावशिष्टं वक्ष्यामि द्वापरं कलिमेव च ॥ ३७ ॥
युगपत्समवेतार्थौ द्विधा वक्तुं न शक्यते ।
क्रमागतं मया ह्येतत्तुभ्यं प्रोक्तं युगद्वयं ।
ऋषिवंशप्रसङ्गेन व्याकुलत्वात्तथैव च ॥ ३८ ॥
तत्र त्रेतायुगस्यादौ मनुः सप्तर्षयश्च ते ।
श्रौतं स्मार्त्तं च धर्म्मञ्च ब्रह्मणा च प्रचोदितं ॥ ३९ ॥
दाराग्निहोत्रसंयोगमृग्यजुःसामसंज्ञितं ।



इत्यादिलक्षणं श्रौतं धर्म्मं सप्तर्षयोऽब्रुवन् ॥ ४० ॥
परम्परागतं धर्म्मं स्मार्त्तञ्चाचारलक्षणं ।
वर्णाश्रमाचारयुतं मनुः स्वायम्भुवोऽब्रवीत् ॥ ४१ ॥
सत्येन ब्रह्मचर्य्येण श्रुतेन तपसा च वै ।
तेषां सुतप्ततपसामार्षेयेण क्रमेण तु ॥ ४२ ॥
सप्तर्षीणां मनोश्चैव आद्ये त्रेतायुगस्य तु ।
अबुद्धिपूर्व्वकं तेषामक्रियापूर्व्वमेव च ॥ ४३ ॥
अभिव्यक्तास्तु ते मन्वास्तारकाद्यैर्निदर्शनैः ।
आदिकल्पे तु देवानां प्रादुर्भूतास्तु ते स्वयं ॥ ४४ ॥
प्रणाशे (१) त्वथ सिद्धीनामभ्यासाच्च प्रवर्तनं ।
आसन् मन्वा व्यतीतेषु ये कल्पेषु सहस्रशः ।
ते मन्वा वै पुनस्तेषां प्रतिभाससमुत्थिताः ॥ ४५ ॥
ऋचो यजूंषि सामानि मन्त्राश्चाथर्व्वणानि च ।
सप्तर्षिभिस्तु ते प्रोक्ताः स्मार्तं धर्म्मं मनुर्जगौ ॥ ४६ ॥
त्रेतादौ संहिता वेदाः केवला धर्म्मशेषतः ।
संरोधादायुषश्चैव व्यस्यन्ते द्वापरेषु ते ॥ ४७ ॥
ऋषयस्तपसा देवाः कलौ च द्वापरेषु वै ।
अनादिनिधना दिव्याः पूर्व्वं सृष्टाः स्वयम्भुवा ॥ ४८ ॥
सधर्म्माः सप्रजाः साङ्गा यथाधर्म्मं युगे युगे ।
विक्रीड़न्ते समानार्था वेदवादा यथायुगं ॥ ४९ ॥
आरम्भयज्ञाः क्षत्रस्य हविर्यज्ञा विशाम्पतेः ।
परिचारयज्ञाः शूद्रास्तु जपयज्ञा द्विजोत्तमाः ॥ ५० ॥

---

(१) पाठोऽयं न समीचीनः ।

तथा प्रमुदिता वर्णास्त्रेतायां धर्म्मपालिताः।
क्रियावन्तः प्रजावन्तः समृद्धाः सुखिनस्तथा॥ ५१॥
ब्राह्मणाननुवर्तन्ते क्षत्रियाः क्षत्रियान् विशः।
वैश्यानुवर्तिनः शूद्राः परस्परमनुव्रताः॥ ५२॥
शुभाः प्रवृत्तयस्तेषां धर्म्मा वर्णाश्रमास्तथा।
सङ्कल्पितेन मनसा वाचोक्तेन स्वकर्म्मणा।
त्रेतायुगे त्वविकलाः कर्म्मारम्भाः प्रसिध्यति॥ ५३॥
आयुर्म्मेधा बलं रूपमारोग्यं धर्म्मशीलता।
सर्व्वसाधारणा ह्येते त्रेतायां वै भवन्त्युत॥ ५४॥
वर्णाश्रमव्यवस्थानं तेषां ब्रह्मा तथाऽकरोत्।
पुनः प्रजास्तु ता मोहात्तान् धर्म्मान्न ह्यपालयन्॥ ५५॥
परस्परविरोधेन मनुत्वाः पुनरन्वयुः।
मनुः स्वायम्भुवो दृष्ट्वा याथातथ्यं प्रजापतिः॥ ५६॥
धात्वा तु शतरूपायाः पुमान् स उदपादयत्;
प्रियव्रतोत्तानपादौ प्रथमन्तौ महीपतौ॥ ५७॥
ततः प्रभृति राजान उत्पन्ना दण्डधारिणः।
प्रजानां रञ्जनाच्चैव राजानस्त्वभवन्नृपाः॥ ५८॥
प्रच्छन्नपापा ये जेतुमशक्या मनुजा भुवि।
धर्म्मसंस्थापनार्थाय तेषां शास्त्रे तपो मया॥ ५९॥
वर्णानां प्रविभागाश्च त्रेतायां संप्रकीर्तिताः।
संहिताश्च ततो मन्त्रा ऋषिभिर्ब्राह्मणैस्तु ते॥ ६०॥
यज्ञः प्रवर्तितश्चैव तदा ह्योन्तु दैवतैः।
यामैः शुक्लैर्जपैश्चैव सर्व्वसम्भारसंवृतैः॥ ६१॥


LIST OF BOOKS FOR SALE
AT THE LIBRARY OF THE
ASIATIC SOCIETY OF BENGAL,
*No. 57, Park Street, Calcutta,*
AND OBTAINABLE FROM
THE SOCIETY'S LONDON AGENTS, MESSRS. TRUBNER & Co.,
57 AND 59, LUDGATE HILL, LONDON, E. C.

BIBLIOTHECA INDICA.
*Sanskrit Series.*

| | | | | | |
|---|---|---|---|---|---|
| aitanya-chandrodaya, Nátaka, 3 fasci. | .. | ... | Rs. | 1 | 14 |
| rauta Sútra, A'śvaláyana, 11 fasci. ... | .. | ... | ... | 6 | 14 |
| ——— Látyáyana, 9 fasci. .. | .. | ... | ... | 5 | 10 |
| ankara Vijaya, 3 fasci. .. ... | ... | .. | ... | 1 | 14 |
| śá-rúpa, 3 fasci. .. .. ... | .. | ... | ... | 1 | 14 |
| ushitaki Bráhmánopanishad, 2 fasci. | ... | .. | ... | 1 | 4 |
| ankhya-sára, 1 fasci. ... .. | .. | ... | ... | 0 | 10 |
| alita-vistara, 6 fasci. ... .. | .. | .. | ... | 3 | 12 |
| aittiríya Bráhmaṇa, 24 fasci. ... | ... | ... | .. | 15 | 0 |
| ittiríya Sañhitá, 31 fasci. ... | ... | ... | ... | 19 | 6 |
| tiríya A'raṇyaka, 11 fasci. | ... | .. | ... | 6 | 14 |
| rt Upanishad, 3 fasci. ... | ... | ... | ... | 1 | 14 |
| ṛvaláyana Grihya Sútra, 4 fasci. | ... | ... | .. | 2 | 8 |
| imáñsá Darsana, 14 fasci. .. | .. | ... | ... | 8 | 12 |
| ndya Bráhmaṇa, 19 fasci. ... | .. | ... | ... | 11 | 14 |
| patha Bráhmaṇa, 2 fasci. ... | .. | ... | ... | 1 | 4 |
| harvaṇa Upanishads, 5 fasci. | .. | ... | ... | 3 | 2 |
| ni Puráṇa, 14 fasci. ... | .. | ... | .. | 8 | 12 |
| ma Veda Sañhitá, 37 fasci. | ... | .. | .. | 23 | 2 |
| pála Tápaní, 1 fasci. .. | ... | ... | .. | 0 | 10 |
| isiñha Tápaní, 3 fasci. ... | ... | .. | .. | 1 | 14 |
| aturvarga Chintámaṇi, 35 fasci. | ... | ... | ... | 21 | 14 |
| bhilíya Grihya Sútra, 10 fasci. | ... | .. | .. | 6 | 4 |
| ingala Chhandah Sútra, 3 fasci. | . | ... | ... | 1 | 14 |
| aittiríya Prátiśákhya, 3 fasci. | .. | ... | ... | 1 | 14 |
| rithiráj Rásu, by Chand Bardai, 4 fasci. | | ... | ... | 2 | 8 |
| ijatarangini, ... ... .. | | ... | .. | 4 | 4 |
| hábhárata, vols. III. and IV., | ... | ... | .. | 40 | 0 |
| uráṇa Sangraha ... ... | ... | ... | ... | 1 | 0 |
| ali Grammar, 2 fasci. .. | ... | ... | .. | 1 | 4 |
| Aitareya A'raṇyaka of the Rig Veda, 5 fasci. | | ... | .. | 3 | 2 |
| Chhándogya Upanishad, English, 2 fasci. | | ... | .. | 1 | 4 |
| Sáṅkhya Aphorisms, English, 2 fasci. ... | | .. | .. | 1 | 4 |
| Sáhitya Darpaṇa, English, 4 fasci. .. | | .. | ... | 2 | 8 |
| Brahma Sútra, English, .. .. | | ... | .. | 1 | 0 |
| Kátantra, 6 fasci. .. ... | ... | ... | ... | 6 | 0 |
| Kámandakíya Nítisára, 4 fasci. (Fasc. 1, out of stock.) | | ... | ... | 2 | 8 |
| Bhámatí, 7 fasci. ... ... ... | | .. | .. | 4 | 6 |
| Aphorisms of Śándalya, English, 1 fasci. | | ... | .. | 0 | 10 |
| Váyu Puráṇa, 5 fasci. ... .. | | ... | ... | 3 | 2 |

## ARABIC AND PERSIAN SERIES.

| | |
|---|---|
| Dictionary of Arabic Technical Terms, 20 fasci., complete, | Rs. 25 0 |
| Risálah-i Shamsiyah, (Appendix to Do. Do.) .. .. | 1 4 |
| Fihrist Túsí, 4 fasci. .. ... ... ... ... | 3 8 |
| Nukhbat-ul-Fikr, .. ... ... ... ... ... | 0 10 |
| Futúh-ul-Shám. Wáqidí, 9 fasci. .. ... ... ... | 5 10 |
| Futúh-ul-Shám, Azadí, 4 fasci. .. .. ... ... | 2 8 |
| Maghází of Wáqidí, 6 fasci.... ... ... ... ... | 3 2 |
| Isábah, 28 fasci., with supplement, ... .. ... ... | 20 14 |
| Tárikh-i-Fíruz Sháhí, 7 fasci. ... ... ... ... | 4 6 |
| Táríkh-i-Baihágí, complete in 9 fasci. ... ... ... | 5 10 |
| Muntakhab-ut-Tawáríkh, vols. I. II. and III., complete in 15 fasci. | 9 6 |
| Wís o Rámín, 5 fasci. .. .. ... ... ... | 2 3 |
| Iqbálnámah-i-Jahángírí, complete in 3 fasci. ... ... ... | 1 14 |
| 'Alamgírnámah, 13 fasci., with index,... .. ... ... | 8 2 |
| Pádsháhnámah, 19 fasci., with index,.. ... ... ... | 11 14 |
| Muntakhab-ul-Lubáb, by Khálí Khán, 19 fasci., with index, ... | 12 12 |
| Aín-i-A'kbarí, Persian text, 4to., 22 fasci. .. ... ... | 27 8 |
| Ain-i-Akbarí, English translation by H. Blochmann, M. A., vol. I.... | 12 4 |
| Farhang-Rashídí, 14 fasci., complete, ... ... ... | 17 8 |
| Nizámí's Khiradnámah-i-Iskandarí, 2 fasci, complete, ... ... | 2 0 |
| Akbarnámah, 17 fasci. with Index, ... ... ... ... | 20 0 |
| Maásir-i-'Alamgírí, by Muhammad Sáqí, complete 6 fasci, with index, | 3 12 |
| Haft Asmán, history of Persian Masnawís ... ... .. | 1 4 |
| Tabaqát-i-Nácirí, English translation by Raverty, 10 fasci. ... | 10 0 |
| Tabaqát-i-Nácirí, Persian text, 5 fasci. ... ... ... | 3 2 |

## MISCELLANEOUS.

| | |
|---|---|
| Journal of the Asiatic Society of Bengal from vols. XII to XVII, 1843-48, vols XIX to XXI, 1850-52, to Subscribers at Re. 1 per number and to non-subscribers at Re. 1-8 per number; vols. XXVI, XXVII, 1857-58, and vols. XXXIII to XLVII, 1864-78, to Subscribers at 1-8 per number and to non-subscribers at Rs. 2 per number. | |
| Asiatic Researches, vols. VII. to XI. and vols. XVII. to XX. each Rs. | 10 0 |
| Do. do. Index, ... ... .. ... .. | 5 0 |
| Catalogue of Fossil Vertebrata, ... ... .. ... | 2 0 |
| ——— of Arabic and Persian Manuscripts, ... .. .. | 1 0 |
| Tibetan Dictionary, ... ... ... ... ... | 10 0 |
| ——— Grammar,... ... ... ... .. | 8 0 |
| Notices of Sanskrit Manuscripts, 14 fasci. .. ... ... | 14 0 |
| Istiláhát-i-Súfiyah. Edited by Dr. A. Sprenger, 8vo. ... ... | 1 0 |
| Jawámi' ul-'ilm ir-riyází, 168 pages with 17 plates, 4to. .. | 2 0 |
| Aborigines of India, by B. H. Hodgson, .. ... ... | 3 0 |
| Examination and Analysis of the Mackenzie Manuscripts, by the Rev. W. Taylor, .. ... .. ... ... | 2 0 |
| Han Koong Tsew, or the Sorrows of Han, by J. Francis Davis, ... | 1 8 |
| 'Ináyah, a Commentary on the Hidáyah, vols. II. IV., ... .. | 16 0 |
| Analysis of the Sher Chin, by Alexander Csoma de Körös, ... | 1 0 |
| Khazánat-ul-'ilm, .. ... ... ... ... .. | 4 0 |
| Sharáyat-ul-Islám, ... ... ... ... .. ... | 4 0 |
| Anís-ul-Musharrihín, .. ... ... ... ... | 3 0 |
| Catalogue Raisonné of the Society's Sanskrit MSS. No. 1 (Grammar),... | 2 0 |

MAY 15 1933

# BIBLIOTHECA INDICA.


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 445.




वायुपुराणम् ।

# The Váyu Puráṇa:

A SYSTEM OF HINDU MYTHOLOGY AND TRADITION.

EDITED BY


RÁJENDRALÁLA MITRA, LL.D., C.I.E.

FASCICULUS VI.

CALCUTTA.

PRINTED BY T. C. BISWAS, AT THE KALICA PRESS.

1880.



# BIBLIOTHECA INDICA,

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, Nos, 420, 424, 428, 434, 437 AND 445.

---

# The Váyu Puráṇa:

A SYSTEM OF HINDU MYTHOLOGY AND TRADITION.

EDITED BY

RÁJENDRALÁLA MITRA, LL. D., C. I. E.

VOLUME I.

---

**CALCUTTA.**

PRINTED BY T. C. BISWAS, AT THE KÁLIKÁ PRESS.

1880,

# वायुपुराणम् ।

——:o:——

महर्षिवेदव्यासप्रणीतम् ।

——:o:——

श्रीलश्री—

वङ्गदेशीयासियातिक्-सोसाइट्याख्यसमाजानुज्ञया

श्रीराजेन्द्रलालमित्रेण

परिशोधितम् ।

प्रथमखण्डः ।

कलिकातराजधान्यां

कालिकायन्त्रे मुद्रितञ्च ।

संवत् १९३७ ।

# अथ वायुपुराण-प्रथमखण्डानुक्रमणिका।


| अध्याये | विषयः | पृष्ठे |
|---|---|---|
| १ | अनुक्रमनिका ... | १ |
| २ | द्वादशवार्षिकसत्रनिरूपणं | २० |
| ३-४-५-६ | सृष्टिप्रकरणं ... | २८ |
| ७ | प्रतिसर्गकीर्त्तनं ... | ५२ |
| ८ | चतुराश्रमविभागः ... | ६० |
| ९ | देवादिसृष्टिवर्णनं ... | ७९ |
| १० | मन्वन्तरादिवर्णनं ... | ९१ |
| ११ | पाशुपतयोगः ... | १०० |
| १२ | योगोपसर्गाः ... | १०६ |
| १३ | योगैश्वर्य्याणि ... | १११ |
| १४-१५ | पाशुपतयोगः ... | ११४ |
| १६ | शौचाचारलक्षणं ... | ११९ |
| १७ | परमाश्रमप्राप्तिकथनं ... | १२४ |
| १८ | यतिप्रायश्चित्तविधिः ... | १२५ |
| १९ | अरिष्टानि ... ... | १२८ |
| २० | ॐकारप्राप्तिलक्षणं ... | १३२ |
| २१ | कल्पनिरूपणं ... | १३७ |
| १२ | कल्पसंस्थानिरूपणं ... | १४५ |
| २३ | माहेश्वरावतारयोगः ... | १४९ |
| २४ | शार्व्वस्तवं ... ... | १७१ |
| २५ | मधुकैटभोत्पत्तिविनाशवर्णनं | १८८ |
| २६ | स्वरोत्पत्तिः ... ... | १९८ |

| अध्याये | विषयः | पृष्ठे |
|---|---|---|
| २७ | महादेवतनुवर्णनं ... | २०१ |
| २८ | ऋषिवंशानुकीर्त्तनं ... | २०९ |
| २९ | अग्निवंशवर्णनं ... | २२४ |
| ३० | दक्षशापवर्णनं ... | २२० |
| ३१ | देववंशवर्णनं ... ... | २५३ |
| ३२ | युगधर्म्माः ... .. | २६० |
| ३३ | स्वायम्भुववंशवर्णनं ... | २६७ |
| ३४-३५ | जम्बूद्वीपवर्णनं ... | २७४ |
| ३६-३७-३८ | पूर्व्वादिचतुर्दिग्विभागस्थ-शरारेलादिकीर्त्तनं | २९३ |
| ३९ | शैलस्थितविविधदेवताकीर्त्तनं ... ... | ९०५ |
| ४० | हेमकूटपर्व्वतमर्य्यादा कीर्त्तनं ... ... | ३१२ |
| ४१ | कैलासवर्णनं ... | ३१५ |
| ४२ | देवलद्वीपवर्णनं ... | ३२४ |
| ४३-४४ | केतुमालवर्णनं ... | ३३३ |
| ४५ | भारतवर्षवर्णनं ... | ३४० |
| ४६ | किंपुरुषादिवर्षवर्णनं | ३५४ |
| ४७ | भद्राश्वतारवर्णनं ... | ३५८ |
| ४८ | जम्बुद्वीपान्तर्व्वर्त्तिद्वीपवर्णनं ... ... | ३६६ |

| अध्याये | विषयः | पृष्ठे |
|---|---|---|
| ४९ | प्लक्षद्वीपादिवर्णनं ... | ३७१ |
| ५०-५१ | ज्योतिःप्रचारः ... | ३९० |
| ५२ | ध्रुवचर्य्या ... ... | ४१० |
| ५३ | ज्योतिःसन्निवेशः ... | ४११ |
| ५४ | नीलकण्ठस्तवः ... | ४४४ |
| ५५ | लिङ्गोद्भवस्तवः .. | ४५७ |
| ५६ | पित्तवर्णनं ... ... | ४६५ |
| ५७ | यज्ञप्रवर्त्तनं ... | ४७३ |

| अध्याये | विषयः | पृष्ठे |
|---|---|---|
| ५८ | चतुर्युगाख्यानं ... | ४८९ |
| ५९ | ऋषिलक्षणं ... | ५०१ |
| ६० | महास्नानतीर्थवर्णनं ... | ५१३ |
| ६१ | प्रजापतिवंशानुकीर्त्तनं | ५२१ |


# PREFACE.

The plan of publishing a large work in small fasciculi after long intervals, precludes the possibility of inserting the Introduction in its proper place at the beginning of the first volume. At the same time it is desirable that some preliminary account should be given of the materials used in the preparation of the work for the press. I propose, therfore, to confine this Preface to a short description of the codices which have been consulted in settling the text of this,the first,edition of the Váyu Puráṇa, reserving the Introduction, containing an analysis of the work and remarks on its age and character, for the concluding fasciculus.

The Mss. of the work at my disposal are the following:—

क. From the Government of India collection, No 975. Material, paper. Size, 14×5½ inches. Folia, 275. Number of lines on each page, 12. Character, Nágara. Date, 2nd. of the waxing moon in the month of Phálguṇa, Śaka, 1688. Purchased by me at Vîrabhúma. Complete, but very incorrect.

ख. From the Library of Bábu Hitalála Miśra, of Mánakara, Zillah Burdwan. Yellow paper, 20×4¾ inches. Folia, 334. Lines 8 to 9 on each page. Character, Bengali. Date, none, apparently about a hundred years old. Complete, but nearly as incorrect as the last.

ग. From the Library of Mahárája Kamalakṛishṇa, of Calcutta. Yellow Paper, 17×5 inches, Folia, 408. Lines on each page, 7. Character, Bengali. Date, none, apparently of about the same age as the last. Incomplete ; wanting 115 folia at the beginning, and incorrect.

क. From the Library of Queen's College, Benares. Paper, 13×5, inches. Folia, 180. Lines on each page, 9. Nágara. Date, none, about a hundred and fifty years old. Revised, and collated with another MS., the readings of which, where different, are given on the margin. Wanting several leaves at the end, but correct.

ख. From the Library of the Deccan College, Púná. No. VIII of 1874–75. Paper, 11×5 inches. Folia, 408. Lines on each page, 9. Character, Nágara. Date, none. Incomplete, but correct.

ग. From the Library of Rao Sáhib Viśvanátha Náráyaṇa Maṇḍalik, C. S. I. Yellow paper, 13½×7 inches. Folia, 300. Lines on each page, 12. Date, full-moon (Púrṇimá) of Mágha, Samvat 1804. Copied by Práṇanátha. Complete and generally correct. Received after 300 pages of this edition had been printed.

The first is the most incorrect of my texts; but, such as it is, it does not differ materially from the next two. The second and the third correspond very closely, and seem to have been taken from one original. The fourth codex represents the text as current in the North Western Provinces, and is by far the most correct. The fifth and the sixth, from the Western Presidency, correspond pretty closely; but they are not copies of the same original, nor are they so markedly separate in their readings from the Benares text as to indicate a distinct recension. In classifying these texts the first three may be taken to form one group, and the next three another. On the whole, however, the two groups correspond so closely, that it would be misleading to say that they constitute distinct recensions. They are all copies of one original, differing just enough to show that they have undergone the usual corruptions which a long course of copying and recopying under different circumstances renders unavoidable.

Ancient and mediæval Indian exegetes did not tolerate any



eclecticism. They were very particular in preserving the errors of their texts, so as not in any way to injure the authenticity of the originals. As regards the Vedas, the variations resulting from the practice of early chanters were classed under different schools or Śákhás, and, to preclude the possibility of further change, the words were recorded in various arbitrary forms under the names of Kramapáṭha, Jaṭápáṭha &c. The religious feeling which prompted these arrangements, did not apply to works of minor importance; but their commentators were particular in noticing the *varietas lectionis* of their texts, and in pointing out what they thought were apocryphal, or of doubtful authenticity. Modern Indian editors do not, as a rule, follow this practice. They, in a manner, repudiate "various readings." They assume that the original must be one, and the differences observable are merely copyist's errors, which it is their duty to correct. The consequence is, not unoften, a serious tampering with originals; and this is also the cause of the almost invariable absence of critical apparatus in their editions.

Generally speaking, European scholars follow a different course. As in their editions of Greek and Latin texts so in Sanskrit, they reproduce, either in footnotes or in appendixes, all the variations and blunders of the differnt codices they have at command. For critical purposes their practice is unquestionably the best, for it would be intolerable to permit editors to become the arbiters of what really were the original readings of their texts. They are, in the present day, so far removed from the language, habits, customs and surroundings of the authors whose works they edit, that they cannot be too careful in preserving, as far as possible, the materials at command for the proper elucidation of their texts.

European practice, in this respect, however, is not so uniform as to admit of being classed under one head, or to be generally set up as models for the people of this country to copy.

While some European scholars are in favour of an intelligent discrimination between what are different readings and what are mere blunders of copyists, others insist upon a faithful reproduction of even the most obvious and unquestionable mistakes.

The learned Professor Max Müller, the prince of modern Sanskrit editors, belongs to the first class. In the Prefaces to his magnificent edition of the Ṛig Veda, he has discussed at great length the principles which he has followed. Denouncing most vehemently "the mischief done by conjectural criticism of classical scholarship, and deprecating most strongly any countenance given to it by Sanskrit scholars," he sets down the principle—"Let an editor give what there is, and let the commentator and translator say what might be, or what ought to be." He, nevertheless, adds: "it may be truly said that the chief business of modern critics is to cleanse the text of the classics from the improvements introduced by the ingenious editors of the last three centuries, and we ought not to neglect this lesson in preparing our own *editiones principes.*" (V. p. XIX.) The principle by itself is sound enough, but it is open to a grave practical objection, for it involves the question of "restoration" of texts, and opens a wide door to "ingenious editors" of our times to commit the very mischief of "conjectural criticism" which the learned scholar condemns. In carrying out this principle in his work, he says:— "I have not thought it necessary to give all the extraordinary corruptions that have crept into Sáyaṇa's text, particularly when they occurred in passages the wording of which admitted of easy restoration" ( p. XXXVII).

On the other hand, some European Sanskritists, particularly those who are not perfect masters of their subject and are nevertheless conscientious, follow a different rule: they jot down all the blunders they meet with, not excepting printers' mistakes, as *varietas lectionis.* In very ancient, and in archaic, unintelligible, works, such as the Vedas and Chand's poems,



this is ordinarily a safe rule to follow, but, strictly enforced it, results in a Chinese tailor's work, copying patch and all. It cannot lay claim to the credit of intelligent critical editing. In dealing with mediæval Sanskrit works it would be absurd to follow such a rule, except in exceptional cases.

I think the proper rule to follow is what has been laid down by Dr. Max Müller – to give every reading that admits of a meaning, and every blunder in orthography, etymology, or syntax, which is constant, or generally prevailing; but to take no note of what are mere accidental lapses. There are many obvious blunders and lacunæ in Mss. which bear no relation to their authors, and for critical purposes are of no value whatsoever. The manner in which due discrimination is made between what are obvious blunders, and what are doubtful and unquestionable variations, marks the distinction between the critical and the uncritical editor. This is but a trite axiom to notice, but some differences of opinion having arisen in connection with the works published in the 'Bibliotheca Indica,' it is necessary to explain the principles which have been followed by me and some of those who have worked under my advice and guidance.

Variations in Mss. may be classed under six heads; 1, Sentences; 2, Phrases; 3, Words; 4, Spelling; 5, Grammatical concordance; 6, Metre.

(1) A sentence may occupy one place in one MS. and another in a different one, or be present in one, and absent in others. In either case, I think, it is imperative on the editor to record the fact in a footnote. Should the absence occur in an apparently very correct and old MS. and later codices should supply the sentence, the fact is still of sufficient importance to be recorded; but if the absence be noticed in a modern and obviously corrupt text, it would, in my opinion, be a waste of time to take note of it. For my part I have systematically overlooked it.

(2, 3) Differences in phrases and words should always be no-

ted, except when undoubtedly corrupt and unmeaning, and occuring in one or two out of several Mss. In India, with the aid of Paṇdits who are experts in the branch of literature to which the works belong, it is not difficult, in preparing copy for the press, to correct such corruptions, and to restore the texts, and, as long as we have the advantage of Paṇdits who are unrivalled in their knowledge of the works to which they have devoted their lives, it would be a sin and a shame to overlook them. No European scholar in India has done so. In Europe, where they are not to be had, the case may be different, and, in conscientious editing, footnotes may be needed. When a corrupt form occurs in all the Mss. and a restoration is needed, the fact should always be recorded.

(4) In spelling it is not unfrequently seen that peculiarities are as uniform and regular as variations in words, phrases, and sentences, while in other cases they are quite accidental. In such cases the forms which are constant or generally prevailing in the texts before an editor, are those which should always be adopted, and mere blunders entirely overlooked. For instance, in Chand's poem the well known word Anangapála occurs repeatedly, spelled अनंगपाल. If in one place the dot on the top indicating then be absent, I think it would n be the merest pedantry to notice it. In some cases even persistent forms occuring in ancient works, such as the Vedas, may be safely corrected without a footnote, and I cannot illustrate this better than by reference to the letters ष, च, ख, which, in Mss. copied in Northern India, are frequently misplaced, and which Professor Max Müller has not thought it worth his while to notice.

(5) As regards grammatical concordance, Professor Max Müller has not hesitated to change simple forms, such as जयति into जयंति where the context required the change. I fully subscribe to his rule ; but in the use of the tenses and other more complicated questions the safest plan appears to be to adhere to the text as closely as possible.



(6) Errors in metre, when accidental, or the results of bad copying, are easily corrected. Ancient authors, however, were, in anushṭup particularly, careless, and their errors cannot be corrected without tampering with the original. In all sacred works they have been respected by mediæval Indian scholars, and accounted for as peculiarities of holy sages, *àrsha*. Modern editors can do no better.

In editing Sanskrit works for the 'Bibliotheca Indica' I have borne these rules carefully in mind. I have had the benifit, too, of the advice and co-operation of some of the ablest Paṇdits of my country in settling many doubtful questions and thereby obviating the necessity of crowding the pages of my works with long arrays of different readings, such as are common in European publications. The limited number of codices available for collation has also, in some cases, reduced the number of various readings. My texts, on the whole, must be taken as eclectic, and the notes to be critical so far as the most prominent peculiarities of my Mss. are concerned. Editors, disposed to be hypercritical, may record in footnotes all the errors they meet with, but there is no necessity for such a course where the object is a simple reproduction of an eclectic text, and not a commentary.

---

सार्द्धं विश्वभुजा चैव देवेन्द्रेण महौजसा ।
स्वायम्भूवेऽन्तरे देवैर्यज्ञास्ते प्राक् प्रवर्त्तिताः ॥ ६२ ॥
सत्यं जपस्तपो दानं त्रेतायां धर्म्म उच्यते ।
क्रिया धर्म्मश्च ह्रसते सत्यधर्म्मः प्रवर्त्तते ॥ ६३ ॥
प्रजायन्ते ततः शूरा आयुष्मन्तो महाबलाः ।
न्यस्तदण्डमहाभागा यज्वानो ब्रह्मवादिनः ॥ ६४ ॥
पद्मपत्रायताक्षाश्च पृथूरस्काः सुसंहिताः ।
सिंहान्तका महासत्त्वाः (१) मत्तमातङ्गगामिनः ॥ ६५ ॥
महाधनुर्द्धराश्चैव त्रेतायां चक्रवर्त्तिनः ।
सर्व्वलक्षणसम्पन्ना न्यग्रोधपरिमण्डलाः ॥ ६६ ॥
न्यग्रोधौ तौ स्मृतौ बाहू व्यामो न्यग्रोध उच्यते ।
वामेनैवोच्छ्रयाद् यस्य समं जृम्भन्तु देहिनः ।
समुच्छ्रयपरीणाहो ज्ञेयो न्यग्रोधमण्डलः (२) ॥ ६७ ॥
चक्रं रथो मणिर्भार्य्या निधिरश्वा गजास्तथा ।
शस्त्रातिशयरत्नानि सर्व्वेषाञ्चक्रवर्त्तिनां ॥ ६८ ॥
चक्रं रथो मणिः खड्गं धनूरत्नञ्च पञ्चमं ।
केतुर्निधिश्च सप्तैते प्राणहीनाः प्रकीर्त्तिताः ॥ ६९ ॥
भार्य्या पुरोहितश्चैव सेनानी रथकृच्च यः ।
मन्त्राश्वः कलभश्चैव प्राणिनः सप्तकीर्त्तिताः ॥ ७० ॥
रत्नान्येतानि दिव्यानि संसिद्धानि महात्मनां ।
चतुर्द्दश विधेयानि सर्व्वेषां चक्रवर्त्तिनां ॥ ७१ ॥

---

१ सिंहात्मका इति ख० ।
२ न्यग्रोधावित्यादिः न्यग्रोधपरिमण्डल इत्यन्तः पाठः ख०, ट० पुस्तकद्वये नास्ति ।

विष्णोरंशेन जायन्ते पृथिव्यां चक्रवर्त्तिनः।
मन्वन्तरेषु सर्व्वेषु अतीतानागतेषु वै ॥ ७२ ॥
भूतभव्यानि यानीह वर्त्तमानानि यानि च।
त्रेतायुगादिकेष्वत्र जायन्ते चक्रवर्त्तिनः ॥ ७३ ॥
भद्राणीमानि तेषां वै भवन्तीह महौजितां।
अङ्गतानि च चत्वारि बलं धर्म्मः सुखन्धनं ॥ ७४ ॥
अन्योन्यस्याविरोधेन प्राप्यन्ते वै नृपैः समं।
अर्थो धर्म्मश्च कामश्च यशो विजय एव च ॥ ७५ ॥
ऐश्वर्य्येणाणिमाद्येन प्रभुशक्त्या तथैव च।
अन्येन तपसा चैव ऋषीनभिभवन्ति च।
बलेन तपसा चैव देवदानवमानुषान् ॥ ७६ ॥
लक्षणैश्चापि जायन्ते शरीरस्थैरमानुषैः।
केशस्थिता ललाटोर्ण्णा जिह्वा चास्यप्रमार्जनी।
ताम्रप्रभोष्ठदन्तोष्ठाः श्रीवत्साश्चोर्द्धरोमशाः ॥ ७७ ॥
आजानुबाहवश्चैव जालहस्ता वृषाङ्किताः।
न्यग्रोधपरिणाहाश्च सिंहस्कन्धाः सुमेहनाः।
गजेन्द्रगतयश्चैव महाहनव एव च ॥ ७८ ॥
पादयोश्चक्रमत्स्यौ तु शङ्खपद्मौ तु हस्तयोः।
पञ्चाशीतिसहस्राणि ते भवन्त्यजरा नृपाः ॥ ७९ ॥
असङ्गा गतयस्तेषाञ्चतस्रश्चक्रवर्त्तिनां।
अन्तरीक्षे समुद्रे च पाताले पर्व्वतेषु च ॥ ८० ॥
इज्या दानं तपः सत्यं त्रेतायां धर्म्म उच्यते।
तदा प्रवर्त्तते धर्म्मो वर्णाश्रमविभागशः ॥ ८१ ॥



मर्य्यादास्थापनार्थञ्च दण्डनीतिः प्रवर्त्तते।
हृष्टपुष्टाः प्रजाः सर्व्वा ह्यरोगाः पूर्णमानसाः ॥ ८२ ॥
एको वेदश्चतुष्पादस्त्रेतायुगविधौ स्मृतः।
त्रीणि वर्षसहस्राणि तदा जीवन्ति मानवाः ॥ ८३ ॥
पुत्रपौत्रसमाकीर्णा म्रियन्ते च क्रमेण तु।
एष त्रेतायुगे धर्म्मस्त्रेतासन्धौ निबोधत ॥ ८४ ॥
त्रेतायुगस्वभावस्तु सन्ध्यापादेन वर्त्तते।
सन्धायां वै स्वभावस्तु युगपादेन तिष्ठति ॥ ८५ ॥
शंश्य उवाच (१)। कथं त्रेतायुगसुखे यज्ञस्यासीत्प्रवर्त्तनं।
पूर्व्वं स्वायम्भुवे सर्गे यथावत्तद्ब्रवीहि मे ॥ ८६ ॥
अन्तर्हितायां सन्ध्यायां सार्द्धं कृतयुगेन वै।
कलाख्यायां प्रवृत्तायां प्राप्ते त्रेतायुगे तदा।
वर्णाश्रमव्यवस्थानं कृतवन्तश्च वै पुनः ॥ ८७ ॥
सम्भारांस्तांश्च सम्भृत्य कथं यज्ञः प्रवर्तितः।
एतत् श्रुत्वाऽब्रवीत्सूतः श्रूयतां शंश्यपायन ॥ ८८ ॥
यथा त्रेतायुगमुखे यज्ञस्यासीत्प्रवर्तनं।
ओषधीषु च जातासु प्रवृत्ते वृष्टिसर्जने।
प्रतिष्ठितायां वार्त्तायां गृहाश्रमपुरेषु च ॥ ८९ ॥
वर्णाश्रमव्यवस्थानं कृत्वा मन्त्रांश्च संहितां।
मन्त्रान् संयोजयित्वाथ इहामुत्रेषु कर्म्मसु ॥ ९० ॥
तदा विश्वभुगिन्द्रस्तु यज्ञं प्रावर्तयत्तदा।
दैवतैः महितः सर्व्वैः सर्व्वसम्भारसम्भृतं ॥ ९१ ॥

१ शंश्यपायन उवाचेति ङ०। वैशम्पायन उवाचेति ख०।

अथाश्वमेधे विततं समाजग्मुर्महर्षयः।
यजन्ते पशुभिर्मेध्यैः हुत्वा (१) सर्व्वे समागताः॥ ९२॥
कर्म्मव्यग्रेषु ऋत्विक्षु सतते यज्ञकर्म्मणि।
सम्प्रगीतेषु तेष्वेवमागमेष्वथ सत्वरं॥ ९३॥
परिक्रान्तेषु लघुषु अध्वर्य्युवृषभेषु च।
आलब्धेषु च मेध्येषु तथा पशुगणेषु वै॥ ९४॥
हविष्यग्नौ हूयमाने देवानां देवहीलभिः।
आहूतेषु च देवेषु यज्ञभाक्षु महात्मसु॥ ९५॥
य इन्द्रियात्मका देवा यज्ञभाजस्तथा तु ये।
तान्यजन्ते तदा देवाः कल्पादिषु भवन्ति ये॥ ९६॥
अध्वर्य्यवः प्रैषकाले व्युत्थिता ये महर्षयः।
महर्षयस्तु तान् दृष्ट्वा दीनान् पशुगणान् स्थितान्।
पप्रच्छुरिन्द्रं सम्भूय कोऽयं यज्ञविधिस्तव॥ ९७॥
अधर्म्मो बलवानेष हिंसाधर्म्मेप्सया तव।
नेष्टः पशुबधस्त्वेष तव यज्ञे सुरोत्तम॥ ९८॥
अधर्मो धर्म्मघाताय प्रारब्धः पशुभिस्त्वया।
नायं धर्मोह्यधर्मोऽयं न हि सा धर्म्म उच्यते॥ ९९॥
आगमेन भवान् यज्ञं करोतु यदिहेच्छसि।
विधिदृष्टेन यज्ञेन धर्म्ममव्ययहेतुना।
यज्ञबीजैः सुरश्रेष्ठ येषु हिंसा न विद्यते॥ १००॥
त्रिवर्षपरमं कालमृषिभिरपरोहिभिः।
एष धर्मो महानिन्द्र स्वयम्भुविहितः पुरा॥ १०१॥

१ ऊचुरिति ट०।



एवं विश्वभुगिन्द्रस्तु मुनिभिस्तत्त्वदर्शिभिः।
जङ्गमैः स्थावरैर्वेति कैर्य्यष्टव्यमिहोच्यते॥ १०२॥
ते तु खिन्ना विवादेन तत्त्वयुक्ता महर्षयः।
सन्धाय वाक्यमिन्द्रेण पप्रच्छुश्चेश्वरं वसुं॥ १०३॥
ऋषय ऊचुः। महाप्राज्ञ कथं दृष्टस्त्वया यज्ञविधिर्नृप।
उत्तानपादे ब्रूहि संशयं छिन्धि नः प्रभो॥ १०४॥
श्रुत्वा वाक्यं ततस्तेषामविचार्य्य बलाबलं।
वेदशास्त्रमनुस्मृत्य यज्ञतत्त्वमुवाच ह।
यथोपदिष्टैर्यष्टव्यमितिहोवाच पार्थिवः॥ १०५॥
यष्टव्यं पशुभिर्मेध्यैरथ वीजैः फलैस्तथा।
हिंसास्वभावो यज्ञस्य इति मे दर्शयत्यसौ॥ १०६॥
यथेह संहितामन्त्रा हिंसालिङ्गा महर्षिभिः।
दीर्घेण तपसा युक्तैर्दर्शनैस्तारकादिभिः।
तत्प्रामाण्यान्मया चोक्तं तस्मान्मा मन्तुमर्हथ॥ १०७॥
यदि प्रमाणं तान्येव मन्त्रवाक्यानि वै द्विजाः।
तदा प्रावर्त्ततां यज्ञो ह्यन्यथा नोऽनृतं वचः।
एवं हुतोत्तरास्ते वै युक्तात्मानस्तपोधनाः॥ १०८॥
अधश्च भवनं दृष्ट्वा तमर्थं वाग्यतो भव।
मिथ्यावादी नृपो यस्मात् प्रविवेश रसातलं॥ १०९॥
इत्युक्तमात्रे नृपतिः प्रविवेश रसातलं।
ऊर्द्ध्वचारी वसुर्भूत्वा रसातलचरोऽभवत्॥ ११०॥
वसुधातलवासी तु तेन वाक्येन सोऽभवत्।
धर्म्माणां संशयच्छेत्ता राजा वसुरथागतः॥ १११॥

तस्मान्न वाच्यमेकेन बहुज्ञेनापि संशयः।
बह्वडारस्य धर्म्मस्य सूक्ष्माद्दरमुपागतिः॥ ११२॥
तस्मान्न निश्चयाद्वक्तुं धर्म्मः शक्यस्तु केनचित्।
देवानृषीनुपादाय स्वायम्भुवमृते मनुं॥ ११३॥
तस्मान्न हिंसा धर्म्मस्य द्वारमुक्तं महर्षिभिः।
ऋषिकोटिसहस्राणि कर्म्मभिः स्वैर्दिवं ययुः॥ ११४॥
तस्मान्न दानं यज्ञं वा प्रशंसन्ति महर्षयः।
तुच्छं मूलं फलं शाकमुदपात्रं तपोधनाः।
एवं दत्त्वा विभवतः स्वर्गलोके प्रतिष्ठिताः॥ ११५॥
अद्रोहश्चाप्यलोभश्च दमो भूतदया तपः।
ब्रह्मचर्य्यं तथा सत्यमनुक्रोशः क्षमा धृतिः।
सनातनस्य धर्म्मस्य मूलमेतदुरासदं (१)॥ ११६॥
धर्म्ममन्वात्मको यज्ञस्तपश्चानशनात्मकः।
यज्ञेन देवानाप्नोति वैराग्यं तपसा पुनः॥ ११७॥
ब्राह्मणं कर्म्मसंन्यासाद्वैराग्यात् प्रेक्षते लयं।
ज्ञानात् प्राप्नोति वैकल्यं पञ्चैता गतयः स्मृताः॥ ११८॥
एवं विवादः सुमहान् यज्ञस्यासीत् प्रवर्त्तने।
ऋषीणां देवतानाञ्च पूर्वं स्वायम्भुवेऽन्तरे॥ ११९॥
ततस्ते ऋषयो दृष्ट्वाऽद्भुतं वर्त्म बलेन तु।
वमोर्वाक्यमनादृत्य जग्मुस्ते वै यथागताः॥ १२०॥
गतेषु देवसङ्घेषु देवा यज्ञमवाप्नुयुः।
श्रूयन्ते हि तपःसिद्धा ब्रह्मक्षत्रमया नृपाः॥ १२१॥

१ नूनमेतं पथं बुधा इति ख०।



प्रियव्रतोत्तानपादौ ध्रुवो मेधातिथिर्वसुः।
सुमेधा विरजाश्चैव शङ्खपाद्भूज एव च।
प्राचीनबर्हिः पर्जन्यो हविर्द्धानादयो नृपाः॥ १२२॥
एते चान्ये च बहवो नृपाः सिद्धा दिवङ्गताः।
राजर्षयो महासत्त्वा येषां कीर्तिः प्रतिष्ठिता॥ १२३॥
तस्मादिष्यते यज्ञात्तपः सर्वेषु कारणैः।
ब्रह्मणा तपसा सृष्टं जगदिश्वमिदं पुरा॥ १२४॥
तस्मान्नात्येति तद्यज्ञं तपोमूलमिदं स्मृतं।
यज्ञप्रवर्त्तनं ह्येवमतः स्वायम्भुवेऽन्तरे।
ततः प्रभृति यज्ञोऽयं युगैः सह व्यवर्तत (१)॥ १२५॥

इति श्रीमहापुराणे वायुप्रोक्ते यज्ञप्रवर्त्तनं नाम
सप्तपञ्चाशोऽध्यायः॥

१ युगैः सार्द्धं प्रवर्त्तत इति ख०।

# अथाष्टपञ्चाशोऽध्यायः ।

———ooo———

## चतुर्युगाख्यानं ।

सूत उवाच । अत ऊर्द्धं प्रवक्ष्यामि द्वापरस्य विधिं पुनः ।
तत्र त्रेतायुगे क्षीणे द्वापरं प्रतिपद्यते ॥ १ ॥
द्वापरादौ प्रजानान्तु सिद्धिस्त्रेतायुगे तु या ।
परिवृत्ते युगे तस्मिन् ततः सा संप्रणश्यति ॥ २ ॥
ततः प्रवर्त्तते तासां प्रजानां द्वापरे पुनः । .
लोभोऽधृतिर्बणिग्युद्धं तत्त्वानामविनिश्चयः । ३ ॥
सम्भेदश्चैव वर्णानां कार्य्याणाञ्चाविनिर्णयः ।
यज्ञौषधेः पशोर्दण्डो मदो दम्भोऽचमाऽबलं ।
एषां रजस्तमोयुक्ता प्रवृत्तिर्द्वापरे स्मृता ॥ ४ ॥
आद्ये कृते च धर्मोऽस्ति त्रेतायां सम्प्रपद्यते ।
द्वापरे व्याकुलीभूत्वा प्रणश्यति कलौ युगे ॥ ५ ॥
वर्णानां विपरिध्वंसः संकीर्त्यते तथाश्रमः ।
द्वैधमुत्पद्यते चैव युगे तस्मिन् श्रुतौ स्मृतौ ॥ ६ ॥
द्वैधात् श्रुतेः स्मृतेश्चैव निश्चयो नाधिगम्यते ।
अनिश्चयाधिगमनाद्धर्म्मतत्त्वं निगद्यते ।
धर्म्मतत्त्वे तु भिन्नानां मतिभेदो भवेन्नृणां ॥ ७ ॥
परस्परविभिन्नैस्तैर्दृष्टीनां (१) विभ्रमेण च ।

१ जन्तूनामिति ख० ।



अयं धर्मो ह्ययं नेति निश्चयो नाभिगम्यते ( ) ॥ ८ ॥
कारणानाञ्च वैकल्यात् कारणस्याप्यनिश्चयात् ।
मतिभेदे च तेषां वै दृष्टीनां विभ्रमो भवेत् ॥ ९ ॥
ततो दृष्टिविभिन्नैस्तैः कृतं शास्त्रकुलन्त्विदं ।
एको वेदश्चतुष्पादस्तत्रे तास्विह विधीयते ॥ १० ॥
संरोधादायुषश्चैव दृश्यते द्वापरेषु च ।
वेदव्यासैश्चतुर्धा तु व्यस्यते द्वापरादिषु ॥ ११ ॥
ऋषिपुत्रैः पुनर्वेदा भिद्यन्ते दृष्टिविभ्रमैः ।
मन्त्रब्राह्मणविद्याभैः स्वरवर्णविपर्य्ययैः ॥ १२ ॥
संहिता ऋग्यजुःसाम्नां संहन्यन्ते श्रुतर्षिभिः ।
सामान्याद् वैकृताच्चैव दृष्टिभिन्नैः क्वचित्क्वचित् ॥१३॥
ब्राह्मणं कल्पसूत्राणि मन्त्रप्रवचनानि च ।
अन्ये तु प्रहितास्तैस्तैः केचित्तान् प्रत्यवस्थिताः ॥ १४ ॥
द्वापरेषु प्रवर्त्तन्ते भिन्नवृत्ताश्रमा द्विजाः ।
एकमाध्वर्य्यवं पूर्व्वमासीद्वैधं पुनस्ततः ॥ १५ ॥
सामान्यविपरीतार्थैः कृतं शास्त्रकुलन्त्विदं ।
आध्वर्य्यवस्य प्रस्तावैर्बहुधा व्याकुलं कृतं ॥ १६ ॥
तथैवाथर्वऋक्सान्नां विकल्पैश्चाप्यसंचयैः ।
व्याकुलं द्वापरे भिन्ने क्रियते भिन्नदर्शनैः ॥ १७ ॥
तेषां भेदाः प्रभेदाश्च विकल्पैश्चाप्यसंचयाः (२) ।
द्वापरे सम्प्रवर्तन्ते विनश्यन्ति पुनः कलौ ॥ १८ ॥

१ नाधिगम्यत इति ख० । २ संकल्पैश्चाप्य संचया इति ख० ।

तेषां विपर्य्ययाश्चैव भवन्ति द्वापरे पुनः ।
अनावृष्टिर्मरणञ्चैव तथैव व्याध्युपद्रवाः ॥ १९ ॥
वाङ्मनःकर्म्मजैर्दुःखैर्निर्वेदो जायते पुनः ।
निर्वेदाज्जायते तेषां दुःखमोक्षविचारणा ॥ २० ॥
विचारणाच्च वैराग्यं वैराग्याद्दोषदर्शनं ।
दोषाणां दर्शनाच्चैव द्वापरे ज्ञानसम्भवः ॥ २१ ॥
तेषाञ्च (१) मानिनां पूर्वमाद्ये स्वायम्भुवेऽन्तरे ।
उत्पद्यन्ते हि शास्त्राणां द्वापरे परिपन्थिनः ॥ २२ ॥
आयुर्वेदविकल्पाश्च अङ्गानां ज्योतिषस्य च ।
अर्थशास्त्रविकल्पश्च हेतुशास्त्रविकल्पनं ॥ २३ ॥
स्मृतिशास्त्रप्रभेदाश्च प्रस्थानानि पृथक् पृथक् ।
द्वापरेष्वभिवर्त्तन्ते मतिभेदास्तथा नृणां ॥ २४ ॥
मनसा कर्म्मणा वाचा कृच्छ्राद्वार्त्ता प्रसिद्ध्यति ।
द्वापरे सर्व्वभूतानां कायक्लेशपुरस्कृता ॥ २५ ॥
लोभोऽधृतिर्वणिग्युद्धं तत्त्वानामविनिश्चयः ।
वेदशास्त्रप्रणयनं धर्म्माणां शङ्करस्तथा ॥ २६ ॥
द्वापरेषु प्रवर्तन्ते रोगो लोभो बधस्तथा ।
वर्णाश्रमपरिध्वंसाः कामद्वेषो तथैव च ॥ २७ ॥
पूर्णं वर्षसहस्रे द्वे परमायुस्तथा नृणां ।
निःशेषे द्वापरे तस्मिन् तस्य सन्ध्या तु पादतः ॥ २८ ॥
प्रतिष्ठते गुणैर्हीनो धर्म्मोऽसौ द्वापरस्य तु ।
तथैव सन्ध्यापादेन अंशस्तस्यावतिष्ठते ॥ २९ ॥

१ तेषान्त्विति ट० ।



द्वापरस्य च वर्षे या तिष्यस्य तु निबोधत ।
द्वापरस्यांशशेषे तु प्रतिपत्तिः कलेरतः ॥ ३० ॥
हिंसासूयानृतं माया बधश्चैव तपस्विनां ।
एते स्वभावास्तिष्यस्य साधयन्ति च वै प्रजाः । ३१ ॥
एष धर्म्मः कृतः कृत्स्नो धर्म्मश्च परिहीयते ॥
मनसा कर्म्मणा स्तुत्या वार्त्ता सिध्यति वा न वा ॥ ३२ ॥
कलौ प्रमारको रोगः सततं क्षुद्भयानि वै ।
अनावृष्टिभयं घोरं दर्शनञ्च विपर्य्ययं ॥ ३३ ॥
न प्रमाणं स्मृतेरस्ति तिष्ये लोके युगे युगे ।
गर्भस्थो म्रियते कश्चिद्यौवनस्थस्तथापरः ।
स्थाविरे मध्यकौमारे म्रियन्ते वै कलौ प्रजाः ॥ ३४ ॥
अधार्म्मिकास्त्वनाचारा मोहकोपाल्पतेजसः (१) ।
अनृतब्रुवश्च सततन्तिष्ये जायन्ति वै प्रजाः ॥ ३५ ॥
दुरिष्टैर्दुरधीतैश्च दुराचारैर्दुरागमैः ।
विप्राणां कर्म्मदोषैस्तैः प्रजानां जायते भयं ॥ ३६ ॥
हिंसा माया तथेर्ष्या च क्रोधोऽसूयाऽक्षमाऽनृतं ।
तिष्ये भवन्ति जन्तूनां रागो लोभश्च सर्व्वशः ॥ ३७ ॥
संक्षोभो जायतेऽत्यर्थं कलिमासाद्य वै युगं ।
नाधीयन्ते तदा वेदा न यजन्ते द्विजातयः ।
उत्क्रोदन्ति नरायैव क्षत्रियाः सविशः क्रमात् ॥ ३८ ॥
क्षुद्राणामन्त्ययोनेस्तु सम्बन्धा ब्राह्मणैः सह ।
भवन्तीह कलौ तस्मिन् शयनासनभोजनैः ॥ ३९ ॥

१ अधार्म्मिककदाचारास्तीक्ष्णकोपाल्पतेजस इति ख० ।

राजानः शूद्रभूयिष्ठा (१) पाषण्डानां प्रवर्तकाः ।
भ्रूणहत्याः प्रजास्तत्र प्रजा एवं प्रवर्त्तते ॥ ४० ॥
आयुर्मेधा बलं रूपं कुलञ्चैव प्रहीयते ।
शूद्राश्च ब्राह्मणाचाराः शूद्राचाराश्च ब्राह्मणाः ॥ ४१ ॥
राजवृत्ते स्थिताश्चौराश्चौरवृत्ताश्च पार्थिवाः ।
भृत्याश्च नष्टसुहृदो युगान्ते पर्य्युपस्थिते ॥ ४२ ॥
अग्नौलिल्योऽव्रताश्चापि स्त्रियो मद्यामिषप्रियाः ।
मायामात्रा भविष्यन्ति युगान्ते प्रत्युपस्थिते ॥ ४३ ॥
श्वापदप्रबलत्वञ्च गवाञ्चैवाप्युपक्षयः ।
साधूनां विनिवृत्तिश्च विद्यात्तस्मिन् कली युगे ॥ ४४ ॥
तदा सूक्ष्मे महोदर्को दुर्लभो भोगिनान्तथा (२) ।
चतुराश्रमधर्मैथिल्याद्धर्मः प्रविचलिष्यति ॥ ४५ ॥
तदा ह्यल्पफला देवी भवेद्भूमिर्महीयसी ।
शूद्रास्तपश्चरिष्यन्ति युगान्ते प्रत्युपस्थिते ॥ ४६ ॥
तदा ह्यैकाहिको धर्मो द्वापरे यश्च मासिकः ।
त्रेतायां वत्सरस्यश्च एकाहादतिरिच्यते ॥ ४७ ॥
अरक्षितारो हर्त्तारो बलिभागस्य पार्थिवाः ।
युगान्तेषु भविष्यन्ति स्वरक्षणपरायणाः ॥ ४८ ॥
अक्षत्रियाश्च राजानो विशः शूद्रोपजीविनः ।
शूद्राभिवादिनः सर्व्वे युगान्ते द्विजसत्तमाः ॥ ४९ ॥
पतयश्च भविष्यन्ति बहवोऽस्मिन् कली युगे ।
चित्रवर्षी तदा देवो यदा स्यात्तु युगक्षयः ॥ ५० ॥

१ अत्र भूयिष्ठा इति ख० । २ दानमूलधानिति ङ०, ट० च ।



सर्व्वे वाणिजकाश्चापि भविष्यन्त्यधमे युगे ।
भूयिष्ठं कूटमानैश्च पण्यविक्रीततेजनैः ॥ ५१ ॥
कुशीलवर्य्या पाषण्डैर्द्वैधारूपैः समावृतं ।
पुरुषाल्पं बहुस्त्रीकं युगान्ते पर्युपस्थिते ॥ ५२ ॥
बहुयाचनको लोको भविष्यति परस्परं ।
क्रव्यादनः क्रूरवाक्यो नार्जवो नानसूयकः ॥ ५३ ॥
न क्षते प्रतिकर्त्ता च क्षीणो लोको भविष्यति ।
अशङ्का चैव पतिते तद्युगान्तस्य लक्षणं ॥ ५४ ॥
नरशून्या वसुमती शून्या चैव भविष्यति ।
मण्डलानि भवन्त्यत्र देशेषु नगरेषु च ॥ ५५ ॥
अल्पोदका चाल्पफला भविष्यति वसुन्धरा ।
गोप्तारश्चाप्यगोप्तारः प्रभविष्यन्त्यशासनाः ॥ ५६ ॥
हर्त्तारः पररत्नानां परदारप्रधर्षकाः ।
कामात्मानो दुरात्मानो ह्यधर्म्मोल्लाहसप्रियाः ॥ ५७ ॥
प्रनष्टचेतनाः पुंसो मुक्तकेशास्तु चूलिकाः (१) ।
ऊनषोड़शवर्षाश्च प्रजायन्ते युगक्षये ॥ ५८ ॥
शुल्कदन्ताः (२) जिताक्षाश्च मुण्डाः काषायवाससः ।
शूद्रा धर्म्मञ्चरिष्यन्ति युगान्ते पर्युपस्थिते ॥ ५९ ॥
सस्यचौरा भविष्यन्ति तथा चैलाभिमर्शनाः ।
चौराश्चौरस्य हर्त्तारो हर्त्तुर्हर्त्तार एव च ॥ ६० ॥
ज्ञानकर्म्मण्युपरते लोके निष्क्रियताङ्गते ।
कीटमूषिकसर्पाश्च धर्षयिष्यन्ति मानवान् ॥ ६१ ॥

१ नाडिका इति ख० । २ शुक्रदन्ता इति ख० ।

सुभिक्षं क्षेममारोग्यं सामर्थ्यं दुर्लभं भवेत्।
कौशिकाः प्रतिवत्स्यन्ति देशान् क्षुद्भयपीड़ितान् ॥ ६२ ॥
दुःखेनाभिप्लुतानाञ्च परमायुः शतं भवेत्।
दृश्यन्ते न च दृश्यन्ते वेदाः कलियुगेऽखिलाः ॥ ६३ ॥
उल्लोदन्ति तथा यज्ञाः केवलाधर्म्मपीड़िताः।
कषायिणश्च निर्ग्रन्थास्तथा कापालिनश्च ह ॥ ६४ ॥
वेदविक्रयिणश्चान्ये तीर्थविक्रयिणोऽपरे।
वर्णाश्रमाणां ये चान्ये पाषण्डाः परिपन्थिनः ॥ ६५ ॥
उत्पद्यन्ते तथा ते वै संप्राप्ते तु कलौ युगे।
नाधीयन्ते तदा वेदाः शूद्रा धर्म्मार्थकोविदाः ॥ ६६ ॥
यजन्ते नाश्वमेधेन राजानः शूद्रयोनयः।
स्त्रीबधं गोबधं कृत्वा हत्वा चैव परस्परं।
उपहन्युस्तदाऽन्योन्यं साधयन्ति तथा प्रजाः ॥ ६७ ॥
दुःखप्रचारतोऽल्पायुर्दैशोत्सादः सरोगता।
मोहो ग्लानिस्तथा सौख्यं तमोवृत्तं कलौ स्मृतं ॥ ६८ ॥
प्रजा तु भ्रूणहत्यायामथ वै सम्प्रवर्त्तते।
तस्मादायुर्बलं रूपं कलिं प्राप्य प्रहीयते।
दुःखेनाभिप्लुतानां वै परमायुः शतं नृणां ॥ ६९ ॥
दृश्यन्ते नाभिदृश्यन्ते वेदाः कलियुगेऽखिलाः।
उल्लोदन्ते तदा यज्ञाः केवला धर्म्मपीड़िताः ॥ ७० ॥
तदा स्वल्पेन कालेन सिद्धिं यास्यन्ति मानवाः।
धन्या धर्म्मं चरिष्यन्ति युगान्ते द्विजसत्तमाः ॥ ७१ ॥
श्रुतिस्मृत्युदितं धर्म्मं ये चरन्त्यनसूयकाः।



त्रेतायां वार्षिको धर्म्मो द्वापरे मासिकः स्मृतः।
यथाशक्ति चरन् प्राज्ञस्तदङ्गः प्राप्नुयात् कलौ ॥ ७२ ॥
एषा कलियुगेऽवस्था सन्ध्यांशन्तु निबोध मे।
युगे युगे तु ह्रीयन्ते त्रींस्त्रीन् पादांश्च सिद्धयः ॥ ७३ ॥
युगस्वभावात्सन्ध्यास्तु तिष्ठन्तीमास्तु पादशः।
सन्ध्यास्वभावाच्चांशेषु पादशस्ते प्रतिष्ठिताः ॥ ७४ ॥
एवं सन्ध्यांशके काले सम्प्राप्ते तु युगान्तिके।
तेषां शास्ता ह्यसाधूनां भृगूणां निधनोत्थितः ॥ ७५ ॥
गोत्रेण वै चन्द्रमसो नाम्ना प्रमितिरुच्यते।
माधवस्य तु सोंऽशेन पूर्व्वं स्वायम्भुवेऽन्तरे ॥ ७६ ॥
समाः स विंशतिं पूर्णाः पर्य्यटन् वै वसुन्धरां।
आचकर्ष स वै सेनां सवाजिरथकुञ्जरां ॥ ७७ ॥
प्रगृहीतायुधैर्विप्रैः शतशोऽथ सहस्रशः।
स तदा तैः परिवृतो म्लेच्छान् हन्ति सहस्रशः ॥ ७८ ॥
स हत्वा सर्व्वगश्चैव राज्ञस्तान् शूद्रयोनिजान्।
पाषण्डान् स ततः सर्व्वान्निःशेषान् कृतवान् प्रभुः ॥ ७९ ॥
नात्यर्थं धार्म्मिका ये च तान् सर्व्वान् हन्ति सर्व्वगः।
वर्णव्यत्यासजातांश्च ये च तानुपजीविनः ॥ ८० ॥
उदीच्यान्मध्यदेशांश्च पार्व्वतीयांस्तथैव च।
प्राच्यान् प्रतीच्यांश्च तथा विन्ध्यपृष्ठापरान्तिकान् ॥ ८१ ॥
तथैव दाक्षिणात्यांश्च द्रविड़ान् सिंहलैः सह।
गान्धारान्पारदांश्चैव पह्लवान् यवनान् तथा ॥ ८२ ॥
तुषारान् बर्ब्बरांश्चीनान् शूलिकान् दरदान् खसान्।

लम्बाकानथ केतांश्च किरातानाञ्च जातयः ॥ ८३ ॥
प्रवृत्तचक्रो बलवान् म्लेच्छानामन्तकृद्विभुः ।
अधृष्यः सर्व्वभूतानां चचाराथ वसुन्धरां ॥ ८४ ॥
माधवस्य तु सोंऽशेन देवस्य हि विजज्ञिवान् ।
पूर्व्वजन्मविधिज्ञैश्च प्रमितिर्नाम वीर्य्यवान् ॥ ८५ ॥
गोत्रेण वै चन्द्रमसः पूर्व्वं कलियुगे प्रभुः ।
द्वात्रिंशेऽभ्युदिते वर्षे प्रक्रान्ते विंशतिं समाः ॥ ८६ ॥
विनिघ्नन् सर्व्वभूतानि मानवानि सहस्रसः ।
कृत्वा वीर्य्यावशेषान्तु पृथ्वीं रूढेन कर्म्मणा ।
परस्परनिमित्तेन कोपेनाकस्मिकेन तु ॥ ८७ ॥
स साधयित्वा वृषलान् प्रायशस्तानधार्म्मिकान् ।
गङ्गायमुनयोर्म्मध्ये निष्ठां प्राप्तः सहानुगः ॥ ८८ ॥
ततो व्यतीते तस्मिंस्तु अमात्ये सत्यसैनिके ।
उत्साद्य पार्थिवान् सर्व्वान् म्लेच्छांश्चैव सहस्रशः ॥ ८९ ॥
तत्र सन्ध्यांशके काले सम्प्राप्ते तु युगान्तिके ।
स्थितास्वल्पावशिष्टासु प्रजास्विह क्वचित् क्वचित् ॥ ९० ॥
आग्रहास्तत्स्था वै लोकचेष्टास्तु वृन्दशः ।
उपहिंसन्ति चान्योन्यं प्रपद्यन्ते परस्परं ॥ ९१ ॥
अराजके युगवशात् संक्षये समुपस्थिते ।
प्रजास्था वै ततः सर्व्वाः परस्परभयार्दिताः ॥ ९२ ॥
व्याकुलाश्च परिश्रान्तास्त्यक्त्वा दारान् गृहाणि च ।
स्वान्प्राणान् समवेक्षन्तो निष्ठां प्राप्ताः सुदुःखिताः ॥९३॥
नष्टे श्रौते स्मृते धर्म्मे परस्परहतास्तदा ।



निर्म्मर्य्यादा निराक्रन्दा निस्नेहा निरपत्रपाः ॥ ९४ ॥
नष्टे वर्षे प्रतिहता क्षुत्क्षामाः पञ्चविंशकाः ।
हित्वा दारांश्च पुत्रांश्च विषादव्याकुलेन्द्रियाः ॥ ९५ ॥
अनावृष्टिहताश्चैव वार्त्तामुत्सृज्य दुःखिताः ।
प्रत्यन्तांस्तान्निषेवन्ते हित्वा जनपदान् स्वकान् ॥ ९६ ॥
सरितः सागरान् कूपान् सेवन्ते पर्व्वतांस्तदा ।
मधुमांसैर्म्मूलफलैर्वर्त्तयन्ति सुदुःखिताः ॥ ९७ ॥
चीरवस्त्राजिनधरा निष्पत्रा निष्परिग्रहाः ।
वर्णाश्रमपरिभ्रष्टाः सङ्करं घोरमाश्रिताः ॥ ९८ ॥
एता काष्ठामनुप्राप्ता अल्पशेषास्तथा प्रजाः ।
जराव्याधिक्षुधाविष्टा दुःखान्निर्वेदमागमन् ॥ ९९ ॥
विचारणन्तु निर्वेदात् साम्यावस्था विचारणात् ।
साम्यावस्थासु सम्बोधः सम्बोधाद्धर्म्मशीलता ॥ १०० ॥
तासूपगमयुक्तासु कलिशिष्टासु वै स्वयं ।
अहोरात्रं तदा तासां युगन्तु परिवर्त्तते ॥ १०१ ॥
चित्तसम्मोहनं कृत्वा तासान्तैः सप्तमन्तु तत् ।
भाविनोऽर्थस्य च बलात्ततः कृतमवर्त्तत ॥ १०२ ॥
प्रवृत्ते तु पुनस्तस्मिंस्ततः कृतयुगे तु वै ।
उत्पन्नाः कलिशिष्टास्तु कार्तयुग्यः प्रजास्तदा ॥ १०३ ॥
तिष्ठन्ति चेह ये सिद्धाः सुदृष्टा विचरन्ति च ।
सदा सप्तर्षयश्चैव (१) तत्र ते च व्यवस्थिताः ॥ १०४ ॥

१ सप्त सप्तर्षयश्चैवेति ख०, ङ० च।

ब्रह्मक्षत्रविशः शूद्रा बीजार्थं ये स्मृता इह ।
कलिजैः सह ते सर्व्वे निर्विशेषास्तदाऽभवन् ॥ १०५ ॥
तेषां सप्तर्षयो धर्म्मं कथयन्तीतरेषु च ।
वर्णाश्रमाचारयुक्तः श्रौतः स्मार्त्तो द्विधा तु सः ॥ १०६ ॥
ततस्तेषु क्रियावस्तु वर्त्तन्ते वै प्रजाः कृते ।
श्रौतः स्मार्त्तः कृतानान्तु धर्म्मः सप्तर्षिदर्शितः ॥ १०७ ॥
तासु धर्म्मव्यवस्थार्थं तिष्ठन्तीहायुगक्षयात् ।
मन्वन्तराधिकारेषु तिष्ठन्ति मुनयस्तु वै ॥ १०८ ॥
यथा दावप्रदग्धेषु तृणेष्विह तपे ऋतौ ।
नवानां प्रथमं दृष्टस्तेषां मूले तु सम्भवः ॥ १०९ ॥
एवं युगाद्युगस्येह सन्तानस्तु परस्परं ।
वर्त्तते ह्यव्यवच्छेदाद् यावन्मन्वन्तरक्षयः ॥ ११० ॥
सुखमायुर्बलं रूपं धर्म्मार्थौ काम एव च ।
युगेष्वेतानि हीयन्ते(१)त्रीणि पादक्रमेण तु ॥ १११ ॥
ससन्ध्यांशेषु हीयन्ते युगानां धर्म्मसिद्धयः ।
इत्येष प्रतिसन्धिर्वः कीर्त्तितस्तु मया द्विजाः ॥ ११२ ॥
चतुर्युगानां सर्वेषामेतेनैव प्रसाधनं ।
एषा चतुर्युगाष्टत्तिरासहस्रात् प्रवर्त्तते(२) ॥ ११३ ॥
ब्रह्मणस्तदहः प्रोक्तं रात्रिश्च तावती स्मृता ।
अत्रार्जवं जड़ीभावो भूतानामायुगक्षयात् ॥ ११४ ॥
एतदेव तु सर्वेषां युगानां लक्षणं स्मृतं ।

१ युगे युगे प्रहीयन्त इति ख० । २ आसहस्राद्गुणीकृतेति ङ०, ट० च ।



एषा चतुर्युगानान्तु गणना ह्येकसप्ततिः ।
क्रमेण परिवृत्ता तु मनोरन्तरमुच्यते ॥ ११५ ॥
चतुर्युगे तथैकस्मिन् भवतीह यथाश्रुतं ।
तथा चान्येषु भवति पुनस्तद्वै यथाक्रमं ॥ ११६ ॥
सर्गे सर्गे यथा भेदा उत्पद्यन्ते तथैव तु ।
पञ्चविंशत्परिमिता न न्यूना नाधिकास्तथा ॥ ११७ ॥
तथा कल्पयुगैः सार्द्धं भवन्ति समलक्षणाः ।
मन्वन्तराणां सर्वेषामेतदेव तु लक्षणं ॥ ११८ ॥
तथा युगानां परिवर्त्तनानि
चिरप्रवृत्तानि युगस्वभावात् ।
तथा न सन्निष्ठति जीवलोकः
क्षयोदयाभ्यां परिवर्त्तमानः ॥ ११९ ॥
इत्येतल्लक्षणं प्रोक्तं युगानां वै समासतः ।
अतीतानागतानां वै सर्वमन्वन्तरेष्विह ॥ १२० ॥
अनागतेषु तद्वच्च तर्कः कार्य्यो विजानता ।
मन्वन्तरेषु सर्वेषु अतीतानागतेष्विह ॥ १२१ ॥
मन्वन्तरेण चैकेन सर्व्वाण्येवान्तराणि वै ।
व्याख्यातानि विजानीध्वं कल्पे कल्पेन चैव हि ॥ १२२ ॥
अस्याभिमानिनः सर्व्वे नामरूपैर्भवन्त्युत ।
देवा ह्यष्टविधा ये च इह मन्वन्तरेश्वराः ॥ १२३ ॥
ऋषयो मनवश्चैव सर्व्वे तुल्याः प्रयोजनैः ।
एवं वर्णाश्रमाणान्तु प्रविभागो युगे युगे ॥ १२४ ॥
युगस्वभावाच्च तथा विधत्ते वै सदा प्रभुः ।

वर्णाश्रमविभागश्च युगानि युगसिद्धये ॥ १२५ ॥
अनुषङ्गः समाख्यातः सृष्टिसर्गन्निबोधत ।
विस्तरेणानुपूर्व्वया च स्थितिं वक्ष्ये युगेष्विह ॥ १२६ ॥

इति श्रीमहापुराणे वायुप्रोक्ते चतुर्युगाख्यानं
नामाष्टपञ्चाशोऽध्यायः ।

---

# अथोनषष्टितमोऽध्यायः ।

—:o:—

## ऋषिलक्षणम् ।

सूत उवाच । युगेषु यास्तु जायन्ते प्रजास्ता वै निबोधत ।
आसुरी सर्पगोपक्षिपैशाची यक्षराक्षसी ।
यस्मिन् युगे च सम्भूतिस्तासां यावत्तु जीवितं ॥ १ ॥
पिशाचासुरगन्धर्व्वा यक्षराक्षसपन्नगाः ।
युगमाचन्तु जीवन्ति ऋते मृत्युवधेन ते ॥ २ ॥
मानुषाणां पशूनाञ्च पक्षिणां स्थावरैः सह ।
तेषामायुः परिक्रान्तं युगधर्म्मेषु सर्वशः ॥ ३ ॥
अस्थितिस्तु कलौ दृष्टा भूतानामायुषस्तु वै ।
परमायुः शतन्त्वेतन्मनुष्याणां कलौ स्मृतं ॥ ४ ॥
देवासुरप्रमाणात्तु सप्तसप्ताङ्गुलं ह्रसत् ।
अङ्गुलानां शतं पूर्णमष्टपञ्चाशदुत्तरं ॥ ५ ॥
देवासुरप्रामाणन्तदुच्छ्रायं कलिजैः स्मृतं ।
चत्वारश्चाप्यशीतिश्च कलिजैरङ्गुलैः स्मृतं ॥ ६ ॥
स्वेनाङ्गुलप्रमाणेन ऊर्द्धमापादमस्तकं ।
इत्येष मानुषोत्सेधो ह्रसतीह युगान्तिके ॥ ७ ॥
सर्वेषु युगकालेषु अतीतानागतेष्विह ।
स्वेनाङ्गुलप्रमाणेन अष्टतालः स्मृतो नरः ॥ ८ ॥

आपादतो मस्तकन्तु नवतालो भवेत्तु यः।
संहताजानुबाहुस्तु स सुरैरपि पूज्यते ॥ ९ ॥
गवाश्वहस्तिनाञ्चैव महिषस्थावरात्मनां।
क्रमेणैतेन योगेन ह्रासवृद्धी युगे युगे ॥ १० ॥
षट्सप्तत्यङ्गुलोत्सेधः पशूनां ककुदस्तु वै।
अङ्गुलाष्टशतं पूर्णमुत्सेधः करिणां स्मृतः ॥ ११ ॥
अङ्गुलानां सहस्रन्तु चत्वारिंशाङ्गुलं विना।
पञ्चाशतं हयानाञ्च उत्सेधः शाखिनां स्मृतः ॥ १२ ॥
मानुषस्य शरीरस्य सन्निवेशस्तु यादृशः।
तल्लक्षणस्तु देवानां दृश्यते तत्त्वदर्शनात् (१) ॥ १३ ॥
बुद्ध्यतिशययुक्तञ्च देवानां कायमुच्यते।
देवानतिशयञ्चैव मानुषं कायमुच्यते ॥ १४ ॥
इत्येते वै परिक्रान्ता भावा ये दिव्यमानुषाः।
पशूनां पक्षिणाञ्चैव स्थावराणां निबोधत ॥ १५ ॥
गावो ह्यजा महिष्योऽश्वा हस्तिनः पक्षिणो नगाः।
उपयुक्ताः क्रियास्तेते यज्ञियास्विह सर्व्वशः ॥ १६ ॥
देवस्थानेषु जायन्ते तद्रूपा एव ते पुनः।
यथाशयोपभोगास्तु देवानां शुभमूर्त्तयः ॥ १७ ॥
तेषां रूपानुरूपैस्तैः प्रमाणैस्थाणुजङ्गमैः।
मनोज्ञैस्तत्त्वभावज्ञैः सुखिनो ह्युपपेदिरे ॥ १८ ॥
अतः शिष्टान् प्रवक्ष्यामि सतः साधूंस्तथैव च।

१ दृश्यतेऽन्वयदर्शनादिति ङ०, ट० च।



सदिति ब्रह्मणः शब्दस्तद्वन्तो ये भवन्त्युत।
सायुज्यं ब्रह्मणोऽत्यन्तं तेन सन्तः प्रचक्षते ॥ १९ ॥
दशात्मके ये विषये कारणे चाष्टलक्षणे।
न क्रुध्यन्ति न हृष्यन्ति जितात्मानस्तु ते स्मृताः ॥ २० ॥
सामान्येषु च धर्म्मेषु तथा वैशेषिकेषु च।
ब्रह्मक्षत्रविशो युक्ता यस्मात्तस्माद्विजातयः ॥ २१ ॥
वर्णाश्रमेषु युक्तस्य स्वर्गगोमुखचारिणः।
श्रौतस्मार्तस्य धर्म्मस्य ज्ञानाद्धर्म्मः स उच्यते ॥ २२ ॥
विद्यायाः साधनात्साधुर्ब्रह्मचारी गुरोर्हितः।
क्रियाणां साधनाच्चैव गृहस्थः साधुरुच्यते ॥ २३ ॥
साधनात्तपसोऽरण्ये साधुर्वैखानसः स्मृतः।
यतमानो यतिः साधुः स्मृतो योगस्य साधनात् ॥ २४ ॥
एवमाश्रमधर्म्माणां साधनात् साधवः स्मृताः।
गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः ॥ २५ ॥
न च देवा न पितरो मुनयो न च मानवाः।
अयन्धर्म्मो ह्ययं नेति ब्रुवन्तोऽभिन्नदर्शनाः ॥ २६ ॥
धर्म्माधर्म्माविह प्रोक्तौ शब्दावेतौ क्रियात्मकौ।
कुशलाकुशलं कर्म्म धर्म्माधर्म्मावितिस्मृतौ ॥ २७ ॥
धारणा धृतिरित्यर्थाद्धातोर्धर्म्मः प्रकीर्त्तितः।
अधारणेऽमहत्त्वे च अधर्म्म इति चोच्यते ॥ २८ ॥
अनिष्टप्रापका धर्म्मा आचार्य्यैरुपदिश्यते।
हृद्या ह्यलोलुपाश्चैव आत्मवन्तो ह्यदम्भकाः।
सम्यग्विनीता ऋजवस्तानाचार्य्यान् प्रचक्षते ॥ २९ ॥

स्वयमाचरते यस्मादाचारं स्थापयत्यपि ।
आचिनोति च शास्त्रार्थान्यमैः सन्नियमैर्युतः ॥ ३० ॥
पूर्व्वेभ्यो वेदयित्वेह श्रौतं सप्तर्षयोऽब्रुवन् ।
ऋचो यजूंषि सामानि ब्रह्मणोऽङ्गानि च श्रुतिः ॥ ३१ ॥
मन्वन्तरस्यातीतस्य स्मृत्वाचारं पुनर्जगौ ।
तस्मात्स्मार्तः स्मृतो धर्म्मो वर्णाश्रमविभागजः ॥ ३२ ॥
स एष द्विविधो धर्म्मः शिष्टाचार इहोच्यते ।
शेषशब्दात् शिष्ट इति शिष्टाचारः प्रचक्ष्यते ॥ ३३ ॥
मन्वन्तरेषु ये शिष्टा इह तिष्ठन्ति धार्म्मिकाः ।
मनुः सप्तर्षयश्चैव लोकसन्तानकारणात् ।
धर्म्मार्थं ये च शिष्टा वै याथातथ्यं प्रचक्ष्यते ॥ ३४ ॥
मन्वादयश्च ये शिष्टा ये मया प्रागुदीरिताः ।
तैः शिष्टैश्चरितो धर्म्मः सम्यगेव युगे युगे ॥ ३५ ॥
त्रयी वार्ता दण्डनीतिरिज्या वर्णाश्रमास्तथा ।
शिष्टैराचर्य्यते यस्मान्मनुना च पुनः पुनः ।
पूर्व्वैः पूर्व्वगतत्वाच्च शिष्टाचारः स शाश्वतः ॥ ३६ ॥
दानं सत्यन्तपोऽलोभो विद्येज्याप्रजनी दया ।
अष्टौ तानि चरित्राणि शिष्टाचारस्य लक्षणं ॥ ३७ ॥
शिष्टा यस्माच्चरन्त्येनं मनुः सप्तर्षयश्च वै ।
मन्वन्तरेषु सर्व्वेषु शिष्टाचारस्ततः स्मृतः ॥ ३८ ॥
विज्ञेयः श्रवणात् श्रौतः स्मरणात् स्मार्त्त उच्यते ।
इज्यावेदात्मकः श्रौतः स्मार्तो वर्णाश्रमात्मकः ।
प्रत्यङ्गानि च वक्ष्यामि धर्म्मस्येह तु लक्षणं ॥ ३९ ॥



दृष्ट्वा प्रभूतमर्थं यः पृष्टो वै न निगूहति ।
यथा भूतप्रवादस्तु इत्येतत्सत्यलक्षणं ॥ ४० ॥
ब्रह्मचर्य्यं जपो मौनं निराहारत्वमेव च ।
इत्येतत् तपसो मूलं सुघोरं तदुरासदं ॥ ४१ ॥
पशूनां द्रव्यहविषामृक्सामयजुषां तथा ।
ऋत्विजां दक्षिणानाञ्च संयोगो योग उच्यते ॥ ४२ ॥
आत्मवत्सर्वभूतेषु यो हिताय हिताय च ।
समा प्रवर्त्तते दृष्टिः कृत्स्ना ह्येषा दया स्मृता ॥ ४३ ॥
आक्रुष्टोऽभिहतो वापि नाक्रोशेद्यो न हन्ति वा ।
वाङ्मनःकर्म्मभिः क्षान्तिस्तितिक्षैषा क्षमा स्मृता ॥४४॥
स्वामिनाऽरक्ष्यमाणानामुत्सृष्टानाञ्च मृत्सु च ।
परस्वानामनादानमलोभ इह कीर्त्यते ॥ ४५ ॥
मैथुनस्यासमाचारो ह्यचिन्तनमकल्पनं ।
निवृत्तिर्ब्रह्मचर्य्यं तद्छिद्रं दम उच्यते ॥ ४६ ॥
आत्मार्थं वा परार्थं वा इन्द्रियाणीह यस्य वै ।
न मिथ्या सम्प्रवर्तन्ते शमस्येतत्तु लक्षणं ॥ ४७ ॥
दृश्यात्मके यो विषये कारणे चाष्टलक्षणे ।
न क्रुध्येत्तु प्रतिहतः स जितात्मा विभाव्यते ॥ ४८ ॥
यद्यदिष्टतमं द्रव्यं न्यायेनोपागतञ्च यत् ।
तत्तद्गुणवते देयमित्येतद्दानलक्षणं ॥ ४९ ॥
दानं त्रिविधमित्येतत्कनिष्ठज्येष्ठमध्यमं ।
तत्र नैःश्रेयसं ज्येष्ठं कनिष्ठं स्वार्थसिद्धये ।
कारुण्यात्सर्व्वभूतेभ्यः सविभागस्तु बन्धुषु ॥ ५० ॥

श्रुतिस्मृतिभ्यां विहितो धर्मो वर्णाश्रमात्मकः।
शिष्टाचाराविरुद्धश्च धर्म्यः सत्साधुसङ्गतः॥ ५१॥
अप्रद्वेषो ह्यनिष्टेषु तथेष्टानभिनन्दनं।
प्रीतितापविषादेभ्यो विनिवृत्तिर्विरक्तता॥ ५२॥
सन्यासः कर्म्मणो न्यासः कृतानामकृतैः सह।
कुशलाकुशलानाञ्च प्रहाणं त्याग उच्यते॥ ५३॥
अव्यक्ताद्योऽविशेषाच्च विकारोस्मिन्नचेतने।
चेतनाचेतनान्यत्वविज्ञानं ज्ञानमुच्यते॥ ५४॥
प्रत्यङ्गानान्तु धर्म्मस्य इत्येतल्लक्षणं स्मृतं।
ऋषिभिर्धर्म्मतत्त्वज्ञैः पूर्वं स्वायम्भुवेऽन्तरे॥ ५५॥
अत्र वो वर्त्तयिष्यामि विधिर्म्मन्वन्तरस्य यः।
इतरेतरवर्णस्य चातुर्वर्णस्य चैव हि।
प्रतिमन्वन्तरञ्चैव श्रुतिरन्या विधीयते॥ ५६॥
ऋचो यजूंषि सामानि यथावत्प्रतिदैवतं।
आभूतसंप्लवस्थापि वर्त्तैकं शतरुद्रियं॥ ५७॥
विधिर्होत्रं तथा स्तोत्रं पूर्ववत्सम्प्रवर्तते।
द्रव्यस्तोत्रं गुणस्तोत्रं कर्म्मस्तोत्रं तथैव च।
चतुर्थमाभिजनिकं स्तोत्रमेतच्चतुर्विधं॥ ५८॥
मन्वन्तरेषु सर्व्वेषु यथा देवा भवन्ति ये।
प्रवर्त्तयति तेषां वै ब्रह्मस्तोत्रं चतुर्व्विधं।
एवं मन्त्रगणाश्च समुत्पत्तिश्चतुर्विधा॥ ५९॥
अथर्व्वयजुषां साम्नां वेदेष्विह पृथक् पृथक्।
ऋषीणान्तप्यतामुग्रन्तपः परमदुश्चरं॥ ६०॥



मन्वाः प्रादुर्बभूवुर्हि पूर्व्वमन्वन्तरेष्विह।
परितोषाद्व्ययाद् दुःखात्सुखाच्छोकाच्च पञ्चधा॥ ६१॥
ऋषीणान्तपःकार्त्स्न्येन दर्शनेन यदृच्छया।
ऋषीणां यदृषित्वं हि तदृच्छामीह लक्षणैः॥ ६२॥
अतीतानागतानान्तु पञ्चधा ऋषिरुच्यते।
अतःस्वृषीणां वक्ष्यामि ह्यार्षस्य च समुद्भवं॥ ६३॥
गुणसाम्ये वर्त्तमाने सर्वसम्प्रलये तदा।
अतिचारे तु (१) देवानामतिदेशे तयोर्यथा॥ ६४॥
अबुद्धिपूर्व्वकं तद्वै चेतनार्थं प्रवर्त्तते।
तेन ह्यबुद्धिपूर्वं तच्चेतनेन ह्यधिष्ठितं॥ ६५॥
वर्त्तते च यथा तौ तु यथा मत्स्योदके उभे।
चेतनाधिष्ठितन्तत्त्वं प्रवर्त्तति गुणात्मना॥ ६६॥
करणात्वात्तथा कार्य्यं तदा तस्य प्रवर्त्तते।
विषये विषयित्वाच्च ह्यर्थेऽर्थित्वात्तथैव च॥ ६७॥
कालेन प्रापणीयेन भेदास्तु कारणात्मकाः।
संसिध्यन्ति तदा व्यक्ताः क्रमेण महदादयः॥ ६८॥
महतश्चाप्यहङ्कारस्तस्माद्भूतेन्द्रियाणि च।
भूतभेदास्तु भेदेभ्यो जज्ञिरे ते परस्परं।
संसिद्धिकारणं कार्य्यं सद्य एव विवर्त्तते (२)॥ ६९॥
यथोल्मुकस्फुटन्नूर्ध्वमेककालं प्रवर्त्तते।
तथा विवृत्तः चेतज्ञः कालेनैकेन कर्म्मणा (३)॥ ७०॥

१ अविभावे लिति ङ०, ट० च। २ प्रवर्त्तत इति ख०।
३ कालेनैतेनेति ङ०, ट० च।

यथान्धकारे खद्योतः सहसा सम्प्रदृश्यते ।
तथा विवृत्तो ह्यव्यक्तात् खद्योत इव चोल्वनः (४) ॥७१॥
स महान् सशरीरस्तु यत्रैवाग्रे व्यवस्थितः ।
तत्रैव संस्थितो विद्वान् द्वारग्रामुखे स्थितः ॥ ७२ ॥
महांस्तु तमसः पारे वैलक्षण्याद्विभाव्यते ।
तत्रैव संस्थितो विद्वांस्तममोऽन्त इति श्रुतिः ॥ ७३ ॥
बुद्धिर्विवर्त्तमानस्य पादुर्भूता चतुर्विधा ।
ज्ञानं वैराग्यमैश्वर्य्यं धर्म्मश्चेति चतुष्टयं ॥ ७४ ॥
सांसिद्धिकान्यथैतानि सुप्रतीकानि तस्य वै ।
महतः सशरीरस्य वैवर्त्त्यात् सिद्धिरुच्यते ॥ ७५ ॥
अत्र शेते च यत्पुर्य्यां क्षेत्रज्ञानमथापि वा ।
पुरीशत्वाच्च पुरुषः क्षेत्रज्ञानात् समुच्यते ॥ ७६ ॥
क्षेत्रज्ञः क्षेत्रविज्ञानात् भगवान् मतिरुच्यते ।
यस्माद् बुद्ध्या तु शेते ह तस्माद् बोधात्मकः स वै ।
संसिद्धये परिगतं व्यक्ताव्यक्तमचेतनं ॥ ७७ ॥
एवं निवृत्तिः क्षेत्रज्ञा क्षेत्रज्ञेनाभिसंहिता ।
क्षेत्रज्ञेन परिज्ञातो भोग्योऽयं विषयस्त्विति ॥ ७८ ॥
ऋषीत्येष गतौ धातुः श्रुतौ सत्ये तपस्यथ ।
एतत्सन्नियते तस्मिन्ब्रह्मणा स ऋषिः स्मृतः ॥ ७९ ॥
निवृत्तिसमकालन्तु बुद्ध्याऽव्यक्तमृषिः स्वयम् ।
परं हि ऋषते यस्मात्परमर्षिस्ततः स्मृतः ॥ ८० ॥
गत्यर्थाद्दृषतेर्द्धातोर्नामनिर्वृत्तिरादितः ।

४ चोल्बुल इति ङ० ।



यस्मादेष स्वयम्भूतस्तस्माच्चात्मर्षिता स्मृता ।
ईश्वराः स्वयमुद्भूता मानसाः ब्रह्मणः सुताः ॥ ८१ ॥
यस्मान्न हन्यते मानैर्महान् परिगतः पुरः ।
यस्माऽदृषन्ति ये धीरा महान्तं सर्व्वतो गुणैः ।
तस्मान्महर्षयः प्रोक्ता बुद्धेः परमदर्शिनः ॥ ८२ ॥
ईश्वराणां शुभास्तेषां मानसान्तरसाश्च ते ।
अहङ्कारं तमश्चैव त्यक्त्वा च ऋषिताङ्गताः ॥ ८३ ॥
तस्मात्ते ऋषयस्ते वै भूतादौ तत्त्वदर्शनाः ।
ऋषिपुत्रा ऋषीकास्तु मैथुनाद्गर्भसम्भवाः ॥ ८४ ॥
तन्माचाणि च सत्यञ्च ऋषन्ते ते महोजसः ।
सत्यर्षयस्ततस्ते वै परमाः सत्यदर्शनाः ॥ ८५ ॥
ऋषीणाञ्च सुतास्ते तु विज्ञेया ऋषिपुत्रकाः ।
ऋषन्ति वै श्रुतं यस्माद्विशेषांश्चैव तत्त्वतः ।
तस्मात् श्रुतर्षयस्तेपि श्रुतस्य परिदर्शनाः ॥ ८६ ॥
अव्यक्तात्मा महात्मा चाहङ्कारात्मा तथैव च ।
भूतात्मा चेन्द्रियात्मा च तेषां तज्ज्ञानमुच्यते।
इत्येता ऋषिजातीस्तु नामभिः पञ्च वै शृणु ॥ ८७ ॥
भृगुर्मरीचिरत्रिश्च अङ्गिराः पुलहः क्रतुः ।
मनुर्दक्षो वसिष्ठश्च पुलस्त्यश्चेति ते दश ।
ब्रह्मणो मानसा ह्येते उद्भूताः स्वयमीश्वराः ॥ ८८ ॥
प्रवर्त्तते ऋषेर्य्यस्मान्महांस्तस्मान्महर्षयः ।
ईश्वराणां सुतास्त्वेते ऋषयस्तान्निबोधत ॥ ८९ ॥
काव्यो बृहस्पतिश्चैव कश्यपश्चोशनास्तथा ।

उतथ्यो वामदेवश्च अपोज्यश्चैव सिंजस्तथा ॥ ९० ॥
कर्दमो विश्ववाः शक्तिर्वालिखिल्यस्तथा धराः (१)।
इत्येते ऋषयः प्रोक्ता ज्ञानतो ऋषिताङ्गताः ॥ ९१ ॥
ऋषिपुत्रान्ऋषीकांस्तु गर्भोत्पन्नान्निबोधत।
वत्सरो नयङ्कश्चैव भारद्वाजस्तथैव च ॥ ९२ ॥
बृहदुक्थः शरद्वांश्च अगस्त्यश्चौसिजस्तथा (२)।
ऋषिर्दीर्घतमाश्चैव बृहदुक्थः शरद्वतः ॥ ९३ ॥
वाजश्रवाः सुवित्तश्च सुवाग्वेषपरायणः।
दधीचः शङ्खमांश्चैव राजा वैश्रवणस्तथा।
इत्येते ऋषिकाः प्रोक्तास्ते सत्याद्दृषिताङ्गताः ॥ ९४ ॥
ईश्वरा ऋषिकाश्चैव ये चान्ये वै तथा स्मृताः।
ऐते मन्त्रकृतः सर्वे कृत्स्नशस्तान्निबोधत ॥ ९५ ॥
भृगुः काव्यः प्रचेतास्तु दधीचो ह्यात्मवानपि।
और्वोऽथ जमदग्निश्च विदः सारस्वतस्तथा ॥ ९६ ॥
अहिषेणः (३) ह्यरुपश्च वीतहव्यः (४) सुमेधसः।
वैन्यः पृथुर्दिवोदासः प्रस्खारो गल्वमाग्नभः।
एकोनविंशदित्येते ऋषयो मन्त्रवादिनः ॥ ९७ ॥
अङ्गिरा वेधसश्चैव भारद्वाजोऽथ वाष्कलिः।
तथाऽमृतस्तथा गार्ग्यः शैनो संहृतिरेव च (५) ॥ ९८ ॥
पुरुकुत्सोऽथ मान्धाता अम्बरीषस्तथैव च।

१ तथा वरा इति ख०। २ अगस्त्यश्चौसिजस्तथेति ख०।
३ आहिषेण इति ट०। आर्ष्टिषेण इति ख०।
४ वीतहोत्र इति ख०। ५ सङ्कृतिरेव चेति ङ०। सन्तिरेव चेति ख०।



आहार्य्योऽथाजमीटश्च ऋषभो वलिरेव च ॥ ९९ ॥
पृषदश्वो विरूपश्च कण्वश्चैवाथ मुद्गलः।
युवनाश्वः पौरुकुत्सः स्वसदस्युः सदस्युमान् ॥ १०० ॥
उतथ्यश्च भरद्वाजस्तथा वाजश्रवा अपि।
आयाप्यश्च सुवित्तिश्च वामदेवस्तथैव च ॥ १०१ ॥
औगजो बृहदुक्थश्च ऋषिर्दीर्घतपास्तथा।
कक्षीवांश्च चयस्त्विंशत् स्मृता अङ्गिरसो वराः।
एते मन्त्रकृतः सर्वे काश्यपांस्तु निबोधत ॥ १०२ ॥
काश्यपश्चैव वत्सारो विभ्रमो रैभ्य एव च।
असितो देवलश्चैव षड़ेते ब्रह्मवादिनः ॥ १०३ ॥
अविर्हिंसनश्चैव श्यामावांश्चाथ निष्टुरः।
वल्गूतको मुनिर्दीमांस्तथा पूर्वातिथिश्च यः।
इत्येते चाचयः प्रोक्ता मन्त्रकारा महर्षयः ॥ १०४ ॥
वसिष्ठश्चैव शक्तिश्च तथैव च पराशरः।
चतुर्थ इन्द्रप्रमतिः पञ्चमस्तु भरद्वसुः ॥ १०५ ॥
षष्ठस्तु मैत्रावरुणः कुण्डिनः सप्तमस्तथा।
सुद्युम्नश्चाष्टमश्चैव नवमोऽथ बृहस्पतिः।
दशमस्तु भरद्वाजो मन्त्रब्राह्मणकारकाः ॥ १०६ ॥
एते चैव हि कर्त्तारो विधर्म्मध्वंसकारिणः।
लक्षणं ब्रह्मणश्चैतद्विहितं सर्व्वशास्त्रिनां ॥ १०७ ॥
हेतुर्हितेः स्मृतो धातोर्य्यन्निहन्त्युदितम्परैः।
अथ वार्थपरिप्राप्तेर्हिनोतेर्गतिकर्मणः ॥ १०८ ॥
तथा निर्वचनं ब्रूयाद्वाक्यार्थस्यावधारणं।

निन्दान्तामाहुराचार्य्या यद्दोषान्निन्द्यते वचः ॥ १०९ ॥
प्रपूर्वाच्छंसतेर्धातोः प्रशंसा गुणवत्तया ।
इदन्त्विदमिदन्नेदमित्यनिश्चित्य संशयः ॥ ११० ॥
इदमेव विधातव्यमित्ययं विधिरुच्यते ।
अन्यस्यान्यस्य चोक्तत्वाद्बुधाः परकृतिः स्मृता ॥ १११ ॥
यो ह्यत्यन्ततरोक्तश्च पुराकल्पः स उच्यते ।
पुराविक्रान्तवाचित्वात् पुराकल्पस्य कल्पना ॥ ११२ ॥
मन्त्रब्राह्मणकल्पैस्तु निगमैः शुद्धैर्विस्तरैः ।
अनिश्चित्य कृतामाहुर्व्यवधारणकल्पनां ॥ ११३ ॥
यथा ह्यदन्तथा तद्वै इदं वापि तथैव तत् ।
इत्येष ह्युपदेशोऽयं दशमो ब्राह्मणस्य तु ॥ ११४ ॥
इतीदृग् ब्राह्मणस्यादौ विहितं लक्षणम्बुधैः ।
तस्य तद्वृत्तिरुद्दिष्टा व्याख्याप्यनुपदं द्विजैः ॥ ११५ ॥
मन्त्राणां कल्पनञ्चैव विधिदृष्टेषु कर्मसु ।
मन्त्रो मन्त्रयतेर्धातोर्ब्राह्मणो ब्रह्मणोऽवनात् ॥ ११६ ॥
अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखं ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥ ११७ ॥

इति श्रीमहापुराणे वायुप्रोक्ते ऋषिलक्षणं
नामोनषष्ट्यध्यायः ।

---

# अथ षष्ट्यध्यायः ।

—:o:—

## महास्थानतीर्थवर्णनम् ।

ऋषय ऊचुः । ऋषयस्त्वृचः श्रुत्वा सूतमाहुः सुदुस्तरं ।
कथं वेदाः पुरा व्यस्तास्तन्नो ब्रूहि महामते ॥ १ ॥
सूत उवाच । द्वापरे तु परावृत्ते मनोः स्वायम्भुवोऽन्तरे ।
ब्रह्मा मनुमुवाचेदन्तद्वदित्थे महामते ॥ २ ॥
परिवृत्ते युगे तात स्वल्पवीर्य्या द्विजातयः ।
संवृत्ता युगदोषेण सर्व्वे चैव यथाक्रमं ॥ ३ ॥
भ्रश्यमानं युगवशादल्पशिष्टं हि दृश्यते ।
दशसाहस्रभागेन ह्यवशिष्टं कृतादिदं ॥ ४ ॥
वीर्य्यं तेजो बलं वाक्यं सर्वञ्चैव प्रणश्यति ।
वेदवेदा हि कार्य्याः स्युर्माभूद्वेदविनाशनं ॥ ५ ॥
वेदे नाशमनुप्राप्ते यज्ञो नाशं गमिष्यति ।
यज्ञे नष्टे देवनाशस्ततः सर्वं प्रणश्यति ॥ ६ ॥
आद्यो वेदश्चतुष्पादः शतसाहस्रसंज्ञितः ।
पुनर्दशगुणः कृत्स्नो यज्ञो वै सर्वकामधुक् ॥ ७ ॥
एवमुक्तस्तथेत्युक्त्वा मनुर्लोकहिते रतः ।
वेदमेकं चतुष्पादं चतुर्धा व्यभजत्प्रभुः ॥ ८ ॥
ब्रह्मणो वचनात्तात लोकानां हितकाम्यया ।
तदिदं वर्तमानेन युष्माकं वेदकल्पनं ॥ ९ ॥

मन्वन्तरेण वक्ष्यामि व्यतीतानां प्रकल्पनं।
प्रत्यक्षेण परोक्षं वै तन्निबोधत सत्तमाः ॥ १० ॥
अस्मिन्युगे कृतो व्यासः पाराशर्य्यः परन्तपः।
द्वैपायन इतिख्यातो विष्णोरंशः प्रकीर्तितः ॥ ११ ॥
ब्रह्मणा चोदितः सोऽस्मिन् वेदं व्यस्तुं प्रचक्रमे।
अथ शिष्यान् स जग्राह चतुरो वेदकारणात् ॥ १२ ॥
जैमिनिञ्च सुमन्तुञ्च वैशम्पायनमेव च।
पैलन्तेषां चतुर्थन्तु पञ्चमं लोमहर्षणं ॥ १३ ॥
ऋग्वेदश्रावकं पैलञ्जग्राह विधिवद्द्विजं।
यजुर्वेदप्रवक्तारं वैशम्पायनमेव च ॥ १४ ॥
जैमिनिं सामवेदार्थश्रावकं सोऽन्वपद्यत।
तथैवाथर्ववेदस्य सुमन्तुमृषिसत्तमं ॥ १५ ॥
इतिहासपुराणस्य वक्तारं सम्यगेव हि।
माद्यैव प्रतिजग्राह भगवानीश्वरः प्रभुः ॥ १६ ॥
एक आसीद्यजुर्वेदस्तञ्चतुर्धा व्यकल्पयत्।
चतुर्होत्रमभूत्तस्मिंस्तेन यज्ञमकल्पयत् ॥ १७ ॥
आध्वर्य्यवं यजुर्भिस्तु ऋग्भिर्होत्रं तथैव च।
उद्गात्रं सामभिश्चक्रे ब्रह्मत्वञ्चाप्यथर्वभिः।
ब्रह्मत्वमकरोद्यज्ञे वेदेनाथर्वणेन तु ॥ १८ ॥
ततः स ऋचमुद्धृत्य ऋग्वेदं समकल्पयत्।
होटृकं कल्पते तेन यज्ञवाहं जगद्धितं ॥ १९ ॥
सामभिः सामवेदञ्च तेनोद्गात्रमरोचयत्।
राज्ञस्त्वथर्ववेदेन सर्वकर्माण्यकारयत् ॥ २० ॥



आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कुलकर्म्मभिः।
पुराणसंहिताञ्चक्रे पुराणार्थविशारदः ॥ २१ ॥
यच्छिष्टन्तु यजुर्वेदे तेन यज्ञमथायुजत्।
युञ्जानः स यजुर्वेद इति शास्त्रविनिश्चयः ॥ २२ ॥
पदानामुद्धृतत्वाच्च यजूंषि विषमाणि वै।
स तेनोद्धृतवीर्य्यस्तु ऋत्विग्भिर्वेदपारगैः।
प्रयुज्यते ह्यश्वमेधस्तेन वा युज्यते तु सः ॥ २३ ॥
ऋचो गृहीत्वा पैलस्तु व्यभजत्तद्विधा पुनः।
द्विःकृत्वा संयुगे चैव शिष्याभ्यामददत्प्रभुः ॥ २४ ॥
इन्द्रप्रमतये चैकां द्वितीयां वाष्कलाय च।
चतस्रः संहिताः कृत्वा वाष्कलिर्द्विजसत्तमः।
शिष्यानध्यापयामास शुश्रूषाभिरतान् हितान् ॥ २५ ॥
बोधन्तु प्रथमां शाखां द्वितीयामग्निमाठरं।
पाराशरं तृतीयान्तु याज्ञवाल्क्यमथापराम् ॥ २६ ॥
इन्द्रप्रमतिरेकान्तु संहितां द्विजसत्तमः।
अध्यापयन्महाभागं मार्कण्डेयं यशस्विनं ॥ २७ ॥
सत्यस्रवसमप्यन्तु पुत्रं स तु महायशाः।
सत्यस्रवाः सत्यहितं पुनरध्यापयद् द्विजः ॥ २८ ॥
सोऽपि सत्यतरं पुत्रं पुनरध्यापयद्विभुः।
सत्यश्रियं महात्मानं सत्यधर्मपरायणं ॥ २९ ॥
अभवंस्तस्य शिष्या वै त्रयस्तु सुमहौजसः।
सत्यश्रियस्तु विद्वांसः शास्त्रग्रहणतत्पराः ॥ ३० ॥
शाकल्यः प्रथमस्तेषां तस्मादन्यो रथान्तरः।

वाष्कलिश्च भरद्वाज इतिशाखाप्रवर्तकाः ॥ ३१ ॥
देवमित्रस्तु शाकल्यो ज्ञानाहङ्कारगर्वितः।
जनकस्य स यज्ञे वै विनाशमगमद्द्विजः ॥ ३२ ॥
शांशपायन उवाच(१)। कथं विनाशमगमत्स मुनिर्ज्ञानगर्वितः।
जनकस्याध्वमेधेन कथं वादी बभूव ह ॥ ३३ ॥
किमर्थञ्चाभवद्वादः केन सार्द्धमथापि वा।
सर्वमेतद्यथावृत्तमाचक्ष्व विदितन्तव।
ऋषीणान्तु वचः श्रुत्वा तदुत्तरमथाब्रवीत् ॥ ३४ ॥
सूतउवाच। जनकस्याध्वमेधे तु महानासीत्समागमः।
ऋषीणांन्तु सहस्राणि तत्राजग्मुरनेकशः।
राजर्षेर्जनकस्याथ तं यज्ञं हि दिदृक्षवः ॥ ३५ ॥
आगतान् ब्राह्मणान् दृष्ट्वा जिज्ञासास्याभवत्ततः।
को न्वेषां ब्राह्मणः श्रेष्ठः कथं मे निश्चयो भवेत्।
इति निश्चित्य मनसा बुद्धिं चक्रे जनाधिपः ॥ ३६ ॥
गवां सहस्रमादाय सुवर्णमधिकं ततः।
ग्रामान् रत्नानि दासांश्च (२) मुनीन् प्राह नराधिपः।
सर्वानहं प्रपन्नोऽस्मि शिरसा श्रेष्ठभागिनः ॥ ३७ ॥
यदेतदाहृतं वित्तं यो वः श्रेष्ठतमो भवेत्।
तस्मै तदुपनीतं हि विद्यावित्तं द्विजोत्तमाः ॥ ३८ ॥
जनकस्य वचः श्रुत्वा मुनयस्ते श्रुतिक्षमाः।
दृष्ट्वा धनं महासारं धनहृद्या जिघृक्षवः।

१ वैशम्पायन उवाचेति ख०। २ ग्राम्यान् दासीगणांश्चैवेति ख०।



अब्रुवाञ्चक्रुरन्योन्यं वेदज्ञानमदोल्बणाः ॥ ३९ ॥
मनसा गतवित्तास्ते ममेदं धनमित्युत।
ममैवैतन्नवेत्यन्यो ब्रूहि किं वा विकत्थते।
इत्येवं धनदोषेण वादांश्चक्रुरनेकशः ॥ ४० ॥
तथाऽन्यस्तत्र वै विद्वान् ब्रह्मवाहसुतः कविः।
याज्ञवल्क्यो महातेजास्तपस्वी ब्रह्मवित्तमः ॥ ४१ ॥
ब्रह्मणोऽङ्गात् समुत्पन्नो वाक्यं प्रोवाच सुस्वरं।
शिष्यं ब्रह्मविदां श्रेष्ठो धनमेतद्गृहाण भो ॥ ४२ ॥
नयस्व च गृहं वत्स ममैतन्नात्र संशयः।
सर्ववेदेष्वहं वक्ता नान्यः कश्चित्, मत्समः।
यो वा न प्रीयते विप्रः स मे ह्वयतु माऽचिरं ॥ ४३ ॥
ततो ब्रह्मार्णवः क्षुब्धः समुद्र इव संप्लवे।
तानुवाच ततः स्वस्थो याज्ञवल्क्यो हसन्निव ॥ ४४ ॥
क्रोधं माकार्पुर्विद्वांसो भवन्तः सत्यवादिनः।
वदामहे यथायुक्तं जिज्ञासन्तः परस्परं ॥ ४५ ॥
ततोऽभ्युपागमंस्तेषां वादा जग्मुरनेकशः।
सहस्रधा शुभैरर्थैः सूक्ष्मदर्शनसम्भवैः ॥ ४६ ॥
लोके वेदे तथाध्यात्मे विद्यास्थानैरलङ्कृताः।
शापोत्तमगुणैर्युक्ता नृपोषपरिवर्जनाः (१)।
वादाः समभवंस्तत्र धनहेतोर्महात्मनां ॥ ४७ ॥
ऋषयस्त्वेकतः सर्वे याज्ञवल्क्यास्तथैकतः।

१ नृपरूपविवर्जना इति ख०।

सर्वे ते मुनयस्तेन याज्ञवल्क्येन धीमता।
एकैकशस्ततः पृष्टा नैवोत्तरमथाब्रुवन् ॥ ४८ ॥
तान्विजित्य मुनीन् सर्वान् ब्रह्मराशिर्महाद्युतिः।
शाकल्यमिति होवाच वादकर्त्तारमञ्जसा ॥ ४९ ॥
साकल्य वद वक्तव्यं किं ध्यायन्नवतिष्ठसे।
पूर्णस्त्वं जड़मानेन वाताध्मातो यथा दृतिः ॥ ५० ॥
एवं स धर्षितस्तेन रोषात्ताम्राक्षलोचनः।
प्रोवाच याज्ञवल्क्यं तं पुरुषं मुनिसन्निधौ ॥ ५१ ॥
त्वमस्मांस्तृणवत्त्वक्त्वा तथैवेमान् द्विजोत्तमान्।
विद्याधनं महासारं स्वयंग्राहं जिघृक्षसि ॥ ५२ ॥
शाकल्येनैवमुक्तः स्याज्ज्ञाज्ञवल्क्यः समब्रवीत्।
ब्रह्मिष्ठानां बलं विद्धि विद्यातत्त्वार्थदर्शनं ॥ ५३ ॥
कामश्चार्थेन सम्बन्धस्तेनार्थं कामयामहे।
कामप्रश्नधना विप्राः कामप्रश्नान्वदामहे ॥ ५४ ॥
पणश्चैषोऽस्य राजर्षेस्तस्मान्नीतं धनं मया।
एतच्छ्रुत्वा वचस्तस्य शाकल्यः क्रोधमूर्च्छितः।
याज्ञवल्क्यमथोवाच कामप्रश्नार्थमद्दचः ॥ ५५ ॥
ब्रूहीदानीं मयोद्दिष्टान् कामप्रश्नान् यथार्थतः।
ततः समभवद्दादस्तयोर्ब्रह्मविदोर्महान् ॥ ५६ ॥
साग्रं प्रश्नसहस्रन्तु साकल्यस्तम चूचुदत्।
याज्ञवल्क्योऽब्रवीत्सर्वान् ऋषीणां शृण्वतां तदा ॥ ५७ ॥
शाकल्ये चापि निर्व्वादे याज्ञवल्क्यस्तमब्रवीत्।
प्रश्नमेकं ममापि त्वं वद शाकल्य कामिकं।



शापः पणोऽस्य वादस्य अब्रुवन् मृत्युमाव्रजेत् ॥ ५८ ॥
अथ सब्रोदितं प्रश्नं याज्ञवल्क्येन धीमता।
शाकल्यस्तमविज्ञाय सद्यो मृत्युमवाप्नुयात् ॥ ५९ ॥
एवं मृतः स शाकल्यः प्रश्नव्याख्यानपीड़ितः।
एवं वादश्च सुमहानासीत्तेषां धनार्थिभिः।
ऋषीणां मुनिभिः सार्द्धं याज्ञवल्क्यस्य चैव हि ॥ ६० ॥
सर्वैः पृष्टांस्तु सम्प्रश्नान्शतशोऽथ सहस्रशः।
व्याख्याय वै मुने तेषां प्रश्नसारं महागतिः ॥ ६१ ॥
याज्ञवल्क्यो धनं गृह्य यशो विख्याप्य चात्मनः।
जगाम वै गृहं स्वस्थः शिष्यैः परिवृतो वशी ॥ ६२ ॥
देवमित्रस्तु शाकल्यो महात्मा द्विजसत्तमः।
चकार संहिताः पञ्च बुद्धिमान् पदवित्तमः ॥ ६३ ॥
तत्शिष्या अभवन् पञ्च मुद्गलो गोलकस्तथा।
खालीयश्च तथा मत्स्यः शैशिरेयस्तु पञ्चमः ॥ ६४ ॥
प्रोवाच संहितास्तिस्रः शाकपूर्णरथीतरः (१)।
निरुक्तञ्च पुनश्चक्रे चतुर्थं द्विजसत्तमः ॥ ६५ ॥
तस्य शिष्यास्तु चत्वारः केतवो दालकिस्तथा।
धर्म्मशर्म्मा देवशर्म्मा सर्व्वे व्रतधरा द्विजाः ॥ ६६ ॥
शाकल्ये तु मृते सर्व्वे ब्रह्मघ्नास्ते बभूविरे।
तदा चिन्तां परां प्राप्य गतास्ते ब्रह्मणोऽन्तिकं ॥ ६७ ॥
तान् ज्ञात्वा चेतसा ब्रह्मा प्रेषितः पवने पुरे।

---

१ पाठोऽयं न समीचीनः।

तत्र गच्छत यूयं वः सद्यः पापं प्रणश्यति ॥ ६८ ॥
द्वादशार्कं नमस्कृत्य तथा वै वालुकेश्वरं।
एकादश तथा रुद्रान् वायुपुत्रं विशेषतः।
कुण्डे च तुष्टये स्नात्वा ब्रह्महत्यां तरिष्यथ ॥ ६९ ॥
सर्व्वे शीघ्रतरा भूत्वा तत् पुरं समुपागताः।
स्नानं कृतं विधानेन देवानां दर्शनं कृतं ॥ ७० ॥
उत्तरेश्वरं नमस्कृत्य वाड़वानां प्रसादतः।
सर्व्वे पापविनिर्मुक्ता गतास्ते सूर्य्यमण्डलं ॥ ७१ ॥
तदा प्रभृति तत्तीर्थं जातं पातकनाशनं।
वायोः पुरं पवित्रञ्च वायुना निर्म्मितं पुरा ॥ ७२ ॥
अञ्जनागर्भसम्भूतहनुमान् पवनात्मजः।
यदा जातो महादेवहनुमान् सत्यविक्रमः।
तदेवं निर्म्मितं तीर्थं वायुना ब्रह्मयोनिना ॥ ७३ ॥
ऊर्य्यां जातास्तु ये शूद्रा ब्राह्मणानां निवेदिताः।
हत्यर्थं ब्रह्मयज्ञार्थं करस्तेषु कृतो महान्॥ ७४ ॥
अनेन विधिना जातं विप्राणां शासनं महत्।
गोघ्नो वापि कृतघ्नो वा सुरापी गुरुतल्पगः।
वाड़ादित्यं नमस्कृत्य सर्व्वपापैः प्रमुच्यते ॥ ७५ ॥

इति श्रीमहापुराणे वायुप्रोक्ते महास्थानतीर्थवर्णनं
नाम षष्ठ्यऽध्यायः।

---

# अथैकषष्ट्यऽध्यायः।

—:o:—

## प्रजापतिवंशानुकीर्त्तनं।

ऋषय ऊचुः। भारद्वाजो याज्ञवल्क्यो गालकिः साङ्कृतिस्तथा।
धीमान् शतबलाकश्च नैगमश्च द्विजोत्तमः ॥ १ ॥
वाष्कलिश्च भरद्वाजस्त्रिस्रः प्रोवाच संहिताः।
रथीतरो निरुक्तञ्च पुनश्चक्रे चतुर्थकं ॥ २ ॥
त्रयस्तस्याभवन् शिष्या महात्मानो गुणान्विताः।
धीमान्नन्दायनीयश्च पन्नगारिश्च बुद्धिमान्।
तृतीयश्चार्यवस्ते च तपसा संशितव्रताः ॥ ३ ॥
वीतरागा महातेजा संहिताज्ञानपारगाः।
इत्येते बह्वृचा प्रोक्ताः संहिता यैः प्रवर्त्तिताः ॥ ४ ॥
वैशम्पायनगोत्रोऽसौ यजुर्वेदं व्यकल्पयत्।
षड़शीतिस्तु येनोक्ताः संहिता यजुषां शुभाः ॥ ५ ॥
शिष्येभ्यः प्रददौ ताश्च जगृहुस्ते विधानतः।
एकस्तत्र परित्यक्तो याज्ञवल्क्यो महातपाः।
षड़शीतिश्च तस्यापि संहितानां विकल्पकाः ॥ ६ ॥
सर्वेषामेव तेषां वै त्रिधा भेदाः प्रकीर्त्तिताः।
त्रिधा भेदास्तु ते प्रोक्ता भेदेऽस्मिन्नवमे शुभे ॥ ७ ॥
उदीच्या मध्यदेशाश्च प्राच्याश्चैव पृथग्विधाः।
श्यामायनिरुदीच्यानां प्रधानः सम्बभूव ह ॥ ८ ॥

मध्यदेशप्रतिष्ठानामारुणिः प्रथमः स्मृतः।
आलम्बिरादिः प्राच्यानान्वयोदश्यादयस्तु(१)ते ॥ ९ ॥
इत्येते चरकाः प्रोक्ताः संहितावादिनो द्विजाः।
ऋषयस्तद्वचः श्रुत्वा सूतं जिज्ञासवोऽब्रुवन् ॥ १० ॥
चरकाध्वर्यवः केन कारणं ब्रूहि तत्त्वतः।
किंस्वीर्णं कस्य हेतोश्च वाचकत्वञ्च भेजिरे।
इत्युक्तः प्राह तेषां स चरकत्वमभूद्यथा ॥ ११ ॥

सूत उवाच। कार्यमासीद्दृषीणाञ्च किञ्चिद् ब्राह्मणसत्तमाः।
मेरुपृष्ठं समासाद्य तैस्तदा त्विति मन्त्रितं ॥ १२ ॥
यो नोऽत्र समरात्रेण नागच्छेद्द्विजसत्तमाः।
स कुर्य्याद् ब्रह्मबध्यां वै समयो नः प्रकीर्तितः ॥ १३ ॥
ततस्ते सगणाः सर्व्वे वैशम्पायनवर्जिताः।
प्रययुः समरात्रेण यत्र सन्धिः कृतोऽभवत् ॥ १४ ॥
ब्राह्मणानान्तु वचनाद् ब्रह्मबध्याञ्चकार सः।
शिष्यानथ समानीय स वैशम्पायनोऽब्रवीत् ॥ १५ ॥
ब्रह्मबध्याञ्चरध्वं वै मत्कृते द्विजसत्तमाः।
सर्व्वे यूयं समागम्य ब्रूत मे तद्वितं वचः ॥ १६ ॥

याज्ञवल्क्य उवाच। अहमेव चरिष्यामि तिष्ठन्तु मुनयस्त्विमे।
बलञ्चोत्थापयिष्यामि तपसा स्वेन भावितः ॥ १७ ॥
एवमुक्तस्ततः क्रुद्धो याज्ञवल्क्यमथाब्रवीत्।
उवाच यत्त्वयाऽधीतं सर्वं प्रत्यर्पयस्व मे ॥ १८ ॥

१ षाढोऽयं न षमीषीनः।



एवमुक्तः स रूपाणि यजूंषि प्रददौ गुरोः।
रुधिरेण तथाक्तानि छर्दित्वा ब्रह्मवित्तमः ॥ १९ ॥
ततः स ध्यानमास्थाय सूर्य्यमाराधयद् द्विजाः।
सूर्य्यब्रह्म यदुच्छिन्नं(१) खड्गत्वा प्रतितिष्ठति ॥ २० ॥
ततो यानि गतान्यूर्द्धं यजूंष्यादित्यमण्डलं।
तानि तस्मै ददौ तुष्टः सूर्य्यो वै ब्रह्मरीतये।
अश्वरूपाय मार्त्तण्डो याज्ञवल्क्याय धीमते ॥ २१ ॥
यजूंष्यधीयते यानि ब्राह्मणा येन केन च।
अश्वरूपाय दत्तानि ततस्ते वाजिनोऽभवन् ॥ २२ ॥
ब्रह्महत्या तु यैस्वीर्णा चरणाच्चरकाः स्मृताः।
वैशम्पायनशिष्यास्ते चरकाः समुदाहृताः। २३ ॥
इत्येते चरकाः प्रोक्ता वाजिनस्तान्निबोधत।
याज्ञवल्क्यस्य शिष्यास्ते कण्ववैधेयशालिनः ॥ २४ ॥
मध्यन्दिनश्च शापेयो विदिग्धश्चाप्य उद्दलः।
ताम्रायणश्च वात्स्यश्च तथा गालवशैषिरी।
आटवी च तथा पर्णी वौरणी सपरायणः ॥ २५ ॥
इत्येते वाजिनः प्रोक्ता दश पञ्च च संस्मृताः।
शतमेकाधिकं कृत्स्नं यजुषां वै विकल्पकाः ॥ २६ ॥
पुत्रमध्यापयामास सुमन्तुमथ जैमिनिः।
सुमन्तुश्चापि सुत्वानं पुत्रमध्यापयत्प्रभुः।
सुकर्माणं सुतं सुत्वा पुत्रमध्यापयत्प्रभुः ॥ २७ ॥

१ तत् सूर्यब्रह्म यच्छिन्नमिति ट०।

स सहस्रमधीत्याथ सुकर्माप्यथ संहिताः।
प्रोवाचाथ सहस्रस्य सुकर्मा सूर्य्यवर्चसः॥ २८॥
अनध्यायेष्वधीयानांस्तान् जघान शतक्रतुः।
प्रायोपवेशमकरोत्ततोऽसौ शिष्यकारणात्॥ २९॥
क्रुद्धं दृष्ट्वा ततः शक्रो वरमस्मै ददौ पुनः।
भाविनो ते महावीर्य्यौ शिष्यावनलवर्चसौ॥ ३०॥
अधीयानौ महाप्राज्ञौ सहस्रं संहितास्विभौ।
एतौ सुरौ महाभागौ मा क्रुध्य द्विजसत्तम॥ ३१॥
इत्युक्त्वा वासवः श्रीमान् सुकर्माणं यशस्विनं।
शान्तक्रोधं द्विजं दृष्ट्वा तत्रैवान्तरधीयत॥ ३२॥
तस्य शिष्यो भवेद्धीमान् पौष्यञ्जी द्विजसत्तमाः।
हिरण्यनाभः कौशिक्यो द्वितीयोऽभून्नराधिपः॥ ३३॥
अध्यापयत्तु पौष्यञ्जी सहस्रार्द्धन्तु संहिताः।
तेनान्योदीच्यसामान्याः शिष्याः पौष्यञ्जिनः शुभाः॥३४॥
शतानि पञ्च कौशिक्यः संहितानाञ्च वीर्य्यवान्।
शिष्या हिरण्यनाभस्य स्मृतास्ते प्राच्यसामगाः॥ ३५॥
लौकाक्षी कुथुमिश्चैव कुशीती लाङ्गलिस्तथा।
पौष्यञ्जिशिष्याश्चत्वारस्तेषां भेदान्निबोधत। ३६॥

राणायनीयः सहितश्शिष्यपुत्र-
स्तस्मादन्यो मूलचारी सुविद्वान्।
सकृतिपुत्रः सहसाल्यपुत्र
एतान् भेदान्वित्त लौकाक्षिणस्तु॥ ३७॥

चयस्तु कुथुमेः पुत्रो औरसो रसपासरः।



भागवित्तिश्च तेजस्वी त्रिविधाः कौथुमाः स्मृताः॥ ३८॥
शौरिद्युः शृङ्गिपुत्रश्च द्वावेतौ चरितव्रतौ।
राणायनीयः सौमित्रिः सामवेदविशारदौ॥ ३९॥
प्रोवाच संहितास्तिस्रः शृङ्गिपुत्रो महातपाः।
चैलः प्राचीनयोगश्च सुरालश्च द्विजोत्तमाः॥ ४०॥
प्रोवाच संहिताः षट् तु पाराशर्य्यस्तु कौथुमः।
आसुरायणवैशाख्यौ वेदब्रह्मपरायणौ॥ ४१॥
प्राचीनयोगपुत्रश्च बुद्धिमांश्च पतञ्जलिः।
कौथुमस्य तु भेदास्ते पाराशर्य्यस्य षट् स्मृताः।
लाङ्गलिः शालिहोत्रश्च षट्षट् प्रोवाच संहिताः॥ ४२॥
भालुकिः कामहानिश्च जैमिनिर्लौमगायिनः।
कण्डश्च कोहलश्चैव षड्ऽते लाङ्गलाः स्मृताः।
एते लाङ्गलिनः शिष्याः संहिता यैः प्रसाधिताः॥ ४३॥
ततो हिरण्यनाभस्य कृतशिष्यो नृपात्मजः।
सोऽकरोच्च चतुर्विंशत्संहिताः द्विपदां वरः।
प्रोवाच चैव शिष्येभ्यो येभ्यस्तांश्च निबोधत॥ ४४॥
राड्श्च मङ्गवीर्य्यश्च पञ्चमो वाहनस्तथा।
तालकः पाण्डकश्चैव कालिको राजिकस्तथा।
गौतमश्चाजवस्तश्च सोमराजाऽपतत्ततः॥ ४५॥
पृष्टघ्नः परिकृष्टश्च उलूखलक एव च।
यवीयसश्च वैशालो अङ्गुलीयश्च कौशिकः॥ ४६॥
सालिमच्छरिसत्यश्च कापीयः कानिकश्च यः।
पराशरश्च धर्मात्मा इति क्रान्तास्तु सामगाः॥ ४७॥

सामगानान्तु सर्व्वेषां श्रेष्ठौ द्वौ तु प्रकीर्त्तितौ।
पौष्यञ्जिश्च कृतिश्चैव संहितानां विकल्पकौ ॥ ४८ ॥
अथर्वाणं द्विधा कृत्वा सुमन्तुरददद्द्विजाः।
कबन्धाय पुनः कृत्स्नं स च विद्यास्थाक्रमं ॥ ४९ ॥
कबन्धस्तु द्विधा कृत्वा पथ्यायैकमुनर्ददौ।
द्वितीयं वेदस्पर्शाय स चतुर्द्धाऽकरोत् पुनः ॥ ५० ॥
मोदो ब्रह्मबलश्चैव पिप्पलादस्तथैव च।
शौक्कायनिश्च धर्मज्ञश्चतुर्थस्तपनः स्मृतः।
वेदस्पर्शस्य चत्वारः शिष्यास्ते दृढव्रताः ॥५१॥
पुनश्च त्रिविधं विद्धि पथ्यानां भेदमुत्तमं।
जाजलिः कुमुदादिश्च तृतीयः शौनकः स्मृतः ॥ ५२ ॥
शौनकस्तु द्विधा कृत्वा ददावेकन्तु बभ्रवे।
द्वितीयां संहितां धीमान् सैन्धवायनसंज्ञिते ॥ ५३ ॥
सैन्धवो मुञ्जकेशाय भिन्नां साच द्विधा पुनः।
नक्षत्रकल्पो वैतानस्तृतीयः संहिताविधिः।
चतुर्थोऽङ्गिरसः कल्पो शान्तिकल्पश्च पञ्चमः ॥ ५४ ॥
श्रेष्ठस्त्वथर्वणो ह्येते संहितानां विकल्पनाः।
षट्त्रयः कृत्वा मयाप्युक्तं पुराणमृषिसत्तमाः ॥ ५५ ॥
आत्रेयः सुमतिर्धीमान् काश्यपो ह्यकृतव्रणः।
भारद्वाजोऽग्निवर्चाश्च वशिष्ठो मित्रयुश्च यः।
सावर्णिः सोमदत्तिस्तु सुशर्म्मा शांशपायनः ॥ ५६ ॥
एते शिष्या मम ब्रह्मन् पुराणेषु दृढव्रताः।
त्रिभिस्त्रिभिः कृतास्त्रिभिः संहिताः पुनरेव हि ॥ ५७ ॥



काश्यपः संहिताकर्त्ता सावर्णिः शांशपायनः।
सामिका च चतुर्थी स्यात्सा चैषा पूर्वसंहिता ॥ ५८ ॥
सर्वास्ताहि चतुष्पादाः सर्वाश्चैकार्थवाचिकाः।
पाठान्तरे पृथग्भूता वेदशाखा यथा तथा।
चतुःसाहस्रिकाः सर्व्वाः शांशपायनिकामृते ॥ ५९ ॥
लोमहर्षणिका मूलास्ततः काश्यपिकाः पराः।
सावर्णिकास्तृतीयास्तु यजुर्वाक्यार्थपण्डिताः ॥ ६० ॥
शांशपायनिकाश्चान्या नोदनार्थविभूषिताः।
सहस्राणि ऋचामष्टौ षट्शतानि तथैव च ॥ ६१ ॥
एताः पञ्चदशान्याश्च दशान्या दशभिस्तथा।
वालिखिल्याः समप्रैक्षाः (१) ससावर्णाः प्रकीर्तिताः ॥६२॥
अष्टौ सामसहस्राणि सामानि च चतुर्दश।
आरण्यकं सहोमञ्च एतद्गायन्ति सामगाः ॥ ६३ ॥
द्वादशैव सहस्राणि छन्द आध्वर्यवं स्मृतं।
यजुषां ब्राह्मणानाञ्च यथा (२) व्यासो व्यकल्पयत् ॥ ६४ ॥
सग्राम्यारण्यकन्तत्स्यात् समन्त्रकरणं तथा।
अतः परङ्गयानान्तु पूर्वा इति विशेषणं ॥ ६५ ॥
ग्राम्यारण्यं समन्त्रञ्च ऋग्ब्राह्मणयजुः स्मृतं।
तथा हारिद्रवीयाणां खिलान्युपखिलानि च।
तथैव तैत्तिरीयाणां परक्षुद्रा इतिस्मृतं ॥ ६६ ॥
द्वे सहस्रे शतन्यूने वेदे वाजसनेयके।
ऋग्गणः परिसंख्यातो ब्राह्मणन्तु चतुर्गुणं ॥ ६७ ॥

१ समप्रैषा इति ख०। समप्रैक्षा इति ट०। २ तथेति ङ०।

अष्टौ सहस्राणि शतानि चाष्टौ
अशीतिरन्यान्यधिकश्च पादः।
एतत्प्रमाणं यजुषामृचाञ्च
सशुक्लियं साखिलयाञ्चदत्तयं ॥ ६८ ॥
तथा चरणविद्यानां प्रमाणं संहितां शृणु।
षट्साहस्रमृचामुक्तमृचः षड्विंशतिः पुनः।
एतावदधिकं तेषां यजुः कामं विवक्षति ॥ ६९ ॥
एकादश सहस्राणि दश चान्या दशोत्तराः।
ऋचान्दश सहस्राणि अशीतित्रिशतानि च ॥ ७० ॥
सहस्रमेकं मन्त्राणामृचामुक्तं प्रमाणतः।
एतावद्भृगुविस्तारमन्यच्चाथर्विकं बहु ॥ ७१ ॥
ऋत्तामथर्वणां पञ्च सहस्राणि विनिश्चयः (१)।
सहस्रमन्यद्विज्ञेयमृषिभिर्विंशतिं विना ॥ ७२ ॥
एतदङ्गिरसा प्रोक्तन्तेषामारण्यकम्पुनः।
इति संख्या प्रसंख्याता शाखाभेदास्तथैव च ॥ ७३ ॥
कर्त्तॄणामेव शाखानां भेदे हेतुस्तथैव च।
सर्वमन्वन्तरेष्वेवं शाखाभेदाः समाः स्मृताः ॥ ७४ ॥
प्राजापत्या श्रुतिर्नित्या तद्विकल्पास्त्विमे स्मृताः।
अनित्यभावाद्देवानां मन्त्रोत्पत्तिः पुनः पुनः ॥ ७५ ॥
मन्वन्तराणां क्रियते सुराणां नामनिश्चयः।
द्वापरेषु पुनर्भेदाः श्रुतानां परिकीर्त्तिताः ॥ ८४ ॥
एवं वेदान्तदान्यस्य भगवान्ऋषिसत्तमः।

१ सहस्राणीति निश्चय इति ट०।



शिष्येभ्यश्च पुनर्दत्त्वा तपस्तप्तुं गतो वनं।
तस्य शिष्यप्रशिष्यैस्तु शाखाभेदास्त्विमे कृताः ॥ ७७ ॥
अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्मशास्त्रं पुराणञ्च विद्यास्त्वेताश्चतुर्दश ॥ ७८ ॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः।
अर्थशास्त्रं चतुर्थन्तु विद्यास्त्वष्टादशैव तु ॥ ७९ ॥
ज्ञेया ब्रह्मर्षयः पूर्वन्तेभ्यो देवर्षयः पुनः।
राजर्षयः पुनस्तेभ्य ऋषिप्रकृतयस्त्रयः।
तेभ्य ऋषिप्रकृतयो मुनिभिः संशितव्रतैः ॥ ८० ॥
कश्यपेषु वशिष्ठेषु तथा भृग्वङ्गिरोऽत्रिषु
पञ्चस्वेतेषु जायन्ते गोत्रेषु ब्रह्मवादिनः।
यस्माद्दृषन्ति ब्रह्माणन्तेन ब्रह्मर्षयः स्मृताः ॥ ८१ ॥
धर्मस्याथ पुलस्त्यस्य क्रतोश्च पुलहस्य च।
प्रत्यूषस्य प्रभासस्य कश्यपस्य तथा पुनः ॥ ८२ ॥
देवर्षयः सुतास्तेषां नामतस्तान्निबोधत।
देवर्षी धर्मपुत्रौ तु नरनारायणावुभौ ॥ ८३ ॥
वालिखिल्याः क्रतोः पुत्राः कर्दमः पुलहस्य तु।
कुबेरश्चैव पौलस्त्यः प्रत्यूषस्याचलः स्मृतः ॥ ८४ ॥
पर्वतो नारदश्चैव कश्यपस्यात्मजावुभौ।
ऋषन्ति देवान्यस्मात्ते तस्माद् देवर्षयः स्मृताः ॥ ८५ ॥
मानवे वैषये वंशे ऐडवंशे च ये नृपाः।
ऐडा ऐक्ष्वाकनाभागा ज्ञेया राजर्षयस्तु ते ॥ ८६ ॥
ऋषन्ति रञ्जनाद्यस्मात्प्रजा राजर्षयस्ततः।

ब्रह्मलोकप्रतिष्ठास्तु स्मृता ब्रह्मर्षयो मताः ॥ ८७ ॥
देवलोकप्रतिष्ठाश्च ज्ञेया देवर्षयः शुभाः।
इन्द्रलोकप्रतिष्ठास्तु सर्वे राजर्षयो मताः ॥ ८८ ॥
अभिजात्या च तपसा मन्त्रव्याहरणैस्तथा।
एवं ब्रह्मर्षयः प्रोक्ता दिव्या राजर्षयस्तु ये ॥ ८९ ॥
देवर्षयस्तथाऽन्ये च तेषां वक्ष्यामि लक्षणं।
भूतभव्यभवज्ज्ञानं सत्याभिव्याहृतं तथा ॥ ९० ॥
सम्बुद्धास्तु स्वयं ये तु सम्बुद्धा ये च वै स्वयं।
तपसेह प्रसिद्धा ये गर्भे यैश्च प्रनोदितं ॥ ९१ ॥
मन्त्रव्याहारिणो ये च ऐश्वर्य्यात्सर्व्वगाश्च ये।
इत्येते ऋषिभिर्युक्ता देवद्विजनृपास्तु ये ॥ ९२ ॥
एतान् भावानधीयाना ये चैत ऋषयो मताः।
सप्तैते सप्तभिश्चैव गुणैः सप्तर्षयः स्मृताः ॥ ९३ ॥
दीर्घायुषो मन्त्रकृत ईश्वरा दिव्यचक्षुषः।
बुद्धाः प्रत्यक्षधर्माणो गोत्रप्रवर्तकाश्च ये ॥ ९४ ॥
षट्कर्माभिरता नित्यं शालिनो गृहमेधिनः।
तुल्यैर्व्यवहरन्ति स्म अदृष्टैः कर्महेतुभिः ॥ ९५ ॥
अग्राम्यैर्वर्त्तयन्ति स्म रसैश्चैव स्वयंकृतैः।
कुटुम्बिन ऋद्धिमन्तो बाह्यान्तरनिवासिनः ॥ ९६ ॥
कृतादिषु युगाख्येषु सर्व्वेष्वेव पुनः पुनः।
वर्णाश्रमव्यवस्थानं क्रियन्ते प्रथमन्तु वै ॥ ९७ ॥
प्राप्ते चेतायुगमुखे पुनः सप्तर्षयस्त्विह।
प्रवर्त्तयन्ति ये वर्णानाश्रमांश्चैव सर्वशः।



तेषामेवान्वये वीरा उत्पद्यन्ते पुनः पुनः ॥ ९८ ॥
जायमाने पिता पुत्रे पुत्रः पितरि चैव हि।
एवं समेत्याविच्छेदाद् वर्त्तयन्त्यायुगक्षयात्।
अष्टाशीतिसहस्राणि प्रोक्तानि गृहमेधिनां ॥ ९९ ॥
अर्थ्यग्नौ दक्षिणा ये तु पितृयानं समाश्रिताः।
द्वाराग्निहोत्रिणस्ते वै ये प्रजाहेतवः स्मृताः ॥ १०० ॥
गृहमेधिनाच्च संख्येयाः श्मशानान्याश्रयन्ति ते।
अष्टाशीतिसहस्राणि निहिता उतरायणे ॥ १०१ ॥
ये ह्यूयन्ते दिवं प्राप्ता ऋषयो ह्यूर्द्ध्वरेतसः।
मन्त्रब्राह्मणकर्त्तारो जायन्ते ह युगक्षये ॥ १०२ ॥
एवमावर्त्तमानास्ते द्वापरेषु पुनः पुनः।
कल्पानां भाष्यविद्यानां नानाशास्त्रकृतः क्षये ॥ १०३ ॥
भविष्ये द्वापरे चैव द्रोणिर्द्वैपायनः पुनः।
वेदव्यासो ह्यतीतेऽस्मिन् भविता सुमहातपाः ॥ १०४ ॥
भविष्यन्ति भविष्येषु शाखाप्रणयनानि तु।
तस्मै तद् ब्रह्मणा ब्रह्म तपसा प्राप्तमव्ययं ॥ १०५ ॥
तपसा कर्म्म सम्प्राप्तं कर्म्मणा हि ततो यशः।
यशसा प्राप्य सत्यं हि सत्येनाप्तो हि चाव्ययः ॥ १०६ ॥
अव्ययादमृतं शुक्रममृतात् सर्व्वमेव हि।
ध्रुवमेकाक्षरमिदं स्वात्मन्येव व्यवस्थितं।
बृहत्त्वाद् बृंहणाच्चैव तद्ब्रह्मेत्यभिधीयते ॥ १०७ ॥
प्रणवावस्थितं भूयो भूर्भुवःस्वरिति स्मृतं।
ऋग्यजुःसामाथर्वरूपिणे ब्रह्मणे नमः ॥ १०८ ॥

जगतः प्रलयोत्पत्ती यत्तत्कारणसंज्ञितं ।
महतः परमं गुह्यं तस्मै सुब्रह्मणे नमः ॥ १०९ ॥
अगाधापरमच्यं जगत्सम्मोहनालयं ।
सप्रकाशप्रवृत्तिभ्यां पुरुषार्थप्रयोजनं ॥ ११० ॥
साङ्गाज्ञानवतां निष्ठा गतिः सङ्गदमात्मनः ।
यत्तदव्यक्तममृतं प्रकृतिब्रह्म शाश्वतं ॥ १११ ॥
प्रधानमात्मयोनिश्च गुह्यं सत्त्वञ्च शब्दते ।
अविभागस्तथा शुक्रमक्षरं बहुवाचकं ।
परमब्रह्मणे तस्मै नित्यमेव नमो नमः ॥ ११२ ॥
कृते पुनःक्रिया नास्ति कुत एवाकृतक्रिया ।
सकृदेव कृतं सर्व्वं यद्वै लोके कृताकृतं ॥ ११३ ॥
श्रोतव्यं वै श्रुतं वापि तथैवासाधुसाधुता ।
ज्ञातव्यञ्चाथ मन्तव्यं स्पृष्टव्यं भोज्यमेव च ।
द्रष्टव्यञ्चाथ श्रोतव्यं ज्ञातव्यं वाथ किञ्चन ॥ ११४ ॥
दर्शितं यदनेनैव ज्ञानं तद्वै सुरर्षिणां ।
यद्वै दर्शितवानेष कस्तदन्वेष्टुमर्हति ।
सर्वाणि सर्व्वान् सर्वाश्च भगवानेव सोऽब्रवीत् ॥ ११५ ॥
यदा यत्क्रियते येन तदा तत्सोऽभिमन्यते ।
येनेदं क्रियते पूर्व्वं तदन्येन विभावितं ॥ ११६ ॥
यदा तु क्रियते किञ्चित्केनचिद्वाङ्मयं क्वचित् ।
तेनैव तत्कृतं पूर्वं कर्त्तृणां प्रतिभाति वै ॥ ११७ ॥
विरक्तञ्चातिरिक्तञ्च ज्ञानाज्ञाने प्रियाप्रिये ।
धर्म्माधर्म्मौ सुखं दुःखं मृत्युश्चामृतमेव च ।



ऊर्द्ध्वन्तिर्य्यगधोभागस्तस्यैवाद्दष्टकारणं ॥ ११८ ॥
स्वायम्भुवोऽथ ज्येष्ठस्य ब्रह्मणः परमेष्ठिनः ।
प्रत्येकविद्यभवति त्रेतास्विह पुनः पुनः ॥ ११९ ॥
व्यस्यते ह्येकविद्यन्तद् द्वापरेषु पुनः पुनः ।
ब्रह्मा चैतदुवाचादौ तस्मिन्वैवस्वतेऽन्तरे ॥ १२० ॥
आवर्त्तमाना ऋषयो युगाख्यासु पुनः पुनः ।
कुर्व्वन्ति संहिता ह्येते जायमानाः परस्परं ॥ १२१ ॥
अष्टाशीतिसहस्राणि श्रुतर्षीणां स्मृतानि वै ।
ता एव संहिता ह्येते आवर्त्तन्ते पुनः पुनः ॥ १२२ ॥
श्रिता दक्षिणपन्थानं ये श्मशानानि भेजिरे ।
युगे युगे तु ताः शाखा व्यस्यन्ते तैः पुनः पुनः ॥ १२३ ॥
द्वापरेष्विह सर्वेषु संहिताश्च श्रुतर्षिभिः ।
तेषां गोत्रेष्विमाः शाखा भवन्तीह पुनः पुनः ।
ताः शाखास्तत्र कर्त्तारो भवन्तीह युगक्षयात् ॥ १२४ ॥
एवमेव तु विज्ञेयं व्यतीतानागतेष्विह ।
मन्वन्तरेषु सर्वेषु शाखाप्रणयनानि वै ॥ १२५ ॥
अतीतेषु अतीतानि वर्त्तन्ते साम्प्रतेषु च ।
भविष्याणि च यानि स्युर्वर्त्स्यन्तेऽनागतेष्वपि ॥ १२६ ॥
पूर्वेण पश्चिमं ज्ञेयं वर्त्तमानेन चोभयं ।
एतेन क्रमयोगेन मन्वन्तरविनिश्चयः ॥ १२७ ॥
एवं देवाश्च पितर ऋषयो मनवश्च ये ।
मन्वैः सहोर्द्ध्वङ्गच्छन्ति ह्यावर्त्तन्ते च तैः सह ॥ १२८ ॥
जनलोकात्सुराः सर्वे पशुकल्पात्पुनः पुनः ।

पर्यायकाले (१) सम्प्राप्ते सम्भूता नैव नश्यन्ति तु (२) ॥१२९॥
अवश्यम्भाविनार्थेन सम्बध्यन्ते तदा तु ते।
ततस्ते दोषवज्जन्म पश्यन्ते रागपूर्वकं ॥ १३० ॥
निवर्त्तते तदा वृत्तिस्तेषामादोषदर्शनात्।
एवं देवयुगानीह दश कृत्वा निवर्त्तते ॥ १३१ ॥
जनलोकात्तपोलोकं गच्छन्तीहानिवर्त्तनं।
एवं देवयुगानीह व्यतीतानि सहस्रशः ॥
निधनं ब्रह्मलोके वै गतानि मुनिभिस्सह ॥ १३२ ॥
न शक्यमानुपूर्व्येण तेषां वक्तुं सविस्तरान्।
अनादित्वाच्च कालस्य असंख्यानाच्च सर्व्वशः।
मन्वन्तराण्यतीतानि यानि कल्पैः पुरा सह।
पितृभिर्मुनिभिर्देवैः सार्द्धं सप्तर्षिभिश्च वै।
कालेन प्रतिसृष्टानां युगानाच्च निवर्तनं ॥ १३४ ॥
एतेन क्रमयोगेन कल्पमन्वन्तराणि तु।
सप्रजानि व्यतीतानि शतशोऽथ सहस्रशः ॥ १३५ ॥
मन्वन्तरान्ते संहारः संहारान्ते च सम्भवः।
देवतानामृषीणाच्च मनोः पितृगणस्य च ॥ १३६ ॥
न शक्यमानुपूर्व्येण वक्तुं वर्षशतैरपि।
विस्तरस्तु निसर्गस्य संहारस्य च सर्वशः।
मन्वन्तरस्य संख्या तु मानुषेण निबोधत ॥ १३७ ॥
देवतानामृषीणाच्च संख्यानार्थविशारदैः।

१ पर्य्यासकाले इति ङ०।
२ पाठोऽयं आदर्शसम्मतो मुद्रितः परन्त्वयं न समीचीनः।



त्रिंशत्कोट्यस्तु संपूर्णाः संख्याताः संख्यया द्विजैः ॥१३८॥
सप्तषष्टिस्तथान्यानि नियुतानि च संख्यया।
विंशतिश्च सहस्राणि कालोऽयं सोऽधिकान् विना ॥१३९॥
मन्वन्तरस्य संख्यैषा मानुषेण प्रकीर्तिता।
वत्सरेणैव दिव्येन प्रवक्ष्याम्यन्तरम्मनोः ॥ १४० ॥
अष्टौ शतसहस्राणि दिव्यया संख्यया स्मृतं।
द्विपञ्चाशत्तथान्यानि सहस्राण्यधिकानि तु ॥ १४१ ॥
चतुर्दशगुणो ह्येष काल आहृतसंप्लवः।
पूर्णं युगसहस्रं स्यात्तदहर्ब्रह्मणः स्मृतं ॥ १४२ ॥
तत्र सर्व्वाणि भूतानि दग्धान्यादित्यरश्मिभिः।
ब्रह्माणमग्रतः कृत्वा सह देवर्षिदानवैः।
प्रविशन्ति शुरश्रेष्ठं देवदेवं महेश्वरं ॥ १४३ ॥
स स्रष्टा सर्व्वभूतानि कल्पादिषु पुनः पुनः।
इत्येष स्थितिकालो वै मनोर्दैवर्षिभिः सह ॥ १४४ ॥
सर्व्वमन्वन्तराणां वै प्रतिसन्धिं निबोधत।
युगाख्या या समुद्दिष्टा प्रागेवास्मिन् मया तव ॥ १४५ ॥
कृतत्रेतादिसंयुक्तं चतुर्युगमिति स्मृतं।
तदेकसप्ततिगुणं परिवृत्तन्तु साधिकं।
मनोरेकमधोकारं प्रोवाच भगवान् प्रभुः ॥१४६॥
एवं मन्वन्तराणान्तु सर्वेषामेव लक्षणं।
अतीतानागतानां वै वर्त्तमानेन कीर्त्तितं ॥ १४७ ॥
इत्येष कीर्त्तितः सर्गो मनोः स्वायम्भुवस्य ह।
प्रतिसन्धिन्तु वक्ष्यामि तस्य वै चापरस्य तु ॥ १४८ ॥

मन्वन्तरं यथा पूर्वमृषिभिर्दैवतैः सह।
अवश्यभाविनार्थेन यथा तद्वै निवर्त्तते ॥ १४८ ॥
अस्मिन् मन्वन्तरे पूर्वं त्रैलोक्यस्येश्वरास्तु ये।
सप्तर्षयश्च देवास्ते पितरो मनवस्तथा।
मन्वन्तरस्य काले तु सम्पूर्णे साधकास्तथा ॥ १५० ॥
क्षीणाधिकाराः संवृत्ता बुद्ध्वा पर्य्यायमात्मनः।
महर्लोकाय ते सर्वे उन्मुखा दधिरे गतिं ॥ १५१ ॥
ततो मन्वन्तरे तस्मिन् प्रक्षीणा देवतास्तु ताः।
सम्पूर्णे स्थितिकाले तु तिष्ठन्त्येकं कृतं युगं ॥ १५२ ॥
उत्पद्यन्ते भविष्याश्च यावन्मन्वन्तरेश्वराः।
देवताः पितरश्चैव ऋषयो मनुरेव च ॥ १५३ ॥
मन्वन्तरे तु सम्पूर्णे यद्यन्यद् वै कलौ युगे।
सम्पद्यते कृतं तेषु कलिशिष्टेषु वै तदा ॥ १५४ ॥
यथा कृतस्य सन्तानः कलिपूर्वः स्मृतो बुधैः।
तथा मन्वन्तरान्तेषु आदिर्मन्वन्तरस्य च ॥ १५५ ॥
क्षीणे मन्वन्तरे पूर्वं प्रवृत्ते चापरे पुनः।
सुखे कृतयुगस्याथ तेषां शिष्टास्तु ये तदा ॥ १५६ ॥
सप्तर्षयो मनुश्चैव कालावेक्षास्तु ये स्थिताः।
मन्वन्तरं प्रतीक्षन्ते क्षीयन्ते तपसि स्थिताः ॥ १५७ ॥
मन्वन्तरव्यवस्थार्थं सन्तत्यर्थञ्च सर्व्वगः।
पूर्ववत् सम्प्रवर्त्तन्ते प्रवृत्ते वृष्टिसर्ज्जने ॥ १५८ ॥
हृष्टेषु सम्प्रवृत्तेषु उत्पन्नास्वोषधीषु च।
प्रजासु च निकेतासु संस्थितासु क्वचित् क्वचित् ॥१५९॥



वार्त्तायान्तु प्रवृत्तायां सद्धर्मे ऋषिभाविते।
निरानन्दे गते लोके नष्टे स्थावरजङ्गमे ॥ १६० ॥
अग्रामनगरे चैव वर्णाश्रमविवर्जिते।
पूर्वमन्वन्तरे शिष्टे ये भवन्तीह धार्म्मिकाः।
सप्तर्षयो मनुश्चैव सन्तानार्थं व्यवस्थिताः ॥ १६१ ॥
प्रजार्थं तपतान्तेषां तपः परमदुश्चरं।
उत्पद्यन्तीह सर्वेषां निधनेष्विह सर्वगः ॥ १६२ ॥
देवासुराः पितृगणा मुनयो मनवस्तथा।
सर्पा भूताः पिशाचाश्च गन्धर्व्वा यक्षराक्षसाः ॥ १६३ ॥
ततस्तेषान्तु ये शिष्टाः शिष्टाचारान्प्रचक्षते।
सप्तर्षयो मनुश्चैव आदौ मन्वन्तरस्य ह।
प्रारभन्ते च कर्म्माणि मनुष्या दैवतैः सह ॥ १६४ ॥
मन्वन्तरादौ प्रागेव क्षेतायुगमुखे ततः।
पूर्वं देवास्ततस्ते वै स्थिते धर्म्मे तु सर्व्वगः ॥ १६५ ॥
ऋषीणां ब्रह्मचर्य्येण गत्वाऽनृण्यन्तु वै ततः।
पितॄणां प्रजया चैव देवानामिज्यया तथा ॥ १६६ ॥
शतं वर्षसहस्राणि धर्म्मे वर्णात्मके स्थिताः।
त्रयीं वार्त्तां दण्डनीतिं धर्म्मान् वर्णाश्रमांस्तथा।
स्थापयित्वाश्रमांश्चैव स्वर्गाय दधिरे मतीः ॥ १६७ ॥
पूर्वं देवेषु तेष्वेव स्वर्गाय प्रमुखेषु च।
पूर्वं देवास्ततस्ते वै स्थिता धर्मेण कृत्स्नशः ॥ १६८ ॥
मन्वन्तरे पराक्रान्ते स्थानान्युत्सृज्य सर्व्वगः।
मन्वैः सहोर्द्धमुच्छ्रन्ति महर्लोकमनामयं ॥ १६९ ॥

विनिवृत्तविकारास्ते मानसीं सिद्धिमास्थिताः।
अवेक्षमाणा वह्निमस्तिष्ठन्त्याभूतसंप्लवं ॥ १७० ॥
ततस्तेषु व्यतीतेषु सर्व्वेष्वेतेषु सर्वदा।
शून्येषु देवस्थानेषु त्रैलोक्ये तेषु सर्वशः।
उपस्थिता इहैवान्ये देवा ये स्वर्गवासिनः ॥ १७१ ॥
ततस्ते तपसा युक्ता स्थानान्यापूरयन्ति वै।
सत्येन ब्रह्मचर्य्येण श्रुतेन च समन्विताः ॥ १७२ ॥
सप्तर्षीणां मनोश्चैव देवानां पितृभिः सह।
निधनानीह पूर्व्वेषामादिना च भविष्यता ॥ १७३ ॥
तेषामत्यन्तविच्छेद इह मन्वन्तरक्षयात्।
एवं पूर्वानुपूर्व्वेण स्थितिरेषाऽनवस्थिता।
मन्वन्तरेषु सर्वेषु यावदाभूतसंप्लवं ॥ १७४ ॥
एवं मन्वन्तराणान्तु प्रतिसन्धानलक्षणं।
अतीतानागतानान्तु प्रोक्तं स्वायम्भुवेन तु ॥ १७५ ॥
मन्वन्तरेष्वतीतेषु भविष्याणान्तु साधनं।
एवमत्यन्तविच्छिन्नं भवत्याभूतसंप्लवात् ॥ १७६ ॥

मन्वन्तराणां परिवर्त्तनानि
एकान्ततस्तानि महर्गतानि।
महर्जनश्चैव जनन्तपश्च
एकान्तगानि स्म भवन्ति सत्ये ॥ १७७ ॥
तद्भाविनां तत्र तु दर्शनेन
नानात्वदृष्टेन च प्रत्ययेन।
सत्ये स्थितानीह तदा तु तानि



प्राप्ते विकारे प्रतिसर्गकाले ॥ १७८ ॥
मन्वन्तराणां परिवर्त्तनानि
मुञ्चन्ति सत्यन्तु ततोऽपरान्ते।
ततोऽभियोगाद्विषमप्रमाणं
विशन्ति नारायणमेव देवं ॥ १७९ ॥
मन्वन्तराणां परिवर्त्तनेषु
चिरप्रवृत्तेषु विधिस्वभावात्।
क्षणं रसं तिष्ठति जीवलोकः
क्षयोदयाभ्यां परिवन्द्यमानः ॥ १८० ॥
इत्युत्तराणेवमृषिस्तुतानां
धर्म्मात्मनां दिव्यदृशां मनूनां।
वायुप्रणीतान्युपलभ्य दृश्यं
दिव्यौजसा व्याससमासयोगैः ॥ १८१ ॥
सर्व्वाणि राजर्षिसुरर्षिमन्ति
ब्रह्मर्षिदेवोरगवन्ति चैव।
सुरेशसप्तर्षिपितृप्रजेशै-
र्युक्तानि सम्यक् परिवर्त्तनानि ॥ १८२ ॥
उदारवंशाभिजनद्युतीनां
प्रकृष्टमेधाभिममेधितानां।
कीर्तिद्युतिख्यातिभिरन्वितानां
पुण्यं हि विख्यापनमीश्वराणां ॥ १८३ ॥
स्वर्गीयमेतत् परमं पवित्रं
पुत्रीयमेतच्च परं रहस्यं।

जप्यं महत्सर्वसु चैतदग्र्यं
दुःस्वप्नशान्तिः परमायुषेयं ॥ १८४ ॥
प्रजेशदेवर्षिमनुप्रधानां
पुण्यप्रसूतिं प्रथितामजस्य ।
ममापि विख्यापनसंयमाय
सिद्धिं जुषध्वं सुमहेशतत्त्वं ॥ १८५ ॥
इत्येतदन्तरं प्रोक्तं मनोः स्वायम्भुवस्य तु ।
विस्तरेणानुपूर्व्या च भूयः किं वर्णयाम्यहं ॥१८६ ॥

इति श्रीमहापुराणे वायुप्रोक्ते प्रजापतिवंशानुकीर्त्तनं नामैकषष्ट्यध्यायः ।

समाप्तम् प्रथमखण्डं ।

---


LIST OF BOOKS FOR SALE
AT THE LIBRARY OF THE
ASIATIC SOCIETY OF BENGAL,
*No. 57, Park Street, Calcutta,*
AND OBTAINABLE FROM
HE SOCIETY'S LONDON AGENTS, MESSRS. TRUBNER & Co.,
57 AND 59, LUDGATE HILL, LONDON, E. C.

BIBLIOTHECA INDICA.

*Sanskrit Series.*

| | | | | | |
|---|---|---|---|---|---|
| anya-chandrodaya, Nátaka, 3 fasci. | .. | ... | Rs. | 1 | 14 |
| a Sútra, A'śvaláyana, 11 fasci. ... | .. | ... | ... | 6 | 14 |
| ——— Látyáyana, 9 fasci. .. | .. | ... | ... | 5 | 10 |
| ara Vijaya, 3 fasci. .. ... | ... | .. | ... | 1 | 14 |
| rúpa, 3 fasci. .. .. ... | .. | ... | ... | 1 | 14 |
| hitaki Bráhmanopanishad, 2 fasci. | ... | .. | ... | 1 | 4 |
| hya-sára, 1 fasci. ... .. | ... | ... | ... | 0 | 10 |
| -vistara, 6 fasci. ... .. | .. | .. | ... | 3 | 12 |
| iya Bráhmaṇa, 24 fasci. | ... | ... | .. | 15 | 0 |
| iya Sañhitá, 31 fasci. ... | ... | ... | ... | 19 | 6 |
| iya A'raṇyaka, 11 fasci. | ... | .. | ... | 6 | 14 |
| Upanishad, 3 fasci. ... | ... | ... | ... | 1 | 14 |
| iyana Grihya Sútra, 4 fasci. | ... | ... | .. | 2 | 8 |
| isá Darsana, 14 fasci. .. | .. | ... | ... | 8 | 12 |
| ya Bráhmaṇa, 19 fasci. ... | .. | ... | ... | 11 | 14 |
| ha Bráhmaṇa, 2 fasci. ... | .. | ... | ... | 1 | 4 |
| vaṇa Upanishads, 5 fasci. | .. | ... | ... | 3 | 2 |
| Puráṇa, 14 fasci. ... | .. | ... | .. | 8 | 12 |
| Veda Sañhitá, 37 fasci. | ... | .. | .. | 23 | 2 |
| a Tápaní, 1 fasci. .. | ... | ... | .. | 0 | 10 |
| iha Tápaní, 3 fasci. ... | ... | .. | .. | 1 | 14 |
| rvarga Chintámaṇi, 35 fasci. | ... | ... | ... | 21 | 14 |
| liya Grihya Sútra, 10 fasci. | ... | .. | .. | 6 | 4 |
| la Chhandah Sútra, 3 fasci. | .. | ... | ... | 1 | 14 |
| iya Prátiśákhya, 3 fasci. | .. | ... | ... | 1 | 14 |
| ráj Rásu, by Chand Bardai, 4 fasci. | | ... | ... | 2 | 8 |
| rangini, ... ... | .. | ... | ... | 4 | 4 |
| hárata, vols. III. and IV., | ... | ... | .. | 40 | 0 |
| a Sangraha ... ... | ... | ... | .. | 1 | 0 |
| rammar, 2 fasci. .. | ... | ... | ... | 1 | 4 |
| ya A'raṇyaka of the Rig Veda, 5 fasci. | | ... | ... | 3 | 2 |
| dogya Upanishad, English, 2 fasci. | | ... | ... | 1 | 4 |
| ya Aphorisms, English, 2 fasci. ... | | .. | ... | 1 | 4 |
| a Darpaṇa, English, 4 fasci. .. | | .. | ... | 2 | 8 |
| a Sútra, English, .. .. | | ... | ... | 1 | 0 |
| tra, 6 fasci. .. ... ... | | ... | ... | 6 | 0 |
| adakíya Nítisára, 4 fasci. (Fasc. 1, out of stock.) | | ... | ... | 2 | 8 |
| ati, 7 fasci. ... ... ... | | .. | .. | 4 | 6 |
| isms of S'aṇḍalya, English, 1 fasci. | | ... | .. | 0 | 10 |
| Puráṇa, 5 fasci. ... .. | | ... | ... | 3 | 2 |